NO. 14.]

THE

VIZIANAGRAM SANSKRIT SERIES

UNDER THE SUPERINTENDENCE OF

ARTHUR VENIS M. A. Oxon.

PRINCIPAL, SANSKRIT COLLEGE, BENARES.

THE

VEDÂNTAKALPATARUPARIMALA

OF

APPAYADÎKSHITA

EDITED BY

RÂMAS'ÂSTRÎ TAILAṄGA

PROFESSOR, SANSKRIT COLLEGE, BENARES.

VOL. XII.

Part III.

PRINTED, PUBLISHED AND SOLD BY

E. J. LAZARUS & Co., BENARES.

MAY BE HAD ALSO FROM GANESH DAS AND CO., CHOWK, BENARES:
JAYESTHARAM MUKUNDJI AND CO., BOMBAY:
OTTO HARRASSOWITZ AND M. SPIRGATIS, LEIPZIG:
LUZAC AND CO., LONDON.

1898.

वेदान्तकल्पतरुपरिमलः ।

भगवदमलानन्दयतीन्द्रविरचितवेदान्तकल्पतरुव्याख्यारूपः
अद्वैतविद्याचार्यसकलतन्त्रनिबन्धकृच्छ्रीमदप्पयदीक्षित-
विरचितः ।

तत्र तृतीयो भागः तृतीयाध्यायमारभ्य चतुर्थाध्यायपर्यन्तः ।

वाराणसेयराजकीयप्रधानसंस्कृतपाठशालायां साहित्यशास्त्राध्यापकेन
मानवल्ल्युपाह्वतैलङ्गरामशास्त्रिणा सपरिष्कारं संशोधितः ।

काश्याम् ।

मेडिकल् हाल् नाम्नि यन्त्रालये
ई· जे· लाजरस् कम्पन्याख्येन मुद्रयित्वा प्रकाशितः ।

वैक्रमसंवत् १९५४ ।

श्रीः ।

विज्ञापनम् ।

अहो सुदिनाहमद्य यदितो वत्सरत्रयात् पूर्वं वेदान्तकल्पतरुनामकेन भामतीव्याख्यानेन सह समारभ्यास्य तद्व्याख्यानरत्नस्य परिमलस्य मुद्रणकार्यमविच्छेदेनानुवर्तितनिजकार्योऽपि महत्तरयोरनयोर्ग्रन्थयोः समाप्तिविषये नानाविधप्रत्यूहसंदोहशङ्कातङ्कितचित्तः कथं कथमपि धृतधैर्यो ऽस्खलन् स्वकर्तव्यात्क्रमशो विदुषां दृग्गोचरतामुपनीय संपूर्णं कल्पतरुमस्मिन्नेव वत्सरे, द्वितीयाध्यायान्तं परिमलग्रन्थं च खण्डद्वयेन १९५२ वैक्रमवत्सरे, प्रभवामि किल साम्प्रतं परिमलस्य ग्रन्थसंपूर्तिभूषितं तृतीयं खण्डमपि तथा कर्तुम्, स्मरामि चानन्दपरवशः 'एति जीवन्तमानन्दो नरं वर्षशतादपी'ति वाल्मीकीयां लौकिकीं गाथाम् ।

अत्रापि भागे पूर्वयोरिवाऽधिकरणसूचीं, शुद्धिपत्रं, कल्पतरुपृष्ठपङ्क्त्यङ्कांश्च पार्श्वे, निवेश्यावशिष्टानपि विषयांस्तथैव प्रदर्शितवानस्मि ।

मन्ये तावदधुना निजकर्तव्यमेकमेव यन्निखिलान्तरायदूरीकरणपुरस्सरं करुणया वितीर्य हस्तावलम्बं पूरितवतो निजमनोरथं भगवतो निखिलान्तर्यामिणो विश्वेशितुः प्रमुक्तकण्ठं धन्यवादोपगानं नाम ।

उपसंहारे चात्र कार्ये पुस्तकवितरणादिना दत्तसाहाय्यानां महाशयानामुपकारं श्लाघं श्लाघं प्रार्थये निर्मत्सरान्निखिलान् विपश्चिदपश्चिमानत्र यथावसरं नयनार्पणपरिश्रमाङ्गीकारेण मामकप्रयाससफलीकरणायेति । शम् ।

वाराणस्याम् संवत् १९५४ ।	मानवल्ल्युपाह्वस्तैलङ्ग- रामशास्त्री ।

तृतीयाध्यायप्रथमपादादिचतुर्थाध्यायान्तभागाधिकरणसूची ।

तृतीयाध्यायस्य प्रथमपादे ।

तृतीयाध्यायस्य द्वितीयपादे ।

तृतीयाध्यायस्य तृतीयपादे ।

तृतीयाध्यायस्य चतुर्थपादे ।

इति ।

शुद्धिपत्रम् ।

पृ० । पं०	अशुद्धम् ।	शुद्धम् ।
४८६ । ११	आनन्दादय	आनन्दादयः
४६५ । १९	रंहणास्या-	रंहणास्या-
५०४ । ६	हंसोप-	हिंसोप-
५०७ । ११	द्वेत-	द्वैत-
५२३ । ५	पत्ताति	पत्तति
५३६ । २	काकु-	काक्र-
५४१ । २१	संहारण-	संहरण-
५४८ । २५	निमितं	निमित्तं
५४९ । १७	सामर्था-	सामर्थ्या-
५५२ । २४	दर्शर्शिता-	दर्शिता
५५४ । १५	त्व देरा-	त्वादेरा-
५५५ । ७	विद्धि-	विद्धि
५५९ । ६	व्यवहारजनजननेन	व्यवहारजननेन
५६१ । १	यवाग्वा वा	यवाग्वा
५६१ । १८	विद्यक्य-	विद्यैक्य-
५६३ । ५	तदीप	तदपि
५६३ । १५	इत्य स	इत्यस
५६७ । १०	र्प्या शि-	र्प्यविशि-
५६९ । ६	व्याख्यान-	व्याख्यानं
५६९ । १५	प्रकरणा।दि-	प्रकरणादि-
५७१ । ६	प्रसिद्धम् । बृ-	प्रसिद्धं बृ-
५७३ । २३	ङ्गत्वन	ङ्गत्वेन
५७४ । ७	प्रवृत्त-	प्रवृत्ते-
५७७ । २४	परिहार्थ-	परिहारार्थ-
५७९ । १	वमक-	वर्मक-
५८० । ११	पत्तके टि-	पत्तकोटि-
५८० । १२	वान्वती-	वान्वेती-
५८५ । १९	पूर्वन्त्र-	पूर्वतन्त्र-
५८८ । १३	करणासि-	करणसि-
५९० । १४	रिमेति ।	रिमेति
५९८ । १३	दयइति	दय इति
६०४ । २५	र्वज्जयित्वा	र्वर्जयित्वा
६०६ । १९	मा -वि-	मात्रं वि-
६०९ । १७	त मा-	तस्मा-
६१० । १	ताद्रुष	ताद्रूष-
६१० । २५	चास्ति	वास्ति
६१८ । ५	ष चात्मे-	ष आत्मे-
६१९ । १३	यथाकामं	यथाकामं
६१९ । १५	विध्यत्ते-	विध्यात्ते-
६१९ । १७	निमित्तेच्छया	निमित्ते च्छाया
६१९ । १७	त्यद्यते	त्यद्येते
६२९ । २०	प्रतित्तप्तम्	प्रतिक्षिप्तम्
६३५ । ६	धारणे	धारिणे
६३८ । २७	यान	यानि
६३८ । २७	च्चैनीचैः	च्चैर्नीचैः
६४३ । २१	श्वे तकेतु-	श्वेतकेतु-
६४९ । १८	तत्सबन्धा-	तत्संबन्धा-
६५१ । २१	चेतर्हि	चेत्तर्हि
६५९ । ८	दशयति	दर्शयति
६५९ । २२	लैकिका-	लौकिका-
६५९ । २६	करणैनैव	करणेनैव
६६६ । ३	ायतुं	यितुं
६७० । १२	समथा	समर्था
६७२ । १६	सामर्थ्यात् । ल-	सामर्थ्याल्ल-
६७८ । २	मैादते	मोदते
६७९ । ७	भावादति	भावादिति
६८० । १९	प्रमाणामेवेति	प्रमाणमेवेति
६८७ । १६	प्रोक्षणाघारा-	प्रोक्षणाद्यारा-
६९१ । ९	समस्तस्याति	समस्तस्येति
६९२ । १७	ज्जोविकत्व-	ज्जोवकत्व-

टि० ६१६, ६५२ पृष्ठयोरसकृत् तृवदिति सर्वपुस्तकानुरोधात् स्थापितं तत्र त्रिवृदिति शुद्धं स्यादिति प्रतिभाति ।

क्क विन्मुद्रणे ऽस्फुटान्यक्षराणि न शुद्धिपत्रे विन्यस्तानि सुखाह्येयत्वादिति बोध्यम् ।

प्रान्ताङ्कशुद्धिपत्रम् ।

पङ्क्तौ	अशुद्धाः अङ्काः ।	शुद्धाः अङ्काः ।	पङ्क्तौ ।	पृष्ठे	पङ्क्तौ	अशुद्धाः अङ्काः ।	शुद्धाः अङ्काः ।	पङ्क्तौ ।	पृष्ठे
१५	३७० । १२	३७० । १२	१४	५१९		४७९ । २१	,, । २१	१८	६२२
	३९६ । १	३६६ । १	२२	५३३	२४	,, । २८	,, । २८	२३	६४९
	३९८ । २०	३९८ । १	८	५३८		५९४ । ११	५९५ । ११	५	६५५
	४१२ । २	४१२ । १	१	५६२		५०२ । ५	५०२ । २५	२	६६८
	४३६ । २७	४३६ । २६	१७	५८७		५०४ । ८	५०४ । १८	१०	६७३
	४५९ । ७	४५९ । ६	४	६०३		,, । १३	,, । २१	२६	६०३

वेदान्तकल्पतरुपरिमले

तृतीयो ऽध्यायः ।

तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः ३४१ । ८
प्रश्ननिरूपणाभ्याम् ॥ १ ॥

अविरोधेनेति । द्वितीयाध्यायकृतेन स्मृतिन्यायश्रुतिविरोधसमाधा-
नेन वेदान्तवेद्यं ब्रह्मेत्यस्मिन्नर्थे प्रतिष्ठिते तस्य ब्रह्मणः प्राप्तौ वेदान्तोत्थं
ज्ञानं साधनमिति तत्सोपायमस्मिन्नध्याये चिन्त्यतइत्यर्थः । सोपायसाध-
ननिरूपणमध्यायार्थः । तच्च वेदान्तमूलकं ब्रह्मज्ञानं ब्रह्मप्राप्तिसाधनमित्ये-
तत्पुरुषार्थाधिकरणे* निरूपितं तच्च जीवाभिन्नब्रह्मविषयमित्यात्मेति तूपग-
च्छन्ती†त्यधिकरणे तत्त्वमसिवाक्यार्थगोचरस्यास्य ज्ञानस्य तत्त्वंपदार्थज्ञान-
पूर्वकत्वाद् द्वितीयपादे न स्थानतो ऽपी‡त्यतः प्राक् त्वंपदार्थः शोधितः ।
ततः प्रभृति तत्पदार्थः शोधितः । शोधितस्य तत्पदार्थस्य तथात्वेन
वेदान्तैः सिद्ध्यर्थे तस्मिन्नुपसंहरणीया विधिनिषेधरूपा धर्मा आनन्दादय§
अक्षरधिया||मित्यधिकरणयोर्दर्शिताः । प्रथमपादे वैराग्यरूपं द्वितीयपादान्त्या-
धिकरणे परमेश्वरप्रसादरूपं तृतीयपादे सगुणविषयाधिकरणेषु सगुणविद्या-
परिशीलनरूपं चतुर्थपादे कर्मतत्संन्यासशमदमादिरूपं च तदुपायजातं
निरूपितमिति विवेकः । **पादसंगतिरिति ।** जीवोपकरणप्राणादिस्वरूपनि-
रूपणार्थेन पूर्वपादेन सोपकरणजीवगतागतनिरूपणार्थस्यास्य पादस्य संग-
तिरित्यर्थः । **भूतपरिष्वङ्ग इति ।** इदं चिन्ताप्रयोजनं भूतगमनाभावे
तदाश्रयाणां प्राणानां गत्यसंभवं सूचयता प्राणगतेश्चे¶ति सूत्रेण दर्शितम् ।
यदि शरीरोत्पत्त्यवस्थामित्येतदनन्तरम् आहुतिजामनाहुतिमिति द्विविधः
पाठः । द्विविधो ऽप्युपपन्नः । अग्निहोत्राहुतिप्रभवत्वाद् वस्तुत आहुतित्वा-
भावाच्च । **अधिदैवं यजमानप्राणा इत्यन्वय इति ।** अग्न्यादयो ह्याधि- ३४२ । ९
दैविकयजमानप्राणाः वागादयस्त्वाध्यात्मिकयजमानप्राणाः । अत आध्या-

---

* व्या॰ सू॰ अ॰ ३ पा॰ ४ सू॰ १ ।
† व्या॰ सू॰ अ॰ ४ पा॰ १ सू॰ ३ ।
‡ व्या॰ सू॰ अ॰ ३ पा २ सू॰ ११ ।
§ व्या॰ सू॰ अ॰ ३ पा॰ ३ सू॰ ११ ।
|| व्या॰ सू॰ अ॰ ३ पा॰ ३ सू॰ ३३ ।
¶ व्या॰ सू॰ अ॰ ३ पा॰ १ सू॰ ३ ।

त्मिकप्राणव्यावर्तकत्वेनाधिदैवमित्येतत्प्राणविशेषणमिति भावः । तथापीत्यादिग्रन्थोक्तादर्थात् तथा हीत्यादिग्रन्थेनोच्यमानस्यार्थस्य नास्ति विशेषः उभयत्रापीष्टादिकारिणां जीवस्य च संबन्धमात्रप्रतिपादनाद् अतः पुनरु-
३४२ । २४ क्तिरित्याशङ्क्य विशेषमाह **श्रद्धां जुह्वतीत्यत्रेति ।** पूर्वं श्रद्धां जुह्वतीति पञ्चाग्निविद्यावाक्ये श्रद्धाशब्दलक्षितास्त्रिवृत्कृता आप एव होम्यत्वेनोक्ताः न तासामिष्टादिकारिभिः संबन्ध उक्त इति शङ्का वारिता इदानीमेव सोमो राजेति दक्षिणमार्गवाक्ये इष्टादिकर्तॄणां सोमराजभावमात्रमुक्तं न तेषामद्भिः परिष्वङ्ग उक्त इति शङ्का वार्यतइत्यर्थः । श्रुतिद्वये ऽपि परस्परार्थविशेषणद्वये सोमराजश्रुतिस्वर्गस्थानयोरैक्यमेव हेतुः श्रद्धाहुतिः प्रथमा कथं द्वितीयोक्तेत्याशङ्क्याह **अन्त्याहुत्यपेक्षयेति ।** यजमानशरीरस्य वैतानिकाग्नावाहुतिरन्त्याहुतिः । सा ऽपि छान्दोग्ये दर्शिता तं प्रेतं दिष्टमितो ऽग्नय एव हरन्तीति । बृहदारण्यके तु स्पष्टमुक्ता तस्याग्निरेवाग्निः समिदेव समिदित्यादिना । तदपेक्षया श्रद्धाहुतिर्द्वितीयेत्यर्थः । चन्द्रभूयं गतश्चन्द्रलोकं गत इत्यनयोर्व्याख्यानव्याख्येयभावशङ्कां निराकुर्वन् तयोरन्वयं दर्शयति **चन्द्रलोकं प्राप्त इति । न द्वितीय इत्याहेति ।** अविद्योपाधेर्व्यापकत्वे ऽपि पूर्वदेहत्यागहेतुरन्तःकरणाद्युपाधिः परिच्छिन्न इति भावः । **द्व्यणुकादेरपीति ।** तथा चोदाहृततर्कानुमानानामाभाससमानयोगक्षेमतया न साधकतेत्यर्थः । **उच्छिद्येत चेति ।** अश्वजातीयं गोजातीयेन विरुद्धं तादात्म्यायोग्यमिति या तज्जातीयानां परस्परविरोधप्रसिद्धिः सोच्छिद्येतेत्यर्थः । तथा सति दोषमाह **तथा चेति ।**

३४४ । २५ **उक्तरीत्योरेकामात्रादिभ्यः परिच्छिद्य प्रवृत्त्युपपत्तेरिति ।** एवमनङ्गीकारे च भूतत्वमूर्तत्वोपाध्योः समावेशाङ्गीकारादन्यत्राप्युपाधिसमावेशशङ्कया क्व चिदाप्तवाक्याद्यवगतेर्नित्यत्वादिभिरनित्यत्वाद्यभावानुमानं न सिध्येदिति भावः । ननु गोत्वाश्वत्वाद्यनन्तविरुद्धजातीनां परस्परा ऽसामानाधिकरण्यमनुभूयते । तत्र च परस्परात्यन्ताभावसमानाधिकरणजातित्वमवच्छेदकं न तु गोत्वाश्वत्वादिरूपत्वमननुगमादिति परस्परपरिहारिण्योर्जात्योरसमावेशसिद्धिः । न चैवमवच्छेदके गौरवाज्जातित्वं न प्रवेशनीयमित्युपाधिसङ्करस्यापि त्यागापत्तिः । तथा सति घटान्यत्वप-

टान्यत्वयोः घटपटयोरेव परस्परपरिहारिणोरन्यथाप्यसमावेशः स्यादिति कुड्यादीनां घटाद्यात्मकतापत्त्या उपाधिसङ्करस्य परिहर्तुमशक्यत्वेन जातिविशेषणगौरवस्य प्रामाणिकत्वादिति चेन्मैवम् । किंचिद्धर्मक्रोडीकारेणानन्तव्यक्तिषु प्रवृत्त्यादिव्यवहारार्थं ग्राह्यस्य कार्यत्वकारणत्वव्याप्यत्वव्यापकत्वशक्यत्वादेरिवासामानाधिकरण्यस्यावच्छेदकापेक्षत्वाभावात् । अनुगतावच्छेदकाभावे ऽप्युपाध्यसामानाधिकरण्यवज्जात्यसामानाधिकरण्यस्याप्यात्मलाभोपपत्तेः । किं च जातीनामसामानाधिकरण्यमात्रं नावद्यम् । सर्वासामपि जातीनां यत्किंचित्समानाधिकरणत्वेन क्व चिदपि जातौ सामानाधिकरण्यसामान्याभावाभावात् । परस्परासामानाधिकरण्यं तु परस्परशब्दार्थाननुगमादननुगतम् । एवमवच्छेदकमपि परस्परात्यन्ताभावसमानाधिकरणत्वं तत एवाननुगतम् । तस्मात्परस्परशब्दार्थानुसारेण गोत्वाश्वत्वादिषु* पृथक् तेन तेन रूपेणासमावेशो ग्राह्य इति पृथिवीत्वादिसंकरे न का चिदनुपपत्तिः । किं च सर्वत्र जातिसंकरस्य प्रत्याख्याने मृन्मयहिरण्मयादिघटेषु घटत्वजातेर्देवदत्तीययज्ञदत्तीयतारमन्दगकारादिषु देवदत्तीयत्वादिजातीनां कथमभ्युपगमः । यदि पृथिवीत्वादिव्याप्यं घटत्वं नाना गत्वादिव्याप्यानि च देवदत्तीयत्वादीनि नानेति तासु संकरपरिहारः तर्हीहापि भूगोलके समुद्रादिषु शरीरेषु च पृथिवीत्वजलत्वादिकं नानेति तत्परिहारो ऽस्तु ।

परस्परपरिहारित्वादिति । परस्परपरिहारिजातित्वादित्यर्थः । **३४४** । २७
गुणत्वरूपत्वयोरनैकान्तिकता गोत्वाश्वत्वविवक्षापक्षे अविशेषपक्षे च समाना । तत्राद्यपक्षे तयोरनैकान्तिकतां विवृणोति **गोत्वाश्वत्वे त्यजतोरिति** । द्वितीयपक्षे तां विवृणोति **यत्किं चिदिति** । **प्रसिद्धिसामर्थ्यादिति** । पञ्चभूतकार्यदर्शनं प्रसिद्धिः । **एतज्जनकत्वे सतीति** । पक्षीकृतदेवदत्तशरीरजनकत्वसमानाधिकरणानि यान्यनुदकत्वाऽतेजस्त्वावायुत्वानाकाशत्वानि तेषामत्यन्ताभाववद् यद्भूतं तत्समवायिकारणकमित्यर्थः । पृथिवीमात्रसमवायिकारणकत्वेन पराभिमते दृष्टान्ते समवायिकारणं यद्भूतं पृथिवी तस्य पक्षजनकत्वविशिष्टानुदकत्वात्यन्ताभाववत्त्वं पक्षजनकत्वरूपविशेषणाभावादित्याह **यद्यपीति** । पक्षे समवायिकारणानि यानि भूतानि तेषामुक्तरूपवि-

* अश्वत्वादिष्विति २ पु॰ पा॰ ।

शिष्टाभाववत्त्वं विशेष्याभावात्सिध्यतीत्युदकादिभूतसमवायिकारणकत्वसिद्धि-
रित्याह **एतज्जनकत्वे सतीति**। न चानुदकत्वाद्यभावचतुष्टयवदुदकादिच-
तूरूपम् एकं भूतं नास्तीति साध्यस्य पक्षे बाधः शङ्कनीयः। एतज्जनकत्वविशि-
ष्टानुदकत्वात्यन्ताभाववद्भूतसमवायिकारणकमित्येवमादिरूपाणां चतुर्णामनुमा-
नानां तेन साध्यनिर्देशेन सूचनादनुमानचतुष्टयेन शरीरस्य पाञ्चभौतिकत्वसि-
द्ध्युपपत्तेः। यद्वा त्र्यात्मकत्वात्तु भूयस्त्वा*दिति सूत्रे शरीरकारणानां त्र्यात्मक-
त्वमुक्तं तत्पञ्चात्मकत्वस्योपलक्षणमिति शरीरकारणेषु भूतेषु प्रत्येकमुदकादि-
चतूरूपत्वसिद्धावपि न बाधः। **गतिस्त्वाश्रयस्यैवेति**। यदि जीवद्देहे गति-
राश्रयस्यैव न प्राणानां तदा मृतावपि प्राणानां गतिर्नाभ्युपगन्तव्येति न तदाश्र-
यभूतपरिष्वङ्गसिद्धिरिति शङ्कितुर्हृदयम्। एतच्छङ्कापरिहारार्थं जीवद्दशाया-
माश्रये गच्छति प्राणानां गतिं साधयति **न चेत् प्राणा गच्छन्तीति**।

नतु पञ्चम्यामाहुतावित्यादिटीकाग्रन्थो न युक्तः। प्रथमाहुताव-
नपां होतव्यत्वेऽपि पञ्चमाहुतेरब्द्रव्यकत्वमाचेणापां पुरुषवचस्त्वप्रका-
रप्रश्नोपपत्तेरित्याशङ्क्य पञ्चस्वप्याहुतिष्वपामेव होतव्यत्वं शास्त्रान्तरान्नि-
र्ज्ञातं तदुपजीव्य प्रथमाहुतावनपां होतव्यत्वाभिधानस्यासंबद्धत्वमुक्तमित्यु-
३४६ । ९ पपादयति **पञ्चम्यामाहुतावपां पुरुषशब्दवाच्यत्वं यथा भवतीत्या-
दिना**। ननु शास्त्रान्तरमनपेक्ष्य प्रश्नोत्तरसंदर्भपर्यालोचनयैव पञ्चस्वप्याहुतिषु
अपामनुवृत्तिर्निश्चेतुं शक्या। यदि ह्यपां पञ्चमपर्याये हूयमानानां पुरुषाका-
रपरिणामं वक्तुं प्रथमादिपर्यायत्वेऽपि तासामेव हूयमानानां सोमराजादिपरि-
णाम उक्तः स्यात् तदानीमिति तु पञ्चम्यामाहुताविति इतिशब्देन प्रकारवा-
चिना पूर्वोक्तसर्वप्रकारपरामर्शः संगच्छते प्रथमादिपर्यायेष्वापः सोमराजादि-
भावं प्राप्य पञ्चमपर्याये पुरुषभावं प्राप्नुवन्तीत्यन्वयात्। यदि तु श्रद्धादिश-
ब्दोक्तानामनपां सोमराजादिभाव उक्तः स्यात्तदा पूर्वोक्तः सर्वोऽपि प्रकारो
ऽपां परिणामक्रमविषयो न भवतीति स न संगच्छेत अपां पुरुषवचस्त्वप्र-
कारे पृष्टे तत्प्रकारं विहाय प्राचीनपर्यायेष्वन्यदन्यदुच्यते चेदपृष्टोत्तरता
स्यात्। अत एव सौत्रशङ्काभागविवरणभाष्ये श्रद्धाशब्दस्य प्रत्ययपरत्वसमर्थ-
नानन्तरं तस्मादयुक्तः पञ्चम्यामाहुतावपां पुरुषभाव इति प्रश्नोत्तरयोर-

* व्याससू॰ अ॰ ३ पा॰ १ सू॰ २।

नुपपत्तिरेवोपसंहृतेति चेत् सत्यम् । एवं प्रश्नोत्तरसंदर्भपर्यालोचनया प्रतीय-
मानमप्यपां प्रथमाहुतिमारभ्य होमद्रव्यत्वं न प्रश्नवाक्यएव विधेयम् ।
आहुतिष्वपां होमद्रव्यत्वं पञ्चमाहुतौ तासां पुरुषाकारपरिणतिप्रकारश्चेत्यु-
भयं पृष्टमिति प्रश्नवाक्यस्योभयविषयत्वकल्पने वाक्यभेदापत्तेर्विशिष्टस्य प्रश्न-
विषयत्वकल्पने ऽपि गौरवात् । अतः प्रश्नस्य पुरुषाकारपरिणतिप्रकाररूपवि-
शेषणसंक्रान्तत्वसिद्ध्यर्थं विशेष्यप्राप्त्याकाङ्क्षायां तत्प्रापकं शास्त्रान्तरमुदाहृतम् ।

ननु यदि शास्त्रान्तरवशात्पञ्चस्वप्याहुतिष्वपां होतव्यता ऽस्ति तदा
प्रथमाद्याहुतिष्वपि हूयमानानां तासां परिणतिविशेषाः संभवन्तीति तेष्वपि
सत्सु तानजिज्ञासित्वा पञ्चमाहुतावेव किमर्थं विशेषो जिज्ञास्यत इत्याशङ्क्य
तदभिप्रायमाह **तत्र प्रथमाद्याहुतिष्वपीति । यैव पञ्चम्याहुतिरिति ।**
यदेव पञ्चमाहुतिद्रव्यं तदेव प्रथमाद्याहुतिष्वपि द्रव्यमिति तावच्छास्त्रा-
न्तरान्निश्चितम् । तत्र प्रथमाहुतिमारभ्य हूयमानानामपां पञ्चमाहुतौ केन
प्रकारेण पुरुषाकारपरिणाम इति प्रश्ने जिज्ञासितप्रकारविशेषान्तर्गततया प्रथ-
माद्याहुतिपरिणतिक्रमो ऽपि पृष्टो भवतीति पञ्चमाहुतिविशेषमात्रविषयः
प्रश्न इत्यर्थः । **आहुत्यपूर्वरूपा इति** । ननु आहुतिजन्यापूर्वं आत्म- ३४६ । २१
गुणरूपं जलाद्याहुतिद्रव्यजन्यमपि न जलादिरूपमिति तत्परिवेष्टनोक्त्या न
भूतपरिष्वङ्गसिद्धिः तत्सिद्धावपि तत्परिवेष्टनं भाष्यटीकयोरन्त्याहुत्यनन्त-
रमुक्तमिति नोत्क्रमणकालमारभ्य प्राणगतिनिर्वाहकस्य भूतपरिष्वङ्गस्य सिद्धि-
रिति चेत् । उच्यते । अपूर्वरूपा इत्यनेन सूक्ष्मरूपा इति विवक्षितं न
त्वात्मगुणरूपा इति कर्मणामीश्वरप्रसाद एव द्वारमिति सिद्धान्ते यावत्फलं
स्थाय्यदृष्टरूपद्वारा ऽनङ्गीकारात् । भाष्यटीकयोरन्त्याहुतिकथनं नान्त्याहुत्य-
नन्तरमद्भिः परिवेष्टनमित्येतदभिप्रायं किं तु यजमानस्य शीघ्रं परलोकनयना-
र्थमन्त्याहुत्यपेक्षाभिप्रायम् । उपकोसलविद्यायामर्चिरादिमार्गप्राप्तिरस्तीत्युक्ति-
सामर्थ्यादन्येषां शवकर्माकरणे शीघ्रं मार्गप्राप्तिर्नास्तीति सूचनेनोपासनान्तर-
निष्ठानां कर्मिणां च झटिति मार्गप्राप्त्यर्थमन्त्येष्ट्यपेक्षणस्य पदभाष्ये भाष्य-
कारैरुक्तत्वात् । **आहुतिगत्यागतिसाम्याद् दृष्टान्तत्वमिति ।** एतेनेय-
मपि शङ्का निरस्ता षट्प्रश्ननिरूपणे अग्निहोत्राहुतिसूक्ष्मरूपैः संपरिष्वक्तस्य
जीवस्योर्ध्वगमनं नोच्यते किं तु तेषामेवाहुत्युद्देश्यदेवतातृप्त्यर्थं तत्तल्लोकं

प्रत्यूर्ध्वगमनमुच्यते ते अन्तरिक्षं तर्पयतः ते दिवं तर्पयत इति वाक्यशेषात् तस्मादाहुतिसूक्ष्मांशा जीवं संवेष्ट्य परलोकं नयन्तीत्यत्रेदमुदाहरणमिति । तथापि भूतसूक्ष्माणां द्युपर्यन्तोत्क्रमणं पुनरावर्तनं चाऽस्तीत्येतावत्यंशे दृष्टान्ततायाः अवैकल्यात् ।

३४७ । १० **प्रौढ्या विद्यैक्यमुपेत्येति*** विद्याभेदवादिनां परितोषार्थमुक्तम् । वस्तुतस्तु विद्यैक्यमुपपद्यते एव द्युपृथिवीपुरुषयोषिदग्निकल्पनाप्रत्यभिज्ञानाद् योषिदग्निपर्याये पुरुषाकारपरिणतिप्रत्यभिज्ञानाच्च । अथ वाऽऽहुतिश्रवणयोः सामान्यविशेषभावेनैकार्थपर्यवसानोपपत्तेः एकैकत्रानुक्तानां विशेषाणां परस्परोपसंहारोपपत्तेः अन्तरिक्षपर्जन्ययोः परस्परोपसंहारेणाग्नीनां पञ्चसंख्यातिरेके ऽपि अथ ह एतानेव पञ्चाग्नीन्वेदेति पञ्चसंख्याभिप्रायेणोपपत्तेः । अन्यथा तस्याग्निरेवाग्निः समिदेव समिदित्यादिना बृहदारण्यकोक्तस्य षष्ठाग्नेरप्यनुपसंहारप्रसङ्गात् । एकस्यामेव वाजसनेयिशाखायां शाण्डिल्यविद्याया इव पञ्चाग्निविद्याया अपि उभयत्र संकीर्तनस्य विशेषविधानार्थत्वोपपत्तेर्बहुतरार्थप्रत्यभिज्ञाने ऽपि किंचिद्वैलक्षण्यादिमात्रेण विद्यैक्यपरित्यागे क्व चिदपि विद्यैक्यासिद्धिप्रसङ्गाच्च । न च तर्पयत इत्युक्त्या देवतातृप्त्यर्थम् आहुत्योरुत्क्रमणं संकीर्त्यत इति शङ्कनीयम् । अग्निहोत्राहुत्योरन्तरिक्षस्य दिवस्तत्तल्लोकस्थितप्राणिनां वोद्देश्यदेवतात्वाभावेन तेषां तर्पणीयत्वाऽयोगात् । तस्मात्ते देवा भक्षयन्तीति श्रुत्युक्तप्रकारेणाजानदेवानां कर्मदेवा भृत्या इत्यग्निहोत्राहुती भृत्यानयनेन तत्तल्लोकस्थितानाजानदेवान् प्रीणयत इत्येवमभिप्रायं तर्पयत इति वाक्यद्वयमपि योज्यते ।

अग्नि†समिद्धूमार्चिरङ्गारविस्फुलिङ्गेष्विति । यथा छान्दोग्ये अपां पुरुषशब्दवाच्यत्वप्रकारमात्रविषयतया प्रतीयमानस्यापि प्रश्नस्याग्निसमिद्धूमादिविषयत्वमपि कल्प्यते‡ अन्यथा प्रश्नोत्तरवैयधिकरण्यापत्तेः एवमत्रापि श्रवणोपसंहाराभ्यामग्निसमिद्धूमादिषट्स्वप्युत्तरवाक्यगतेषु सत्सु ताव-
,, । २१ त्पर्यन्तं प्रश्नवाक्यानामभिप्रायः कल्पनीय इति भावः । **यथेति शेष इति** । मूले यथा सोमस्येति यथाशब्दयुक्तपाठे तु न शेषाध्याहारः । ननु क्रियासमभि-

---

* विद्यैक्यमभ्युपेत्येति २ पु॰ पा॰ । † अग्नीति नास्ति २ पु॰ ।

‡ कल्प्यते इति २ पु॰ पा॰ ।

हारविवक्षायां तस्य तस्य धातोर्द्विर्भावोऽनुप्रयोगश्च प्राप्नोतीति तत्सूत्रवार्तिके द्विर्भावानुशासनाद् यथाविध्यनुप्रयोगः पूर्वस्येति* सूत्रेण तस्य धातोरनुप्रयोगनियमाच्च । नैष दोषः । आप्यायनापक्षययोः प्रत्येकं पौनःपुन्यं समुच्चयश्चेत्युभयविवक्षोपपत्तेः । उभयविवक्षायां हि समुच्चयविवक्षाप्रयुक्तमेव कार्यं भवति विप्रतिषेधे परं कार्यमिति स्मरणात् । प्रपञ्चितश्चायमर्थः प्रथमसूत्रे जायस्व म्रियस्वेति श्रुत्यर्थकथनावसरे ।

युक्ततरश्चायमर्थ इति । युक्ततरत्वोक्तेरभिप्रायं न विद्मः । यद्यप्येष ३४७ । २०
सोमो राजेत्यत्र सोमो राजेति शब्दावादित्याच्चन्द्रमसमिति प्रस्तुतचन्द्रपरौ तयोस्तत्र लोकवेदप्रसिद्धत्वात्तद्देवानामन्नमिति च तस्मिन् प्रथमां पिबते वह्निरित्यादिप्रसिद्धं देवान्नत्वमुच्यते तं देवा भक्षयन्तीत्येतदपि स्वर्गं प्राप्य कर्मदेवरूपा इष्टादिकारिणोऽपि तं भुञ्जत इत्येवं तेषां त्रैविष्टपभोगकथनार्थम् । एवं च ते धूममभिसंभवन्तीति बहुवचनान्तशब्देन प्रकृतानां देवा इति बहुवचनान्तशब्देन परामर्शः । चन्द्रमसमित्येकवचनान्तेन प्रकृतस्य चन्द्रस्य सोमो राजेत्येकवचनान्तेन परामर्श इत्येतदप्युपपद्यत इति प्रतिभाति तथाप्येष सोमो राजेत्येतस्य प्रकृतेष्टादिकारिपरत्वमेव युक्तम् । पञ्चाग्निविद्यावाक्ये सोमो राजेति श्रुतस्य प्रथमाहुतितः संभवस्य द्वितीयाहुतौ होतव्यत्वस्य चेष्टादिकारिण्येव चन्द्रेऽन्वयसंभवात्पञ्चाग्निविद्यावाक्ये पितृयाणवाक्ये च श्रुतयोः सोमराजशब्दयोः श्रुतिस्थानसामान्याभ्यामैकार्थ्यावश्यम्भावात्तदुपजीवनेनैव भूतपरिष्वक्तजीवरंहणास्याश्रुतत्वा†दिति सूत्रेण समर्थितत्वाच्च । किं च छान्दोग्ये सोमो राजेति प्राप्यस्य सोमस्य प्राधान्येन प्रकृतत्वात्तथा एतांस्तत्र भक्षयन्तीति श्रुत्यन्तरस्यैतान्नित्यस्य चन्द्रलोकपरत्वे का युक्तिर्दर्शिता स्यात् । छन्दोगश्रुत्यर्थे श्रुत्यन्तरस्यापि पर्यवसानं स्यादिति युक्तिरिति चेन्न । श्रुत्यन्तरे ते चन्द्रं प्राप्यान्नं भवन्तीति कर्मिणामेवान्नभावश्रवणं प्राधान्येन प्रकृतत्वं चास्तीति तत्र कर्मिणामेवान्नत्वं भक्ष्यत्वं चोच्यत इति तदनुसारेण छन्दोगश्रुतावपि अन्नत्वभक्ष्यत्वश्रवणस्य तद्विषयत्वस्थितौ तन्निर्वाहार्थं पञ्चाग्निविद्यागतसोमराजशब्दैकार्थ्यनिर्वाहार्थं च छान्दोग्ये पितृयाणवाक्यगतसोमराजशब्दस्यैवेष्टादिकारिपरत्वप्राप्तेः चन्द्रवाचकस्याप्यमृतमयदेहत्वरूपचन्द्रसादृश्यविधानार्थत्वेन दे-

* पूर्वस्मिन्निति सोत्रः पा० ।

† व्या० सू० अ० ३ पा० १ सू० ६ ।

षभोग्यत्वरूपतत्सादृश्यविधानार्थत्वेन चेष्टादिकारिषु गौणतोपपत्तेः । बहुष्व-प्येकवचनस्य ग्रहं संमार्ष्टि पत्नीं सन्नह्येत्यादिष्विव प्रतिव्यक्तिगतैकत्वानुवादकतोपपत्तेश्च । तस्मादस्या युक्ततरत्वोक्तेरभिप्रायो ऽन्वेषणीयः * ॥

३४८ । १४ **कृतात्यये ऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥**

एकभविकनयादिति । प्रायणस्य सकलकर्मशक्त्यभिव्यञ्जकत्वादभिव्यक्तशक्तिभिः कर्मभिः प्रायणानन्तरभाविन्येकस्मिन्नेव शरीरे फलजननावश्यम्भाव एकभविकनयः । **सम्यग्ज्ञानस्य नैष्फल्यमिति ।** न चाचारेणान्यकृतेन कर्मणा वा जातस्य पुनरपि देहान्तरापादनीयकर्मपरम्परा प्रतीयेतेति न सम्यग्ज्ञाने नैष्फल्यमिति वाच्यम् । तिर्यग्योनिजातस्य कर्मानुष्ठानसामर्थ्यात्प्रागेव मृतस्य वा तेन देहेनाचारान्यकृतकर्मणोरपि क्षपणेन सम्यग्ज्ञाननैष्फल्यं स्यादिति भावः । **लोके तथोपलम्भादिति ।** कर्मणामुत्तरदेशसंयोगादिफलविनाश्यत्वदर्शनादित्यर्थः । **स्वर्गादवरोहतामिति कथमवगम्यतइति ।** तृतीयस्थानादवतीर्णानां दृश्यमानं भोगवैचित्र्यमस्तु अतः स्वर्गादवरोहतां न तद्धेत्वनुशयसिद्धिरिति शङ्काभिप्रायः । स्वर्गादवरोहतां कपूयरमणीयानुशयश्रवणात्तेषामपि तत्कृतं भोगवैचित्र्यं भवेदिति परिहाराभिसंधिः । यद्यप्ययमभिसंधिरित्यादिटीकाग्रन्थो ऽन्यकृतकर्मणा ब्राह्मणादिदेहप्राप्तिरिति पूर्वपक्षस्य कपूयचरणा इत्यादिबहुव्रीहिप्रतिपाद्ये मत्वर्थे कर्मसंबन्धे मुख्यसाक्षात्संबन्धरूपे संभवत्यमुख्यपरम्परासंबन्धरूपः स नाश्रयणीय इति युक्त्या निराकरणार्थः प्रतीयते तथापि भाष्योक्तं भोगवैचित्र्यमन्वर्थोपपत्तिनिराकरणेनोपपादयितुं प्रवृत्तस्य टीकाग्रन्थस्य तदप्यानुषङ्गिकं प्रयोजनमिति तात्पर्यम् । **निमित्तत्वमिति ।** सायंप्रातःकालावच्छिन्नजीवनं निमित्तमिति निमित्तसंकोचकतया निमित्तकोट्यनुप्रविष्टत्वमित्यर्थः । पृथग् निमित्तनैमित्तिकसंकोचकत्वानुपपत्तेः । अभ्यासो ऽकर्मशेषत्वा†दिति पूर्वतन्त्राधिकरणे सायं-

३५० । १७ प्रातःकालयोर्जीवनविशेषणतया निमित्तसंकोचकत्वस्यैवोक्तत्वाच्च । **उपमिमान इति ।** उत्प्रेक्षमाण इत्यर्थः । वर्णनीयपुरं हि शेषपुण्यकृतकल्पितद्युखण्डतादात्म्येनोत्प्रेक्ष्यते न तु तथाभूतेन केन चिद् द्युखण्डेनेदं सदृशमित्युपमीयते । **भुवि भोगमिति ।** यस्य कर्मणः स्वर्ग एव फलमुक्तं तद्विषया भुवि भोगा-

* अत्र प्रथमं तदन्तरप्रतिपत्त्यधिकरणं पूर्णम् । † जै० सू० अ० ६ पा० २ सू० २३ ।

भावोक्तिः । यस्य तु कर्मणः स्वर्गभोगानन्तरंभुव्यपि फलमनेकजन्मानुयायि श्रुतं तस्य श्रुतिवशाद्भुव्यपि फलं भवन्न निवार्यते। **आचारस्य यागादिवदिति** । ३५० । २२
भाष्ये पुरुषार्थत्वोक्त्या यागादिवदाचारस्य स्वतन्त्रपुरुषार्थसाधनत्वं नोक्तं किं तु पुरुषसंस्कारत्वमुक्तमित्याहेत्यर्थः । **वाक्येन पुरुषधर्मत्वप्रतीतेरिति** । जञ्जभ्यमान इति कृत्प्रत्ययान्तेन जृम्भणकर्ता पुरुष उच्यते कर्ता कर्तरि कृदित्यनुशासनात् ततस्तत्समभिव्याहाररूपेण वाक्येन मन्त्रवचनस्य पुरुषार्थत्वमवसीयते तन्निर्वाहाय प्राणापानावेवात्मन् धत्तइत्यर्थवादावगतं चिरजीवित्वं फलमुखेन विपरिणमनीयं तीर्थे स्नातीत्यत्र यद्यपि शब्दतस्तीर्थस्नानकर्ता न प्रतीयते आख्यातस्य कर्तृसंख्यामात्रवाचित्वात्तथापि स्नानं मलापकर्षणार्थं तीर्थविशेषणं सुखावतरणार्थमिति लिङ्गात्तीर्थस्नानमपि तत्कर्तृपुरुषार्थतया ऽवगम्यते । अतस्तत्रापि तीर्थमेव समानानां भवतीत्यर्थवादश्रुतफलविपरिणामः कार्य इति भावः । एवं च मूले वाक्येनेति शब्दो लिङ्गस्याप्युपलक्षको द्रष्टव्यः ।

गुणकर्म तु स्यादिति । पुरुषसंस्कारकतयेति भावः । **तच्च न पुरुषमात्रइति** । यथा व्रीहिप्रोक्षणं न व्रीहिमात्रे विधीयते वैयर्थ्यात्फलान्तरकल्पने गौरवाच्च किं त्वपूर्वसाधनेष्टव्रीहिष्विति प्रकृतक्रत्वपूर्वसाधनत्वलाभार्थमतिप्रबलया ऽपि श्रुत्या प्रकरणमपेक्षितमभ्यनुज्ञायते । एवमिहापीति क्रतुयुक्तपुरुषसंस्कारौ स्नानमन्त्रवचने यथा क्रतुयुक्तव्रीहिसंस्कारः प्रोक्षणमिति भावः । कदा चित्सुकृतं कर्मेति श्लोके सुकृतशब्दं दुष्कृतसाधारण्येन व्याचष्टे **सुष्ठ्वभिमानपूर्वकं कृतमिति*** ॥

अनिष्टादिकारिणामपि च श्रुतम् ॥ १२ ॥ ३५२ । १

इष्टादिकारिणां प्रतीतेरित्युक्तमित्यादिना व्यवहिताधिकरणसंबन्ध उक्तः । अव्यवहिताधिकरणसंगतिमाह **यत्किंचयावच्छब्दयोरिति** । **यथोपात्तमनुष्येति** । पुरुषशब्दो मनुष्यवाचित्वेन नैघण्टुकैः स्मृत इति भावः । टीकायामसौ लोक इति स्थाने असौ मार्ग इत्यपि पाठान्तरं दृश्यते तद्व्याचष्टे **न्यायसाम्यादिति** । गन्तव्यलोकासंपूरणे मार्गासंपूरणमप्यर्थसिद्धमित्यर्थः ।

भोगवैषम्यमर्थाद्गम्येत इति । परमते दुष्कृतिनां चन्द्रमण्डलारोहो ऽस्ति तेषां सुकृतिभिर्भोगसाम्यं स्यात्तत्त्वयुक्तमिति शङ्कां भोगवैषम्यप्र-

* अत्र द्वितीयं कृतात्ययाधिकरणं पूर्णम् ।

दर्शनेन निराकृत्य पूर्वपक्षोपपादनार्थमिदं सूत्रं तत्र भोगवैषम्यं शब्दतो न प्रतीयते किं तु संयमनइति स्थानविशेषकीर्तनेनार्थात्सिध्यति । न च यदर्थं सूत्रप्रवृत्तिस्तस्य शाब्दत्वे संभवति आर्थत्वं वक्तुं युक्तं तस्माच्चन्द्रमण्डलारोहावरोहपूर्वपक्षनिरासस्तुशब्दार्थं इति सिद्धान्तसूत्रत्वमेव वक्तुं युक्तमित्यर्थः । ननु पूर्वपक्षसूत्रत्वे ऽपि तुशब्दो भोगसाम्यशङ्काव्यावृत्त्यर्थ इति विवक्षितार्थः शाब्दो* भवत्येव । मैवम् । सिद्धान्तसूत्रतायामनिष्टादिकारिणां संयमने ऽनुभूय प्रत्यवरोहणमित्येतदनन्तरं भाष्ये† एवं भूतारोहावरोहाविति सूत्रशेषयोजनया न तु चन्द्रमण्डलारोहावरोहाविति तुशब्दार्थः स्पष्टं प्रतीयते । परमते भोगवैषम्यस्य शब्दार्थत्वाभावात् तत्प्रतिद्वन्द्विभोगसाम्यशङ्कानिरासस्तुशब्दार्थतया स्पष्टं न प्रतीयतइति वैषम्यसद्भावात् । ननु स्पष्टमप्रतीयमानो ऽपि स एव तुशब्दार्थो वक्तव्यः अन्यथा विद्याकर्मणोः§ इति सूत्रस्य सिद्धान्तारम्भसूत्रत्वाभावे तद्गततुशब्दस्य‡ वैफल्यप्रसङ्गादिति चेन्न । अत्रत्यतुशब्देन दुष्कृतिनां चन्द्रमण्डलारोहावरोहशङ्काया भोगराहित्येन नैष्फल्यान्निरासे सति सर्वे चन्द्रमसं गच्छन्तीति श्रुतिमवलम्ब्य पुनस्तच्छङ्कोत्थितो मार्गद्वयभ्रष्टानां तृतीयस्थानोक्तिहेतुना सर्वशब्दसंकोचावश्यम्भावप्रदर्शनेन तन्निरासार्थतया भाष्यएव तत्रत्यतुशब्दस्य व्याख्यातत्वात् ।

३५३ । १९ चन्द्रमण्डलादवरोह इति च॥ अध्याहारापेक्षा स्यादिति ॥

परमते हि प्रथमं चन्द्रमण्डलारोहः ततस्तस्मादवरोहस्तद्द्वारा संयमनं प्राप्यानुभूयावतरणमिति हि सूत्रार्थः । तथा च संयमने ऽनुभूय प्रत्यवरोहणमित्येतावत्यंशे मतद्वये ऽपि सूत्रयोजनायाः साम्ये ऽप्यारोहावरोहावित्यत्र स्वमते श्रुतस्यैव संयमनस्यारोहणीयत्वम् अवरोहापादानत्वं च । परमते तु अध्याहृतस्य चन्द्रमण्डलस्येति विशेष इत्यर्थः । अण्डजमित्यादिविभागो न युक्तः अण्डजादीनामपि जीवजत्वादित्याशङ्क्य यज्जीवदवस्थाज्जायते तज्जीवजं विवक्षितम् अण्डजादिकं तु किं चिन्मृतादेव जायते किं चिदचेतनादेव भूतलाज्जलाद्वा जायते अतो विभागो युक्त इत्याह

अण्डजं हि किं चिदिति¶ ॥

---

* विवक्षितार्थशब्द इति १ पु॰ पा॰ । † भाष्ये इति नास्ति २ पु॰ ।

‡ भवतुशब्दस्येति २ पु॰ पा॰ । § व्या॰ सू॰ अ॰ ३ पा॰ १ सू॰ १७ ।

‖ इति वेति ५ पु॰ पा॰ । ¶ अत्र तृतीयम् अनिष्टादिकार्यधिकरणं पूर्णम् ॥

साभाव्यापत्तिरुपपत्तेः ॥ २२ ॥ ३५४ । ५

न तु भवतिश्रुतेः सादृश्यलक्षणार्थत्वे ऽस्ति निमित्तमिति । यद्यपि वायुर्भूत्वा धूमो भवतीत्यादिवाक्येषु वायुधूमादिशब्दानां तत्तत्सदृशे गौणी वृत्तिरित्यपि वक्तुं शक्यं तथापि तद्भावस्तत्सादृश्येनौपचारिको व्याख्येय इति सिद्धान्तटीकानुसाराद्वाय्वादिसादृश्यं वाय्वादिभवनत्वेनोपचरितमित्यभिप्रेत्य सिद्धान्ते भवतिश्रुतेर्लक्षणोक्ता । **वाक्यशेषानिर्णयेनेति ।** अवरोहतां सूक्ष्मशरीरस्य क्रमेणाकाशवायुभावापत्तौ तदनुप्रवेशे कर्मतया ऽप्याकाशं वायुमिति द्वितीयानिर्देश उपपद्यते । धूमो भवतीत्यादिनिर्देशस्तु देवो भवति मनुष्यो भवतीत्यादिनिर्देशवत्तच्छरीरकत्वएवोपपद्यतइति व्यवस्थितार्थेन वाक्यशेषेणाव्यवस्थितार्थस्योपक्रमस्य निर्णयो विवक्षितः । गङ्गायां घोष इत्यत्र गङ्गाशब्दस्य तीरे गङ्गासम्बन्धितीरत्वेन लक्षणा न तु तीरत्वसामान्येन गङ्गायां घोष इति वाक्यश्रवणानन्तरं घोषं जिगमिषोर्विशिष्य गङ्गातीरे प्रवृत्तिदर्शनादित्येकं मतम् । तीरत्वेनैव लक्षणा तस्य गङ्गासंबन्धस्त्वर्थात्सिद्ध्यति मुख्यार्थासंबन्धिनो लक्ष्यत्वायोगादित्यपरं मतम् । अग्निर्माणवक इत्यत्र मुख्यार्थसादृश्यरूपपैङ्गल्यविशिष्टे माणवके गौणी वृत्तिरित्येकं मतम् । अग्निशब्दस्य माणवकवृत्तिपैङ्गल्यमात्रे लक्षणा तदविनाभावाद्धर्मिप्रतीतिः सैव गौणी वृत्तिरित्यपरं मतम् । तत्र लक्षणागौणवृत्त्योर्द्वितीयमताश्रयणेन भेदमाह **लक्षणायामिति ।** आकाशसदृशा भवन्तीति सूक्ष्मतापत्तिः । **सादृश्यं गमनकाले यो धूम आसीदिति ।** यद्यपि धूममात्रं श्रुतं तथापि गमनकालोक्तप्रत्यभिज्ञानादेवमुक्तम् । एवमुक्तिश्चाकाशवद्धूमस्यापि पूर्वसिद्धतया ताद्रूप्येणानुशयिनां सूक्ष्मशरीरस्य परिणामो न संभवतीति न्यायसाम्यसूचनार्थम् । एवमाकाशवाक्ये धूमवाक्ये च ताद्रूप्येण परिणात्यसंभवात् तत्सादृश्यार्थकत्वव्यवस्थितौ वाक्येष्वपि* तथैवार्थव्यवस्था सिध्यतीति तात्पर्यम् । **तत्तुल्यो भवतीति ।** वायुस्वभावानुवृत्तिवद्धूमादिस्वभावानुवृत्तिस्तेन तेन तुल्यता† ॥

नातिचिरेण विशेषात् ॥ २३ ॥ ३५५ । १४

आकाशादिष्वनुशयिनां चिरमचिरं वा ऽवस्थानमिति विशये नियम-

---

* वाय्वभ्रमेष्ववाक्येष्वपीति ५ पु॰ पा॰ । † अत्र चतुर्थं साभाव्यापत्त्यधिकरणं पूर्णम् ।

कारिणः शास्त्रस्याभावाद् अनियम इति पूर्वपक्षो भाष्ये दर्शितः स न युक्तः । व्रीह्यादिषु चिरावस्थानश्रुतिबलादाकाशादिष्वचिरावस्थानलाभादित्याशङ्क्य टीकाकारैस्तदुपपादनं कृतम् । दुर्निष्प्रपतरशब्दो न चिरावस्थानवाचकः किं तु दुःखनिष्क्रमणवाचकः । अतस्तद्वशादाकाशादिभ्यः सुखनिष्क्रमणं लभ्यते न तु चिरा*वस्थानमिति । एवं पूर्वपक्षोपपादनमपि न युक्तम् । व्रीह्यादिभावे ऽनुशयिनां दुःखसद्भावस्यानन्तराधिकरणे निषेत्स्यमानतया दुर्निष्प्रपतरमित्यस्य लक्षणया विलम्बपरत्वादित्यपरितोषादाचार्यैः सामान्यतोदृष्टावलम्बनपूर्वपक्षं प्रदर्श्य तस्य श्रुतार्थापवादः सिद्धान्ते वर्णितः । सामान्यतोदृष्टमात्रावलम्बनः पूर्वपक्षस्तुच्छ इति तत्राप्यपरितोषादाचार्यैः पूर्वपक्षस्येत्थमुपोद्बलनं कृतम् । अतो वै खल्वित्यत्रातःशब्दः प्रकृतानामाकाशादीनां सर्वेषां परामर्शक इति सर्वेष्वपि तेषु चिरावस्थानं श्रुतित एव प्रतीयते तदनुग्राहकमनुमानमिति† । अतःशब्दः समनन्तरवाक्योक्तान् व्रीह्यादीनेव परामृशेद् न व्यवहितानाकाशादीन् सर्वनामस्वाभाव्यात्तथा च व्रीह्यादिषु चिरावस्थानश्रुतिसामर्थ्यादाकाशादिष्वचिरावस्थानलाभात्तद्बाधितमनुमानमिति सिद्धान्तो वर्णितः । वस्तुतस्तु यथाभाष्यमनियमपूर्वपक्ष एव दृढः । अतो वै खलु दुर्निष्प्रपतरमिति वाक्येन व्रीह्यादिषु चिरावस्थाननियमो बाध्यते‡ न तत्सत्तामात्रं चिरमचिरं वेत्यनियतस्य चिरावस्थानस्य व्रीह्यादिष्ववस्थानोक्त्यैव लब्धत्वेन तस्याविधेयत्वात् । तथा च विशिष्य व्रीह्यादिषु चिरावस्थाननियमप्रतिपादनसामर्थ्यादाकाशादिभ्यश्चिरावस्थाननियम एव व्यावर्तते न त्वनियतं चिरावस्थानमपि । अत एवार्द्धमन्तर्वेद्यर्द्धं बहिर्वेदीति यूयमानदेशविधावन्तर्वेदीत्येव विधिस्तत्सामर्थ्यादर्द्धान्तरं बहिर्वेदीति लभ्यते । अतो ऽर्द्धं बहिर्वेदीत्यनुवाद इति पूर्वपक्षे दूषणमुक्तम् । तथा यूपस्य वेदि§रित्यधिकरणे अर्द्धमन्तर्वेदीति नियमविधिसामर्थ्यादर्द्धान्तरादन्तर्वेदिनियम एव व्यावर्तते नान्तर्वेदिस्वरूपमित्यर्द्धान्तरमन्तर्वेदि बहिर्वेदि वेत्यनियमः प्राप्नोति न तु बहिर्वेद्येवेति नियमो लभ्यते । अतो ऽर्द्धं बहिर्वेदीत्यनुवाद इति पूर्वपक्षे पाक्षिकानुवादो ऽयं स्यादिति नित्यवच्छ्रवणविरोधः तत्परिहारायार्द्धं बहिर्वे-

* न तु तेषु चिरेति २ पु॰ पा॰ ।
† अनुमानमात्रमिति २ पु॰ पा॰ ।
‡ बोध्यते इति २ पु॰ पा॰ ।
§ जै॰ सू॰ अ॰ ३ पा॰ ७ सू॰ १३ ।

दीत्यपि विध्यन्तराश्रयणे वाक्यभेदः । तस्मादन्तर्वेदिबहिर्वेदिशब्दाभ्यां लक्षितो ऽन्तरालदेशो विधीयतइत्यङ्गीकर्तव्यमिति । एवं प्राप्तस्य पूर्वपक्षस्य निरासप्रकारो ऽपि भाष्यएव विशेषादिति सौत्रपदव्याख्यानेन स्पष्टीकृतः । स इत्थम् । दुर्निष्प्रपतरमिति तरप्प्रत्ययार्थस्यातिशयस्य प्रतियोग्याकाङ्क्षायां प्रागनुक्रान्तानाम् आकाशादीनां बुद्धिसन्निधानात्तत्प्रतियोगित्वेनान्वयः स्यात्तथा च व्रीह्यादिष्वाकाशाद्यपेक्षा चिरमवस्थानोक्तावाकाशादिष्ववस्थानस्य तदपेक्षया ऽल्पकालत्वं पर्यवस्यतीति । नन्वसिद्धस्तरप्प्रत्ययस्तकारलोपवद्रेफोपजनस्यापि छान्दसस्य वक्तुं शक्यत्वादिति चेन्न । उभयथासंभवे ऽर्थातिशयसिद्ध्यर्थं तकारलोपेन तरप्प्रत्ययसद्भावस्यैवाश्रयितुं युक्तत्वात् । दुरुपपदात् पतिधातोः खलर्थे डप्रत्यये सति दुर्निष्प्रपतरमिति रूपसिद्धौ विनैव तकारलोपं तरप्प्रत्ययान्तत्वस्य निर्वक्तुं सुकरत्वाच्च । अन्येष्वपि दृश्यतइति जनेरुपपदान्तरेषु डप्रत्ययविधायकसूत्रे अन्येभ्यो ऽपीति दृश्यतइति वक्तव्यमिति वार्तिककृता धात्वन्तरेभ्यो ऽपि डप्रत्ययस्यानुशिष्टत्वात्तत्र दृशिग्रहणं सर्वोपाधिव्यभिचारार्थमिति वृत्तिकारेणोक्ततया कृत्यल्युटो बहुलमिति बहुलग्रहणादन्ये ऽपि कृतः प्राप्तमभिधेयं व्यभिचरन्तीति तेनैवोक्ततया च तस्य डप्रत्ययस्य खलर्थवृत्तित्वोपपत्तेश्च । एतेनातःशब्दः संकोचकाभावादाकाशादिसर्वपरामर्शक इति शङ्कापि निरवकाशीकृता । आतिशायनिकप्रत्ययार्थप्रतियोगित्वेनान्वयितया वक्तव्यत्वेन तस्यां व्यवहितव्रीह्यादिमात्रपरत्वावश्यंभावाद् व्रीह्यादिभ्यो दुर्निष्प्रपतरत्वोक्तिसामर्थ्यादाकाशादिभ्यो ऽपि दुर्निष्प्रपतरत्वमात्रमस्तीति तेष्वपि चिरावस्थानावगमात् सूत्रे नातिचिरेणेत्यतिचिरावस्थाननिषेधः कृत इत्यास्तां विस्तरः ।

कथं तत्रापि चिरावस्थानेन पूर्वपक्ष इति । चिरावस्थानस्य को- ३५५ ।
ट्यन्तरतया प्रवेशनेन कथं पूर्वपक्ष इत्यर्थः । भाष्योक्ते ह्यनियमपूर्वपक्षे चिरावस्थानमपि कोट्यन्तरत्वेन प्रविशति । **व्यवधानादिति ।** विलम्बे दुरुपसर्गस्याप्रसिद्धत्वेन साक्षाद्वाचकतया तस्मिन्नप्रवृत्तेरित्यर्थः* ॥

---

* अत्र पञ्चमं नातिचिराधिकरणं पूर्णम् ।

३५६ । १ **अन्याधिष्ठिते पूर्ववदभिलापात् ॥ २४ ॥**

ननु क्रतुप्रकरणस्थेति । यथा खल्वामलकं कोष्ठे कफं हन्तीति वाक्यस्येष्टसाधनत्वं विषयः कण्ठे कफं करोतीति वाक्यस्यानिष्टसाधनत्वं विषय इति विषयभेदादविरोधः एवं विधिनिषेधयोरविरोधश्चेत्तर्हि क्रतुहिंसा विहितापि निषिद्धेति वक्तव्यम् । ततश्च क्रतुमध्ये निषिद्धानुष्ठाने कथं क्रतुवैगुण्यं न स्यादिति शङ्कार्थः । **न हि क्रतुशेषः प्रतिषेध इति ।** यथा कलञ्जभक्षणप्रतिषेधस्य क्रतुशेषत्वाभावात्कलञ्जभक्षणेन न क्रतोर्वैकल्यम् एवं हिंसानिषेधस्यापि क्रतुशेषत्वाभावाद्धिंसया न क्रतोः साकल्यमेव किं तु क्रतुसाकल्यलोभात्पुरुषार्थनिषेधमतिक्रामतः पुरुषस्य परं प्रत्यवाय इति परिहारार्थः । **एवं विहिताया अपीति ।** यथेष्टसाधनत्वबोधनास्पदमेव तक्रपानमनिष्टसाधनत्वबोधनस्याप्यास्पदम् एवं विहितैव हिंसा यदि निषेधस्यापि गोचरा स्यात्तर्ह्येव सा दुःखफला स्याद् न त्वेवं निषेधस्य पुरुषार्थहिंसामात्रविषयत्वादित्याहेत्यर्थः ।

ननु पुरुषार्थहिंसाया एव निषेध्यत्वादिति हेतुसाधनाय प्रवृत्ते तथा हीत्यादिटीकाग्रन्थे हिंसानिषेधस्यानृतवदननिषेधवत् क्रतुप्रकरणाम्नानाभावात् क्रत्वर्थहिंसा न निषेध्येत्येतावति वक्तव्ये पदार्थे निषेध्यं तदर्थो निषेध इति निषेध्यनिषेधयोरेकविषयत्वनियमोक्तिः क्वोपयुज्य-
११ । २३ तइत्याशङ्क्य तदुपयोगं दर्शयन्नवतारयति । **क्रत्वर्थो हि प्रतिषेध इति ।** अयमाशयः । क्रत्वर्थपुरुषार्थोभयविधस्य हिंसामात्रस्य पुरुषार्थो निषेध इति सांख्यमतेन खल्वत्र पूर्वपक्षः कृतः । न तन्मतं युज्यते । निषेध्यनिषेधयोरेकविषयत्वनियमेन निषेधस्य पुरुषार्थत्वे निषेध्यहिंसाया अपि पुरुषार्थत्वावश्यंभावादित्येवं नियमकथनस्य सांख्यप्रक्रियानिराकरणेन हेतुसिद्ध्युपयोगित्वं तावत् स्पष्टमेव तर्हि नियमाऽविरोधाय निषेध्यनिषेधावुभावपि क्रत्वर्थौ स्ताम् एवमपि पुरुषार्थाया एव निषेधादिति हेतोरसिद्धिर्भवेदिति शङ्कोत्थाने ऽपि नियमवर्णनस्यास्त्युपयोगः । तस्यां शङ्कायां निषेध्यस्य क्रत्वर्थत्वासंभवेन दूषितायां तर्ह्यनारभ्याधीतस्य हिंसानिषेधस्यानृतवदननिषेधवत् क्रतूपस्थापकप्रकरणाभावेन क्रत्वर्थनिषेधत्वासंभवे क्रत्वर्थत्वं पुरुषार्थत्वं च विशेषणं विना हिंसिधात्वर्थमात्रस्य निषेधो ऽस्तु । तथा च

क्रत्वर्थहिंसाया अपि निषेधो लभ्यतइति शङ्कायां निषेधस्य क्रत्वर्थत्वपुरुषार्थत्वबोधनाय वाक्यवैरूप्यापत्त्या तद्दूषणे चास्यस्य नियमवर्णनस्योपयोग इति । एवं च क्रत्वर्थो हि प्रतिषेधः क्रत्वर्थं प्रतिषेधेदिति हिंसानिषेधयोर्वक्ष्यमाणनियमलभ्यस्य क्रत्वर्थत्वस्य वचनमग्रे शङ्किष्यमाणस्य क्रतुपुरुषोभयार्थत्वस्याप्युपलक्षणमिति वक्ष्यन्नित्येतत्क्रतुपुरुषोभयार्थत्वं नास्तीति वक्ष्यमाणान्तरस्याप्युपलक्षणम् । तेन प्रकारेण न हिंस्यादित्येतत्कस्य चित्प्रकरणे न समाम्नातमिति दार्ष्टान्तिकांशमाकाङ्क्षितमध्याहृत्य टीकार्थः कथितः ।

कथं क्रत्वर्थः स्यादिति । आज्यभागजन्योपकारस्याभावेनासंभवा- ३५१ । ५
दिति भावः । **प्राभाकरास्त्विति** । प्राभाकराणां पर्युदासपक्षो दर्शपूर्णमासप्रकरणगतवाक्यस्यार्थवादत्वपक्षश्च हानौ तूपायने*त्यधिकरणएव स्पष्टीकरिष्यते । **प्रवृत्तिकैमर्थ्यनिर्णयाय चेति** । यदाख्यातेन कर्ता ऽभिधीयते तदा श्रुत्युपात्तकर्तृपुरुषशेषभूतमनृतवदनं निषेध्यमिति तन्निषेधो ऽपि पुरुषार्थो भवति यदि तेन कर्ता नाभिधीयते तदा प्रकरणसन्निधापितक्रत्वर्थं तन्निषेध्यमिति तन्निषेधो ऽपि क्रत्वर्थो भवतीति विचाराणां फलफलिभावमाह **अभिहितेति** । ननु न तौ पशौ करोतीति निषेधे आज्यभागवन्नानृतं वदेदिति निषेधे निषेध्यमनृतवदनं क्रत्वर्थतया विहितं नास्तीति चेत् । सत्यम् । क्रत्वर्थद्रव्यादिसंपादनोपायभूतं यदनृतवदनं तदविहितमपि द्रव्यार्जनवत्क्रतूपकारकतया क्रत्वर्थमिह विवक्षितम् । अथ वा व्रीहिभिर्यक्ष्यइति संकल्प्य यस्तदलाभे तत्प्रतिनिधीन्नीवारादीन् विहाय यवैर्यजते तस्य तत्संकल्पवचनमनृतं जायतइति तथाभूतमनृतमिह क्रत्वर्थानृतवचनमिति† विवक्षितम् । **गम्यमानकर्तुः संख्याया इति** । समानप्रत्ययोपात्तकर्तृसंख्याभिधानपक्षे नातिप्रसङ्गः । गम्यमानस्यापि चेत्कर्तुः संख्या ऽऽख्यातेनाभिधीयेत तदा पदान्तरोपात्तकरणादिसंख्या तेन सुतरामभिधातुं शक्येति चित्रैः काष्ठैः पचतीत्यपि प्रयोगप्रसङ्ग इत्यर्थः । अथ गम्यमानस्यापि कर्तुरेव संख्या तेनाभिधेया तदैककर्तृके पाके तन्दुलाः पच्यन्तइति प्रयोगप्रसङ्ग इत्याह **पच्य-**
तइत्यत्रापीति । **अनभिहितस्यापीति** । यत्प्रधानं कारकं तत्संख्या ३५८ । ४

---

* व्या॰ सू॰ अ॰ ३ पा॰ ३ सू॰ २६ ।

† इवेति २-५ पु॰ पा॰ ।

ऽऽख्यातेनाभिधेयेति नियमः। तथा च पचति तन्दुलानित्यत्र कर्तुः प्राधान्यात्तत्संख्या तेनाभिधेया। पच्यन्ते तन्दुला इत्यत्र कर्मणः* प्राधान्यात्तत्संख्या करणादीनां तु सर्वत्राप्राधान्यान्न क्वाप्याख्यातेन तदभिधानप्रसङ्ग इत्यर्थः। **अनुवादकत्वमाहेति।** बलवदनिष्टाननुबन्धीष्टसाधनत्वरूपं श्रेयःसाधनत्वमनूद्य तन्निषेधः क्रियते स च निषेधो विशेष्यसत्त्वाद्विशेषणनिषेधमादाय पर्यवस्यतीत्यर्थः। **रागप्राप्तेति।** पुरुषार्थेत्यर्थः। तथा चाख्यातोपात्तभावनाक्षेपोपस्थितपुरुषशेषहिंसाविषयत्वेन चारितार्थ्यादनुपस्थितक्रतुशेषहिंसानुवादतन्निषेधविषयत्वकल्पनं गौरवपराहतमित्यर्थः। ननु पुरुषार्थत्वेन क्रत्वर्थत्वेन च हिंसोपस्थितिमपेक्ष्य तन्निषेधो नोच्यते किं तु हिंसासामान्यनिषेधेन पुरुषार्थहिंसानिषेधवत् क्रत्वर्थहिंसानिषेधो ऽपि लभ्यतइत्युच्यते ऽतो न क्रत्वर्थतोपस्थितिगौरवमित्यस्वरसादाह **उभयनिषेधे चेति। रागप्राप्तेति।** पुरुषार्थेतेत्यर्थः। न तु रागाधीनप्रवृत्तिविषयतेत्यर्थः। क्रत्वर्थहिंसाया अपि रागाधीनप्रवृत्तिविषयत्वात्फलरागं विना ऽद्यापि प्रवृत्त्यसंभवात्कामाधिकारे करणांशे रागतः प्रवृत्तिः अङ्गेषु वैधी प्रवृत्तिरिति निरालम्बनायाः प्राभाकरपरिभाषायाः सिद्धान्ताऽनभिमतत्वात्तदयुक्तम्।

३५९ । ६ **विशेषविधिविहितस्यार्थस्येति।** अत्रेदं वक्तव्यम्। इहाप्युत्सर्गापवादन्यायः प्रवर्ततएव हिंस्यादित्यनेन विहितहिंसाया अपि क्रोडीकारात्। मरणफलोपहितमरणकारणपुरुषव्यापारत्वं हिंसात्वं हिंसाशब्दप्रवृत्तिनिमित्तं तद्वैधहिंसायामप्यविशिष्टम्। न च सत्यपि हिंसाशब्दार्थत्वे हिंस्यादित्याख्यातोपात्तभावनाक्षिप्तकर्तृपुरुषशेषभूतैव हिंसा प्रतीयतइति न तत्र हिंसिधातुना वैधहिंसाक्रोडीकारो ऽस्ति तद्व्यावर्तकविशेषणसद्भावादिति वाच्यम्। उद्देश्ये तथा विशेषणायोगात्। अन्यथा आहवनीयवाक्ये ऽपि जुहोतिधातुना ऽऽख्यातोपात्तभावनाक्षिप्तपुरुषशेषाणां पुरुषार्थहोमानामेवानुवादो न क्रत्वर्थहोमानामिति ज्योतिष्टोमक्रत्वर्थस्य पदहोमस्य तेनाविषयीकरणादाहवनीयपदवाक्ययोरुत्सर्गापवादन्यायः प्रत्युद्ध्रियेत नारिष्टहोमादीनां च क्रत्वर्थानामाहवनीयसिद्धिर्न स्यात्। ननु तत्र प्रत्यक्षविधिविहितानां सर्वेषां होमानामनुवादसंभवादनपेक्षितोद्देश्यविशेषणे वाक्यभेदापत्तेर्न पुरुषशेषत्वं विशेषणमिह तु हिंसामात्रनिषेधे

---

* कर्मणोति २ पु· पा·।

लौकिके पुरुषार्थत्वं वैदिके क्रतुशेषतेति वाक्यवैरूप्यापत्तेर्लौकिकवैदिकान्यतरग्रहणाकाङ्क्षायामुपस्थितपुरुषशेषभूतैव हिंसा गृह्यते नानुपस्थितक्रतुशेषभूतेति चेन्न । लौकिकवैदिकोभयविधहिंसानिषेधस्य पुरुषार्थैकरूपत्वोपपत्तेः । निषेध्यनिषेधयोर्विषयैकरूप्यनियमस्त्वसिद्धः । स्त्र्युपगमनमांसभक्षणादीनां प्रतिषेधस्य क्रत्वर्थत्वदर्शनात् स्त्र्युपायमांसभक्षादिपुरुषार्थमपि श्रितः प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयादिति वार्तिकोक्तेश्च । तथापि क्रत्वर्थस्य निषेधः क्रत्वर्थ एव न पुरुषार्थ इति नियमोऽस्तीति चेन्न । अप्रयोजकत्वात् । क्रत्वर्थपुरुषार्थसाधारणापगोरणसामान्यादिनिषेधानां पुरुषार्थत्वसंप्रतिपत्तेश्च । अन्यथा क्रत्वनुष्ठानप्रतिबन्धकब्राह्मणापगोरणादिषु स्वाच्छन्द्यप्रसङ्गात् । नन्वेवं सति क्रत्वर्थस्यैवानृतवदनस्य निषेधः क्रत्वर्थ इति क्रतुमध्ये क्रत्वर्थानृतवदनएव क्रतोर्वैकल्यं पुरुषार्थानृतवदने तु यो नाम क्रतुमध्यस्थ इत्युक्तरीत्या पुरुषस्यैव प्रत्यवाय इति कर्त्रधिकरण*सिद्धान्तो नावतिष्ठेत । उक्तनियमानङ्गीकारे क्रत्वर्थानि पुरुषार्थानि वा यावन्त्यनृतवदनानि तेषां सर्वेषामपि निषेधस्य क्रत्वर्थत्वोपपत्तेरिति चेत् । उच्यते । नानृतं वदेदिति वाक्ये अनृतं वदेदिति भागस्य प्रकरणाम्नानादयमर्थो भवति अनृतवदनेन दर्शपूर्णमासयोरुपकुर्यादिति । ततश्च नञा संबन्धादयमंशोऽनुवादो न विधिरित्यवसायात् कृत्स्नस्य वाक्यस्यायमर्थो भवति अनृतवदनेन दर्शपूर्णमासयोरुपकुर्यादिति यत्तन्नेति । इत्थमेवास्य वाक्यस्य योजनाप्रकारो वार्तिके दर्शितः । एवमनया रीत्या प्रकरणसामर्थ्यात्क्रत्वर्थानृतवदननिषेध एव क्रत्वर्थ इति लाभान्न तन्निर्वाहार्थमुक्तनियमोऽपेक्षणीयः । नन्वेवं प्रकरणाम्नातानृतवदननिषेधवाक्यार्थकथने अनारभ्याधीतहिंसानिषेधवाक्यस्यानया प्रक्रिययेत्थमर्थो भवति हिंसया पुरुषस्योपकुर्यादिति यत्तन्नेति । तथा च पुरुषार्थहिंसानिषेध एव वाक्यार्थ इति क्रत्वर्थहिंसायाः तदविषयत्वात्तच नोत्सर्गापवादन्यायप्रवृत्तिः । अत इदं घट्टकुट्यां प्रभातमिति चेन्न । क्रत्वर्थहिंसायाः परंपरया पुरुषोपकारकत्वेन तस्या अपि तेन विषयीकरणात् क्रत्वर्थताद्वारा अन्यथा वा यथा कथं चित् पुरुषोपकारपर्यवसानमात्रमेव हि तत्रानुवाद्यकोटौ प्रविष्टं यथाऽनृतवदननिषेधे पुरुषार्थता-

---

* क्रतुमध्ये ऽधिकरणेति २ पु॰ पा॰ ।

द्वारा ऽन्यथा वा क्रतूपकारमात्रं न हि तत्रानृतवदनं पुरुषार्थतामनपेत्य क्रतूपकारकम् । क्रतूपयोगिद्रव्यादिराहित्यावस्थाविशिष्टस्य पुरुषस्यैव हि शेषभूतं सद् द्रव्यार्जनोपायान्तरवत् क्रतूपकारकम् । एवं व्रीहीन् संकल्प्य यवानुपाददानस्य संकल्पवचनानृततापादनमपि । न हि तदुभयं क्रत्वर्थ-तया विहितम् । नन्वेवं निषेध्यनिषेधयोरेकार्थतानियमाऽनादरे क्रत्वर्थ-पुरुषार्थसाधारणहिंसासामान्यनिषेधस्य केवलपुरुषार्थतोपपत्तेः सांख्य एव विजयी स्यात् । महाफलसाधनस्य यागस्य प्रत्यक्षादिप्रमाणाप्राप्तं वित्तव्ययाया-सप्रयुक्तमिव पशुमालभेतेत्यादिश्रुतिप्राप्तं हिंसादिकरम्बितत्वप्रयुक्तमपि स्व-ल्पदुःखमस्त्विति प्रवृत्त्युपपत्तेः । असति विरोधे हिंसासामान्यनिषेधस्य वैधहिंसाविधिना बाधनायोगात् । अतो हिंसानिषेधवाक्यस्य वैधहिंसापरि-हारमिच्छता निषेधवाक्यस्य प्रथममेव पुरुषार्थहिंसाविषयत्वं वर्णनीयमिति न तत्रोत्सर्गापवादन्यायप्रवृत्तिः । अपवादसद्भावप्रयुक्ततद्विषयपरिहारस्थल-स्यैव तन्न्यायविषयत्वादिति चेदुच्यते । हिंसानिषेधविधानयोरुत्सर्गापवाद-न्यायविषयत्वाभावव्यवस्थापनप्रत्याशया निर्मूलं निषेध्यनिषेधयोरेकविषय-त्वनियममवलम्ब्य पुरुषार्थहिंसाया एव निषेध इति समर्थने ऽपि तयो-रुत्सर्गापवादन्यायविषयता नापैति मरणान्तप्रायश्चित्तमाहवाभिमुखहनन-मुचितदण्डरूपचोरहननं स्तेनहननमिति बहूनां पुरुषार्थहिंसनानां निषेधेन परिहरणीयत्वात् । न हि सुरापस्य ब्राह्मणस्योष्णामासिञ्चेयुः सुरामास्ये मृतः शुध्येदिति शुद्ध्यर्थमेव विहितमात्महननमशुद्ध्यापादकमिति वक्तुं शक्यम् । न दोषो हिंसायामाहवइति परस्पराह्वानपूर्वके धर्मयुद्धे योद्धुमभिमुखस्य हनने दोषाभावः कण्ठत एवोक्तः ।

अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चैव गच्छति ॥

स्तेनः प्रकीर्णकेशो मुसली राजानमीयात्कर्माचक्षाणः पूतो वधमो-क्षाभ्यामघ्नन्नेनस्वी राजेति राज्ञो दण्डरूपचोराद्यहनने स्तेनाहनने च दोष-स्मरणात्तादृशहनने ऽपि दोषाभावः सिद्धः । तथा च पुरुषार्थहिंसानिषेधपक्षे ऽप्यनुपदिष्टप्रायश्चित्तविहितहिंसातिरिक्तहिंसाविषयत्वमवश्यं वक्तव्यम् । तथा च तत एव वैधपशुसंज्ञपनस्याप्युत्सर्गापवादन्यायेनैव परिहारसिद्धेः किं प्रथ-

ममेव तत्परिहारार्थं पुरुषार्थहिंसाया निषेध्यत्वकल्पनेन । अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्य इति छन्दोगोपनिषदि हिंसानिषेधे तीर्थपर्युदसनेनापि हिंसानिषेधविधानयोरुत्सर्गापवादन्यायः प्रत्याय्यते । तत्र हि तीर्थशब्देनागर्हिता या हिंसा सा पर्युदस्यते । अगर्हिता चानुपदिष्टप्रायश्चित्तविहितहिंसा । अत एव श्येनेनाभिचरन् यजेत आततायिनमायान्तं हन्यादेवाविचारयन् इति विहितयोरपि अभिचाराततायिविषययोः प्रायश्चित्तोपदेशाद्गर्हितत्वेन न पर्युदासविषयता । एतेन वैधहिंसायां स्वल्पदोषो ऽस्तीति वदन्तः साङ्ख्याः साङ्ख्यमतनिरासाऽसामर्थ्येन वैधपशुसंज्ञपनं हिंसैव न भवति पश्वनुग्रहार्थत्वश्रवणादिति वदन्तश्चैकदेशिनो निरस्ताः । क्रत्वर्थपुरुषार्थरूपागर्हितवैधहिंसामात्रे सामान्यनिषेधाप्रवृत्तेः समर्थितत्वाद्धिंसाशब्दप्रवृत्तिनिमित्तसद्भावेन हिंसात्वाभावोक्त्ययोगाच्च । न च न वा इवेतन्म्रियसे तरिष्यसीत्यादिश्रवणेन वध्यानुग्रहपर्यवसन्नत्वादहिंसात्वमाशङ्कनीयम् । व्रणशान्त्यर्थं कृतावयवच्छेदनस्य छेदनीयानुग्रहार्थत्वे ऽपि क्रोधकृतावयवच्छेदसाधारणच्छेदेन शब्दप्रवृत्तिनिमित्तसद्भावेन छेदनत्ववद्वैधहिंसाया अपि हिंसात्वस्यानिवार्यत्वात् । भाष्ये हिंसादीत्यादिशब्दगृहीतस्य सोमोच्छिष्टभक्षणस्य सौत्रामण्यादिषु सुराग्रहादीनां चाऽनुच्छिष्टभक्षणत्वाऽसुराग्रहत्वादीनां वक्तुमशक्यत्वाच्चेति यथाभाष्यमुत्सर्गापवादन्यायः समञ्जस एव ।

हिंसैव वैधमपि संज्ञपनं न हिंस्यादित्यत्र रागकृतता पुरुषार्थता वा ।
आदौ न हिंसनविशेषणमस्त्यथापि नौत्सर्गिकः स्पृशति वैधमयं निषेधः ॥
सार्वत्रिको न खलु वृत्तिनिमित्ततौल्ये शब्दार्थतापलपनं परिहारहेतुः ।
उच्छिष्टभक्षणसुराग्रहणानुरागप्राप्ताखिलस्त्यपरिहारमुखेष्वभावात् ॥
रागप्रयुक्तपुरुषार्थविशेषणे ऽपि हिंसा निषेधनमसर्वगमेव वाच्यम् ।
नो चेददोषलवमाहवहिंसनादि व्यावर्तनं प्रतिलभेत कथं निषेधात्* ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीवेदान्तकल्पतरुपरिमले तृतीयस्याध्यायस्य प्रथमः पादः ॥

---

* अत्र षष्ठम् अन्याधिष्ठिताधिकरणं पूर्णम् ।

अथ तृतीयाध्यायस्य द्वितीयः पादः ।

३६० । १ **संध्ये सृष्टिराह हि ॥ १ ॥**

कर्मफलस्य यातायातरूपत्वेनेति । प्रथमाधिकरणे तावद्गमनं चिन्तितम् । तत्र सकलसंसारदुःखायतनस्य भूतेन्द्रियसंघातरूपदेहसंबन्धस्याऽऽब्रह्मसाक्षात्कारमिह परत्र च गताऽऽगतयोरनुवृत्तिर्निरूपिता । तत्रैव भाक्तं वानात्मवित्त्वा*दिति सूत्रे देवभृत्यभावेन तत्प्रयुक्त क्लेशकरम्बितस्य स्वर्गभोगानुभवस्य तुच्छत्वं सातिशयत्वं चाविष्कृतम् । द्वितीयाधिकरणे सूक्ष्मदेहस्यापि कारणतया सकलसंसारक्लेशनिदानस्य कर्मबन्धस्य ब्रह्मज्ञानपर्यन्तमनुवृत्तिर्निरूपिता । तत्रैव स्वर्गभोगस्य क्षयिष्णुत्वदोषो ऽपि कृतात्यय†इति सूत्रभागेन दर्शितः । एवमनेकदोषदुष्टस्यापि स्वर्गभोगस्य जनकं यागादिकं प्रतिजन्म यावज्जीवकर्त्तव्यस्नानसंध्यावन्दनादिविहितानुष्ठाननिषेधपरिहाररूपबहुविधशरीरक्लेशसाध्यस्मार्त्ताचारसापेक्षत्वादतिदुष्करमिति चरणादिति चे‡दित्यादिसूत्रैः प्रकटितम् । अनिष्टादिकारिणां तु शुभमार्गेण गतिर्वा ग्रामं गच्छन् वृक्षमूलान्युपसर्पतीति न्यायेन स्वर्गप्राप्तिमात्रं वा नास्तीति तृतीयाधिकरणे वर्णितम् । चतुर्थे स्वर्गादवरोहताम् आकाशादिभावश्रवणात् तदभिमानिदेवतानामिवाकाशादिशरीरकत्वप्रयुक्तः कियान् दिव्यभोगो ऽस्तीति शङ्कावारणायाकाशादिषु संश्लेषमात्रमित्युक्तम् । पञ्चमे तेषु चिरमचिरं वा ऽवस्थानमिति अनियमनिरासव्याजेन व्रीह्यादिषु सुखभोगरहितम् अतिचिरावस्थानमिति दर्शितम् । तच्च तदभिमानिजीवात्मना चेत्तल्लवनपर्यन्तमेव भवेदित्यनतिहेयत्वशङ्कानिराकरणात्तेषु संश्लेषमात्रमिति षष्ठाधिकरणे दर्शितम् । स च संश्लेषस्तेषां शोषणकुसूलावस्थापनावहननफलीकरणपाकभक्षणादिदशास्वनुवर्तमानः पितृवीर्यात्मना परिणामपर्यन्त इति रेतःसिक्सूत्रेण§ दर्शितम् । पुरुषभक्षणविषयत्वमनापन्नेषु व्रीह्यादिषु संश्लिष्टानामनुशयिनां तेषु संश्लेषः तत्तद्व्रीह्यादिपरिणामान्तरपरम्पराक्रमेण

---

* व्या· सू· अ· ३ पा· १ सू· ७ ।
† व्या· सू· अ· ३ पा· १ सू· ८ ।
‡ व्या· सू· अ· ३ पा· १ सू· ९ ।
§ व्या· सू· अ· ३ पा· १ सू· २६ ।

यथा कथं चित्पुरुषभक्षणविषयत्वप्राप्त्यनन्तरं तेषां तद्वीर्यात्मना परिणामपर्यन्त इत्यपि तेनैव सूत्रेण सूचितम् । पुरुषवीर्यानुप्रवेशे ऽपि योषितमप्राप्य तेषां न शरीरलाभः । तद्यदि वीर्यमपरिग्रहाणां वन्ध्यादिषु प्रवृत्तानां वा स्यात्तदा तद्वीर्यपरिणामान्तरक्रमेण पुनरपि पुरुषभक्षणविषयत्वं प्राप्य तद्वीर्यसंसक्ततया ऋतुमतीनां योषितां गर्भगोलकप्रवेशानन्तरमेव क्व चिज्जन्मनि भोगाश्रयस्य भोगमोक्षसाधनानुष्ठानोपयोगिनश्च शरीरस्य लाभ इति योनेः शरीर*मिति सूत्रेण दर्शितम् । एवं गतागतनिरूपणेन वैराग्यं दृढीकृतमित्यर्थः ।

जीवावस्थाभेदो ऽनुगतः पादार्थो न भवतीत्याशङ्क्याह **तत्त्वम्पदार्थविवेकायेति**† । महावाक्यार्थान्वयिपदार्थविवेकायेत्यर्थः । **तदवस्थमिति** । ३६० । ३
स्वप्ने ऽप्यादित्यादिसद्भावादिति भावः । **मनस्तु स्वप्ने सदपीति** । व्यावहारिकमपीत्यर्थः । ननु मनो यदि दृश्यत्वान्नात्मभासनक्षमं तर्हि स्वाप्न आदित्यादिरपि तत एव तथेति तन्मिथ्यात्वसमर्थनं व्यर्थमित्याशङ्क्य प्रातिभासिकत्वसिद्ध्यर्थं तदित्याह **आदित्यादीनामिति । शुक्तिरजतात्मकमेकमेव वस्त्विति** । रजतावयवैः शुक्त्यवयवैश्च शुक्तिरारब्धा यथा व्रीह्यवयवैर्नीवारावयवैश्च नीवाराः । अत एवेष्टिषु‡ व्रीह्यलाभेन समग्रव्रीह्यवयवोपादानाऽसंभवे सति यथा कथं चिद् ऽव्रीहिशास्त्रार्थलिप्सया कतिपयव्रीह्यवयववन्तो नीवारा उपादेया इति पूर्वतन्त्रे प्रतिनिधिपेटिकायां समर्थितम् । इयाँस्तु विशेषः । शुक्तौ शुक्त्यवयवा भूयांस इति प्रायेण शुक्त्याकारो गृह्यते तदग्रहणदशायान्तेनाभिभवाद्रजताकारो न गृह्यते दोषवशात्तदग्रहणे गृह्यतइति भावः ।

तद् दूषयतीति । नीवारेषु व्रीह्यवयवानामिव शुक्तिषु रजतावयवानां सत्त्वे शुक्तिदाहे क्षारभाववद् द्रवीभावस्याप्युपलब्धिप्रसङ्गः । आधाने ३६२ । ११
रजतशकलाद्यलाभे शुक्तिशकलोपादानप्रसङ्गः । अतः शुक्तौ रजतावयवाभावात्तत्सत्त्वेन रजतज्ञानप्रमात्वसमर्थनमयुक्तम् । कथं चिद्रजतावयवसत्त्वकल्पने ऽपि सर्वावयवावच्छेदेन शुक्तौ रजतज्ञानस्य चित्रपटे सर्वः पटो रक्त इति ज्ञानस्येव प्रमात्वं निर्वोढुं न शक्यम् । असार्वत्रिकं चैतदवयवालम्बन-

---

* व्या· सू· अ· ३ पा· १ सू· २७ ।
† विवेकार्थमिति मु· मूलपाठः ।
‡ इष्टिष्विति नास्ति २ पु· ।

तया प्रमात्वसमर्थनं तेन नीवारादिषु व्रीह्यादिज्ञानस्य प्रमात्वा*लाभात् । न हि रजतावयवेषु रजतत्वमिव व्रीह्यवयवे व्रीहित्वमस्ति । उत्पले नीलिमा उत्पले ऽरुणिमेति ज्ञानयोश्च प्रमात्वं निर्वोढुमशक्यं द्रव्येषु द्रव्यान्तराणामिव निरवयवेषु गुणेषु गुणान्तराणामवयवानुप्रवेशस्य वक्तुमशक्यत्वात् पृथग्भूतयोश्च नीलिमारुणिमगुणयोरेकत्र व्याप्यवृत्तितया समावेशाऽसम्भवादिति दोषान्मनसिकृत्य दूषयतीत्यर्थः । ननु तोयद्वैविध्यवादिनं प्रति पिपासोपशमरूपतोयार्थक्रियाव्यावृत्तिसाधनं न युक्त†मित्याशङ्क्य तोयद्वैविध्यकल्पनमयुक्तमिति तावदाह **पिपासोपशामकमिति । अकल्पने चेति ।** तोयद्वैविध्याकल्पने इत्यर्थः । कल्पनइति पाठे पिपासोपशमकमुदकमित्यैकविध्यकल्पनइत्यर्थः ।

३६२ । २९ **तन्निषेधस्य पूर्वेण कर्तुमशक्यत्वादिति ।** ननु को ऽत्र निषेधः यः परेण पूर्वस्य कर्तुं शक्यः सन् पूर्वेण परस्य कर्तुं न शक्य इत्युच्यते । किं ध्वंस उत स्वरूपतो विषयतो वा तदभावबोधनम् । नाद्यः । द्विक्षणावस्थायिनः पूर्वज्ञानस्योत्तरात्मविशेषगुणमात्रात्कालाच्च ध्वंससत्त्वेन तत्साधारणस्य ध्वंसकत्वस्य विरोधिविषयज्ञानाऽसाधारणबाधकत्वरूपतानुपपत्तेः । न द्वितीयतृतीयौ । रजतविषयतया निष्पन्नत्वेन स्वरूपतो नास्तीति तद्रजतविषयं न भवतीति च तस्याभावबोधनासम्भवात् । न च रजतज्ञानस्य भ्रमत्वप्रत्यायनं निषेधः । दर्पणे चैत्रमुखं नास्तीति पूर्वप्रत्यक्षेण चैत्रमुखसन्निधानानन्तरभाविनो दर्पणे चैत्रमुखमिति प्रत्यक्षस्य वृक्षोर्ध्वाग्रत्वप्रत्यक्षेण तत्समसमयवर्तिजलप्रतिबिम्बितवृक्षाधोग्रत्वप्रत्यक्षस्य च भ्रमत्वप्रत्यायनादिति चेदुच्यते । पूर्वं बाध्यं परम्बाधकमिति प्रायिकोक्तिः । लोके प्रवृत्तिसंवादादिना वेदे तदर्थतत्त्वनिर्णायकन्यायेन च बलवद्बाधकम् इतरद्बाध्यमिति व्यवस्था । इयांस्तु विशेषः । परेण पूर्वस्य भ्रमत्वप्रत्यायनमेव बाधः पूर्वेण परस्य तु सोपाधिकभ्रमस्थले भ्रमत्वप्रत्यायनं बाधः निरुपाधिकभ्रम‡स्थले वैदिके चोत्पत्तिप्रतिबन्धः । अत एव शीघ्रभाविना श्रौतविनियोगेन लैङ्गिकविनियोगस्य बाध इष्यते ।

---

* ज्ञानप्रमात्वेति २ पु॰ पा॰ ।

† क्रियाव्यावृत्त्या तोयत्वव्यावृत्तिसाधनं युक्तमिति २ पु॰ पा॰ ।

‡ निरुपाधिभ्रमेति १ पु॰ पा॰ ।

भारते वर्षे यो रजनीसमय इति । लक्षयोजनविस्तृतवर्तुलाकारलवणार्णवपरिवृतस्य लक्षयोजनविस्तृतस्य जम्बूद्वीपस्य मध्ये भूकमलकर्णिकाकृतेरिलावृताख्यमध्यवर्षमध्यमध्यासीनस्य मेरोर्दक्षिणतो हरिकिम्पुरुषभारताख्यानि त्रीणि वर्षाणि । उत्तरतो रम्यक*हिरण्मयोत्तरकुरुसंज्ञानि त्रीणि । पश्चिमतः केतुमालाख्यमेकम् । पूर्वतो भद्राश्वसंज्ञ†मेकम् । वसन्ति रमन्ति चैतेषु प्राणिन इति मर्यादा । पर्वतान्तरिताः प्राणिनिवासस्थानभूता भूप्रदेशा वर्षाण्युच्यन्ते । तेषु मेरुं प्रदक्षिणीकुर्वाणस्यादित्यस्य रश्मयो यदा यावत्पर्यन्तं प्राप्नुवन्ति तदा तावत्पर्यन्तं दिवसः अन्यत्र रजनीति व्यवस्था । एवं च भारते वर्षे सूर्यास्तमयानन्तरं केतुमाले मेरुव्यवधानाभावात्सूर्यप्रकाशो ऽस्तीति दिवसो भवति । अतो रजन्यां दिवसो न विरुद्ध इति शङ्कावारणाय भारते वर्षे रजन्यां सुप्तस्य तत्रैव स्वाप्नं दिवसदर्शनमुदाहृतम् । नन्विदं रजन्यां दिवसदर्शनं न विरुध्यते स्वप्ने परमेश्वरसृष्टस्वप्नदृगेकानुभाव्यादित्यरश्मिप्रचारेण तं प्रति तदा दिवसोपपत्तेः । एवं च मुहूर्तमात्रवर्तिनि स्वप्ने वर्षपूगातिवाहनं च युज्यते । देवादिकालोपाधिभ्यो मनुष्यादिकालोपाधिभ्यो मनुष्यादिकालोपाधीनामिव जाग्रत्कालोपाधिभ्यः स्वाप्नकालोपाधीनां सूक्ष्मत्वतारतम्यकल्पनात्कालविपर्यासवद्देशविपर्यासो ऽपि घटते । स्वप्ने कुरुदेशाधिष्ठितशरीरसदृशेन यथास्वप्नानुभवं तद्विसदृशेन वा शरीरान्तरेण पञ्चालदेशगमनोपपत्तेः योजनशतप्राप्यस्यापि देशान्तरस्य क्षणेन प्राप्तेः क्षणेन ततः प्रत्यागतेश्च स्वाप्नशरीरस्याश्चर्यरूपस्य जाग्रच्छरीरविलक्षणत्वादुपपत्तेः । जागरे गजादिमत्सु देशेषु रथाद्युपलम्भस्य च‡ स्वप्नार्थानां जागरितार्थानां च जलालोकपवनन्यायेन मूर्तत्वे ऽपि मिथःप्रतिघातकत्वाभावकल्पनयोपपत्तेः स्वप्नानुभूतरथादीनां स्वप्नदृष्टदारुरथादिभस्मनां च जागरानन्तरमननुभवस्य स्वप्नान्ते परमेश्वरकृतनिरवशेषस्वाप्नपदार्थोपसंहारकल्पनया स्वाप्नपदार्थानां स्वाप्नचक्षुरादिमात्रगम्यत्वकल्पनया चोपपत्तेरिति चेदुच्यते । एतावल्लोकदृष्टविरुद्धं किमवलम्ब्य कल्प्यते । बहिष्कुलायश्रुतिं रथादिसृष्टिश्रुतिं चेति चेन्न । बहिष्कु- ३६३ । २५

---

* रम्यकेति १ पु० पा० । † भद्राख्यसंज्ञमिति १ पु० पा० ।
‡ देशेषु कुरुदेशशयिताद्युपलम्भस्येति २ पु० पा० ।

लायश्रुतेः स्वे शरीरइति श्रुत्यनुसारेण भाक्तत्वात्। शरीरान्तरमपि स्वीयमेवेति न विरोध इति चेन्न। तस्य पूर्वशरीरवत्स्वीयत्वमनुक्तसिद्धमिति तस्यावक्तव्यतया तस्याः श्रुतेर्विकृतशरीरान्तरपरिग्रहदर्शने ऽपि बहिः सञ्चारदर्शनेपि शेते पूर्वशरीरएव परिवर्तते नापि बहिः सञ्चरतीति तस्य सर्वस्यापि मिथ्यात्वदर्शनेनैव साफल्यस्योपपादनीयत्वाद् न तत्र रथा इत्याद्युपक्रमानुसारेण भाक्तत्वात्। तत्र लडाख्याताभ्यां रथाद्यभावरथादिसृष्ट्योः समानकालत्वप्रतिपादनेन रथादिमिथ्यात्वे तात्पर्यावसायात्। अथेत्यव्ययस्य अथापीत्येतदर्थत्वेनाप्युपपत्तेः। किं च सृष्टिशरीरान्तरश्रुत्योः स्वार्थपरत्वे प्रकरणप्रतिपाद्यप्रधानार्थविरोधः स्यात् तद्धि प्रकरणमात्मनः स्वयंज्योतिष्ट्वं साधयितुं* प्रवृत्तम्। तत्र जाग्रदवस्थायामादित्यादिज्योतिर्व्यतिकरात्तद् दुर्विवेचमिति तद्विवेचनाय स्वप्नावस्था ऽवतारिता। तत्र यदि सृष्टिः प्रतिपाद्येत तदा तस्यामपि तद्दुर्विवेचं स्यात्। आदित्यादिज्योति†रन्तरसद्भावात्। अतः प्रधानप्रतिपाद्यविरोधात्स्वर्गार्थज्योतिष्टोमप्रकरणे तदङ्गविध्यर्थवादरूपस्य को हि तद्वेद यदमुष्मिन् लोके ऽस्ति वा न वेति वाक्यस्येव स्वप्नसृष्टिशरीरान्तरपरिग्रहवचनस्य न स्वार्थे तात्पर्यमित्येव वक्तुं युक्तम्। किं च स्वप्ने महासेनायां गजतुरगवृषभोष्ट्रभटादिरूपाः पारेपरार्द्धं चेतना दृश्यन्ते। एवमेकैकस्य स्वप्नं निर्वोढुं कियन्तश्चेतनाः कुतः समानीय परमेश्वरेणापि मेलनीयाः। न हि स्वप्ननिर्वाहार्थमेव तेन क्व चित्के च न चेतनाः पृथग् निवेशिताः सन्ति। चेतनांशे चेत् स्वप्नानामयथार्थता अचेतनांशे ऽपि तथा ऽस्तु किमर्धजरतीयेन। अवश्यं तच्छरीरान्तरपरिग्रहे ऽपि प्राचीनं तदेवेदं मच्छरीरमित्यभिमानांशे ऽपि स्वाप्नसृष्ट्यङ्गीकारे ऽपि चिरातीतेषु पित्रादिषु दृश्यमानेषु तएवैते मे पित्रादय इत्यभिमानांशे ऽपि भ्रमत्वमवश्यं वाच्यम्। आरुह्यमिव शैलाग्रमाविशमिव काननमित्यादिलोकानुभवसिद्धं च स्वप्नस्य भ्रमत्वम् उतेव स्त्रीभिः सह मोदमान इत्यादिश्रुत्या ऽपि तदनूदितम्। तस्मादुक्तं देशकालादिविपर्ययेण स्वप्नस्य मिथ्यात्ववर्णनम्‡॥

* प्रसाधयितुमिति २ पु० पा०। † आदित्यज्योतिरिति १ पु० पा०।
‡ अत्र प्रथमं संध्याधिकरणं पूर्णम्।

तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥ ३६५ ।

मूलाऽविद्यायाः स्थितत्वादित्यर्थ इति । सूच्यतइति शेषः । एवं हि तावच्छब्दस्यान्वयो भवति । बृहत्पृष्ठं भवतीति ज्योतिष्टोमे माध्यन्दिनपवमानानन्तरभाविमाहेन्द्रस्तोत्रं पृष्ठाख्यं बृहत्पृष्ठं भवतीत्यादिवाक्यद्वयेन बृहद्रथन्तरे तत्साधनत्वेन विधीयेते मृगारूढगीतिक्रियारूपसामविशेषवाचिनोर्बृहद्रथन्तरशब्दयोः प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानरूपस्तोत्रविशेषवाचिनः पृष्ठशब्दस्य च साध्यसाधनभावविवक्षां विना सामानाधिकरण्यायोगात्तयोश्चैकस्तोत्रसाधनत्वाद्व्रीहियवन्यायेन विकल्प इत्यर्थः ।

व्रीह्यनुष्ठानपक्षे इति । प्रथमं व्रीह्यनुष्ठानइत्यर्थः । **एवं यवानुष्ठानपक्षइति ।** द्वितीयप्रयोगे यदा यवानुष्ठानं तदा व्रीहिशास्त्रस्य प्रतीतप्रामाण्यपरित्यागो ऽप्रतीताऽप्रामाण्यस्वीकारश्च द्वौ दोषौ । पुनस्तृतीयप्रयोगे व्रीहिषूपादीयमानेषु व्रीहिशास्त्रस्य स्वीकृताऽप्रामाण्यपरित्यागः परित्यक्तप्रामाण्यस्वीकारश्चेति* द्वौ दोषौ । एवं प्रयोगत्रयेण यवशास्त्रे चत्वारो दोषाः । व्रीहिशास्त्रे चत्वार इति । एवमष्टदोषदुष्टो विकल्प इत्यर्थः । नाडीपुरीतद्ब्रह्मणां विकल्पे तु द्वादश दोषाः प्रसज्येरन् । तथा हि एकस्यां सुप्तौ नाड्यां शयने पुरीतद्वाक्ये ब्रह्मवाक्ये च प्रत्येकं प्राथमिकौ द्वौ द्वौ दोषौ सुप्त्यन्तरे पुरीतति शयने नाडीवाक्ये प्राथमिकौ द्वौ दोषौ पुरीतद्वाक्ये तूपरितनमपि दोषद्वयमिति चत्वारो दोषाः । पुनः सुप्त्यन्तरे ब्रह्मणि शयने ब्रह्मवाक्ये ऽप्युपरितनदोषद्वयम् । ततः सुप्त्यन्तरे नाड्यां शयने नाडीवाक्ये ऽप्युपरितनं दोषद्वयमिति स्वापचतुष्टयेन द्वादश दोषाः प्रादुःष्युः । ननु प्रामाण्यपरित्यागो नाम प्रामाण्याभावस्वीकार एव अन्याऽनिर्वचनात् । अप्रामाण्यस्वीकारो ऽपि स एव निर्दोषे वेदविपर्यासरूपाप्रमितिजनकत्वस्यासंभवेनाप्रामाण्यस्वीकार इत्यत्राऽप्रामाण्यशब्दस्य प्रामाण्याभावपरत्वात् तथा चाद्ययोर्दोषयोर्न भेद इति चेत् । उच्यते । उभयत्रापि प्रामाण्याभावस्वीकार एव पर्यवसितो दोषः । तस्य च दोषत्वबीजं द्विविधम् प्रामाण्ये प्रमाणस्य निर्दोषत्वादेः सद्भावरूपं प्रामाण्याभावे प्रमाणस्य प्रामाण्याऽनुपलम्भस्याभावरूपं चेति । एवं च भावप्रमाणसद्भावोपाधिकतया आद्यो दोषः । अभावप्रमाणा-

---

* इतिशब्दो नास्ति २ पु· ।

भावोपाधिकतया स एव द्वितीयो दोष इत्युपाधिभेदेन दोषद्वैविध्यं विवक्षितम् । तदुक्तं वार्तिके

प्रमाणं त्वप्रतीतं यदुज्ज्वलं तदपह्नुतम् ।
एकस्तावदयं दोषः स्यात्प्रमाणविपर्ययात् ॥
तथा तदप्रमाणत्वं यदभावप्रमाणकम् ।
भावे सत्यप्यभावेन विनैव परिकल्प्यते ॥ इति ।

अत्राद्यश्लोके प्रमाणविपर्ययादित्यनेन प्रामाण्यसद्भावविषयकप्रमाणाऽविरोधादित्यर्थकेन भावप्रमाणसद्भावमूलकं प्रामाण्याभावस्वीकारस्य दोषत्वं दर्शितम् । द्वितीयेन तु श्लोकेनाभावप्रमाणसद्भावमूलकं प्रामाण्याभावस्वीकारस्य दोषत्वं दर्शितम् । द्वितीयश्लोकस्यायमर्थः । यथा प्रामाण्यपरित्यागो दोषस्तथा तदप्रमाणत्वमपि दोषः । यत् यस्माद्धेतोः अभावप्रमाणकं प्रामाण्यानुपलब्धिरूपाभावप्रमाणग्राह्यं प्रामाण्याभावरूपमप्रमाणत्वं भावे सत्यपि प्रामाण्योपलम्भरूपे भावे विद्यमाने ऽपि तस्याभावेन विनैव कल्प्यते ततो हेतोर्द्वितीयदोष इत्यर्थः ।

३६७ । १४ **पृष्ठस्तोत्रमावर्तत*इति ।** ननु पृष्ठस्तोत्रमेकं न भवति येनाङ्गानुरोधात्प्रधानाभ्यासे इदमुदाहरणं भवेत् किं तु बृहत्पृष्ठं भवति रथन्तरं पृष्ठं भवतीति पृथगुत्पत्तिवाक्याभ्यां बृहत्सामकं रथन्तरसामकं चान्यदन्यत्पृष्ठस्तोत्रमुत्पन्नम् । एवं च यद्यपि स्तुतशस्त्राधिकरण†न्यायेन स्तोत्राणामदृष्टार्थत्वात्स्तोत्रद्वयस्यापि समुच्चयः प्राप्नोति तथापि बृहद्वा रथन्तरं वा पृष्ठं भवतीति वचनबलाद्विकल्प इत्युक्तं नवमाध्याये वार्तिककारैः । एतदवलम्बनेनैव च तैर्बृहद्रथन्तरधर्माणां बृहति प्रस्तूयमाने समुद्रं मनसा ध्यायेद्रथन्तरे प्रस्तूयमाने संमीलयेदित्येवमादीनां यथानिर्देशं व्यवस्था समर्थिता । बृहद्रथन्तरयोरेकार्थत्वे तु व्रीहिधर्माणां यवेष्विव तेषां संकरः स्यादित्यप्युक्तम् । अतः प्रकृतौ प्राप्तस्य समुच्चयस्य विकल्पवचनेनापोदितस्य गोसवादिष्वनुज्ञाकरणएवेदमुदाहरणं न त्वङ्गानुरोधात्प्रधानाभ्यासइति चेत् । सत्यम् । माहेन्द्राख्यं पृष्ठस्तोत्रमेकमित्यप्यस्ति मतान्तरम् । तदित्थम् । पृष्ठैः

---

* आवर्त्यतइति २ पु॰ पा॰ । † जै॰ सू॰ अ॰ २ पा॰ १ सू॰ १३-२६ ।

स्तुवतइति माहेन्द्रादीनां चतुर्णां स्तोत्राणामुत्पत्तिवाक्यं वाक्यशेषे तेषां सङ्कीर्तनात् तत्र बृहत्पृष्ठं भवति रथन्तरं पृष्ठं भवतीति माहेन्द्रे पृष्ठस्तोत्रे बृहद्रथन्तरयोः साधनतया विधानमित्येकार्थत्वादेव तयोर्विकल्पः । न तु तद्विधायकवाक्ययोर्वाकारो ऽस्ति । पृष्ठस्तोत्रे भेदपक्षे ऽपि* नास्ति बृहद्रथन्तरवाक्ययोर्वाकारापेक्षा लिङ्गदर्शनात्तयोर्विकल्पसिद्धेः । समुच्चये हि द्वादशाग्निष्टोमस्य स्तोत्राणीति स्तोत्रसंख्या तस्य नवतिशतं स्तोत्रीया इति स्तोत्रीयऋक्संख्या च पीड्येत त्रयोदश स्तोत्राणि सप्तोत्तरे द्वे शते स्तोत्रीयाश्च स्युः । अतः सप्तदशयोः कयोश्चित्स्तोत्रयोर्वैकल्पिकत्वे वक्तव्ये गोसवे उभे कुर्यादिति विकृतिविशेषेषु बृहद्रथन्तरस्तोत्रसमुच्चयविधानलिङ्गात्प्रकृतौ तयोरेव विकल्पो ऽवसीयतइति । धर्मासङ्करस्तु शूरत्वचित्रत्वादिश्रुतिद्वारभेदानुगृहीताद् रथन्तरे प्रस्तूयमाने बृहति प्रस्तूयमाने इति निर्देशभेदात् । रथन्तरगेयऋक्साध्या हि स्तुतिरभि त्वा शूर नोनुम इति शूरत्वादिद्वारा बृहत्साध्या तु स्तुतिः स त्वं नश्चित्रेति चित्रत्वादिद्वारा । एवं पृष्ठस्तोत्रमेकमनेकमिति पक्षद्वयसद्भावादेकमिति पक्षमाश्रित्याङ्गानुरोधात् प्रधानावृत्तिरुदाहृता ।

नन्वत्रापि कथमिति । बहुयागसमुच्चयएवेदमुदाहरणं न त्वेकस्य यागस्याङ्गानुरोधादभ्यासे इति शङ्कार्थः । इमां शङ्कां पशुसोमाधिकरणे* सोमोदाहरणविषयसिद्धान्तं दर्शयन् परिहरति **इदमत्राकूतमित्यादिना ।** २६७ । २६
इतराणि त्विन्द्रियवाय्वादिविशिष्टेति । यागोत्पत्तिवाक्यावगतं सोमलताया हविष्ट्वं रसद्वारेत्यभिषवादिसंस्कारवाक्यपर्यालोचनया पर्यवस्यतीति न विरोध इति भावः । **यदीमानि देवताविधानानीति ।** ऐन्द्रवाय्वादिवाक्यानां देवताविधानार्थत्वे तत्प्रापितदेवतानां याज्यानुवाक्यानां मन्त्रवर्णकल्पितविधिप्रापितोपांशुयाजदेवतानामिवैककार्यत्वाद्विकल्पः स्याद् न त्वेवं तेषामिन्द्रवाय्वादिदेवतोद्देश्यकग्रहणविधानार्थत्वस्य वक्ष्यमाणत्वादित्यर्थः । **द्रव्यं चेति ।** यदि ग्रहणसंस्कृतं सर्वं द्रव्यं युगपत्त्यक्तुं शक्यं तदापि देवताविकल्पः स्यात् । विकल्पेनैकैकामेव देवतामुद्दिश्य त्यागसंभवात् । द्रव्यमपि सकृत् त्यक्तुं न शक्यते ग्रहचमसेषु तत्तद्देवतोद्देशेन पृथग् गृही-

* स्तोत्रपक्षे ऽपीति २ पु॰ पा॰ ।   † जै॰ सू॰ अ॰ ३ पा॰ २ सू॰ १७-२० ।

तानां तथैव पृथक् त्यक्तव्यताया वक्ष्यमाणत्वादित्यर्थः । प्रथमं युगपत् त्यक्तुं
३६८ । ९ न शक्यमित्येतत्सम्भावितसकलशङ्कानिराकरणेनोपपादयति न तावदिति ।
ननु दशमुष्टिपरिमितापि लता सकृदेव त्यज्यतां तत्राह न च दशापीति ।
अभिषवश्चर्मणि सोमलतां निधाय ग्रावभिः कुट्टनं प्लावनं वस्त्रेण सोमरसगा-
लनं प्लावयतीत्यादिनेत्यन्वयः । गालयतीति तदर्थकथनं तु दशमुष्टिपरि-
मितस्यापि सोमस्य रस एकस्मिन् पात्रे ग्रहीतुं शक्यो बहुपात्राऽपर्याप्तश्च ।
अत एकस्मिन् पात्रे गृहीतस्य सकृदेव त्यागाद्देवताविकल्पः सिध्येदित्या-
शङ्क्य रसबाहुल्यप्रत्यायनाय नियतपरिमाणेषूदककलशेषु संस्कृतस्य सोमर-
सस्येति शाबरभाष्योक्तविशेषणार्थं दर्शयति तस्य च नियतेति । एवं भूयसो
ऽपि रसस्य युगपत्त्यागशङ्का तत्तद्देवतोद्देशेन पृथग् ग्रहणं प्रदर्श्य निरस्यती-
त्याह न च सर्वो ऽपीति । ग्रहणविकल्पेन देवताविकल्पशङ्कां निरस्य-
तीत्याह ननु प्रतीन्द्रवाय्वादिकमिति । न चैकस्मिन् पात्रे इति । न
च यावान् संमाति तावानेव गृह्यतामिति शङ्कनीयम् । कृत्स्नस्य रसस्य
देवतार्थत्वाभावे तावद्रससंपादनस्यादृष्टार्थत्वप्रसङ्गस्य टीकायां वक्ष्यमाण-
त्वादिति भावः ।

ननु यदि देवताविशिष्टग्रहणविधिर्न यागे देवताविधिस्तदा कथ-
मासां देवतानां यागान्वयसिद्धिरित्याशङ्क्याह ग्रहणमात्रे त्वपर्यवसाना-
दर्थाद्देवतानां यागान्वय इति । अयं भावः । ऐन्द्रवायवमित्यादयस्ता-
वद्देवतातद्धितान्ताः न तु संबन्धसामान्यादिविषयतद्धितान्ताः । मरुत्वतीयं
गृह्णातीत्यत्र छप्रत्ययस्य द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृह-
मेधाच्छ चेति सूत्रेण देवतायामेव विहितत्वेन तत्साहचर्यपाठादैन्द्रवायवादि-
ष्वपि देवतातद्धितनिश्चयात् । न च ग्रहणान्वयमात्रेण देवतात्वनिर्वाहः ।
सूक्तहविषोरेव देवतातद्धितनियमात् । अतस्तत्तत्पात्रगृहीतसोमरसरूपैर्हविः-
संबन्धेनैव तेषां देवतात्वमर्थात्पर्यवस्यतीति ।

नन्वभ्यासे प्रमाणाभावमुक्त्वा व्रीहियवसमुच्चये प्रमाणविरोध उच्यते,
कथमनयोरेकविषयत्वम् पुरोडाशस्य चेति चकारेण प्रत्याय्यत इत्याशङ्क्य
। ७ प्रमाणाभावोक्तिमपि समुच्चयविषयतया योजयति व्रीहियववाक्ये इति । वस्तु-
तस्तु बहुपात्रगृहीतसोमरसद्रव्यकयागाभ्यासकल्पनवत् व्रीहियवप्रकृतिकपुरो-

डाशद्वयद्रव्यकयागाभ्यासकल्पनायां तथा बलवत्प्रमाणं नास्ति पुरोडाशप्रकृतिद्रव्याकाङ्क्षायां स्वस्वशास्त्रसमर्पितयोर्व्रीहियवयोः प्रत्येकं पुरोडाशनिवर्तनसामर्थ्यं पर्यालोचयता प्रयोगवचनेन तयोः पाक्षिकतया ग्रहणोपपत्तेः । अत इह नाभ्यास इत्येतावन्मात्रपर इह त्वित्यादिग्रन्थः । पुरोडाशस्य चेत्यादिग्रन्थस्त्वेकस्यामेव सुषुम्रौ नाडीपुरीतद्ब्रह्मणां समुच्चयं वक्तुमेकस्मिन् पुरोडाशे यथा व्रीहियवयोर्न समुच्चयस्तथेह किं न स्यादित्याशङ्कायां तद्वैषम्यप्रदर्शनार्थमुत्तरग्रन्थशेष इति युक्तं पुरोडाशस्येत्यादिवाक्यानन्तरं न तु नाडीपुरीतद्ब्रह्मणामित्यादिवाक्यप्रवृत्तिच्छायया तथैवावगमात् । इह त्वित्यादिग्रन्थो ऽपि व्रीहियवसमुच्चयनिराकरणार्थ इति व्याख्यानेपि तत्र पुरोडाशद्वयार्थतया व्रीहियवसमुच्चयस्य प्रमाणाभावेन निराकरणम् इह त्वेकपुरोडाशार्थतया तत्समुच्चयस्य प्रमाणविरोधेन निराकरणमिति विषयभेदस्यापरिहार्यत्वाच्च ।

मिश्रपुरोडाशपक्षे प्रमाणविरोधमुपपादयति **पुरोडाशचोदनयैवेति । व्रीहिश्रुतिबाधः स्यादिति ।** ननु समुच्चये सति नाप्राप्तांशपरिपूरणार्थे व्रीहिश्रुतिबाधः सर्वेष्वपि पुरोडाशेषु व्रीहिप्राप्तिसत्त्वेन क्व चिदपि तदप्राप्त्यभावात् प्रत्युत विकल्प एव । यवपक्षे व्रीह्यप्राप्त्या तद्बाधः । एवं यवश्रुतेरपि यवाप्राप्तांशपरिपूरणार्थाया न समुच्चये बाधः किं तु विकल्पएवेति चेदुच्यते । अश्वशफपरिमाणस्य कृत्स्नस्य पुरोडाशस्य प्रकृतिद्रव्याकाङ्क्षायां व्रीहिशास्त्राप्रवृत्तौ यवनीवारादीनामिव कृत्स्नपुरोडाशनिर्वर्तनसमर्थैकद्रव्यालाभे व्रीहियवरूपद्रव्यद्वयस्यापि पक्षे प्राप्तिर्भवति तथा चाकाङ्क्षानुसारिणा व्रीहिशास्त्रेण कृत्स्नपुरोडाशप्रकृतितया व्रीहिनियमे क्रियमाणे पक्षप्राप्तानां नीवारादीनामिव व्रीहियवद्रव्यद्वयस्यापि निवृत्तिर्भवत्येव । कृत्स्नपुरोडाशप्रकृतितया पक्षप्राप्तानां यवानां परं निवृत्तिर्न भवति यवशास्त्रविरोधात् । मिश्रद्रव्यद्वयनिवृत्तौ तु नानुपपत्तिः तद्विधायकशास्त्राभावात् । एवं च मिश्रपुरोडाशे क्रियमाणे व्रीहिश्रुतिबाधः । एवं यवश्रुतिबाधोपीति युक्तमुक्तम् ।

न्यायसुधायां* तु

व्रीहयो निरपेक्षा हि ज्ञायन्ते यागसाधनाः ।
यवाश्चैवमतस्तेषां मिश्रत्वं नावकल्पते ॥

* इयं न्यायसुधा तन्त्रवार्तिकव्याख्या राणकमित्यप्यस्या नामान्तरं श्रूयते ।

नैव व्रीहिभिरिष्टं स्याद्यवैर्न च यथाश्रुतेः ।
मिश्रैरिज्येत चैतच्च भवेदुभयसाधनम् ॥

इति वार्तिकश्लोकव्याख्यानावसरे समर्थः पदविधिरिति पदमात्रविधेः सामर्थ्यापेक्षत्वाद्व्रीह्यादिप्रातिपदिकस्य यवादिसापेक्षत्वे तद्व्याघातापत्तेर्विभक्त्यन्वयाऽयोगान्निरपेक्षाणामेव व्रीहियवानां तृतीयया करणत्वप्रतीतेर्मिश्रत्वं न युक्तमिति मिश्रपक्षे व्रीहिभिर्यवैरिति तृतीयाश्रुतिबाध उक्तः ।

३६९ । १४ **प्रकृते गत्यन्तरसद्भावादिति*** । नाडीनां पुरितत्परिवेष्टितहृदयपुण्डरीकमध्यगतब्रह्मप्राप्तौ मार्गत्वेन यो हि गङ्गया सागरं गच्छतीति भाष्योक्तरीत्या समुच्चयो घटते पुरीततोऽपि प्राकारन्यायेन स घटते । श्रुतावपि बर्हिषि हवींष्यासादयतीति वेद्यास्तीर्णे बर्हिष्यासादनीयानां हविषां वेद्यां हवींष्यासादयतीति वेद्यामप्यधिकरणत्वमाम्नायते । एवं द्वारभेदात्समुच्चयोपपत्तेर्न विकल्प इत्यर्थः ।

स्यादेतत् । अथ यदा सुषुप्तो भवति यदा न कं चन वेद हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते इति जीवस्य हृदयान्नाडीभिर्निष्क्रम्य पुरीतति शयनं श्रूयते । हृदयात्पुरीततं गच्छतो नाडीनां मार्गत्वोपपादनाय हि हृदयात्पुरीततमभिप्रतिष्ठन्ते इत्युक्तम् । अतः प्राकारन्यायो ऽत्र न प्रवर्तते । न हि प्रासादान्निर्गत्य प्राकारे शेते नृपतिरिति वाक्यं प्राकारवेष्टितप्रासादमध्यगपर्यङ्कशयनेनोपपादयितुं शक्यम् । नैष दोषः । ताभिः प्रत्यवसृप्येति हृदयात्प्रत्यागमनं नोच्यते किं तु हृदयं परितः स्थिताभ्यः स्वप्नवहननाडीभ्यः । स यत्रैतत्स्वप्न्यया चरतीत्युपक्रम्य उतेव महाराजो भवत्युतेव महाब्राह्मण इत्यादिना स्वप्नदर्शनप्रकारमनूद्य स्वे शरीरे यथाकामं परिवर्तत इत्यन्तेन स्वप्नावस्थानिरूपणानन्तरम् अथ यदा सुषुप्तो भवतीत्युपक्रमात् । हृदयात्पुरीततमभिप्रतिष्ठन्तइति तु स्वरूपकथनार्थं द्वासप्ततिसहस्राणीति संख्यावचनवद् । नाडीषु पुरीततीति निरपेक्षश्रुतिविरोधं परिहरति
,, । १६ **निरपेक्षता ह्यपेक्षाभाव उत्सर्ग इति** । नाडीपुरीततोर्नाडीब्रह्मणोश्च

---

* संभवादिति २ पु० पा० ।

समुच्चयं स्वीकृत्य त्रयाणां विकल्पस्यापि स्वीकारादुरं सर्वेषां द्वारभेदेन समुच्चयस्यैव स्वीकार इति भावः । **विकल्पफलके ऽभ्युच्चयइति ।** तया वा युक्त्या प्रकृतार्थनिर्णयो ऽनया वा युक्त्येति विकल्पफलके युक्त्यन्तरसमुच्चये अयमपि चेति शब्दो न भवतीत्यर्थः । **इदानीमतुल्यार्थत्वाच्च* न विकल्प इत्याहेति ।** यद्यपि प्रागपि द्वारभेदेनातुल्यार्थत्वमुक्तं तथापि जीवस्य ब्रह्मणेव नाडीपुरितद्भ्यां तादात्म्यसंपत्तिरूपविवक्षिताधाराधेयभावयोग्यता नास्तीत्येवं विधान्तरेणातुल्यार्थत्वमिदानीमुच्यतइति भावः । **समप्रधानत्वे हीति ।** सिद्धान्त्यभिमतः समुच्चयः समप्राधान्ये न भवति किं तु गुणप्रधानतयेति न च वयमिह तुल्यं नाड्यादिसमुच्चयं प्रतिपादयाम इत्यादिभाष्येण वर्ण्यते तस्य पूर्वपक्षिकृतविकल्पनिरासार्थत्वेनोपयोग इत्यर्थः । **पूर्ववाक्ये उक्त इति ।** एता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं चा†मुष्मादादित्यात्प्रतायन्ते ता आसु नाडीषु सृप्ता इति वाक्ये इत्यर्थः‡ ॥

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥

आत्यन्तिकत्वेनेति । ब्रह्मप्राप्तेरौत्पत्तिकीति तावदुत्सृष्टा मुक्ता ३७० । १२
वौत्सर्गिकत्वेनावधारितेति सुषुप्तावपि सत्संपत्तिः पूर्वाधिकरणे वर्णिता । तस्या अप्यात्यन्तिकत्वप्राप्तावविद्याशेषत्वसमर्थनेनापवादो ऽस्मिन्नधिकरणे वर्ण्यतइत्यर्थः । एतेन मिथ्याज्ञानातिरिक्तामविद्यामपहत्य मिथ्याज्ञानवदविद्याया अपि निवृत्तिं चापाद्य पूर्वपक्षः प्रवर्ततइति दर्शितम् अन्यथा पूर्वपक्षानुत्थानात् ।

सुषुप्तस्य नाडीपुरीततोरवस्थानसंभवादित्याक्षिप्यतइति । ननु यदि नाडीपुरीततोरवस्थानं संभाव्य सत्संपत्तिराक्षिप्यते कथं तर्हि तेनान्योत्थानं समर्थ्यते संपन्नस्योत्थानं न संभवतीति युक्त्या खलु तत्समर्थनीयम् । उच्यते । यदि सिद्धान्तिना सुषुप्तस्य सत्संपत्तिरिष्यते तदा तेनान्यस्यैवोत्थानमभ्युपेतव्यम् । यदि कर्मानुस्मृत्याद्यनुरोधात्तस्यैवो-

---

* अर्थादिति १ पु॰ पा॰ । † अमुं चेति नास्ति २ पु॰ ।
‡ तत्र द्वितीयं तदभावाधिकरणं पूर्णम् ।

त्थानं वाच्यं तदा तस्य स*त्सम्पत्तिर्हीतव्येति नाडीपुरीततोरवस्थानमुपपद्यते । अतो न पूर्वाधिकरणसिद्धान्तसिद्धिरित्याक्षेपे तात्पर्यम् । एवं च स एवोत्तिष्ठत्यन्यो वेत्यनियमपूर्वपक्षो ऽपि सत्संपत्त्यभ्युपगमतत्परित्यागपक्षद्वयानुसारेण व्यवस्थितः पर्यवस्यति । तथा सत्येव चात्यन्तिकीं सत्संपत्तिं प्राप्तस्य कथं पाक्षिकतया ऽपि पुनरुत्थानं पूर्वपक्षीक्रियतइति शङ्काऽप्यनवकाशा भवति । **येषामीश्वर एवेति ।** ईश्वरादन्यः संसारी नास्तीति वादिनामीश्वर एव वा संसारी स्यात् स्वप्नदृष्टमनुष्यादिवत्कल्पितो वा । आद्ये तस्य न सुषुप्तिर्न प्रबोधः । द्वितीये प्रातिभासिकस्य नोत्थानादिव्यवहार इति दूषणार्थः । **द्वे अहनी द्व्यह इति ।** द्वे अहनी समाहृते इत्यर्थे तद्धितार्थोत्तरपदसमाहारे चेति समासः । राजाहःसखिभ्यष्टजिति समासान्तप्रत्ययः । रात्राह्नाहाः पुंसीति पुँल्लिङ्गता† ॥

३७२ । ६ **मुग्धे ऽर्धसंपत्तिः परिशेषात् ॥ १० ॥**

ऐक्यप्रत्यभिज्ञानादिति । यद्यप्यत्र व्यक्त्यैक्यप्रत्यभिज्ञानं न संभवति सुखमहमस्वाप्समिति परामर्शोन्नीतसौषुप्तिकानुभवयोग्याविद्यापरिणामविशेषः सुषुप्तिरित्यभ्युपगमे व्यक्तिभेदस्य स्फुटत्वाद्विशेषविज्ञानसंसर्गाभावकूटः सेत्यभ्युपगमे ऽपि तत्तत्कालं मिलितकूटानुप्रविष्टविज्ञानप्रागभावप्रध्वंसव्यक्तीनां विपर्यासेन कूटभेदस्यावर्जनीयत्वात् । तथापि क्व चिन्निमीलितनयनत्वनिश्चेष्टत्वादिविशिष्टे पुरुषे सुषुप्तिमेव गतवतो मूर्च्छितमपि तथाभूतं पश्यतो भवति जात्यैक्यविषया प्रत्यभिज्ञा सैवेयमस्य सुषुप्तिरिति स एवायं शङ्खध्वनिरितिवत्सैवात्र पूर्वपक्षसाधनसमर्था पूर्वपक्षिणा विवक्षिता । एवं च पूर्वाधिकरणे व्यक्त्यैक्यविषया प्रत्यभिज्ञा इह जात्यैक्यविषयेति भेदसद्भावे ऽपि प्रत्यभिज्ञासामान्यं संगत्यर्थं‡ विवक्षितमिति नासंगतिः । **स्थिरकारणस्वीकारादिति ।** क्षणिकवादएव समर्थस्य क्षेपायोगात्समर्थे बीजक्षणे सत्यङ्कुरजननमवश्यंभावीति नियमः । स्थिरवादिभिस्तु समर्थस्यापि सहकारिविरहसमये कार्याऽजनकत्वमभ्युपगतमिति भावः । **अद्धयेति ।** तत्पदार्थाभे-

* सदिति नास्ति २ पु० ।
† अत्र तृतीयं कर्मानुस्मृतिशब्दविध्यधिकरणं पूर्णम् ।
‡ गत्यर्थमिति १ पु० पा० ।

दर्सिद्ध्यर्थं त्वंपदार्थशोधनाय पूर्वपक्षे जागराद्यवस्थाचतुष्टयेनासम्बन्धो जीवस्य परिभावनीयः सिद्धान्ते तु मूर्च्छया ऽपीत्येवं फलभेद इत्यर्थः* ॥

न स्थानतो ऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥ ३१२ । २१

पृथिव्याद्युपाधिप्रयुक्तैः सर्वगन्धत्वग्रामनीत्वादिगुणैः शाण्डिल्योपकोसलविद्याद्युपास्यस्य ब्रह्मणः स्वरूपेण भेदो न निषिध्यते किं तु ज्ञेयत्वेन तदर्थमेवेदमधिकरणमिति ये मन्यन्ते तन्मतं स्वयं दूषयति **परस्तु कश्चिदिति । सिद्धान्तादिति ।** दोषोपाधिप्रयुक्तं चक्षुरादीनां भ्रमकरणत्वमिव पृथिव्याद्युपाधिप्रयुक्तं ब्रह्मणः सविशेषत्वं सत्यमित्येवंरूपपूर्वपक्षस्य सिद्धान्ताद्विशेषमाहेत्यर्थः । **अयमेव स इत्यद्वैतप्रतिपादकत्वादिति ।** अद्वैतप्रतिपादके च ब्रह्मणः सविशेषत्वं विवक्षितमिति वक्तुं न शक्यं विरुद्धविशेषवता ब्रह्मणा जीवस्याभेदायोगादिति भावः । वचनव्यक्तीराह **किं सल्लक्षणमिति ।** पूर्वपक्षाभिमतप्रथमवचनव्यक्तिप्रतीकोपादानं व्यक्तीरिति बहुवचनं पूर्वपक्षसिद्धान्ताभिमतवचनव्यक्तिद्वयाभिप्रायम् । ननु वचनव्यक्तित्रयोपन्यासाद् द्वौ पूर्वपक्षौ एकः सिद्धान्त इति प्रतिभाति । अग्रे च सल्लक्षणं प्रकाशलक्षणं च ब्रह्मेत्येकस्यैव पूर्वपक्षस्य निराकरणं दृश्यते कथमेतद्युज्यत इत्याशङ्क्य द्वितीयतृतीये द्वे अपि वचनव्यक्ती सिद्धान्तिन एवेति व्याख्यातुं द्वितीयवचनव्यक्तिमुपादत्ते **किं सल्लक्षणमेवेति ।** नन्वियं वचनव्यक्तिः कथं सिद्धान्त्यभिमता एवकारेण प्रकाशलक्षणत्वव्यावर्तनात् सिद्धान्ते च प्रकाशलक्षणत्वाङ्गीकारादित्याशङ्क्य प्रकाशलक्षणाद् भेदव्यवच्छेद एवकारार्थो न तु प्रकाशलक्षणत्वव्यवच्छेदार्थ इति व्याचष्टे **एवकार इति ।** नन्वेवकारद्वयं प्रकाशलक्षणत्वसल्लक्षणत्वव्यवच्छेदार्थं न भवति चेत् सिद्धान्ते ऽप्युभयलक्षणं ब्रह्मेति पूर्वपक्षात्तस्य को विशेष इत्याशङ्क्याह **ततश्चेति ।** सत्प्रकाशभेदेनोभयरूपं ब्रह्मेति पूर्वपक्षः । तयोरभेदेनैकरूपं तदिति सिद्धान्त इति विशेष इत्यर्थः । सच्चेति साध्ये अवैयर्थ्यादिति हेतुं विवृणोति **सच्छ्रुतेरिति ।** ३१४ । ३

नन्वेकदेश्यभिमतसिद्धान्तनिराकरणप्रस्तावेनाप्युभयलक्षणमेव ब्रह्मेति शक्यं वक्तुम् । पूर्वाभ्युपगमविरोधप्रत्यया†दिति भाष्यं सिद्धान्त्यभिमतस्यैव

* अत्र चतुर्थं मुग्धाधिकरणं पूर्णम् । † प्रसङ्गादिति १ पु॰ पा॰ ।

पक्षान्तरस्य निराकरणार्थं प्रवृत्तमिति प्रतिभाति । तस्य तादर्थ्यमयुक्तम् । उभयलक्षणत्वं पूर्वपक्षीकृत्य तन्निराकरणार्थतयैव द्वितीयाधिकरणप्रवृत्तेरेकदेशिभिरुक्तत्वादित्याशङ्क्य तदपि भाष्यं पूर्वपक्षस्यैव निराकरणार्थमित्याह

३७४ । ९ **पूर्वपक्षानुत्थानएवेति** । ननु पूर्वपक्षनिराकरणार्थत्वे प्राग् यदि तावदनेकलिङ्गत्वमित्यादिभाष्योक्तहेतुना पौनरुक्त्यमिति चेन्न । प्राक् पूर्वाधिकरणे सिद्धस्यार्थस्य पुनः साधनवैयर्थ्यमिति सिद्धान्तदूषणतयोक्तम् । इदानीं पूर्वाधिकरणसिद्धान्ते स्थिते तदनुपमृद्य पूर्वपक्षोत्थानं न संभवतीति पूर्वपक्षदूषणतयोच्यतइति मुखभेदेनापौनरुक्त्यात् । यद्यपि तत्र सिद्धान्तदूषणमपि पूर्वपक्षानुत्थानमुपजीव्योक्तम् अन्यथा सिद्धान्तवैयर्थ्यात्त्ययोगात् तथापि पूर्वपक्षानुत्थानं द्वारीकृत्य सिद्धान्तदूषणपर्यन्तं पूर्वभाष्यम् इदं तु भाष्यं पूर्वपक्षानुत्थानमात्रपर्यवसायीति भेदः । अत एवाचार्यैरिह पूर्वपक्षानुत्थानएवेत्येवकारः कृतः । वस्तुतस्तु केवलसल्लक्षणत्वे केवलबोधलक्षणत्वे चोक्तदोषं पश्यन् सिद्धान्ती यद्यगत्या स्वनिराकृतमेव पूर्वपक्षं परिगृह्णीयात् तदा तस्य न केवलं पूर्वपक्षिण इह पूर्वाधिकरणसिद्धान्तोक्तयुक्तिविरोधमात्रम् अपि तु स्वाभ्युपगमविरोधोऽपीत्ययमेवार्थो भाष्यस्य स्वारसिकः ।

नन्वेकदेशिसिद्धान्ते किं दूषणं दृष्ट्वा परमार्थतस्त्वभेद एव प्रकृष्टप्रकाशवदित्यखण्डसिद्ध्या स्वसिद्धान्ताभिमततयोपसंहारः कृत इत्याशङ्क्य टीकाभिप्रेतं परसिद्धान्तदूषणं दर्शयति **यश्च सत्ताप्रकाशयोरिति** । सर्वात्मना सत्ताप्रकाशयोरभेदाभ्युपगमे सद्बोधशब्दयोः पर्य्यायत्वप्रसङ्गः । अनिर्वाच्यप्रवृत्तिनिमित्तभेदेन पर्यायत्वसमाधाने त्वस्मत्सिद्धान्त एव । न च तथा निर्णयार्थमेवाधिकरणान्तरमिहास्त्विति शङ्कनीयम् । स्वरूपतटस्थलक्षणोपपादनार्थं प्रवृत्ते जन्माधिकरण*एव स्वरूपलक्षणेनाखण्डसिद्धिरिति पूर्वपक्षस्य निराकृतत्वेन पुनरिह शङ्काऽनुत्थानादित्यर्थः । **जर्तिलाः** आरण्यतिलाः । **गवेधुकाः**† आरण्यगोधूमाः । शारीरस्तेजोमयोऽमृतमयः पुरुष इत्येतदनन्तरमियं पृथिवीति वाक्यादनुषक्तपदानि योजयन्ना-

३७६ । ११ काङ्क्षां पूरयति **सर्वेषां भूतानां मध्विति** । मधुशब्दस्य सृज्यत्वसाम्याल्लक्षणीयमर्थमाह **उपकारकाविति** । वाक्यद्वयादनुषङ्गलब्धानि पदानि

* व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ २ ।   † गवीधुका इति १ पु॰ पा॰ ।

योजयित्वा वाक्यान्तरं दर्शयति **तयोश्च सर्वाणि भूतानि मध्विति** । एतावदनुषङ्गश्चकारसामर्थ्यान्मध्वित्युपक्रमाच्चेत्याह **चशब्दादिति** । नानेवेतीवशब्दार्थमाह **आभासमिति** । वस्तुतोऽपारमार्थिकमित्यर्थः । **स्वयं च न कारणमिति** । वस्तुतः कारणं न भवति सत्यस्य कार्यस्याभावादिति भावः । **पञ्चेति लिङ्गशरीरमुच्यतइति** । मनःप्राणविज्ञानानां लिङ्गशरीरान्तर्गतानां पञ्चपुच्छादिनिरूपणादिति भावः* ॥

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥ ३७७ । ३

ननु यदित्यस्य गच्छदित्यर्थश्चेद्वाय्वोरेव संग्रहो नाकाशस्येत्याशङ्क्याह **ततश्चेति** । यदित्यनेन गच्छद्रूपं एकत्रैवावस्थानाभावो लक्ष्यते स व्याप्तिः आकाशस्यापि तुल्य इति भावः । **यद्यपि पञ्चभूतेति** । समष्टिलिङ्गशरीरस्य पञ्चभूतकार्यत्वात्तदभिमानिनो हिरण्यगर्भस्य तथात्वमुक्तम् । चक्षुरिन्द्रियस्य तैजसत्वाच्चक्षुषोरसत्त्ववचनं गोलकाभिप्रायमित्याह **चक्षुरिति** । **रूपाद्युपलब्धिभिः क्रियाभिरिति** । रूपाद्युपलब्धिभिर्गमनादानक्रियाभिश्चेत्यर्थः । **आध्यात्मिकेति** । आध्यात्मिकलिङ्गशरीरान्तर्गतस्य चक्षुरादेः समष्टिरूपलिङ्गशरीरान्तर्गतादित्यादिव्यष्टित्वात्समष्ट्यभिमानिनो हिरण्यगर्भस्य व्यष्ट्यभिमानिदेवतात्वमप्यस्तीति हिरण्यगर्भत्वोक्तिरित्यर्थः । एवं च लिङ्गशरीरस्य सकलस्थूलशरीरवर्तित्वेऽपि तदभिमानिदेवतायाश्चक्षुष्यवस्थानं श्रुतिबलादङ्गीकार्यमिति तात्पर्यम् । **अथ वेति** । आदित्यश्चक्षुर्भूत्वेति श्रुतौ चक्षुरनुग्राहकत्वेनादित्यस्य तस्मिन्नवस्थानं प्रसिद्धं स आदित्यः प्राणात्मनाऽऽदित्यमण्डलमधितिष्ठन् हिरण्यगर्भ एव हिरण्यगर्भस्य† तथात्वेन पुराणेषु प्रसिद्धेः । तस्य श्रुतिपुराणसिद्धाया जगदण्डादुत्पत्तेः छन्दोगोपनिषदि आदित्ये समाम्नानाच्चेति भावः । **कार्यं शरीरं करणमिन्द्रियमिति** । आधिदैविकाध्यात्मिकभेदे द्विविधे सत्त्यदित्युभे द्विविधसद्रूपभूते आदित्यमण्डलचक्षुर्गोलके चेत्येतत्सर्वं समष्टिव्यष्टिस्थूलशरीररूपं कार्यशब्देनोक्तम् । द्विविधरसभूतं समष्टिलिङ्गशरीरद्वयं करणशब्देनोक्तमिति विभागः । यद्यपि द्विविधमपि लिङ्गशरीरं द्विविधसकलस्थूलशरीर-

* अत्र पञ्चमम् उभयलिङ्गाधिकरणं पूर्णम् ।

† हिरण्यगर्भस्येति नास्ति २ पु॰ ।

वर्ति तथापि तदभिमानिनो मण्डलगोलकयोः सन्निधानात्तस्यापि तयोर्वर्तनमभिमान्यभेदोपचारादुक्तम् । तदभेदोपचारादेव तस्य द्वैतस्य पुरुषस्येति अनन्तरवाक्ये पुरुषशब्देनाभिमानिवाचिना करणद्वयस्य परामर्शः । कार्यकारणभावेनेति पाठे तु मूर्तामूर्ते रूपे कारणे तद्रसतयोक्तानि कार्याणि ।
३७८ । २० स्पष्टो विभागः । **मूर्त्तामूर्त्तेति** । मूर्तामूर्तविषयेण जागरानुभवेन जनितया वासनया जन्यं विज्ञानं स्वप्नविभ्रमस्तद्विषय इत्यर्थः । विज्ञानमयमिति पाठेऽपि विज्ञानविषय इत्येवार्थः । **दृष्टान्तैरुपमां दर्शयतीति** । महारजनादिरूपसमानं रूपमादर्शयतीत्यर्थः । **महारजनं हरिद्रेति** । नैघण्टुकास्तु महारजनं कुसुम्भमाहुः । **वासनाजन्येति** । वासनाजन्यपूर्वपूर्वस्वप्नविश्रान्तिवशादुत्तरोत्तरे स्वप्नेषु प्रतीयमाने प्रपञ्चे महारजनादिसमानरूपाध्यासानुकूलः कोप्याकारो लिङ्गशरीरे तादात्म्येनारोप्यते । तन्निष्ठा रूपभेदाः स्वाप्नपदार्थेषु भासन्ते तत्परिणामत्वात्स्वाप्नपदार्थानामिति भावः । ननु सत्सामान्यस्य बोधरूपविशेषसत्त्वान्नाच मूर्तामूर्तविशेषव्यावृत्तावपि सत्तासामान्यं व्यावर्ततेत्याशङ्क्याह **तच्चेति** । तत्सत्त्वस्य सामान्यात्मकत्वं सवासनमूर्तामूर्तसाधारण्योक्त्या स्पष्टीकृतमित्यर्थः । अयमाशयः । यथा शोणकर्कादयोऽश्वविशेषाः शोणोऽश्वः कर्कोऽश्व इत्यादिव्यावृत्तानुवृत्तव्यवहाराद् एवं मूर्तामूर्तब्रह्मरूपत्वेनोक्ताः पृथिव्यादयः सद्विशेषाः । सती पृथिवी सज्जलमित्यादिव्यवहारात् । ततश्च यथा शोणकर्कादियावद्विशेषव्यावृत्तावश्वत्वसामान्यं व्यावर्ततएवं पृथिव्याद्यात्मकयावद्रूपविशेषव्यावृत्तौ सामान्यं व्यावर्तेत । न च बोधरूपविशेषान्तरसद्भावात्तदव्यावृत्तिः शङ्कनीया द्वे वावेत्यवधारणे ब्रह्मणि मूर्तामूर्तरूपद्वयव्यतिरेकेण रूपान्तरं नास्तीत्यवगमात् । एवं च बोधात्मकत्वं सहैव ब्रह्मणा धर्मिणा श्रुतमप्यसदेव स्यादिति । यथाहुरित्युदाहृतस्यार्थस्य निर्विशेषं सामान्यं शशविषाणवन्न भवेदिति योजनान्तरभ्रान्तिं वारयति **निर्विशेषं यत्तत्सामान्यं न भवेदिति योजनेति** । ननु विशेषणत्वादेव योग्यत्वमसिद्धमित्याशङ्क्याह **अप्रमितत्वमेवेति** । प्रमितत्वमेव प्रतिषेधायोग्यत्वं न तु विशेषणत्वमिति । ब्रह्मणस्तु प्रमित-
३७९ । २१ त्वमसिद्धं रूपद्वयसन्निषेधायानुवादोपपत्तेरिति भावः । **कर्क ईषल्लोहित इति** । अमरसिंहस्त्वश्वप्रकरणे पृष्ठः स्थूरी सितः कर्क इति श्वेतमश्वं

कर्कमाह । **निषेधेन निषेध्या सत्तेति ।** निर्विशेषं सामान्यं न भवेदिति निषेधेन सत्ता किमर्थस्वभावभूता निषेध्या उत प्रमाणसंबन्धात्मिकेति सम्भावितविकल्पद्वयप्रतिषेधार्थमभावोप्रमितिर्वेत्युक्तमित्यर्थः । द्वे वावेत्यव-धारणं तु रूपद्वयातिरिक्तां ब्रह्मणो बोधरूपतां न व्यवच्छिनत्ति किं तु रूपद्वयस्यासमुच्चयमित्याचार्यैः प्रागेव व्याख्यातम् । **तत्र यथा विधि-** ३८० । १३
प्राप्तस्येति । यजतिषु येयजामहङ्करोतीत्येतदनन्तरं नानुयाजेष्वित्यनेना-नुयाजेषु येयजामहकरणं निषिध्यतइति पूर्वपक्षे निषेधस्य निषेध्यप्राप्तिपूर्व-कत्वान्न हिंस्यादित्यत्र हिंसनस्येव यजतिषु येयजामहकरणस्य लोकतः प्राप्त्यभावाच्च तस्य यजतिषु येयजामहं करोतीत्यनेनैव प्राप्तिर्वक्तव्या । तथा च सर्वात्मना प्रतिषेधप्रापकशास्त्रस्याप्रामाण्यप्रसङ्गाद् विधिप्रतिषेध-शास्त्रद्वयप्रामाण्यायानुयाजेषु येयजामहविकल्प आश्रित इत्यर्थः* ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजि-द्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ वेदान्त-कल्पतरुपरिमले तृतीयाध्यायस्य द्वितीयः पादः ॥

---

* अत्र षष्ठं प्रकृतैतावत्त्वाधिकरणं पूर्णम् । एतदुत्तरम् एतदधिकरणावशिष्टभागस्य सप्तमाष्टमाधिकरणयोश्च समुपलब्धेषु केषु चिदपि परिमलपुस्तकेषु व्याख्यानग्रन्थो नोपलभ्यते । विशदत्वाद् व्याख्यानाऽनपेक्षां मत्वा ग्रन्थकर्त्रा तावान् भागो न व्याख्यात इति प्रतीयते ।

अथ तृतीयाध्यायस्य तृतीयः पादः ।

९१ । २ पूर्वपादेन सङ्गतिं प्रदर्शयन् पादार्थमाह **द्वितीयपादइति** । तत्त्वम्पदार्थशोधनेन निर्विशेषब्रह्मणि निर्द्धारिते मोक्षसाधनं तज्ज्ञानो*पयोगिसगुणनिर्गुणवाक्यार्थनिर्धारणं क्रियतइति पादसंगतिः । हिरण्मयादिवाक्यं सगुणविषयं प्रतर्दनादिवाक्यं निर्गुणविषयमित्येवंरूपसगुणनिर्गुणवाक्यार्थनिर्धारणस्य प्रथमाध्यायेन कृतत्वे ऽपि नानाशाखाम्नातगुणोपसंहारेण तन्निर्धारणं न कृतमिति तदर्थो ऽयं पादः । तथा च गुणोपसंहारः पादार्थ इति भावः । ननु सगुणवाक्यार्थनिर्द्धारणं विचार्यत्वेन प्रतिज्ञातस्य निर्विशेषस्य ज्ञाने नोपयोगीत्यत आह **सगुणेति** । चित्तशुद्धिद्वारेणेत्युपलक्षणम् । चित्तैकाग्र्यदृढिमसंपादनद्वारेत्यपि द्रष्टव्यम् । ननु गुणोपसंहारः केषुचिदेवाधिकरणेषु चिन्त्यते केषुचिद्विद्यानामभेदः केषुचिद्भेदः अतो नैकः पादार्थ इत्यत आह **पदार्थोपसंहारेणेति** । गुणोपसंहार एव पादार्थः । अभेदचिन्ता तदुपयोगिभेदचिन्ता तदपवादत्वेनेत्यर्थः । अभेदचिन्ता गुणोपसंहारोपयोगिनी चेन्निर्गुणविद्यायां किमिति सा न कृतेत्याशङ्क्याह **अधिकरणैरिति** । यद्यप्यानन्दाधिकरणे† आनन्दादिभावरूपगुणोपसंहारचिन्ता अक्षरधियामित्यधिकरणे‡ स्थूलत्वाद्यभावरूपगुणोपसंहारचिन्तेत्यधिकरणद्वयमेव निर्गुणविद्याया अवगतपरस्परगुणोपसंहारविषयं तथाप्यात्मगृहीति§रित्यधिकरणे प्रथमवर्णके पूर्वपक्षे आत्मा वा इदमेक एवाग्रआसीदित्यैतरेयवाक्यं हिरण्यगर्भविषयम् । द्वितीयवर्णकपूर्वपक्षे सदेव सोम्येदमग्रआसीदित्यादिच्छान्दोग्यवाक्यं सत्तासामान्यविषयमित्युभयत्रापि पूर्वपक्षयोरानन्दादिगुणानुपसंहारः सिद्धान्ते तदुपसंहार इति निर्गुणविद्यागतगुणोपसंहारफलत्वात् कामाद्यधिकरणे‖ निर्गुणविद्यायां सगुणविद्यागतसत्यकामादिगुणोपसंहारस्य साक्षान्निरूपितत्वाच्च तदभिप्रायमधिकरणैरिति बहुवचनम् ।

---

* साधनतज्ज्ञानेति २ पु० पा० ।

† व्या० सू० अ० ३ पा० ३ सू० ११ ।

‡ व्या० सू० अ० ३ पा० ३ सू० ३३ ।

§ व्या० सू० अ० ३ पा० ३ सू० १६ ।

‖ व्या० सू० अ० ३ पा० ३ सू० ३९ ।

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥ ३९१ । १

नामरूपेति । काठककालापादिर्नामभेदः । क्व चिच्छाखायां दर्शपूर्णमासयोराग्नीषोमीय एकादशकपालः श्रूयते शाखान्तरे द्वादशकपाल इति रूपभेदः । कारीर्यादिषु शिरोभूमिभोजनादिर्धर्मविशेषः पुनरुक्तिः । अग्निहोत्रादिविधेः शाखाभेदेनाऽविशेषपुनःश्रवणरूपो ऽभ्यासः । निन्दा उदितानुदितहोमयोः । अशक्तिः सर्वशाखोदितसकलाङ्गपहार्थतावच्छाखाऽध्ययनाशक्तिः । मैत्रायणीयानामन्वारोहसंज्ञकेषु स्थलारोहणमन्त्रेष्वग्निचयनस्य समाप्तिः अन्यत्रान्येषामिति समाप्तिभेदः । केषां चिच्छाखायामुदितहोमव्यतिक्रमे प्रायश्चित्तम् अन्येषामनुदितहोमव्यतिक्रमे इति प्रायश्चित्तभेदः । यदि पुरा दिदीक्षाणाः स्युर्बृहत्सामानमतिरात्रमुपेयुरुपेतं ह्येषां रथन्तरं यद्यदिदीक्षाणाः रथन्तरसामानमतिरात्रमुपेयुरित्यनिष्टप्रथमयज्ञानां द्वादशाहदर्शनं शाखाभेदेन द्वादशाहभेदे ऽन्यार्थदर्शनरूपं लिङ्गम् । दिदीक्षाणाः प्राग्दीक्षितवन्तः । लिटः कानचि द्विर्वचनम् । कथं प्राग्दीक्षितानां द्वादशाहदर्शनं द्वादशाहभेदे लिङ्गमुच्यते शाण्डिल्यशाखायामेष वाव प्रथमो यज्ञो यज्ञानां यज् ज्योतिष्टोमो य एतेनानिष्ट्वा ऽथान्येन यजते गर्तपत्यमेव तत्कुरुतइति सर्वक्रतूनां जोतिष्टोमपाश्चात्यत्वमङ्गं विहितम् । यद्येक एव द्वादशाहो नानाशाखासु विधीयते तदा तस्य ज्योतिष्टोमपूर्वकत्वनियमादनिष्टप्रथमयज्ञस्य द्वादशाहदर्शनं नोपपद्यते । यदि प्रतिशाखं द्वादशाहभेदः स्यात्तदा शाण्डिल्यशाखायाम् अथान्येन यजतइत्यन्यशब्दस्य शाण्डिल्यशाखागतद्वादशाहादिविषयत्वोपपत्तेः शाखान्तरगतद्वादशाहानां ज्योतिष्टोमपाश्चात्यत्वस्याविधानात् । यस्यां शाखायामनिष्टप्रथमयज्ञस्य द्वादशाहदर्शनं तच्छाखागतद्वादशाहविषयत्वेन तदुपपद्यते । एवं नामभेदादिहेतुभिः प्रतिशाखमग्निहोत्रादिकर्म भिद्यतइति सूत्रार्थः ।

विरुद्धकालद्वयाऽसंभवादिति । यद्यपि कालद्वयं विकल्पेन संभ- ३९२ । ४
वति तथापि निन्दयोदिताऽनुदितहोमपक्षद्वये ऽपि वैगुण्यापादकमुदितानुदितकालद्वयमपि कर्मैक्ये न संभवतीति भावः । न केवलं निन्दया वैगुण्यमवगम्यते किं तूदिताऽनुदितकालव्यतिक्रमे प्रायश्चित्तोपदेशेनाप्येतद्दर्शयति

प्रायश्चित्तमिति । निन्दा प्रायश्चित्तइति । अन्धं तमः प्रविशन्तीत्या-
दिषु केवलयोर्विद्याकर्मणोर्निन्दासद्भावे ऽपि भिन्नशाखागतयोरग्निहोत्रयोरिव
३९२ । ७ विद्ययोर्भेदापादिका निन्दा नास्तीति भावः । **अस्त्यथैष ज्योतिरित्या-
दिनेति ।** प्राग् ज्योतिष्टोमे प्रकृते अथैष ज्योतिरित्याद्युपक्रमः । **ज्योतिरि-
ति हि प्रातिपदिकमात्रं न त्वस्य नामत्वमभिव्यक्तमिति ।** मात्र-
शब्देन यजिसामानाधिकरण्यं व्यावर्त्यते । अथैष ज्योतिरित्यत्र यजिसामा-
नाधिकरण्याभावाद् न क्रतुनामत्वमभिव्यक्तमित्यर्थः । प्रतीकमात्रमिति क्व-
चित्पाठः । तत्र ज्योतिष्टोमनामावयवमात्रमिति नास्य प्रकृतज्योतिष्टो-
मनामत्वमभिव्यक्तमित्यर्थः । यद्यपि तदभिव्यक्तिसत्त्वे तदिष्टमेव प्रकृते
ज्योतिष्टोमे सहस्रदक्षिणालक्षणगुणविधिरिति वदतः पूर्वपक्षिणस्तथाप्य-
प्रयोजकमिह नामभेदाभेदयोरित्यग्रिमयन्थे नाम यथा पूर्वपक्ष्यभिमते अ-
भेदे न प्रयोजकम् एवं सिद्धान्त्यभिमते भेदे ऽपि न प्रयोजकमिति वक्ष्यमा-
णत्वात् । तत्र कथमभेदेन प्रयोजकं ज्योतिरिति प्रकृतज्योतिष्टोमनाम्ना
तदभेदप्रतीतेरित्याशङ्कानिवारणार्थत्वेनेदं वाक्यमिति नेतव्यम् । **प्रायेणा-
ख्यातसंबन्धीति ।** आख्यातसंबन्धस्यापि प्रागेव क्लृप्तलब्धप्रवृत्तिनिमि-
त्तकं नाम नाख्यातपरतन्त्रं यथा ऽऽग्नेयादीनां प्रयाजादीनां च यागानां
सन्निधौ श्रूयमाणे दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यधिकारवाक्ये यजेते-
त्यस्य संनिहितसर्वयागानुवादस्वारस्ये ऽपि न तत्पारतन्त्र्येण दर्शपूर्णमासना-
म्नस्तावद्यागवृत्तित्वं किं त्वमावास्यापौर्णमासीकालयुक्तेष्वाग्नेयादिषु क्लृप्तप्रवृ-
त्तिनिमित्तकत्वात्तावन्मात्रवृत्तित्वमभिप्रेत्य प्रायेणेत्युक्तम् । तथा चाक्लृप्तप्र-
वृत्तिनिमित्तकं नामाख्यातपरतन्त्रं तथाभूतं च ज्योतिरिति नाम अतस्त-
स्याख्यातपारतन्त्र्यादाख्यातस्य च प्रकृतज्योतिष्टोमानुवादस्वारस्यात्तत्परतन्त्रं
नामापि तु तत्रैव वर्तितुमर्हतीति भावः । **ज्योतिरिति कर्मसामानाधि-
करण्येन कर्मनामव्यवस्थापनादित्यादिहेतूनामिति ।** अत्र टीकाया-
मसन्नपि ज्योतिरित्ययमंशः कस्य कर्मनामत्वं व्यवस्थितमित्याकाङ्क्षितांशपू-
,, । २३ रणार्थं स्वयमध्याहृतः । **द्वादशशतं दक्षिणेति ।** श्रुतौ द्वादशमिति
शब्दस्तदस्मिन्नधिकमिति दशान्ताड्ड इति सूत्रविहितडप्रत्ययान्तः । ततश्च
द्वादशाधिकं शतमित्यर्थः । द्वादशशतं गाव इत्युदाहृतश्रुतिवाक्ये गोशब्दा-

भावे ऽपि तत्र निर्दिष्टा द्वादशशतसंख्या गौश्चाश्वश्चाश्वतरश्च गर्दभश्चेत्यादिपूर्वसंदर्भप्रकृतगोविषयेति दक्षिणाधिकरणे* निर्णीतत्वाद्गाव इत्युक्तम् । अन्यायश्चानेकशब्दत्व†मिति न्यायः प्रकृते उदाहर्त्तव्यः । अतो न्यायान्तरोदाहरणं दृष्टान्तार्थमिति व्याचष्टे **यथानेकार्थत्वमिति ।**

ज्योतिर्ज्योतिष्टोमशब्दयोरेकार्थत्वादिति । यद्यपि वसन्तवाक्ये ३९३ । १
ज्योतिःशब्द एकदेश्येकदेशसंबन्धेन ज्योतिष्टोमशब्दं स्मारयति स्मृतज्योतिष्टोमशब्दाभिहितो यागो वाक्यार्थान्वयी न त्वत्र ज्योतिःशब्दो ज्योतिष्टोमस्य वाचकः । ज्योतिष्टोमज्योतिःशब्दौ नैकस्य कर्मणो वाचकौ इत्यनुपदमेवाभिहितत्वात् । वसन्तादिवाक्ये ज्योतिःशब्द एकदेशान्तरलक्षणार्थ इत्यनुपदमेव वक्ष्यमाणत्वाच्च । तथापि यथा कथं चिज् ज्योतिष्टोमयागप्रतीत्युपयोगित्वेन श्रुतौ ज्योतिःशब्दः प्रयुक्त इत्येतावता तयोरैकार्थ्यमुक्तम् । नामतयैकार्थप्रतीत्युपयोग्यनेकशब्दप्रसिद्धावन्यत्र सुलभतरायामपि क्लिष्टोदाहरणम् । अथैष ज्योतिरित्यत्र यस्य ज्योतिःपदस्य ज्योतिष्टोम इति नामान्तरवति वृत्तिरन्याय्येति विचिकित्सते तस्यैवान्यत्र तस्मिन् वृत्तिर्दृष्टेति दर्शयितुं **यत्तु वसन्तादिवाक्य इति ।** वसन्तादिवाक्ये इव अथैष ज्योतिरित्यत्राप्युत्सर्गबाधो ऽस्त्विति भावः । **एकदेशान्तरलक्षणार्थ इति ।** अत्र लक्षणार्थइत्यनेन एकदेश्येकदेशसंबन्धमूलकज्योतिष्टोमशब्दस्मृत्यर्थत्वं विवक्षितं न त्वेकदेशान्तरे एकदेशिनि वा लाक्षणिकत्वं शक्यसंबन्धाभावात् । न हि नामैकदेशस्य किं चिच्छक्यम् एकदेशस्य एकदेशिनश्च शक्यसंबन्धो वा ऽस्ति । न चैकत्रेतीति प्रतीकग्रहणानन्तरं वसन्तवाक्ये ज्योतिषा यजेतेति आख्याततन्त्रा संज्ञा आख्यातं च कालविधिसंक्रान्तमिति पूर्वकर्मानुवदेदेषा तु प्रथमान्तत्वादतन्त्रेति प्रकृतकर्मबुद्धिं व्यवच्छिनत्तीत्यर्थ इति शुद्धः पाठः । वसन्तवाक्ये हि काललक्षणनिमित्तसंक्रान्तत्वाद्विधेः कर्मसिद्ध्यनुपपत्तिः नान्यत्रेत्यर्थ इति क्व चित्पाठो दृष्टः सो ऽप्यत्रैवार्थे कथं चिद्योज्यः । तस्मिन् पाठे नान्यत्रेत्यस्य न त्वत्रेत्यर्थः । तथा च वसन्तवाक्ये कर्मविध्यनुपपत्तेराख्यातेन पूर्वकर्मानुवदनीयमिति तत्समानाधिकरणज्योतिःशब्दस्यापि कथं चित्तत्प्रत्यायकत्वमाश्रितं न त्वत्र तदाश्रयणीयम् प्रथमान्ते तथानुपपत्तिस्फूर्त्यभावादिति । तस्यै-

* जै॰ सू॰ अ॰ १० पा॰ ३ सू॰ ३९-४१ ।   † जै॰ सू॰ अ॰ १ पा॰ ३ सू॰ २६ ।

व नाम्नः कर्मान्तरवाचकत्वादित्याहेति । प्रथमान्तज्योतिःशब्दस्य वि-
धास्यमानकर्मनामतायास्तदानीमनभिव्यक्तावपि पूर्वासंबन्धिपदेन तेन प्रकर-
णविच्छेदादिति भावः । अत्र हि द्रव्यदेवतेति यजमानद्रव्यदेवतासंबन्धो या-
गेनैव कर्तव्य इति द्रव्यदेवतासंबन्धस्य यागाविनाभावात्तेन यागानुमितिः ।
टीकायां गुणाधिकरणसंदेहोपन्यासपूर्वपक्षकोटौ द्रव्यमात्रस्य विधिरुक्तो न
देवतायाः तत्र किमर्थं देवताया अपि विधिर्नोक्तः अविधाने च देव-
३९३ । २१ तायाः कुतो लाभ इत्याशङ्क्याह **यद्यपीत्यादिना** । ननूभयोरपि वाक्ययोः
समसमयवृत्तेरिति टीकोक्तमयुक्तम् । आमिक्षावाक्ये स्वार्थमभिधाय पर्यवसिते
वाजिनवाक्यप्रवृत्तेः* । न ह्युत्तरवाक्यप्रवृत्तिपर्यन्तं पूर्ववाक्यमपर्यवसिताभि-
धानं भवतीति क्व चिद् दृष्टमित्याशङ्क्यान्यत्रातथाभावे ऽपि प्रकृते तथाभा-
वमुपपादयति **अयमभिप्राय इति** । यत्र पूर्वापरवाक्यद्वयमपि किंचिदं-
शकल्पनया पूरणीयं भवेत्तत्र नानेकं कल्पनीयं गौरवादिति भावः । **तद्धि-
तान्तपदश्रुतिमात्रादिति** । विश्वेदेवा देवता अस्या इति विग्रहवाक्ये अ-
स्या इत्येतदर्थत्वेनामिक्षायाः प्रवेशात्तत्समानार्था तद्धितश्रुतिरपि द्रव्यदेवता-
संबन्धार्था । वाजिभ्य इति चतुर्थ्यन्तशब्दस्तूद्देश्यदेवतामात्रमभिधत्ते न
तस्या द्रव्यसंबन्धमपि स तु तत्र वाक्यगम्य एवेति भावः । **तथा सतीति** ।
विग्रहवाक्यस्यस्यास्या इति पदस्यामिक्षायां पर्यवसानार्थम् आमिक्षापदसम-
भिव्याहारापेक्षा ऽस्तीतीहापि वाक्यबोध्य एव संबन्ध† इति भावः । **श्रौत
एवामिक्षासंबन्ध इति** । पर्यवसिताभिधानस्य यत्प्रत्यायनाय पदान्त-
रसमभिव्याहारापेक्षा तत्रैव वाक्यं प्रमाणं यत्र त्वपर्यवसिताभिधानाय
पदान्तरापेक्षा तत्र पदान्तरसंनिधानेन पर्यवसिता श्रुतिरेव प्रमाणमिति
भावः । टीकायां तथापीत्यारभ्योपलक्षयतीत्यन्तेन ग्रन्थेन प्रकृते श्रुतितो
वाक्यस्य दौर्बल्याभावमुपपादयितुमुपक्रम्य तद्विहाय यद्यपीत्यादिना विचा-
रान्तरं प्रवर्तितं तदनन्वितमित्याशङ्क्य उपलक्षयतीत्यन्तस्योपरितनग्रन्थे-
३९४ । २४ नान्वयं दर्शयति **उपलक्षितेषु चेति** । विश्वान् देवानुपलक्षयतीत्युक्ते कथं
वाजिशब्दोक्ता विश्वेदेवाः स्युः शब्दभेदेन देवताभेदादित्याशङ्कायां प्रस-
क्तायां तन्निराकरणेन विश्वान् देवानुपलक्षयतीत्यर्थे स्थिरीकृते सति

* वाक्ये प्रवृत्तेरिति २ पु॰ पा॰ ।

† एकः संबन्ध इति २ पु॰ पा॰ ।

तत्फलमिह वाक्यदौर्बल्याभावलक्षणमग्रे वक्ष्यतइति नानन्वय इति भावः ।
तामेव प्रसक्तामाशङ्कां दर्शयति **नन्विति । हविःप्रदानसमयइति ।** ३९५ । ३
दर्शपूर्णमासयोर्देवतापदापेक्षा निगमाः सन्ति अग्नये जुष्टं निर्वपामि अग्नये
जुष्टं प्रोक्षामि अग्नेः प्रिया धामानि अग्निरिदं हविरजुषतेत्याद्यास्तेष्वाह-
त्याग्निपदश्रवणात् तेष्वियं चिन्ता किं तूद्देशत्याग एवेति भावः । यदि
शब्द एव देवता स्यादर्थरूपा देवता न स्यात्तदा पर्यायाणां न प्रसक्तिरत
आह **अर्थरूपत्वाद्देवतात्वस्येति ।** अस्ति तावदग्न्यादिदेवताशब्देभ्यो
ऽग्नये जुष्टमित्यादिनिगमेषु नानाविभक्त्युत्पत्तिः । ताः तेषां प्रातिपदिकत्व-
मन्तरेण नोत्पद्यन्ते तत्प्रातिपदिकत्वं च नार्थवत्त्वमन्तरेण भवतीति सन्त्य-
ग्न्यादिशब्दानामर्थास्तएव देवताः । सास्य देवतेत्यर्थे ऽग्न्यादिप्रातिपदि-
केभ्यस्तद्धितोत्पत्तिदर्शनादिति भावः । **तत्तु न स्वर्गवासित्वादीति ।**
नाकसत्त्वादिकं देवतात्वं चेन्नाकसदामग्न्याद्यभिमानिनां लोकवेदप्रसिद्धपर्या-
यसद्भावात्पर्यायाः प्रसज्येरन् न तु तदिह देवतात्वं विवक्षितं मासादि-
देवताननुगतत्वादित्यर्थः । यद्यपि मासाद्यभिमानिदेवताः सन्ति अत
एवार्चिरादिपर्वभूतानां मासादीनामातिवाहिकत्वं वक्ष्यते तथापि तन्नानुगतं
दद्भ्यः स्वाहा हनूभ्यां स्वाहेत्यादिहोमेष्वश्वस्य दन्तहनुशकृन्मूत्रादीनामपि
देवतात्वदर्शनादिति भावः । अस्तु हविः प्रति प्राधान्येन निर्देश्यत्वं
देवतात्वं तन्निर्देश एव पर्यायान्तरेण किं न स्यादित्याशङ्क्य सूत्रं योजयन्
विधिशब्देनैव निर्देश्यत्वे हेतुमाह **तत्राग्नेय इतीति ।**

शब्दान्तरेण निर्देशे देवतात्वं न स्यादिति । अयमाशयः । ,, । ११
आग्नेय इति तद्धितेनाग्निरूपा देवता यागाङ्गत्वेन विधीयतइति वक्त-
व्यम् । अनुष्ठेयमुपकारकं चाङ्गं भवति न चाग्नीन्द्रादिरूपा देवता
यागमध्ये स्वरूपेणानुष्ठातुं शक्याः । न च ऋत्विजामिव देवतानां हस्ता-
दिनोपकारकत्वमस्ति तस्मात्तद्वाचकशब्दोच्चारणमेव पुरुषस्यानुष्ठेयं स्ववा-
चकशब्दद्वारैव तासामुपकारकत्वं चेत्यास्थेयम् । तथा चावश्यकत्वाद-
ग्न्यादिशब्दानां प्रथमोपस्थितत्वाच्चाग्न्यादिशब्दयुक्तेन यागेनेष्टं भावयेदित्ये-
वाग्नेयादिपदयुक्तविधिवाक्यार्थः । हविस्त्यागकाले यद्वाचकशब्देनोद्देशः
क्रियते तस्य देवतात्वमर्थसिद्धमिति तदेवार्थसिद्धं देवतात्वं तद्धिते-

रनूद्यते यथा ऽऽग्नेयमष्टाकपालं निर्वपतीति विकृतीष्टिवाक्ये ऽश्रुतो ऽपि द्रव्यदेवतासंबन्धो विधीयते श्रुतो ऽपि निर्वापो न विधीयते किं तु प्रकृतितः प्राप्नुवन्ननूद्यते । एतत्सर्वमभिप्रेत्योक्तमाचार्यशबरस्वामिना शब्द एव हविषा संबध्यते तत्संबन्धादर्थो देवता भविष्यतीति । तस्माच्छब्दान्तरेण निर्देशे विधेयाग्न्यादिशब्दनिर्देशार्थप्राप्यमग्न्यादीनां देवतात्वं न सिध्येदिति आदित्यः प्रायणीयश्चरुरिति विकृतिविशेषे क्व चिदादित्यदेवताकयागविधायकमिदं वाक्यमाचार्यैर्दृष्टं भविष्यति । ज्योतिष्टोमे तु प्रायणीयचरुरदितिदेवत्यः । क्व चित्कोशे यः पापयक्ष्मगृहीतः स्यात्तस्मा एतमादित्यं चरुं निर्वपेदित्यादित्यचरुवाक्योदाहरणं दृष्टम् । तदपि शाखान्तरस्थमाचार्यैर्दृष्टमित्येवोपपादनीयम् । प्रसिद्धतैत्तिरीयशाखास्थे तु वाक्ये बहुवचनान्तादित्यशब्दस्तद्धितान्तः । आदित्यानेव स्वेन भागधेयेनोपधावतीति वाक्यशेषात् ।

३९५ । १८ **सर्वसंमतानुष्ठानविरोधादिति ।** नन्वनुष्ठानविरोधः पूर्वपक्षिणो न दूषणम् । मीमांसानुसार्यनुष्ठानविरोधेनैव हि सर्वत्र पूर्वपक्षः । अन्यथा ऽऽग्नेययागएव सर्वसंमतानुष्ठानविरोधादिति वक्तुं* शक्ये किं बकबन्धविधिप्रयासेन । यद्यस्मिन्नधिकरणे पर्यायान्तरेण देवतां निर्दिश्यापि हविःप्रदानमस्त्विति विप्रतिपद्यमानः पूर्वपक्षी सौर्यचरौ निर्वापमन्त्रैः सूर्यायेत्येवानुष्ठानं न कदाप्यादित्यायेत्यनुष्ठानमित्यस्मिन्नंशे विप्रतिपत्तिरहितः स्यात्तदा सर्वसंमतानुष्ठानविरोधादित्येवं तत्रापि संमतमनुष्ठानं विरुद्ध्येतेत्येतदर्थतया योजयितुं शक्यं न त्वेतदस्ति । विधिशब्दस्य मन्त्रत्वा† इत्येतदधिकरणानन्तरं प्रवृत्ते तथोत्तरस्यां ततो तत्प्रकृतित्वा‡दित्यधिकरणे अस्तु प्रकृताविव सौर्यं चरुं निर्वपेदिति विधिविहितायां विकृतावपि हविःप्रदाने सूर्यशब्दनियमः निर्वापादिनिगमेषु सूर्यायेत्यादिवदादित्यायेत्यादिरपि कदाचिन्निर्देशो ऽस्तु सौर्यं चरुं निर्वपेदित्युत्पत्तिवाक्येन हविःप्रदानमात्रे सूर्यशब्दयोगस्य विहितत्वात्प्रकृतावग्नये जुष्टमित्यादिपाठवत्सौर्यचरौ सूर्याय जुष्टमित्यादिपाठाभावाच्चेत्येव पुनः पूर्वपक्ष इत्युत्थानदर्शनात् । तस्मादनुष्ठानविरो-

---

* कर्तुमिति २ पु. पा. ।   † जै. सू. अ. १० पा. ४ सू. २३ ।

‡ जै. सू. अ. १० पा. ४ सू. २५ । तत एतत्प्रकृतित्वादिति २-५ पु. पा. ।

धोक्तिर्न सङ्गच्छतइति चेदुच्यते । अनुष्ठानविरोधादित्यत्रानुष्ठानशब्दः करण-व्युत्पत्त्याऽनुष्ठापकविधिपरः । तथा चायमर्थः । सौर्यं चरुं निर्वपेदिति वाक्येन सूर्यशब्दप्रयोगस्वरूपमात्रे न विधीयते किं तु प्रयोगान्तर्गताश्च निर्वापादि-निगमा इति तेष्वपि सूर्यपदसिद्धिः । न चैवं सति प्रकृतौ निर्वापादिनिग-मेष्वग्निपदपाठो व्यर्थः स्यात्प्रयोगाङ्गाग्निपदविधानत एव तत्सिद्धेरिति वाच्यम् । प्रयोगाङ्गाग्निपदनिर्देशस्य प्रयोगान्तर्गतेषु सर्वेषु पदार्थेषु प्रतिपदार्थं प्राप्तौ निर्वापादिषूज्जित्यन्तेषु केषु चिदेवेति तत्परिसंख्यानार्थत्वात् । एवं च यदा सौर्यचरौ सूर्यपदयोगविधानं निर्बाधं निर्वापप्रभृत्यङ्गपर्यन्तमाक्रामति तदा किमु वक्तव्यमुत्पत्तिपदवाक्ये ऽग्निपदयोगविधानं प्रधानं हविःप्रदानं न त्यजतीत्येवमुत्तराधिकरणसिद्धान्तस्मारणेनोपन्यस्ताधिकरणसिद्धान्तदृढी-करणार्थेयमनुष्ठानविरोधोक्तिरिति न का चिदनुपपत्तिः । **विश्वेदेवपदस-** ३९५ । २० **न्निहितानामिति ।** यद्यप्यन्यत्र तद्धितादिविग्रहवाक्यस्थसर्वनामपरामर्श-नीयं येनार्थगतेन रूपेण सन्निहितं तेनापि परामृष्टुं शक्यमिति न सन्निधा-पकशब्दरूषितत्वेन परामर्शनियमः तथापि प्रकृते विश्वेषां देवानां शब्दैक-गम्यानामनुपस्थितरूपान्तराणां सन्निधापकशब्दरूषिततयैवोपस्थितिनियमो ऽस्तीति तात्पर्यम् । **स च न्यायो वचनेन बाधिष्यतइति ।** यथा ह्युदि-तेष्टावाग्नेयेन्द्रश्रुतिबलीयस्त्वन्यायः पूर्वदेवतापनयदेवतान्तरसंयोजनवचनेन बाध्यते एवमत्रापीत्यर्थः । **इति तदिद*मुत्थितमिति ।** समुच्चितद्रव्यद्वययु-क्तमेकं कर्म विधीयतइति टीकावाक्यालोचनया समुत्थितमित्यर्थः । **द्रव्यद्वय-युक्तैककर्मविधिरिति ।** पूर्वपक्षे आमिक्षावाक्यप्राप्तकर्मानुवादेन वाजिनवाक्ये गुणविधिरिति कथं संदेहटीकायामुक्तमित्याकाङ्क्षायामाह **एवं चेति ।**

तदापातप्रतिभानमादायेति । आपातप्रतिभानमित्येतदापातद- ३६९ । १ र्शिनो विनेयान् प्रत्युक्तम् । वस्तुतस्तु संदेहटीकोक्तमपि विमर्शपूर्वकमेव । तथा हि द्विविधो ऽस्मिन्नधिकरणे सिद्धान्तन्यायः प्रवर्तते । उत्पत्तिवा-क्यशिष्टामित्रावरुणे यागे वाक्यान्तरेण वाजिनं निवेशनं न लभतइत्युत्प-त्तिशिष्टबलीयस्त्वन्याय एकः । श्रौतामित्रावरुणेषु विश्वेषु देवेषु वाक्येन वाजिनं निवेशनं न लभतइति श्रुतिबलीयस्त्वन्यायो द्वितीयः । तत्र द्विती-

* तत इदमिति ५ पु॰ पा॰ ।

यस्य टीकायां द्वेधोपमर्दः कृतः । वैश्वदेवीशब्दः श्रुतिर्न भवतीति श्रुतित्वे ऽपि वचनबलादिह श्रुतिबलीयस्त्वन्यायो न प्रवर्ततइति च । एवमाद्यस्यापि सिद्धान्तन्यायस्य द्वेधोपमर्दो विवक्षितः । आमिक्षोत्पत्तिशिष्टा न भवतीति उत्पत्तिशिष्टत्वे ऽपि वचनबलादिहोत्पत्तिशिष्टबलीयस्त्वन्यायो न प्रवर्तइति च । अत्र प्रथमः प्रकारः समक्षमयेति टीकायां कण्ठत उक्तः । द्वितीयस्तु श्रुतिबलीयस्त्वन्यायस्य वचनबलाद्बाधोक्त्यैव न्यायतौल्यादूहितुं शक्यतइति कण्ठतो नोक्तः । दृष्टं ह्यभ्युदयेष्टौ श्रुतिबलीयस्त्वन्यायस्येवोत्पत्तिशिष्टबलीयस्त्वन्यायस्यापि पूर्वदेवतापनयदेवतान्तरसंयोजनवचनबलाद्बाधनम् । एवमुत्पत्तिशिष्टबलीयस्त्वन्यायबाधने पूर्वकर्मानुवादेन वाजिनमात्रगुणविधिरिति संदेहटीकोक्तप्रकारो ऽपि संगच्छते । वाक्याभ्यां द्रव्यद्वययुक्तमेकं कर्म विधीयतइति पूर्वपक्षोपसंहारटीका ऽपि पक्षद्वयसाधारण्येन योजयितुं शक्या । प्रथमवाक्येनैकगुणविशिष्टतयोत्पन्नं कर्मानूद्य द्वितीयवाक्येन गुणान्तरविधिरिति पक्षे ऽपि हि वाक्यद्वयेनैकं कर्म गुणद्वययुक्तं सिध्यति न त्वेकवाक्येन वैश्वदेवीत्यस्य श्रुतित्वोपपादनार्थे प्रवृत्तेः । स्यादेत*देवमित्यादिसिद्धान्तटीकाग्रन्थोपसंहारे तद्धितश्रुत्यवगतामिक्षालक्षणगुणावरोधात्पूर्वकर्मासंयोगिवाजिनद्रव्यं स्वसंबन्धिकर्म पूर्वस्माद्भिनत्तीति वाक्यमपि प्रथमवाक्यविहितं कर्मानूद्य द्वितीयवाक्येन गुणमात्रविधानमिति पूर्वपक्षानुमितिं सूचयति । अन्यथा हि श्रौतामिक्षावरुद्धानां विश्वेषां देवानां वाक्यप्रमाणकवाजिनसंबन्धासंभवाद् युगपद् द्रव्यद्वययुक्तविश्वेदेवदेवताकैकयागविधिर्न संभवतीति वक्तव्यं स्यात् । तस्मात्संदेहटीकायां पूर्वपक्षशरीरोपन्यासो ऽपि विमर्शपूर्वक एव ।

३९६ । ३ **श्रुतिबलीयस्त्वन्यायमादाय सिद्धान्तयतीति** । श्रुतिबलीयस्त्वमङ्गीकृत्य विश्वेदेवामिक्षासंबन्धे वैश्वदेवीशब्दस्य श्रुतित्वं नास्तीति विवादेन पूर्वपक्षे तस्य तत्र श्रुतित्वोपपादनम् । तस्य श्रुतित्वमङ्गीकृत्य श्रुतिबलीयस्त्वन्यायः प्रकृते न प्रवर्ततइति विवादेन पूर्वपक्षे तत्प्रत्युपपादनं चेत्युभयमप्यत्र विवक्षितम् । आमिक्षाविशिष्टानित्यामिक्षासंबन्धमिति च वस्तुवृत्तकथनं न त्वामिक्षाया अप्यभिधेयकोटिनिवेशाभिप्रायम् । एवं च सति कुतो

---

* एतदिति नास्ति २ पु॰ ।

ऽस्यामिक्षावाचकत्वमित्याचार्यग्रन्थो न तु विश्वेषु देवेषु न तत्संबन्धेनापि तत्संबन्धिमात्रइति टीकाग्रन्थश्च न संगच्छते। कुत आमिक्षापदानपेक्षप्रत्ययप्रसङ्गः कुतो वा तत्राऽनपेक्षेति वाक्ययोः पौनरुक्त्यशङ्कां परिहरति **द्वयं हि सर्वत्रापाद्यमिति । यदिति द्वितीयान्तः शब्द इति ।** स च पदाभिधेयवस्तुपर इत्यग्रे स्फुटीभविष्यति । **अनपेक्षावगतसाधनभावाया इति ।** वैश्वदेवीति तद्धितेनामिक्षा द्रव्यान्तरानपेक्षा हविरवगम्यते तत्सापेक्षाया हविष्ट्वे सामर्थ्याभावेन तद्धिताऽनुत्पत्तिप्रसङ्गादिति भावः । एवं च यदा श्रुतिबलीयस्त्वन्यायस्य द्रव्यद्वयसमुच्चयप्रापकेण वचनेन बाधः पूर्वपक्षिणोक्तः तदा न केवलया श्रुत्या वाक्यस्य बाधाभावमात्रं किं तु निरवकाशदेवतातद्धितश्रुतिबाधो ऽपि स्यादित्यतो वाक्यस्यैव स्वतो दुर्बलस्य सावकाशस्य द्रव्यदेवताविशिष्टकर्मान्तरविधायकत्वकल्पनं युक्तमिति । एवं समुच्चयपक्षे दोषं दृष्ट्वा वचनबलेन प्राप्यमाणं वाजिनं निरपेक्षसाधनभावसमर्पकतद्धितश्रुतिबाधपरिहाराय विकल्पे ऽन्वयं लभतामिति पूर्वपक्षी ब्रूयादित्यभिप्रायेण शङ्कितो विकल्पपक्षो ऽपि निराकृतः ।

मृदूक्त्या वतिप्रयोग इति । कुपितत्वेनावगते ऽपि राद्धि त्वयि ३९७ । १०
कुपित इव वर्ततइत्युक्तिरिव नित्यत्वेनावगते नित्यवदित्युक्तिर्मृदूक्तिरिति भावः । स्यादेतद्वाक्यं यागान्तरविधानेनैव तद्धितश्रुतिसंबन्धसामान्यमक्षतम् अग्नीषोमीयपुरोडाशस्येवाग्निना । एवं च विशिष्टविधिकर्मान्तरापूर्वान्तरकल्पनागौरवपरिहाराय तद्धितश्रुतेरेव संबन्धसामान्यरूपावकाशान्तरकल्पनं युक्तम् । न चैवं सति देवताया अलाभप्रसङ्गः । देवतापेक्षायां कॢप्तहविरेकदेशसंबन्धानां बुद्धिस्थानां विश्वेषां देवानां देवतात्वकल्पनोपपत्तेरित्याशङ्कोत्तरत्वेन न चाश्व इत्यादिग्रन्थमवतारयति **यत्तूक्तं वचनेनैवेति ।** कॢप्तो योगः कल्प्यमानां रूढिमिवाबुद्धिस्थरूढिं बुद्धिस्थयोगो बाधतइति शङ्कापरिहारार्थं टीकायां प्रधानं यत्तत्प्रकृतं तदेव सर्वनाम परामृशति नोपसर्जनमिति नोपसर्जनन्यायो दर्शितस्तं विवृणोति **वैश्वदेवशब्दादिति ।** उपसर्जनीभूतामित्यस्य नोपलक्षयिष्यतीत्यस्य च मध्ये एवं सति कर्मान्तरविधिपक्षइति पदान्याकरग्रन्थेषु दृश्यन्ते तान्यत्र नान्वितानि हेत्वन्तरमाहेति प्रागवतारिते एवं च सतीति टीकाग्रन्थे चकारः किं चेत्यर्थो हेत्व-

न्तरमाहेत्युक्त्या विवृत: । एवं सतीत्यंशे विवरणीये स्थिते तद्विवरणार्थानि तत्रैव प्रतीकोपादानानन्तरं लेखनीयानि व्यत्यस्तकाकुपदजनितभ्रान्तिभिर्लेखकैरिह प्रमादाल्लिखितानि । यद्वा तत्र व्याख्यातव्य एव सन्नेवं सतीत्यंश इहाकृष्य व्याख्यात: । न चाश्वत्वइत्यादौ नोपलक्षयिष्यतीत्यन्ते द्वितीयवाक्ये ऽप्यनुवृत्तिसूचनाय तत्रैव व्याख्याने एवं सति विकल्पसमुच्चयो न प्राप्स्यते इति प्रथमवाक्यएवान्वय: प्रतीयेत एवं सति नोपलक्षयिष्यतीति द्वितीयवाक्ये ऽपि विवक्षितस्तदन्वयो न प्रतीयते* । ननु नोपसर्जनन्यायो न सर्वनाम्ना परामर्शे प्रवर्तते अथ शब्दानुशासनं केषां शब्दानामिति महाभाष्यदर्शनात् । सर्वनाम्ना ऽनुसन्धिर्वृत्तिच्छन्नस्येति वामनसूत्राच्चेत्यभिप्रेत्याशङ्कते **ननूपसर्जनभूता अपीति** । सर्वनामश्रवणे तेनोपसर्जनस्यापि परामर्शो भवति न चेह वाजिपदे सर्वनामपदश्रवणमस्ति किं तु तद्धितान्तविग्रहवाक्ययोरैकार्थ्यनियमात् तत्र विग्रहवाक्यस्थसर्वनामानुप्रवेशमात्रम् । न चात्र तद्धितान्तत्वमपि निश्चितमस्ति बुद्धिस्थविषयादपि क्लिष्टयोगादक्लिष्टरूढेरेव न्याय्यत्वात् ।

१ । १७ **प्रामाणिके चेतीति** । तद्धितस्य हविर्देवताभावरूपसंबन्धविशेषविषयत्वं परित्यज्य किंचिद्विशेषपर्यवसानसापेक्षसंबन्धसामान्यविषयत्वकल्पनेनापि तत्प्रतिपत्तिगौरवमप्रामाणिकं विशेषपर्यवसानलम्भकाभावात् । न च यागस्य देवतापेक्षया श्रुतहविरेकदेशसंबन्धानां विश्वेषां देवानां देवतात्वकल्पनया संबन्धविशेषपर्यवसानं स्यादिति वाच्यम् । देवतापेक्षस्य यागस्य श्रवणाभावात् । तद्धितस्य संबन्धसामान्यविषयत्वे च यागकल्पकस्य द्रव्यदेवतासंबन्धस्य प्रागनुपस्थिते विशिष्टविध्यादिकल्पनागौरवं तु प्रामाणिकम् । पर्यग्निकृतं पात्नीवतमुत्सृजति आज्येन शेषं संस्थापयतीत्यादिषु दर्शनादिति भाव: । **एकां भावनां विशिंषन्तीति** । अपूर्वरूपफलैक्योपाधिकं भावनैक्यं न तत्स्वरूपैक्यं प्रयत्नव्यक्तीनां बहुत्वाद्गुणभूतधात्वर्थानां समुच्चय इति क्रय इवारुणिमादीनामिति भाव: ।

एकस्मादेव धातोर्विधानादिति । यद्यप्युदाहृतेषु यजत्यादिषु बहुभ्यो धातुभ्य एक: प्रत्यय इति शङ्का न प्रवर्तते† बहुधात्वश्रवणात्-

* प्रतीयेतेति २ पु. पा. ।

† न वर्तते इति २ पु. पा. ।

थापि बदरामलकबिल्वा इति बहुभ्यो नामभ्यः सुप इव बहुभ्यो धातुभ्यस्तिङ उत्पत्तिरन्यथापि नास्तीति दर्शयितुमिदमुक्तम् । एकधात्वर्थानुरक्ता भावना न धात्वर्थान्तरेण संबध्यतइति सामान्यतः खल्वग्रे साध्यं निर्दिश्यते । ननु परस्परापेक्षाणामेकवाक्यत्वे हि स प्रयोजकः स्यादिति टीकाग्रन्थो वैदिकशब्दानां बोधकतायां पाठक्रमस्याऽप्रयोजकत्वे कथमुपक्रमोपसंहारयोरुपक्रमप्राबल्यव्यवस्था सिध्येदित्याशङ्कानिराकरणार्थत्वेन व्याख्यातुमुचितः । तथा व्याख्याने हि यत्रैकवाक्यता तत्र पाठक्रमः प्रथमचरमभावे नियामक इत्युपक्रमोपसंहारव्यवस्थासिद्धिः । यत्र नैकवाक्यत्वं तत्र बोधकतायां पाठक्रमो न नियामक इति वैषम्यकथनेन परिहारसिद्धेः पाठक्रमस्य प्रयाजानामनुष्ठानक्रमे इव प्रयाजवाक्यानां बोधनक्रमे ऽपि नियामकत्वं स्यादिति शङ्कानिराकरणार्थत्वेन व्याख्यानं तु न युक्तम् । तदा हि प्रयाजवैषम्यं प्रयाजवाक्येषु दर्शनीयम् । प्रयाजाः सर्वे ऽप्यखण्डोपकाररूपं स्वप्रयोजनं परस्परापेक्षया संभूय कुर्वन्तीति तेषां मेलनार्थे युगपदनुष्ठानप्रसक्तौ एकेन कर्त्रा बहूनां युगपदनुष्ठातुमशक्यतया क्रमापेक्षायां पाठक्रमस्तन्नियामक इष्यते । न च प्रयाजवाक्यानाम् अर्थबोधनरूपं स्वप्रयोजनं जनयितुं परस्परापेक्षा संभूयकारित्वपरतया नीयतइत्यपरः क्लेशः । तस्मादिदं व्याख्यानं न युक्तमिति चेत् । उच्यते । इह पाठक्रमाऽनादरे उपक्रमोपसंहारवैषम्यं प्रयाजादियागवैषम्यं चेत्युभयमपि परस्परापेक्षाणामिति टीकाग्रन्थेनैव तन्त्रेण प्रदर्श्यतइत्यभिप्रेत्य । तत्राद्यवैषम्यप्रदर्शनपरतया योजनं स्फुटमित्यपहायाऽस्फुटं द्वितीयवैषम्यपरतया योजनमाचार्यैः प्रदर्शितमिति न दोषः ।

नन्वध्ययनमात्रवतः* इति सूत्रे भाष्यादिष्वध्ययनविधेरर्थावबोधफलकत्वमङ्गीकृतम् । अर्थावबोधः स्त्रीभाक्षरादिष्वव्याप्त इति तत्फलजपपारायणाद्यनुगमेनाधीतेन† स्वाध्यायेन यद्भावयितुं शक्यं तत्फलको ऽध्ययनविधिरिति तदुपपादनीयम् । स्वाध्यायशब्दार्थश्च क्रमविशेषविशिष्टवर्णराशिरित्यध्ययनगृहीतेन विशेष्यांशेन वर्णराशिनेव विशेषणांशेन क्रमेण यद्भावयितुं शक्यं तदप्यध्ययनफलत्वेन संगृहीतं भवति । तथा च यथा विधिपाठक्रमस्य

* व्या· सू· अ· ३ पा· ४ सू· १२ । † अनुगमावाधीतेनेति २ पु· पा· ।

प्रयाजाद्यनुष्ठानक्रमः फलं मन्त्रपाठक्रमस्याऽऽग्नेयाग्नीषोमीययागक्रमः फलम् उपक्रमोपसंहारपाठक्रमस्योपक्रमप्राबल्येन वारुणेष्ट्यश्वदाचोः शेषशेषिभावः फलं काम्येष्टीनां काम्येष्टियाज्यानुवाक्यानां च पाठक्रमस्येष्टिविशेषाणां मन्त्रविशेषाणां च शेषशेषिभावः फलम् एवं समिदादिवाक्यानां पाठक्रमस्य तेषां विध्यनुवादभावः फलं भवन्न निवार्यतामित्याशङ्कापरिहारार्थमिह पाठक्रमादरे ऽपि विध्यनुवादविशेषो न सिध्यतीति प्रदर्शनाय प्रवृत्तं कथं विदित्यादिटीकाग्रन्थमवतारयति **ननु धात्वैक्यादिति ।**

३६८ । २० **प्रत्यभिज्ञानमुक्तमिति ।** प्रत्यभिज्ञया यागैक्ये सत्येकस्मिन् यागे विधिद्वयाऽनपेक्षणादेको विधिरन्यो ऽनुवाद इति विशेषनिर्णयः पाठक्रमेण सिध्यतीति भावः । **आख्यातस्य हीति ।** वैदिकस्य लिङाद्याख्यातस्याप्रवृत्तप्रवर्तकत्वमुत्सर्गः शासनादेव हि तच्छास्त्रं भवेदिति भावः । **किं तद्बलवदपवादकमिति ।** सन्निधिकृतमैक्यप्रत्यभिज्ञानमात्रं विधिश्रुतिस्वभावस्यापवादकं भवितुं नार्हतीति भावः । **तदपेक्षायामिति ।** तथा च विधिश्रुत्यपेक्षितानुवादकत्वसिद्ध्यर्थं धात्वर्थस्य पूर्ववाक्यतः प्राप्तिं समर्पयन् सन्निधिर्विधिश्रुतेरनुग्राहको नोपमर्दकः । इह तु गुणश्रवणाभावादनुवादत्वं नापेक्षितमिति विधिश्रुतिः सन्निधिं बाधतइति भावः ।

यदि नामधेयानीति । ननु समिदादीनां पञ्चानां नामधेयत्वमभ्यासात्कर्मभेदे सिद्धे सिध्यत्यभेद इति पूर्वपक्षे एकस्य नामधेयपञ्चकाऽयोगाद्यागविधौ श्रूयमाणं समिदित्येकमेव नाम अनुवादेषु श्रूयमाणं तनूनपातमित्यादिकं विकल्पितदेवतं देवताविधायकत्रिष्णुरुपांशुयष्टव्यइत्यादिमन्त्रवर्णप्राप्तदेवतानुवादेन स्तुतिपरं वा वक्तव्यम् । अत एव च* नाम्न एव च† भेदो नाभ्यासादित्ययुक्ता शङ्केति चेत्सत्यम् । अभ्युपेत्य परिहारान्तरं दर्शयितुमियं शङ्का **अग्निगतपञ्चसंख्यायास्तु उत्पत्तिशिष्टत्वादिति ।** नन्वसौ वाव लोको गौतमाग्निरित्यादीनां पञ्चानामग्नीनां कीर्तनानन्तरं यद्यदित्थं विदुरित्यादौ स एतान् ब्रह्म गमयतीत्यन्ते वाक्ये वेद-

---

* चेति नास्ति २ पु॰ । † चेति नास्ति २ पु॰ ।

नविधानमस्ति तदतिलङ्घ्य य एतानेवं पञ्चाग्नीन्वेदेत्यादौ शुचि: पूत: पुण्यलोको भवतीत्यन्ते उपसंहारवाक्ये वेदनविधानं किमित्यभ्युपगम्यते यत: पञ्चसंख्योत्पत्तिशिष्टा स्यादिति चेत् । उच्यते । उभयत्राप्यार्थवादिकफलश्रवणं रात्रिसत्रन्यायेन फलपरं विपरिणमय्य* लाघवादेकमेवाधिकारवाक्यमवान्तरवाक्यद्वयोपात्तयावद्विशेषणसहितं कल्पनीयम् । तत्रैव च वेदनस्योत्पत्तिरपि पृथगुत्पत्तिवाक्याभावात्तस्मिन् पञ्चसंख्याप्यनुप्रविष्टेत्युत्पत्तिशिष्टत्वं पञ्चसंख्याया उक्तम् ।

षडप्यग्नय: शाखाद्वये ऽप्युपास्या इति । लोकान्तरगमना- ३९८ । १६
गमनयो: पुरुषाहुत्याधारभूता: खलु द्युलोकादयो ऽग्नय: कीर्त्यन्ते प्रत्यक्षाग्निरपि पुरुषाहुत्याधारत्वेन कथ्यतइति द्युलोकादिसाम्यात्सोप्यग्नि: सर्वैरेवोपास्य इति भाव: । ननु टीकायां छन्दोगानामिति वक्तव्ये कथं छान्दोग्यानामित्युक्तिस्तत्राह **छन्दोगेन दृष्टां शाखामधीयतइति ।** छान्दोग्या इति छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्य इति छन्दोगशब्दाद्धर्माम्नाययोरेव ञ्यप्रत्ययो विहित: । छन्दोगेन दृष्टां शाखामधीयतइत्यर्थे ञ्यप्रत्यय: छान्दोग्यरूपापादक: कश्चिदन्यो वा प्रत्यय: पाणिनीये विहितो न दृश्यते । अतो ऽत्र व्याकरणान्तरमन्वेषणीयम् । पाणिनीयानुसारेण तु छान्दोग्यं छन्दोगानामाम्नायो येषामस्तीत्यर्थे मत्वर्थीयाकारप्रत्ययान्तो ऽत्र छान्दोग्यशब्दो वाच्य: । **अधिकस्तु षष्ठो ऽग्निर्विकल्प्यतइति ।** यद्यपि षष्ठो ऽग्निश्छान्दोग्ये ऽप्युपसंहार्य इति वक्तुमुचितं विरोधाभावे ऽपि भाष्येपि तथैवोक्तं तथापि विरोधमभ्युपगम्य षोडशिग्रहणन्यायेन विकल्पो भविष्यतीति भाष्ये य: पक्ष उक्त: स इह दर्शित: । उपसंहारस्त्वग्रिमाधिकरणन्यायेन सेत्स्यतीति स्पष्टत्वान्नोक्त: ।

ननु किं कठप्रोक्तत्वादिनिमित्तानुसरणेनेति । ननु काठक- ३९९ । ९
शब्द: कठ†प्रोक्तत्वनिमित्तो न भवति किं तु कठाम्नायत्वनिमित्त: तस्येदमित्यधिकारे गोत्रचरणाद्वुञिति विहितस्य वुञश्चरणाद्धर्माम्नाययोरिष्टे: कठेन प्रोक्तमित्यर्थे वुञ्प्रत्ययस्य विधानाभावादिति चेत्सत्यम् । आम्नायार्थवुञ्-

---

* विपरिणाम्येति २ पु॰ पा॰ ।

† कठेति नास्ति २ पु॰ ।

प्रत्ययप्रकृतिभूतकठशब्दे प्रोक्तार्थप्रत्ययार्थ*स्याप्यन्तर्भावो ऽस्ति । तत्र कठशब्दस्य कठप्रोक्तशाखाध्येतृवचनत्वात् । अन्यथा कठशब्दस्य चरणवाचित्वाभावेन ततश्चरणलक्षणवुञनुत्पत्तिप्रसङ्गात् । शाखासंबन्धनिमित्तकः खलु चरणशब्दः । कथं कठशब्दः कठप्रोक्तशाखाध्येतृषु वर्तत इति चेत् । इत्थम् । कठशब्दात्कठेन प्रोक्तमित्यर्थे कलापिवैशम्पायनान्तेवासिभ्यश्चेति सूत्रेण वैशम्पायनान्तेवासिलक्षणे णिनिप्रत्यये तस्य कठचरकाल्लुगिति लुकि पुनरपि कठेत्येवरूपे स्थिते ततः कठप्रोक्तां शाखामधीयत इत्यर्थे प्राग्दीव्यतीये अण्प्रत्यये तस्यापि प्रोक्ताल्लुगिति लुकि सति कठशब्द एव लुप्तप्रोक्ताध्येतृप्रत्ययद्वयः (कठप्रोक्तशाखाध्येतृपुरुषवाची) तत्र† कठप्रोक्तशाखायां प्रोक्तप्रत्ययलोपमात्रेण कठशब्दो न प्रयोज्यः किं तु प्रत्ययद्वयलोपेन तदध्येतृपुरुषेष्वेव प्रयोज्यः छन्दोब्राह्मणानि च तद्विषयाणीति सूत्रेण प्रोक्तप्रत्ययान्तानि छन्दांसि ब्राह्मणानि चाध्येतृवेदितृविषयप्रत्ययोत्पादनेनाध्येतृवेदितृविषयाण्येव प्रयोज्यानीति नियमितत्वात् । अतः काठकशब्दार्थे कठप्रोक्तस्यान्तर्भावात् केवलप्रोक्तप्रत्ययान्तस्य च कठशब्दस्य शाखाविद्ययोः प्रयोगानर्हत्वात्कठशाखाध्येतृपुरुषाम्नायवाचिनः काठकशब्दस्य भवानीपतिशब्दस्य भववत् कठप्रोक्तशाखायां वस्तुतः पर्यवसानाच्च काठकशब्दः कठप्रोक्तत्वनिमित्तकत्वेन व्यवहृत इति न दोषः ।

३९९ । १२ ग्रन्थसंबन्धाद्विद्यायां च वृत्तिसंभव इति । न च विनिगमनाविरहः । एकस्यां शाखायां मुख्यवृत्तस्य बह्वीषु विद्यासु लक्षणाभ्युपगमे शक्तिकल्पनालाघवस्य विनिगमकत्वात् । उक्तं हि ।

शाखया ह्येकया योगाद्बहुकर्मावबोधनम् ।
युज्यते कर्मनानात्वं नैकशाखोपलक्षणम् ॥ इति ।

ननु विद्यासु काठकशब्दः कठधर्मत्वनिमित्तो ऽस्तु चरणाद्धर्माम्नाययोरित्यनुशासनादतो मुख्यवृत्तिसंभवे लक्षणा न कल्पनीयेति काठकवाजसनेयकतैत्तिरीयकादिशब्दैर्विद्यानां कठवाजसनेयितैत्तिरीयादिपुरुषधर्मस्य प्रतीतेस्तासां भेदः स्यादित्याशङ्क्याह अङ्गीकृत्यापीति । अपिशब्देनोक्तयुक्ति-

* प्रोक्तप्रत्ययेति २ पु. पा. ।   † ( ) एतदन्तर्गतो ग्रन्थो नास्ति २ पु. ।

रसार्वत्रिकी । केवलप्रोक्तप्रत्ययान्तया याज्ञवल्क्यादिसमाख्यया विद्याभेदसिद्धेः । छन्दोब्राह्मणानीति सूत्रे छन्दोग्रहणे सिद्धे पुनर्ब्राह्मणग्रहणस्य चिरन्तनऋषिप्रोक्तब्राह्मणप्रत्यायनार्थत्वेनाचिरजातयाज्ञवल्क्यादिप्रोक्तब्राह्मणविषयाणां प्रोक्तप्रत्ययान्तानामध्येतृवेदितृविषयत्वनियमाभावादिति सूचयति । **शाखान्तराधिकरणेनेति** । प्रौढ्या ऽभ्युपगते ऐकशास्त्र्यपक्षे पौनरुक्त्यशङ्का । सैद्धान्तिके शास्त्रभेदपक्षे ऽप्येवं योजना । स्वशाखोपयुक्तमपि शास्त्रान्तरे चिन्तितं यत्स्वाभिमतं तदिह न चिन्त्यते । यथा न्यायशास्त्रे चिन्तितं कर्मानुमानादि यथा च पूर्वतन्त्रे चिन्तितम् अग्निहोत्रवाक्यार्थादि । अतः शाखान्तराधिकरणन्याये ऽपि स्वाभिमत एव तत्र चिन्तितः । अतस्तच्चिन्तने पौनरुक्त्यमिति* ॥

उपसंहारो ऽर्थाभेदाद्विधिशेषवत्समाने च ॥ ५ ॥ ४०० । ६

अन्ये ऽपि पक्षा इति । प्रथमे काण्डे अष्टौ पक्षा विचारिताः । तत्र प्रथमपञ्चमसप्तमाष्टमपक्षा इह लिखिताः । वैयर्थ्यदोषत्रयाभ्यां प्रथमपञ्चमपक्षौ दूषयित्वा सप्तमपक्षं दूषयति **अतिदेशस्य चेति** । अखण्डकरणोपकारः समस्तप्रकृताङ्गजन्यदृष्टाऽदृष्टोपकारद्वारा प्रधानस्य फलजननसामर्थ्याद्बोधनम् । तस्य प्रकृतौ क्लृप्तस्य विकृत्यपेक्षितस्य विकृतावतिदेशो भवन् तत्तदुपकाररूपजनकाङ्गरूपपदार्थान् विनोपकारासंभवात्प्राकृतसकलपदार्थविशिष्टविषयो भवतीत्यर्थः । ननु सामान्यतः प्रवृत्तो भवत्वतिदेशस्तस्यैवाज्यभागविषयेण विशेषशास्त्रेणोपसंहारः किं न स्यात् । लुप्तद्वारप्रत्याम्नातप्रतिषिद्धव्यतिरिक्तपदार्थोपसंहारवत् । उच्यते । समान्यतो ऽतिदेशशास्त्रं कल्पयित्वा तस्य विशेषशास्त्रेणोपसंहारणस्य यदाज्यभागमात्रानुष्ठानफलमिष्यते तत् क्लृप्ताद्विशेषशास्त्रात एव भवतीति किं चोदककल्पनया । अथोच्येत अवैयर्थ्याय प्राकृतसकलाङ्गविषयमेवातिदेशशास्त्रं कल्प्यत इति । तत्रेदं दूषणमुक्तमतिदेशस्य चेति ।

उपकारावच्छेद एवेति । अखण्डोपकारस्याज्यभागातिरिक्ताङ्गेभ्यो ऽवच्छिद्याज्यभागयोरेवावस्थापनम् उपकारावच्छेदः । कथमयमाज्यभागविधा-

* अत्र प्रथमं सर्ववेदान्तप्रत्ययाधिकरणं पूर्णम् ।

नतो लभ्यतइति चेत्। इत्थम् । गृहमेधीयस्येतिकर्तव्यताकाङ्क्षस्य प्रत्यक्षश्रुतकॢप्तोपकाराज्यभागसंयोजनाया निराकाङ्क्षतापादनेन तदाकाङ्क्षामूलकचोदककल्पनाप्रतिबन्धस्य द्वारा गृहमेधीयस्य प्रकृतिराहित्यरूपाऽपूर्वतासिद्ध्यर्थमिदमाज्यभागविधानमिति चोदकसंभवत्प्राप्तिकयोः पुनर्विधानसामर्थ्यात्कल्प्यते । ततश्च ताभ्यामेवाखण्डोपाधिसिद्धिरित्यपि कल्प्यते । न चैवं सांग्रहण्यादीनामप्यामनहोमादिनैवाखण्डोपकारः सिध्येदिति विकृतिषु यत्किंचिद्विशेषाकाङ्क्षश्रवणे सति प्राकृताङ्गातिदेशो न स्यादिति वाच्यम् । उपकारद्वारा भवन्ती हि पदार्थेष्वाकाङ्क्षा प्रथमं कॢप्तोपकारेष्वेव भवति प्रकृतिः कॢप्तोपकारपदार्थादर्शनादकॢप्तोपकारानपि सन्निध्याम्नातान् गृहीत्वा तत्तत्पदार्थसामर्थ्यानुसारिण्या दृष्टादृष्टोपकारकल्पनया निर्वृणोति । विकृतिस्तु कॢप्तोपकारप्राकृतपदार्थसत्तां पश्यन्ती सन्निध्याम्नातामनहोमादीनकॢप्तोपकारान्विहाय कॢप्तोपकारान् प्राकृतपदार्थानेवातिदेशप्राप्यान् प्रथमं गृह्णाति ततो निराकाङ्क्षापि सांग्रहण्यादिविकृतिराम्नायवैयर्थ्यपरिहारायामनहोमादीनपि गृह्णातीति भवति विकृतिष्वतिदेशः । उक्तं हि ।

कॢप्तोपकारसाकाङ्क्षाः प्रथमं प्राकृतैः सह ।
संबध्यन्ते समीपस्थं विकाराः प्रोज्भ्य*चोदितम् ॥ इति ।

गृहमेधीयस्य तु सन्निधौ कॢप्तोपकारावाज्यभागौ श्रुताविति तयोः प्रथमं ग्रहणे सति तत एवोपकारशान्तिः कल्प्यते । अन्यथा पुनरुपश्रवणवैयर्थ्यापत्तेरिति विशेषः ।

०१ । १४ **अशक्तेः प्रथमाधिकरणे निरस्तत्वादिति ।** न च परशाखाध्ययनाभावप्रयुक्ताशक्तेस्तत्र निरासे ऽप्यनन्तशाखाम्नातगुणेयत्तापरिच्छेदाशक्तिर्न निरस्तेति वाच्यम् । सर्वज्ञैर्महर्षिभिः प्रणीतेषु कल्पसूत्रेषु कर्मणामङ्गेयत्तेव ब्राह्मवासिष्ठादिषु विद्याकल्पेषूपासनानां गुणेयत्तापि निर्धारितेति तेभ्यस्तत्परिच्छेदसंभवात् ।

प्राप्तयोः† पुनर्वचनादिति । प्राप्तयोः संभवत्प्राप्तिकयोरित्यर्थः । चोदकप्रवृत्त्यभावात्पूर्वपक्षगतपरिसंख्यापक्षो ऽपि व्युदस्त इति तस्मिन् पक्षे चो-

---

* प्रोह्येति १ पु· पा· । † प्राप्तयोरिति नास्ति २ पु· ।

दकप्रवृत्तिरस्तीत्यष्टमपक्षो ऽपि परिसंख्यापक्ष एव । आज्यभागातिरिक्ताङ्गवर्जन-रूपस्य परिसंख्याशब्दार्थस्य तत्रापि सत्त्वात् । तथापि पञ्चमपक्षे शाब्दी परिसंख्या तत्राज्यभागयागविधेस्तदितरयागपरिवर्जने लक्षणाभ्युपगमात् । अत एव सा परिसंख्या त्रिदोषेत्युक्तम् । अष्टमपक्षे त्वार्थी परिसंख्येति विशेषः । न च विद्यास्वपि शाखान्तरतः संभवत्प्राप्तिकानां गुणानां पुनः श्रवणमस्ति तद्गुणान्तरपरिवर्जनफलकं स्यादिति वाच्यम् । तस्य गुणोपसंहारार्थविद्यैक्यप्रत्यभिज्ञानार्थत्वेनान्यथासिद्धत्वादिति भावः । आज्यभागतदितराङ्गसाध्योपकारे अतिदेशप्राप्ते इत्यत्रोपकारस्तोमे ऽतिदेशप्राप्ते इति क्व चित्पाठः । तत्र मूलगतपिण्डशब्दव्याख्यानार्थः स्तोमशब्दस्तदङ्गजन्यदृष्टादृष्टोपकारसमुदायार्थः । उपकारावच्छेद इत्यत्र तज्जन्यस्य फलजननसामर्थ्योद्बोधनरूपस्याखण्डोपकारस्यैवाज्यभागमात्रजन्यत्वेनावच्छेदः न तु दृष्टादृष्टोपकारसमुदायस्याङ्गान्तरजन्यदृष्टोपकाराणामाज्यभागजन्यत्वासंभवात्प्राप्तौ* पुनर्विधानमेव बलवद्बाधकमिति तत्र नास्तीति† भावः‡ ।

अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥ ४०२ । ३

प्रजापतिः कर्मज्ञानाधिकृतः पुरुष इति । वक्ष्यमाणवागादिवृत्तिरूपाणां प्रजानामपत्यानां पतिरीश्वरस्तत्तत्कार्येषु नियोजने समर्थः कर्मज्ञानेषु लौकिकवैदिकेष्वधिकृतः पुरुषः क्षेत्रज्ञः कर्मज्ञानानि हीन्द्रियपाटवसापेक्षाणि तदपत्यानीन्द्रियवृत्तय इति । यद्यपि तदपत्यानीन्द्रियाणीति व्याख्यातुं युक्तं ते ह वाचमूचुरित्याद्युपरितनसंदर्भे तदपत्यरूपेषु देवेषु वागादीनामेव ह्यनुप्रवेश उक्तः न तु तद्वृत्तीनां बृहदारण्यकभाष्ये ऽपि तथैव व्याख्यातं सात्त्विकवृत्त्या संपन्ना देवास्तामसवृत्तिप्रधाना असुरा इति टीकाया अपि तत्रैव स्वारस्यम् । तथाप्युद्भवाभिभवरूपस्पर्द्धोक्तिश्छान्दोग्यगतसंग्रामोक्तिश्च परस्परभिन्नासु वृत्तिष्वेव सङ्गच्छत इत्येवं व्याख्यातम् । छान्दोग्यभाष्ये ऽप्येवमेव व्याख्यातम् । प्रजापतिः कर्मज्ञानाधिकृतः पुरुषः तस्य शास्त्रीयाः स्वाभाविक्यश्च करणवृत्तयो विरुद्धास्तदपत्यानीव तदुद्भवत्वादिति । वृत्तिवृत्तिमदभेदविवक्षया न व्याख्यानयोः परस्परविरोधः ।

---

* प्राप्ते इति २ पु॰ पा॰ । † तत्त्वात्र नास्तीति २ पु॰ पा॰ ।

‡ अत्र द्वितीयम् उपसंहाराधिकरणं पूर्णम् ।

अविध्यत्सन्निति । विषयासङ्गरूपदोषेण पाप्मना वेद्धुमैच्छ*न्नित्यर्थः । व्यध ताडन इति धातोः सन्प्रत्ययान्तस्य लङि रूपम् । **न विद्याभेदकमिति ।** उद्गातृशब्दस्योद्गीथे लक्षणायामुभयथापि विद्यैक्यं भवतीत्यर्थः । उद्गीथ उद्गानक्रियेत्यभिप्रेत्य टीकायां लक्षणोक्ता । यद्युद्गीथावयव ओँकार इति व्यवहाराद्गीयमानवर्णसमुदायरूपा द्वितीया भक्तिरुद्गीथस्तदा सौकर्यातिशयेन कर्मणः कर्तृत्वविवक्षयोद्गातृशब्द उद्गीथस्य वाचक इत्यपि समर्थयितुं शक्यम् । ओँकारस्येत्यस्य षष्ठ्यन्तस्याकाङ्क्षापूरणार्थं कृत्वेति शेषाध्याहारेऽपि तथा हीत्यग्रिमग्रन्थेन नान्वय इत्याशङ्क्य कृत्वेत्यन्तं भाष्यप्रतीकोपादानमित्याह एतच्चेति । **यस्य यजमानस्येति ।** के चित्तु हविरिति द्वितीयान्तम् अभिरभागे इत्यभेर्लक्षणे कर्मप्रवचनीययुक्ते द्वितीयेत्येवमवान्तरवाक्यभेदं विना व्याचक्षते पुरस्तादित्येतच्च पूर्वस्यां दिशीति व्याचक्षते । निरुप्तं हविरभ्युदेति ज्ञायते देवतार्थमसंकल्पितस्य यजमानद्रव्यमात्रस्य हविष्ट्वाभावात् । एवं च यद्यपि सिद्धरूपं यजमानद्रव्यमात्रम् अनाविष्टव्यापारं चन्द्रोदयीयलक्षणत्वेन न विशेषणत्वेन निवेशयितुं शक्यं तथाऽपि हविःपदात् प्रतीतस्य सङ्कल्पमात्रस्य विशेषणतोपपत्तौ न पदान्तरप्रतीतः शकटानीताद्व्रीहिराशेः पुरोडाशार्थैकदेशग्रहणलक्षणो निर्वापोऽपि निवेशनीयः । अनाकाङ्क्षितोद्देश्यविशेषणविवक्षायां वाक्यभेदापत्तेरिति भावः । **दात्रग्न्यादिदेवताभ्यो निर्वपेदिति ।** दात्रग्न्यादिदेवता उद्दिश्य यजेतेत्यर्थः । **अभितः सन्निधाविति ।**

यमुपक्रान्तदर्शमभि उदितश्चन्द्रः स यजमानोऽभ्युदित इत्यपि व्याचष्टे
१०३ । २० **दर्शलोपे त्विति ।** नन्वकालोपक्रान्तस्य दर्शस्य लोपोऽस्तु तावता नैमित्तिकं कर्म कृत्वा किमित्युपरन्तव्यम् । सिद्धान्तइव पूर्वपक्षेऽपि मुख्यकाले दर्शकर्तव्यताया (आवश्यकत्वाद्वाक्यान्तरेण)† दर्शितत्वाच्च । एवं हि तद्यदि बिभियाद्भि मोदेष्यतीति महारात्रे हवींषि निर्वपेत् फलीकृतैस्तण्डुलैरुपाशीताद्धं दधि हविरातञ्चनार्थं निदध्याद्दद्धं न यद्यभ्युदियात्तेनातञ्च्य प्रचरेद्यदिनान्येद्युस्तेन ब्राह्मणं भोजयेदिति । अस्यार्थः । यः प्रवृत्तदर्शतन्त्रो यजमानः किमद्य चतुर्दश्याममावास्याभ्रान्त्या दर्शः प्रारब्धः किं चन्द्रमा अभ्युदेष्यतीति शङ्क-

* इच्छन्निति २ पु पा. ।

† ( ) एतदन्तर्गतो ग्रन्थो नास्ति १ पु. ।

या भयं * प्राप्नुयात् स महत्यामेव रात्रौ हविर्निरुप्यावहत्य फलीकृत्योदीक्ष-माण आसीत सायंदोहसंपादितं च दधि द्विधा विभज्य तदर्धं मुख्यकाले करिष्यमाणस्य दर्शस्यार्थे तत्पूर्वदिनसायंदोहं संपाद्य दध्यातञ्चनाय निद-ध्यादर्धान्तरं तदर्थं न निदध्यात्किं तु पूर्ववदेव स्थापयेत् । एवं कृते यद्य-भ्युदयः स्यात्तदा मुख्यकाले दर्शप्रारम्भानन्तरमातञ्चनार्थं निहितेनार्धेन दध्ना सायं दुग्धे पयस्यातञ्चनं कृत्वा दध्युत्पाद्यान्येद्युर्दधियागं निर्वर्तयेद् यदि नाभ्युदयस्तदानीमातञ्चनार्थं निहितादर्धादन्येनार्धेन दर्शनिवृत्तेस्तदर्थं दध्युत्पादनाऽनपेक्षणेनातञ्चनार्थं निहितमर्धं ब्राह्मणभोजनेन प्रतिपादये-दिति । तदेतदातञ्चनाभ्यासदर्शनं सिद्धान्तलिङ्गत्वेन वर्णितम् । यदि कर्मा-न्तरमभ्युदयेष्टिः स्यात्तदा पशुकामेष्टाविव दधिशृतयोरधिकरणत्वेन प्रणीता-कार्ये विधानादुपादेयत्वेन च प्रकृतग्रहणप्रमाणाभावाल्लौकिकएव दधि पयसि च श्रपणं कृत्वा सायंदोहेनाकालकृतेनापि प्रायश्चित्तनिर्हृतकालापराधदोषेण मुख्यकाले दर्शः कर्तव्यो न दध्यन्तरमुत्पाद्यम् । यद्यकाले प्रक्रान्तमेव दर्श-कर्म देवताविकारयुक्तं सदभ्युदयेष्टिः स्यात्तदा तदर्थं कृतेन दध्ना तस्यैवानुष्ठि-तत्वान्मुख्यकालकर्तव्यदर्शार्थमवश्यं दध्यन्तरमुत्पाद्यमित्यर्थवदातञ्चनम् । तथाऽमुख्यकालकृतसायंदोहार्थेनैवातञ्चनं कार्यमित्येतावान् विशेषो विधीय-तइति । अथ सिद्धान्तलिङ्गतयोपन्यस्तेनातञ्चनाभ्यासेन मुख्यकाले दर्शकर्त-व्यता ऽपि ज्ञाप्यतइति स्पष्टमेव । पूर्वपक्षिणा ऽप्यकालोपक्रान्तं दर्शं त्यक्त्वा नैमित्तिकं कृत्वा पुनर्दर्शः समारम्भणीय इति सिद्धान्तिवदेव मन्यमानेन पुनरारब्धदर्शप्रयोगाद्बहिरकालकृतस्य दध्नो मुख्यकालकर्तव्यदर्शाऽनर्हत्वेना-तञ्चनाभ्यासो ऽभ्युदितेष्टेः कर्मान्तरत्वे ऽप्युपपद्यतइति तस्य सिद्धान्तलिङ्ग-त्वमेवापहूयते न तु मुख्यकालकर्तव्यदर्शकालज्ञापकत्वम् । सिद्धान्तिना त्वकालोपक्रमदोषस्य पूर्वपक्षे नैमित्तिकेन कर्मान्तरेण निर्हृतत्वादकालोपक्रा-न्त एव दर्शो मुख्यकालेऽपिक्रान्त एव दर्शो मुख्यकाले समापनीयः न तु मुख्य-काले पुनर्दर्शः समारम्भणीय इत्यापाद्य तस्यातञ्चनाभ्यासलिङ्गानुपपत्तिः समर्थ्यते । अमावास्यायामेवेत्यादिटीकाग्रन्थो ऽपि पूर्वपक्षसिद्धान्तसाधार-ण्येन निमित्ताधिकारस्य कर्मान्तरस्य विकृतदर्शप्रयोगस्य वा समाप्त्यनन्तरं

---

* शङ्काभयमिति २ पु॰ पा॰ ।

मुख्यकाले दर्शः कर्तव्य इत्येतत्पर एव स्वरसतः प्रतिभाति न सिद्धान्तकोटिप्रयोजनप्रदर्शनपरः पूर्वपक्षकोटिप्रयोजनप्रदर्शनाभावात्तदहरेव वेद्युद्धरणादि कृत्वेत्येनदातञ्चनाभ्यासलिङ्गसमर्थनार्थं पूर्वपक्ष्यनुसारेण पूर्वपक्षे ऽपि योजयितुं शक्यम् । अथ वा ऽमावास्यायामेवेत्यादिटीकाग्रन्थः सिद्धान्तकोटावनुष्ठानप्रकारमात्रस्य प्रदर्शनपरः न तु पूर्वपक्षे मुख्यकालकर्तव्यो दर्शो नास्तीति तद्व्यावृत्तसिद्धान्तकोटिफलप्रदर्शनपरः । पूर्वपक्षे आतञ्चनाभ्यासलिङ्गानुपपत्तिं समर्थयमानेन सिद्धान्तिना पूर्वपक्षे ऽपि मुख्यकाले दर्शयागानुष्ठानस्य दर्शितत्वाद् दर्शस्तु लुप्यते कालापराधादिति पूर्वपक्षोपसंहारटीकाग्रन्थो ऽप्यातञ्चनाभ्यासलिङ्गसमर्थनप्रवृत्तपूर्वपक्ष्याशयानुसारेण कालोपक्रान्तदर्शप्रयोगमात्रलोपपरः कालापराधादिति हेतूक्तेः । तस्मादकालोपक्रान्तदर्शप्रयोगं त्यक्त्वा संकल्पप्रभृति कर्मान्तरं पूर्वपक्षे कर्तव्यं सिद्धान्ते त्वकालोपक्रान्तदर्शप्रयोग एव देवतान्तरसंयोजनरूपविकारयुक्तः संपादनीय इत्येव पूर्वपक्षसिद्धान्तयोः प्रयोजनभेदो वक्तुमुचित इति चेत् । उच्यते । अकालोपक्रमदोषेण तस्याममावास्यायां सर्वात्मना दर्शो लुप्तः । मध्यमादिवाक्यैर्विहितं कर्मान्तरं तु लुप्तस्य प्रत्याम्नायरूपम् । अतो यथा स प्रत्यामनेत्स्थाना*दित्यधिकरणपूर्वपक्षे यस्योभयं हविरार्तिमार्च्छेति ऐन्द्रं पञ्चशरावमोदनं निर्वपेदिति दधिशृतरूपसान्नाय्यनाशे निमित्ते विधीयमानो दर्शेष्टितः कर्मान्तररूपः पञ्चशरावयागो दर्शेष्टेर्हविर्नाशेन लोपात्तत्प्रत्याम्नाय इति तदधिकरणपूर्वपक्षे दर्शेष्टिलोपः । एवमभ्युदयनिमित्ते ऽपीति केश्चिदेकदेशिभिः पूर्वपक्षे प्रयोजनमुक्तं भविष्यति तदनुवादो ऽयमिति न दोषः ।

४०४ । ६ **येमध्यमादिवाक्यैर्देवतान्तरेष्विति ।** अत्र पूर्वकर्मणि देवतान्तरविधानं न विवक्षितं तस्योत्पत्तिशिष्टगुणावरोधपरिहाराय देवतापनयविधिप्रवृत्तिसापेक्षत्वेन परस्पराश्रयापत्तेः किं तु येमध्यमादिवाक्यैर्यदि पूर्वकर्मणि देवतान्तरविधिः यदि वा देवतान्तरविशिष्टकर्मान्तरविधिः पक्षद्वये ऽपि देवतान्तरविधिरविप्रतिपन्न इत्येतावद्विवक्षितम् । एतावता तत्सजातीयानां देवतानां बुद्धिस्थतोक्ता । तत्प्रतियोगिनीनामित्यनेनाप्येकहविःसंबन्धित्वेन तत्प्रतिद्वन्द्वित्वं न विवक्षितं परस्पराश्रयसादवस्थ्यापत्तेः

* जै॰ सू॰ अ॰ ६ पा॰ ४ सू॰ ३० ।

किं तु साजात्येन तत्सम्बन्धित्वमात्रम् । अथ वा तण्डुलदधिशृतशब्दैः प्रकृतदर्शहविषां प्रत्यभिज्ञानात्तेषामेव देवतान्तरविधानं येमध्यमादिवाक्यैः क्रियतइति तावत्प्रतिभाति तच्च तेषां पूर्वदेवतापनयमन्तरेण नोपपद्यत-इति विमर्शोपस्थितदार्शिकहविषां देवतान्तरविधानं चेधा वाक्यस्यान्यतः प्राप्तिमत्प्रतीयमानार्थतया ऽर्थान्तरपर्यवसानापेक्षस्य दार्शिकहविषां पूर्वदेवताभ्यो विभागो ऽर्थ इति निर्णयहेतुत्वेन विवक्षितम् । अत एव विभागविषयेषु सामर्थ्यलब्धहविष्ट्वविशेषणावश्यम्भावात्तत्तुल्यत्वस्यापि विवक्षायां वाक्यभेदापत्तिर्वक्ष्यते हविर्मात्रं विभागविषय इत्यादिना । पूर्वव्याख्याने तु यद्यपि हविष्ट्वं न श्रुतं तथापि तण्डुलानां हवीरूपेणैव देवतासम्बन्धित्वं न स्वरूपेणेति हविष्ट्वं तावदश्रुतमपि यस्य हविर्निरुप्तमित्यत्र सन्निहितमवश्यं विवक्षणीयम् । अतस्तण्डुलत्वस्यापि विवक्षायां वाक्यभेदापत्तिरिति योज्यम् ।

ननु श्रुतत्वे ऽप्युद्देश्यविशेषणस्य ग्रहैकत्वस्याविवक्षा तृतीये निर्णीता तेनैव न्यायेनोभयत्वस्याविवक्षा सिद्धा कथं पूर्वपक्ष इत्याशङ्क्याह **हविर्वदिति** । आर्तिमार्च्छतीत्युद्देश्याया निमित्तभूताया नाशप्राप्तेर्हविर्विशेषणं सिद्धान्ते ऽपि विवक्षितमङ्गीक्रियते पदान्तरोपात्तत्वेन ग्रहैकत्ववैलक्षण्याच्चेदुभयत्वमपि तत एव विवक्षितमस्त्विति भावः ।

विशिष्टोद्देशे वाक्यभेदं विवृणोति **हविरार्ताविति** । ननु विशि- ४०४ । १६
ष्टोद्देशो नाम द्वित्वविशिष्टहविरार्तिनिमित्ततयोद्देशः । तत्र वाक्यभेदं प्रतिज्ञाय कथं हविरुभयत्वयोर्विशेषणविशेष्यभावं विना स्वातन्त्र्येणार्त्यन्वये वाक्यभेदः प्रदर्श्यते । उच्यते । नामपदानां परस्परमसंबद्धानामेवाख्यातान्वयो ऽरुणाधिकरणन्यायसिद्धः । अत एव बार्हस्पत्यो नैवारः सप्तदशशरावश्चरुर्भवतीतिविहितायां विकृतीष्टौ प्राकृते चतुर्मुष्टिनिर्वापे चोदकतः प्राप्ते चतुर्भिर्मुष्टिभिः सप्तदशशरावपूरकस्य चरोः संपादयितुमशक्यत्वेन तत्र संख्यामुष्ट्यन्यतरबाधे कर्तव्ये मुष्टिलोपात्तु संख्यालोपस्तद्गुणत्वादिति* सूत्रेणामुष्टिगुणभूतसंख्याबाधः कार्य इति पूर्वपक्षं कृत्वा न निर्वापशेषत्वादिति† सूत्रेण संख्यामुष्ट्योरुभयोरपि निर्वापशेषत्वेन तयोर्गुणप्रधानभावविशेषाभावाच्चरमश्रुतस्य मुष्टेरेव बाधः कार्यः । अतश्चतुर्भिर्महा-

---

* जै॰ सू॰ अ॰ १० पा॰ २ सू॰ ६४ । † जै॰ सू॰ अ॰ १० पा॰ २ सू॰ ६५ ।

पाचे: सप्तदशशरावचरुसंपादनापेक्षितव्रीहिनिर्वापः कार्य इति दशमे सिद्धा-
न्तितम् । अतश्चतुरो मुष्टीन्निर्वपतीत्यत्र संख्यामुष्ट्योरिवात्र हविरुभयत्व-
योराख्यातेनैवान्वयो न तूभयत्वस्य हविरन्वयः तथापि कथं चित्तस्य
हविरन्वयः कल्प्येत यदि तदाकाङ्क्षा स्याद् न त्वसावस्ति हविरार्तिमात्रस्य
निमित्तत्वोपपत्तेः । तस्मात्संख्यामुष्टिन्यायेन हविरुभयत्वयोराख्यातान्वयसिद्धौ
संख्यामुष्ट्युभयविशिष्टनिर्वापविधानेनाऽवाक्यभेदे ऽप्यत्र निमित्तविशेषणयोरु-
द्देश्यकोटिनिविष्टयोर्विधेययोरिव क्रियया वशीकार्यत्वाभावेन क्रियायास्ताभ्यां
प्रत्येकसंबन्धनिमित्तो वाक्यभेदो भवतीत्यहविरार्तौ निर्वपेदुभयार्तौ चेति वाक्य-
भेदो दर्शितः । हविरार्तौ निर्वपेदुभयहविरार्तौ चेति क्व चित्पाठः स पाठः
एतावन्तमर्थं मनसि निधाय इति उपरि शङ्कान्तरपरिहारार्थत्वेन योजनीयः ।
अत्रेवं शङ्का । नेह हविरुभयत्वयोरप्यार्त्यन्वयः किं तु हविरार्तिमार्च्छेदिति
हविरार्तेर्निमित्तत्वबोधनानन्तरं हविरुभयमिति तस्य हविषः संख्यान्वयो
बोध्यते तत्राख्यातश्रवणादुभयत्वं हविषैव संबध्यते नीलमुत्पलमित्यत्रो-
त्पलेनेव नैल्यं निमित्तपर्यवसानार्थं हविषः स्वतः संख्याकाङ्क्षाविरहे ऽपि तत्सं-
बन्धबोधनेनेदम्पर्यप्रवृत्तवचनबलात्तत्र तद्बोधः स्यादेवेति । एवमपि वाक्य-
भेदः स्वयं प्रदर्शितयैव रीत्या समापतन्न निवार्य इति परिहारः स्पष्टः ।
तत्र हविरुभयमित्येतावति द्वितीयवाक्ये प्रदर्शनीये प्रथमवाक्यप्राप्तांशानुवाद-
साहित्येनोभयहविरार्तौ निर्वपेदिति द्वितीयवाक्यमुपन्यस्तम् ।

४०४ । १८ **वाक्यभेदतादवस्थ्यादिति** । आर्तिमार्च्छेदित्येतावता निमित्त-
पर्यवसानात् सा चार्तिर्हविर्विशिष्टेति पृथग्बाधनीयम् । तथा चोभयविशेषणा-
भावे ऽप्यार्तिमार्च्छेद्धविरार्तिमार्च्छेदिति वाक्यभेदस्तदवस्थ इत्यर्थः ।
सर्वदा सर्वेषामपि यजमानानामन्ततश्चिन्तितनिमिषितादिनाशसत्त्वान्नाश-
मात्रं न निमित्तम् अनियतत्वाभावादित्यस्ति हविर्विशेषणापेक्षा नैवमुभय-
त्वविशेषणापेक्षा ऽस्तीति परिहारार्थः । **तस्मादुभयत्वमविवक्षितमिति** ।
श्रुतिगतं तूभयपदं न केवलं दध्न एवार्तिनिमित्तं नापि केवलपयस एवेत्ये-
तदर्थमनुवादमात्रमिति तात्पर्यम् ।

शाब्दिकास्तु द्वित्वस्याविवक्षां नानुमन्यन्ते । यदुक्तं हरिणा ।

एकत्वं वा बहुत्वं वा केषां चिदविवक्षितम् ।
तद्विजात्यभिधानाय द्वित्वं तु स्याद्विवक्षितम् ॥ इति ।

एतद्व्याख्यानावसरे हेलाराजेन तथा सति यस्योभयं हविरित्यत्रापि
द्वित्वस्य विवक्षायामन्यतरार्त्तौ नैमित्तिकाभावप्रसङ्ग इत्याशङ्क्य समाहितम् ।
तत्र द्वित्वमात्रं न श्रुतं किं तु द्व्यवयवः समुदायः संख्याया अवयवे तय-
बिति संख्याविशेषयुक्तावयवघटितसमुदायार्थतयप्प्रत्ययादेशाऽयजन्तत्वादु-
भयशब्दस्य । ततश्चोभयशब्दार्थस्यावयवद्वयारब्धसमुदायस्यैकावयवनाशे
ऽपि नाशान्निमित्तमस्तीत्यन्यतरनाशे ऽपि नैमित्तिकानुष्ठानमुपपद्यत इति ।

द्रव्यमुखेनेतीति । इह हि दार्शिकद्रव्याण्यपनीतपूर्वदेवताकानि ४०४ । २३
देवतान्तरसंयोजनसाकाङ्क्षाण्यासते अतो मध्यमादिशब्दानां प्रकृतदार्शिक-
द्रव्यपरत्वावश्यंभावात्तन्मुखेन दर्शकर्मप्रत्यभिज्ञानं पूर्वोक्तं सिद्धान्तप्रयोजनं
न गमयतीत्यवतारितः ततश्चेति टीकाग्रन्थः शङ्कान्तरपरिहारार्थत्वे-
नापि योजयितुं शक्यः । तत्रेयं शङ्का । कर्मान्तरमिति पूर्वपक्षे भवतु पुन-
र्दर्शानुष्ठानं प्रक्रान्तस्यैव दर्शस्य विकृतप्रयोगेऽभ्युदयेष्टिरिति सिद्धान्ते दर्श-
स्यानुष्ठितत्वात्किमिति पुनर्दर्शानुष्ठानमिति । तत्रायं परिहारः । अकालोप-
क्रान्तदर्शे नैमित्तिकेन विकृतिप्रयोगेण समापिते ऽपि मुख्यकाले त्वननुष्ठि-
तत्वाच्च पुनस्तदनुष्ठानमिति । **पुरोडाशसामर्थ्यादिति** । पुरोडाशस्यापूप-
विशेषत्वेन तत्सामर्थ्यादेव तण्डुलादीनां पाकान्तानां प्राप्तिः व्रीहीनवहन्ति
तण्डुलान् पिनष्टि पिष्टं संयौति पुरोडाशं श्रपयति कपालेषु श्रपयतीत्यादिवि-
धयस्तु कर्तृकरणाद्युपायनियमार्था इति भावः ।

दध्नस्तन्दुलानामिति । ननु देवतैक्याद्दधितण्डुलानां पयस्त- ४०५ । १
ण्डुलानां च प्रदाने साहित्यं सिध्यति न तु पाके । स तु पयसः कुम्भ्यां
भर्जनकपाले ऽन्यत्र वा तण्डुलानामिति भेदेनैव प्राप्नोति । न च दध्न-
श्चरुं शृते चरुमिति दधियुक्ततण्डुलानां पयोयुक्ततण्डुलानां च देवता-
संबन्धबोधनात् तण्डुलानां पाककाले तद्युक्तयोर्दधिपयसोरपि सहपाकः
प्राप्नोतीति वाच्यम् । दध्नः पयसश्च सप्तम्योः सहपाकादर्थप्राप्ताधिकरण-
त्वानुवादकतया वक्ष्यमाणत्वेन सप्तमीभ्यां दधिपयःसाहित्येन तण्डुलानां
देवतासंबन्धाभावादिति चेत् । अभ्युदयेष्टिप्रकरणे सह श्रपयतीति वाक्यमस्ति

तेन दधितण्डुलानां पयस्तण्डुलानां च सहपाकसिद्धिरित्याहुः । **अधिकेति** । सान्नाय्यदोहं प्रकृत्य श्रूयते वाग्यतस्तिस्रो दोहयित्वा विसृष्टवागनन्वारभ्य तूष्णीमुत्तरा दोहयतीति । तत्र कपिञ्जलन्यायेन तिस्र एवोत्तरा गावो न दोग्धव्याः किं तु यावत्यो यजमानस्य गावस्ताः सर्वा दोग्धव्याः नास्यैतां रात्रिं कुमाराश्चन पयसो लभन्तइति वाक्यशेषात् । न चात्र कुमाराणामदृष्टार्थः पयोनिषेधः । दृष्टार्थत्वे संभवत्यदृष्टार्थत्वकल्पनाऽनुपपत्तेः । अप्यर्थेन चनेत्यनेनापि कृत्स्नस्य यजमानपयसो देवतार्थत्वेन विनियोगप्रतीतेश्चेति उत्तरासु न यावत्स्वमपूर्वत्वा*दित्येकादशे निर्णीतम् । तदर्थो ऽत्रानुसंहितः । **ननु पुरोडाशनिवृत्ताविति** । पुरोडाशसामर्थ्याद् लब्धः तदर्थत्वेन च श्रुतः पाकः पुरोडाशनिवृत्तौ निवर्ततेति भावः ।

४०५ । ७ **साधनविशेषाश्रितत्वादिति** । यथा †व्रीहीनवहन्तीत्यादिषु श्रुता अवहननादयो न व्रीहिप्रयुक्ताः किं त्वपूर्वसाधनरूपसाधनविशेषप्रयुक्ताः । न हि ते व्रीहय इति कृत्वा ऽवहन्यन्ते किं तर्हि तण्डुलादिप्रणाडिकया पुरोडाशनिर्वर्तनद्वारेण यागाऽपूर्वस्य साधनानीति यवेष्वपि तद्रूपसाम्यात्तेषामप्यवहननादयो भवन्ति तथा पुरोडाशस्य पाको न पुरोडाशप्रयुक्तः किं त्वपूर्वसाधनतारूपो यस्तद्धुतिसाधनताविशेषस्तत्प्रयुक्तः । स च स्यर्थिष्ठादिवाक्यद्वयाम्नातेषु तण्डुलेष्वपि समान इति भावः । ननु तण्डुलावस्थायां देवतासंयोजनाच्चरुत्वस्याभिधानाच्च‡ तण्डुला एव प्रदेया इति प्रधानपेषणवत् पाको ऽपि निवर्तेत प्रदेयद्रव्यसिद्ध्यर्थो हि पाकः इह प्रदेयास्तण्डुला विनैव पाकं सिद्धाः अत एव चित्रायागद्रव्येभ्यस्तण्डुलेभ्यः पाकनिवृत्तिरुक्ता न्यायरत्नमालायां तण्डुलेभ्योऽर्थलोपेन श्रपणं विनिवर्तताइति दोहनानन्तरमेव अर्पितस्य शृतस्य दध्नश्च कथमपि न पाकप्राप्तिरस्ति । सत्यम् । इह सह श्रपयतीति वाक्यादेव पाकस्यापि सिद्धिः । स्यादेतत् । चरुसप्तम्यर्थयोरनुवाद्यत्वेन तद्विधानप्रयुक्तवाक्यभेदाभावे ऽपि दधि तण्डुलांश्चोद्दिश्य पयस्तण्डुलांश्चोद्दिश्य देवतासंबन्धविधानेन प्रत्युद्देश्यं वाक्यपरिसमाप्त्या वाक्यभेदो दुर्निवारः । न च वाच्यं सप्तम्यन्तसमभिव्याहारलभ्यं तण्डुलानां दधि-

---

* जै॰ सू॰ अ॰ ११ पा॰ १ सू॰ ४६ । † यद्वेति १ पु॰ पा॰ ।
‡ अविधानाच्चेति १ पु॰ पा॰ ।

युक्तत्वं पयोयुक्तत्वं च विधेयमस्तु मा भूत्सप्तम्यर्थस्यानुवाद्यत्वं तथा च सहितस्यैकस्योद्देशान्न वाक्यभेद इति । तथापि साहित्यं देवतासंबन्धश्चेत्युभयविधाने वाक्यभेदाऽनिवारणाद्दधिपय:साहित्यस्य विधेयत्वे सान्नाय्यरहितानां सोमयाजिनामप्यभ्युदयेष्टिरस्तीति निर्णायकेन सान्नाय्यसंयोगान्नासन्नयत: स्या*दित्यधिकरणेन विरोधप्रसङ्गाच्च । तत्र ह्यसन्नयतो दधिपयसोरभावान्नाभ्युदयेष्टिरिति पूर्वपक्षे दध्नस्तण्डुलानां पयसस्तण्डुलानां च प्रत्येकमुद्देश्यत्वेन तत्साहित्यस्याविवक्षितत्वादसन्नयतामपि केवलतण्डुलद्रव्यकाभ्युदयेष्टि: स्यात् । न च चरुत्वसिद्ध्यर्थं दधिपयसोर्मिश्रणापेक्षा अनूद्यमानचरुत्वस्यानङ्गत्वेन तदभावे वैकल्याभावाद् अप्सु श्रपणसंभवाच्चेति व्यवस्थापितम् । एतेन देवतापनये प्रयोगविशेषश्चोद्यत इति टीकानुसाराद् द्रव्यद्वयेन देवतया च विशिष्टस्यैकस्य प्रयोगस्य विधानान्न वाक्यभेद इत्यपि शङ्का निरस्ता । दधिपयसोर्विधेयतायामसन्नयतामभ्युदयाभावप्रसङ्गात् प्रयोगस्य प्राप्ततया विकारमात्रविधानपर्यवसानेन वाक्यभेदपरिहारालाभाच्चेत्याशङ्कायां भवतु वा ऽनेकवाक्यकल्पेनाप्रकृताधिकारावगमबलादस्यापि न्याय्यत्वादिति टीका प्रवृत्ता । तत्र यदि प्रकृताधिकारावगम: प्रकृतदर्शयागानुवृत्तिप्रत्यभिज्ञानं तदा पञ्चशरावयागो ऽपि विकृतो दर्श एव स्यान्न कर्मान्तरम् । तथा सति पञ्चशरावस्तु द्रव्याश्रुते: प्रतिनिधि: स्यादित्यधिकरणे† यदार्तदोहप्रतिनिधित्वेन दर्शयागएव पञ्चशरावद्रव्यविधि: न तु कर्मान्तरविधिरिति पूर्वपक्षे पञ्चशरावौदनस्य द्रव्यस्य इन्द्रस्य देवतायाश्च प्रकृतसान्नाय्ययागानुवादेन विधौ वाक्यभेद: स्यादतो द्रव्यदेवताविशिष्टनैमित्तिककर्मान्तरविधिरिति सिद्धान्तितं तद्विरोध: स्यात्तथापि प्रकृतप्रत्यभिज्ञानेन वाक्यभेदस्याऽसोढव्यतापत्तिरित्याशङ्क्य विशेषितं द्रव्यद्वारेणेति । अपनीतपूर्वदेवतान्तरसंयोजनसापेक्षाणि दार्शिकान्येव तण्डुलादीनि गृह्यन्तइत्याकाङ्क्षानुसारेणावगम्यते । किं च यदि बिभियादित्यादिवाक्ये महारात्रे फलीकरणपर्यन्तं कृत्वा पेषणमकृत्वा प्रतीक्षणात्रवनादपीदं ज्ञायते । अभ्युदयेष्ट्यामेतएव तण्डुला इन्द्राय प्रदात्रे विष्णवे शिपिविष्टाय चेति । अन्यथा पेषणात्प्रागेव प्रयोगमवस्थाप्य प्रतीक्षणमदृष्टार्थं स्यात् तथा

* जै॰ सू॰ अ॰ ६ पा॰ ५ सू॰ २१ । † जै॰ सू॰ अ॰ ६ पा॰ ४ सू॰ २८ ।

आतञ्चनार्थस्य दध्यर्थस्याभ्युदयाभावपक्षइव तदन्यस्य दध्यर्थस्याभ्युदयपक्षे प्रतिपत्त्यविधानादिदं ज्ञाप्यते* अभ्युदयेष्ट्यां तदेवान्यदर्थं दधीति। अभ्युदयाभावपक्षे दध्यन्तरोत्पादनस्यानपेक्षितत्वादातञ्चनार्थं दध्यर्थप्रतिपत्त्यपेक्षावदभ्युदयपक्षे तदितरार्थस्य लौकिकदधिसाध्यायामभ्युदयेष्ट्यां दध्यन्तरोत्पादननिर्वर्त्ये मुख्यकालदर्शे चानुपयोगात्प्रतिपत्त्यपेक्षा ऽस्तीति तत्प्रतिपत्तिरप्युपवर्ण्येत। तथा विष्णवे शिपिविष्टाय शृते चरुमिति शृतपदप्रयोगाज् ज्ञायते अभ्युदयेष्ट्यां वैदिकप्रसिद्ध्या दुग्धा शृतशब्दवाच्यः प्रातर्दोह एव पयो न तु लौकिकं पय इति। अन्यथा आदित्यः प्रायणीयः पयसि चरुरित्यत्रेव पयःशब्द एव प्रयुज्येतेति। पशुकामेष्टौ तु गृहीतशब्दो लौकिकपयसो लक्षणार्थं इति सूत्रकृतैवोक्तं लक्षणार्था शृतश्रुतिरिति। न चेह लक्षणायां कारणमस्ति। एवमिह द्रव्यैक्यकृता ऽनन्यथासिद्धा प्रत्यभिज्ञैव प्रकृतत्वमात्रकृता वाक्यभेददोषभावात् प्रच्यावयितुं न क्षमेति विशेषं सूचयितुं द्रव्यद्वारेणेत्युक्तम्। एवं च स्थविष्ठादिवाक्यद्वयइव सह श्रपयतीति वाक्ये ऽपि वाक्यभेदः स च तण्डुलोद्देशेन प्रत्येकं दध्ना पयसा च सहपाकविधिरित्येवंरूपो वा दधि तण्डुलानां च पयस्तण्डुलानां च सहपाकविधिरित्येवंरूपो वा न भवति असन्नयतो ऽभ्युदयेष्ट्यभावप्रसङ्गात् किं तु दध्युद्देशेन पयउद्देशेन च तण्डुलसहपाकविधिः। तेन यत्र दधिपयसी तत्रैवेदं वाक्यद्वयं प्रवर्ततइत्यसन्नयतो ऽप्यभ्युदयेष्टिलाभः एवं चासन्नयतः प्रभूतदधिपयःसहपाकप्रयुक्तायाः पुरोडाशभावनिवृत्तेरभावात्पुरोडाशभावेनैव प्रदेयता चरुशब्दः पाक्षिकानुवादः। दधिपयसोः सप्तमी च स्थविष्ठानामणिष्ठानां च तण्डुलानां देवतासम्बन्धवच्चरुभावो विधेयः। स्थविष्ठाणिष्ठवाक्ययोः प्रत्येकं वाक्यवैविध्योपपत्तेः। एवं चरुभावस्याङ्गत्वादेवार्थाच्चरुभावसाधने दधि पयसि च प्रणीताधर्माणां प्राप्तिर्नवमे स्थापिता असन्नायिनामप्सु चरोः श्रपणं भाष्यकारैरुक्तं च सङ्गच्छते। टीकायां परस्माच्च परः पराच्च वरीयानिति व्युत्पत्तिर्दर्शिता तत्र पञ्चम्यन्तस्य परशब्दस्य वरशब्दस्य च पूर्ववाक्ये सामगतिपरंपरायां निवेशितस्वरप्राणादिरर्थ इति व्याचष्टे परस्मात्स्वरप्राणादेः परोवराच्च तस्मादेव वरीयान् वरतर इति। परोव-

* इदं ज्ञायते इति २ पु॰ पा॰।

रीयानित्येकं पदं परोवरीयो हास्य भवति परोवरीयसो ह लोकान् जयतीति
वाक्यशेषात्परशब्दे ओत्वनिपातेन सिद्धोयं शब्द उपन्यस्तार्थविषयः* ॥

व्याप्तेश्च समञ्जसम् ॥ ९ ॥ ४०५ । २३

स एवार्थ इति । उद्गीथेन विशेषणरूपं यमर्थं सिद्धवत्कृत्य
विद्याभेदो दर्शितः स एवार्थश्चिन्त्यतइत्यर्थः । **उद्गीथभक्तिसंब-
न्धिनः प्रणवस्योपासनाया अधिकारप्रतिपादनमिति ।** प्रतिपादनं
विधानं तथा चोमित्यक्षरमुद्गीथमुपासीतेत्यत्र उद्गीथभक्त्यवयवोङ्कारकर्मविशि-
ष्टोपासनाविधिरयं सोमेन यजेतेतिवद्विशिष्टविधिरूप उत्पत्तिविधिः स एव
रसानां रसतमः परमः परार्ध्योऽष्टमो य उद्गीथ इत्यत्रोङ्कारे रसतमत्वगुण†-
विधिः । आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त-
इत्यत्राप्तिगुणविधिः । समर्धयिता ह वै कामानां भवति य एतदेवं विद्वान-
क्षरमुपास्तइति तस्मिन् समृद्धिगुणविधिः । आप्तिसमृद्धिगुणविध्यर्थवादश्रुतफ-
लद्वयग्रहणेन कल्प्यो ऽधिकारविधिः । **आप्त्यादिदृष्टीर्विधातुमिति ।**
दृष्टिविषयानाप्त्यादिगुणान् विधातुमित्यर्थः । उत्पत्तिविधिनैव दृष्टिप्राप्तेः । **पृथगु-
पासनाविध्यभावादिति ।** वक्ष्यमाणफलविशिष्टोपासनोत्पत्तिविषयत्वेन
स्वतन्त्रोपासनान्तरविध्यभावादित्यर्थः । न चात्र मा भूदयमुत्पत्तिविधिः ।
यथाश्रुतग्रन्थस्वारस्यानुरोधेनोद्गीथावयवत्वविशिष्टप्रणवरूपाश्रयसमर्पणपरोय-
मस्त्विति वाच्यम् । एकपदश्रुत्योपासनान्वितस्य विधेस्तदतिलङ्घनेन विशेषण-
संक्रान्तिकल्पनाऽनौचित्यात् । अन्यथा सोमेन यजेतेति विधेरप्यधिकारविधि-
लभ्ययागानुवादेन सोमगुणमात्रविधित्वकल्पनाप्रसङ्गादिह रसतमत्वादिगुणवि-
धिषु त्रिष्वपि विनिगमनाविरहात्तत्तद्गुणविशिष्टोपासनाविधित्वस्य कल्पनीय-
तया बहुविशिष्टविधिबहूपासनाविधिकल्पनागौरवप्रसङ्गाच्च । अपि च ।
गौण्या वृत्तेरिति टीकायामध्यासपक्षे गौणी वृत्तिः सिद्धवत्कृत्य व्यवहृता
विशेषणपक्षइव तस्मिन्नपि पक्षे लक्षणैव किं न स्यादित्याशङ्क्य तस्मिन् पक्षे
दृष्टिविधिलाभार्थं गौणी वृत्तिरवश्याश्रयणीयेत्याह **ॐकारउद्गीथदृष्टि-
विधौ हीति ।** सादृश्यलक्षणागर्भा खलु गौणी । ततश्चोद्गीथशब्दस्य ४०७ । ६

---

* अत्र तृतीयम् अन्यथात्वाधिकरणं पूर्णम् ।

† रसतमगुणेति २ पु॰ पा॰ ।

यद्योङ्कारे गौणी वृत्तिराश्रीयेत तदोद्गीथदृष्टिविषयत्वम् । अमी पिष्टपिण्डाः सिंहाः क्रियन्तामित्यत्र सिंहाकारमिव साध्यसादृश्यं गृहीत्वा ओँकारमुद्गीथदृष्टिविषयं कुर्वन्नुपासीतेत्यर्थे पर्यवसानं कर्तुं शक्यमिति दृष्टिविधिर्लभ्येत । अवयवावयविसंबन्धमूलकलक्षणाश्रयणे तु सा न लभ्यतइति । **उद्गीथदृष्टिविषयत्वादोङ्कार उद्गीथ इत्यर्थ इति** । गौणवृत्त्याश्रयणे ओमित्येतदक्षरमुद्गीथमित्यस्यैव तदर्थो लभ्यतइत्यर्थः ।

४०७ । ११ **गौण्यां लक्षणीयार्थद्वारा ऽर्थान्तरे शब्दस्य वृत्तेर्व्यवधानमाहेति** । लक्षणीयार्थो मुख्यार्थसादृश्यम् । ननु भाष्यस्वारस्यान्मुख्यार्थे यत्प्रवृत्तिनिमित्तं तस्यान्यत्रारोपेण शब्दस्य वृत्तिर्गौणी वृत्तिरभिमतेति प्रतीयते । टीकायामप्यधिकरणोपक्रमे तथैव गौणी वृत्तिर्लक्षिता । इह लक्षणागौण्योः सन्निकर्षविप्रकर्षप्रदर्शनभाष्यव्याख्यानावसरे मुख्यार्थसादृश्यं लक्षयित्वा तद्द्वारेण तद्वृत्त्यर्थान्तरे वृत्तिर्गौणीति लक्षितलक्षणारूपा सा टीकाकारैराचार्यैश्च वक्ष्यते किमर्थमिह भाष्यस्वारस्यपरित्यागः । भाष्योक्त आरोप एव हि प्रकृतोपयोगी प्रसिद्धश्च । तथा हि अध्यासपक्षे नाम्नि ब्रह्मत्वादेरोङ्कारे उद्गीथत्वादेरारोप्योपासना वर्णिता तथोपासना च नाम्नि ब्रह्मशब्दस्य ब्रह्मत्वारोपेणोङ्कारे उद्गीथशब्दस्योद्गीथत्वारोपेण च वृत्तावेव घटते तस्मादारोपपक्ष एव प्रकृतोपयोगी । प्रसिद्धश्च स एव लोके वेदे च । लोके तावत् ।

किमसुभिर्गलितैर्जड* मन्यसे मयि निमज्जतु भीमसुतामनः ।
मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः ॥ इति ।

अत्र नलविरहातुरया दमयन्त्या चन्द्रं प्रत्युपालम्भः क्रियते । मृतानां मनश्चन्द्रे लगतीति प्रतिपादयन्ती यत्रास्य पुरुषस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रमित्यादिश्रुतिं दृष्ट्वा खलु दमयन्ती मृता चेदस्या मनः स्वस्मिन् लग्नं भवेदिति प्रत्याशया मां मारयितुमिच्छसि सा जडस्य तव प्रत्याशा निष्फला यतः सा श्रुतिः नलमुखचन्द्रविषयेति विबुधो मन्मथो मह्यमुपदिष्टवानिति । एवं श्रुतेश्चन्द्रान्तरविषयत्ववर्णनं नलमुखे चन्द्रत्वारोपएव संगच्छते । एवम्

* गलितैरिति नैषधपुस्तकेषु पाठो दृश्यते ।

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान् बादरायणः ॥

इत्यत्रापि बादरायणे ब्रह्मत्वाद्यारोपे एव चतुर्वदनत्वादिप्रसिद्धब्रह्माद्येकैकगुणवैकल्यवर्णनं स्वारस्यमश्नुते । अत्यल्प*मिदमुदाहृतम् । सर्वेचारोपप्रमाणा एव कार्यसरणयः । एवंभूतेष्वारोपेषु सादृश्यं व्यङ्ग्यविषयतया कविभिर्विवक्ष्यते न तु गौणवृत्तिविषयतया । अत एव रूपकेणोपमा व्यज्यत इत्यालङ्कारिकसमयः । तथा वेदे ऽप्यात्मानं रथिनं विद्धि शरीरं रथमेव चेत्यादिष्वात्मशरीरादिषु रथिरथादिभावारोपः सुप्रसिद्धः । अजामेकामित्यादिमन्त्रे प्रकृतावजात्वकल्पना असौ वा आदित्यो देवमध्वित्यादावादित्यमण्डले मधुत्वकल्पनेत्यादिकमपि सुप्रसिद्धमेव । इत्थं वेदे आरोपमूलां शब्दवृत्तिं शरीररूपकविन्यस्तगृहीतेरिति कल्पनोपदेशाच्च मध्वादिवदविरोध इति च सूत्रकारो ऽपि स्पष्टमाह । तस्मादिह लक्षितलक्षणारूपा गौणीति व्याख्यातुमयुक्तम् । न च लक्षणागौण्योः सन्निकर्षविप्रकर्षप्रतिपादकव्याख्येयभाष्यमनुसृत्य तथा व्याख्यानं मुख्यार्थसाक्षात्संबन्धमूला लक्षणा सन्निकृष्टा मुख्यार्थवृत्तिगुणसमानगुणाधिकरणत्वरूपपरम्परासंबन्धमूला गौणी विप्रकृष्टेत्येवं भाष्यतात्पर्योपपत्तेरिति चेदुच्यते । यथाभाष्यमारोपमूला गौणीत्येव टीकाकाराणामाचार्याणामप्यभिमतं तदधिकरणोपक्रमटीकातद्व्याख्यानाभ्यां स्पष्टम् । सन्निकर्षविप्रकर्षभाष्यं गौण्यारोपमूला न भवति किं तु सादृश्यलक्षणामूलेति ये पूर्वमीमांसका वर्णयन्ति तन्मतानुसारेणापि योजयितुं शक्यमिति वैभवात्तथा व्याख्यातम् । पूर्वमीमांसकैर्हि तत्सिद्धये टीकायां यजमानः प्रस्तर इत्यत्र प्रस्तरे यजमानशब्दस्य यजमानत्वारोपेण वृत्तिर्न भवति किं तु तत्कार्यकरणत्वरूपयजमानसादृश्येनेति महता यत्नेनोपपादितम् । वस्तुतस्त्वत्रापि यजमानत्वारोपेण वृत्तिरित्येव युक्तमुत्तरम् । बर्हिषः प्रस्तरं सादयति प्रजा वै बर्हिर्यजमानः प्रस्तरो यजमानमेवायजमानादुत्तरं करोतीति संदर्भो रोहितेन त्वा ऽग्निर्देवतां गमयत्वित्याहैते वै देवाश्वा यजमानः प्रस्तरो यदेतैः प्रस्तरं प्रहरति देवाश्वैरेव यजमानं स्वर्गं लोकं गमयतीति संदर्भश्च संगच्छते । बर्हिष उपरि यत्प्रस्तरस्यासादनं तदेव

* अत्यल्पमिति २ पु॰ पा॰ ।

यजमानस्यायजमानादुत्तरीकरणमिति वचनं हि बर्हिषि प्रस्तरत्वारोपे प्रस्तरे यजमानत्वारोपे च सत्येव संगच्छते । तथा रोहितेन त्वेत्यादिभिर्मन्त्रैः प्रस्तरस्याहवनीये स्वर्गो लोक आहवनीय इत्यर्थवादान्तरश्रुतेः प्रहरणं प्रक्षेपणमिति वचनमपि मन्त्रेषु देवाश्वत्वस्य प्रस्तरे यजमानत्वस्याहवनीये स्वर्गत्वस्य चारोपएव संगच्छते । एवं सत्यपि वार्तिकादिषु यदारोपप्रच्छादनं तद्वेदप्रामाण्यसंरक्षणव्यसनितया । यद्यपि रुद्ररोदनाद्यसदर्थमवलम्ब्य विधेयस्तुतौ तात्पर्यवर्णने प्रामाण्यस्य न क्षतिः तथापि

प्रसरं न लभन्ते हि यावत्क्व च न मर्कटाः ।
नाभिद्रवन्ति ते तावत् पिशाचा वा स्वगोचरे ॥

इतिन्यायमवलम्ब्य वेदप्रामाण्य*प्रतिषेधकारणं क्रियतो ऽप्यवकाश-स्यालाभायारोपपक्षः प्रौढ्या प्रच्छादितः । अलं विस्तरेण† ॥

४०१ । १९ **सर्वाभेदादन्यत्रेमे ॥ १० ॥**

ननु कौषीतकिवाक्यमिति । एवंशब्दः सन्निहितावलम्बन इत्येतावता शाखान्तरोक्तं वसिष्ठादिकं न व्यावर्तयति तस्याप्यनुमानतः सन्निहितत्वेनैवंशब्दपरामर्शनीयत्वादिति शङ्कार्थः । सन्निधापितमेवैवंशब्दः परामृशति न प्रमाणान्तरसन्निधापितमपि । अन्यथा गामानयेत्यत्र गोरिव प्रत्यक्षोपस्थापितघटस्यापि कर्मतया ऽन्वयप्रसङ्गादिति परिहारार्थः । **फलविधिपरे इति ।** तथो य एवैवं विद्यादित्यादि तदमृतो भवति यदमृता देवा इत्यन्तं तत्र फलवाक्यम् ।

विद्यैक्यद्वारा प्राप्तशाखान्तरीयफलसंबन्धानुवादादिति । ननु कौषीतकिशाखायां तदमृतो भवति यदमृता देवा इति प्राणदेवतासायुज्यं फलमुक्तम् । शाखान्तरे तु छान्दोग्ये बृहदारण्यके च ज्यैष्ठ्यश्रैष्ठ्यरूपफलं तद्बृहदारण्यके स्वानामिति विशेषणाज्ज्ञातिमध्ये वयसा गुणेन चाधिक्यरूपमैहिकमेव तत्कुतः शाखान्तरीयफलानुवादसंभव इति चेदुच्यते । कौषीतकिशाखायामिवास्ति शाखान्तरे ऽप्यनाम्नातवसिष्ठत्वादिगुणा प्राणविद्या । अत एव भाष्ये कौषीतकिप्रभृतीनामित्युक्तम् । तेषु प्राणदेवता-

---

* वेदवत्प्रामाण्यमिति २ पु. ।

† अत्र चतुर्थं व्याप्त्यधिकरणं पूर्णम् ।

सायुज्यं फलमुक्तमस्तीत्याचार्याणामाशयः । ननु छान्दोग्यबृहदारण्यकोक्तज्यैष्ठ्यश्रैष्ठ्यगुणलाभो ऽपि प्राणदेवतासायुज्यरूप एव तत्सायुज्यस्य तद्गुणान्वयरूपत्वाद्बृहदारण्यके ज्येष्ठश्च श्रेष्ठश्च स्वानां भवतीत्येतदनन्तरमपि च येषां बुभूषति य एवं वेदेति वाक्येनान्येषामपि येषां ज्येष्ठश्च श्रेष्ठश्च भवितुमिच्छति तेषामपि ज्येष्ठः श्रेष्ठश्च भवतीति ज्यैष्ठ्यश्रैष्ठ्ययोरैहिकामुष्मिकसाधारण्यस्योक्तत्वात् । एवं फलाभेदोपपादनेन* पूर्वपक्षसिद्धान्तयोर्विद्यैक्यसिद्धत्कारयोगात् । तस्मात्फलानुवादेनान्यव्यावृत्तिपरतोक्तिर्युक्तैव । ननु पञ्चाग्निविद्यावैश्वानरविद्यादिफलवाक्येष्वपि एवं श्रूयते तेषामपि शाखान्तरप्राप्तफलानुवादेनान्यव्यावृत्तिपरता स्यादिति चेत् । अस्तु । पूर्वपक्षिणः का हानिः । अत्र सैद्धान्तिकन्यायव्युत्पादनेन तेष्वनुपसंहारशङ्कानिरासो भविष्यतीति । ननु सत्यमित्यादिटीकायामशब्दस्यापि शाखान्तरीयगुणजातस्य शाब्दान्वयो युक्तः अव्यभिचरितक्रतुसंबन्धिजुहूपस्थापितस्य क्रतोः पर्णतान्वयदर्शनात् तथेहाऽव्यभिचरितवसिष्ठत्वादिगुणसंबन्ध्युपास्यफलोपस्थापितस्य वसिष्ठत्वादेरन्वयसंभवादित्युक्तमिति प्रतिभाति । तन्न युक्तम् । शब्दोपस्थापितस्यैव शाब्दान्वयनियमात् पर्णतावाक्ये ऽपि न लिङ्गोपस्थापितस्य क्रतोरन्वयः किं तु जुहूपदलक्षितस्य । पर्णतायाः जुह्वाकृतिमात्रार्थत्वे वैयर्थ्यं स्यादिति जुहूपदस्य तद्वति क्रतौ लक्षणा स्वीकृता । न चेह कस्य चित्पदस्य शाखान्तरीयगुणजातलक्षणायां किं चित्कारणमस्तीत्याशङ्कां वारयति **सत्यमशाब्दं शाब्देनान्वेतीति ।**

भवति शाब्दमिति । स्व†शाखाम्नातवत्परशाखाम्नातमपि शाब्द- ४०८ । ५
मेव शाब्दत्वे ऽपि कौषीतकिशाखागतैवंशब्दार्थावगतिसमये शाखान्तराम्नातं गुणजातं शब्देन नोपस्थितं‡ किं तु स्वशाखाम्नातं तत्पूर्वापरानेकवाक्यविहितं तदाशब्देनोपस्थितं तदानीमशाब्दमपि शब्दमूलप्रतिपत्त्यास्पदमेतत्प्रकरणाम्नातगुणत्वेन क्रोडीकृतम् एवंशब्दो गोचरयेदिति चेत् । एवं तर्हि शाखान्तराम्नातमपि गुणजातमेतद्विद्यासंबन्धिगुणत्वेन क्रोडीकृतं स गोचरयतीत्यस्तु प्रधानभूतविद्याघटितप्रकरणानुप्रवेशापेक्षया विद्यानुप्रवेशे

* फलभेदाऽनुपपादनेनेति २ पु॰ पा॰ ।
† स्वशब्दो नास्ति १ पु॰ ।
‡ नोपस्थितं चेदिति २ पु॰ पा॰ ।

४०८ । ९ लाघवादिति भावः । उपास्यफलप्रत्यभिज्ञानादिति फलप्रत्यभिज्ञानमुपपादितम् । स्यादेतत् । वसिष्ठत्वादीनां* कौषीतकिशाखाम्नातायामुदाहृतप्राणविद्यायामुपसंहारो न युज्यते विरोधात् । तथा हि । वाचो वसिष्ठत्वं वाग्मिनः सद्व्यवहारजननेन वसुमत्तासंपादकत्वं चक्षुषः प्रतिष्ठात्वं चक्षुष्मतः समविषमभूतलादिप्रदर्शनेन प्रतिष्ठासंपादकत्वं श्रोत्रस्य संपत्त्वं वेदशास्त्रतदर्थश्रवणादिसंपादनेन संपत्करत्वं मनस आयतनत्वं स्रक्चन्दनादिविषयत्वज्ञानरूपभोगायतनत्वमिति तत्तद्वाक्यशेषाद्यनुसारेण स्थितम् । अतो यदहं वसिष्ठो ऽस्मीत्यादेर्यदहं वसुमत्तासंपादनसमर्थो ऽस्मि त्वं तद्वसिष्ठो ऽसि मत्सामर्थ्यस्य त्वदधीनत्वात्तवैतत्सामर्थ्यमित्यादिरर्थः । इदं च प्राणस्य वागादिगततत्कार्यसंपादनसामर्थ्यनिमित्तत्वरूपं वसिष्ठत्वादिकं छान्दोग्यवाजसनेयकगतप्राणविद्यायामुपपद्यते । तयोः प्राणोत्क्रमिषायां वागादीनामपि क्रमेण प्रसक्तिवर्णनेन तेषां स्वकार्यकरणसामर्थ्यस्य प्राणाधीनत्वात् । कौषीतकिशाखायां दशमाध्याये यत्प्राणविद्याम्नानं तत्रापि वसिष्ठत्वादिकमुपपद्यते । तत्र हि यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च स्वानां भवतीत्यारभ्य छान्दोग्यबृहदारण्यकरीत्यैव प्राणस्य ज्यैष्ठ्यश्रैष्ठ्यगुणवत्त्वं वागादीनां वसिष्ठत्वादिगुणकत्वं मुख्यप्राणस्य वागादीनां च श्रैष्ठ्यविषयपरस्परविवादेन ब्रह्मसभोपवर्णनं यस्मिन्नुत्क्रान्ते शरीरेन्द्रियाऽनवस्थितिः स श्रेष्ठ इति ब्रह्मवचनं तत्परिचिकीर्षया वागादीनामेकैकस्य शरीरादुत्क्रम्य पर्यटनं तदा शरीरस्येन्द्रियाणां च यथापूर्वमवस्थानं प्राणस्योत्क्रमणप्रवृत्तौ तेषां विशरणं ततो भीतानां वागादीनां मोत्क्रमीस्त्वन्नः श्रेष्ठ इति मुख्यप्राणं प्रति वचनमित्येतत्सर्वं क्रमेण वर्णितम् । प्राणे वागादिगतवसिष्ठत्वादिगुणसमर्पणमात्रं नोक्तं कौषीतकिशाखायां चतुर्थाध्याये अथातो निःश्रेयसादानमित्यारभ्य या प्राणविद्या ऽऽम्नाता तस्यामुक्तरूपं वसिष्ठत्वादिकं प्राणे नोपपद्यते । तत्र हि प्राणाऽनधीनकार्यत्वं वागादीनामुक्तम् । शरीरमात्रस्य प्राणाधीनस्थितिसंचारादिमत्त्वमुक्तम् । अथातो निःश्रेयसादानं सर्वा वै देवता अहंश्रेयसे विवदमाना अस्माच्छरीरादुच्चक्रमुस्तद्दारुभूतं शिश्ये अथैतद्वाक् प्रविवेश तद्वाचा वदच्छिश्य एव । अथैनच्चक्षुः प्रविवेश तद्वा-

* वसिष्टत्वादिनेति पु· पा· ।

यावदग्नुषा पश्यंश्छिश्य एव । अथैनत् श्रोत्रं प्रविवेश तद्वाचा वदच्चक्षुषा पश्यच्छ्रोत्रेण शृण्वत् शिश्ये एव । अथैनन्मनः प्रविवेश तद्वाचा वदच्चक्षुषा पश्यत् श्रोत्रेण शृण्वत् मनसा ध्यायत् शिश्ये एव । अथैनत् प्राणः प्रविवेश ततत एव समुत्तस्थाविति । तस्मादुदाहृतकौषीतकिशाखाम्नातप्राणविद्यायां वसिष्ठत्वाद्युपसंहारो न युक्त इति चेदुच्यते । वागादीनामभिवदनमात्रस्य प्राणानधीनत्वोक्तावपि गोष्ठीषु सद्व्यवहारजनजननेन वसुमत्तासंपादकत्वरूपं यद्वसिष्ठत्वम् एवमादिकं शरीरस्थितिसंचारापेक्षं प्राणाधीनमित्येतदिहाप्यनुमतमेवेति वसिष्ठत्वाद्युपसंहारे न का ऽप्यनुपपत्तिः ।

उशब्दो ऽप्यर्थ इति । तथो इत्यत्र तथा उ इति द्वे पदे इति भावः । **प्राणात्मत्वप्राप्त्या** प्राणसायुज्यप्राप्त्या अथ वा कल्पान्तरे प्राणदेवताभावप्राप्त्या* ॥

आनन्दादयः प्रधानस्य ॥ ११ ॥ ४०८ । २१

संयद्वामत्वादय इत्यादेर्**यथाविधि व्यवस्थे**त्यन्तस्यायमर्थः । अक्षिपुरुषोपासनार्थमुपास्यगुणत्वादयो संयद्वामत्वादयो दध्यादिवद्विधेयाः । अतः कालान्तरभाविफलोद्देश्यकगुणविशिष्टब्रह्मोपासनाविधिप्रयुक्तं फलापूर्वमभ्युपगन्तव्यं तत्प्रयुक्ताश्चेतिकर्तव्यतारूपा धर्माः कर्तव्यत्वेनोपदिष्टस्य कथं कर्तव्यमित्याकाङ्क्षायामित्थं कर्तव्यमित्युपदिश्यमानस्तत्प्रकारविशेषः खल्वितिकर्तव्यता सात्वपूर्वप्रयुक्तेति पूर्वतन्त्रे सप्रमाद्ये व्युत्पादितम् । तदित्थं यद्यपि यागेनाऽपूर्वं कृत्वा स्वर्गं भावयेदिति विधिना यागकर्तव्यता ऽप्यवगम्यते तथापि तत्र न प्रकाराकाङ्क्षा ऽस्ति किं चिदुद्दिश्य द्रव्यत्यागरूपस्य लौकिकस्य तस्य निर्ज्ञातप्रकारत्वात् । न ह्योदनं पचेत्युक्ते कथमिति प्रकारविशेषाकाङ्क्षा जायते जायते तु घृतपूरं पचेत्युक्ते । तथेहाऽपूर्वकर्तव्यताया अनिर्ज्ञातप्रकारत्वात्तत्र कथमाकाङ्क्षायां तदितिकर्तव्यतारूपतयोपदिश्यमाना धर्मास्तत्प्रयुक्ता इति तदपूर्वं मियतो धर्मानपेक्षत इति लोकतस्तत्परिमाणाऽनवगमाच्च यावतामन्वयस्तावद्भिस्तद्भवतीति विध्यनुसारेणावगन्तव्यत्वात् । **यथाविधि व्यवस्थेति** । एवं चानिर्ज्ञातपरिमाणत्वादि-

* अत्र पञ्चमं सर्वाभेदाधिकरणं पूर्णम् ।

त्यस्यानिर्ज्ञातपरिमाणधर्मसाध्यत्वादित्यर्थः । अपूर्वबहुत्वाभावेन यथाश्रुतानन्वयात् । अथ वा ऽवान्तरापूर्वाभिप्रायं सर्वमिदं वाक्यं योजनीयम् । बहुगुणविशिष्टब्रह्मोपासने हि पाठक्रमेण गुणचिन्तनेषु बहुषु जायमानेषु प्रयाजाद्यपूर्ववद्बहून्यवान्तरापूर्वाणि भवन्ति तत्प्रयुक्ताश्च भवन्ति उपास्यफलाः । अङ्गापूर्वाणामपि तदङ्गगुणप्रयोजकत्वात्तेषामियत्तारूपं परिमाणमनिर्ज्ञातं विध्यधीनं निर्ज्ञातमिति यथाविधि व्यवस्था ।

यावन्त्यो भ्रान्तय इति । निर्गुणप्रकरणेषु गुणवैशिष्ट्याम्नानस्य निष्प्रधानभूतनिर्गुणप्रमित्यर्थत्वसिद्ध्यर्थं गुणवैशिष्ट्यांशं त्यक्तुं ज्ञानत्वानन्दत्वादीनामन्यतमगुणवैशिष्ट्यश्रवणे ऽपि विरोधस्फूर्तये प्रकरणान्तराम्नातगुणोपसंहारे कर्तव्ये विनिगमनाविरहान्नानाप्रकरणाम्नानात् सर्वगुणोपसंहारः कार्यः । न चैवं सगुणप्रकरणाम्नातसंयद्वामत्वादिगुणानामपि निर्गुणप्रकरण उपसंहारप्रसक्तिः । सच्चिदानन्दत्वानामुपसंहारस्यानृतजडदुःखात्मत्वपरिच्छिन्नत्वाऽनात्मत्वभ्रान्तिनिवारणेनैव संयद्वामत्वादीनामुपसंहारस्य किंचिद्भ्रान्तिनिवर्तनेन सच्चिदानन्दापरिच्छिन्नप्रत्यगात्मभूतब्रह्मस्वरूपरूपप्रमित्युपयोगित्वाभावादिति भावः* ॥

४०९ । १३ **आध्यानाय प्रयोजनाभावात् ॥ १४ ॥**

ब्रह्मस्वभावभूतेति । सत्तादिसामान्यानि घटत्वादिवद्धर्मिस्वभावभूतानि अर्थादिपरत्वं तु प्रतियोगिसापेक्षम् अस्वभावभूतमित्यर्थः । न सर्वैर्वाक्यैरिन्द्रियादिभ्यः सर्वेभ्यः पुरुषस्य परत्वं शब्दवृत्त्या प्रतिपाद्यते इन्द्रियादिभ्यो ऽर्थादीनां क्रमेण प्रतिपादनदर्शनात् । न चैकं वृणीते द्वौ वृणीते त्रीन् वृणीते इत्यत्र त्रयाणां वरणस्य विधानेनार्थसिद्धम् एकस्य द्वयोश्च वरणमिव पुरुषस्याव्यक्तात्परत्वप्रतिपादनेनार्थादीनामिन्द्रियादिपरत्वमर्थसिद्धमनुवदितुं शक्यं तथेहार्थतः सिद्ध्यसंभवात् । तस्मात्तेन तेन वाक्येनार्थादिपरत्वमपि प्रतिपादनीयमित्यतः सर्वेषां वाक्यानां पुरुषपरत्वप्रतिपादनमात्रे तात्पर्यं कल्पयितुं न युक्तमिति भावः । **दृष्टप्रयोजने संभवतीति ।** यद् ग्राम्याणां पशूनां पयसा जुहुयाद् ग्राम्यान् पशून् शुचा

* अत्र षष्ठम् आनन्दाधिकरणं पूर्णम् ।

ऽर्पयेत् यदारण्यानामारण्यान् जर्तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा न ग्राम्यान् पशून् हिनस्ति नारण्यान् । अथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेति पयसा ऽग्निहोत्रं जुहोतीत्यत्र ग्राम्यारण्यपशुहिंसाराहित्येन प्रशस्तयोरपि जर्तिलगवीधुकयवाग्वोर्यदपेक्षया ऽपकर्षस्तत्पयो ऽत्यन्तं प्रशस्तमिति पयःप्राशस्त्यप्रतिपादनार्थं जर्तिलगवीधुकयवाग्वोर्विधिसरूपार्थवादो न तु विधिः । एवमिन्द्रियाद्यपेक्षया उत्तरोत्तरोत्कर्षावधेरव्यक्तादपि परः पुरुष इति पुरुषपरत्वप्रतिपादनएव तात्पर्यम् । इन्द्रियेभ्यः परा ह्यर्था इत्यादिस्तु तत्तत्परत्वप्रतिपादकसरूपस्तच्छेषः पुरुषपरत्वप्रमितिरूपे दृष्टफलार्थत्वे संभवति उपासनाद्वारकादृष्टार्थत्वायोगात् । भूमपरत्वप्रतिपादनपरायामपि भूमविद्यायां नामाद्युपासनातत्फलश्रवणस्येवात्रेन्द्रियाद्युपासनातत्फलश्रवणस्याभावेनावान्तरतात्पर्यकल्पनाऽयोगात् । न च स्मृत्यनुसारेण तत्कल्पनं स्मृतेः सांख्यकल्पिततत्वविषयत्वेन श्रुतेरानुमानिकाधिकरणे*क्तन्यायाच्छरीरेन्द्रियादिविषयत्वेन च स्मृतेः श्रुत्यनुसारित्वाभावात् । आचार्यैर्व्याख्यातेन प्रकारेण स्मृतेः सांख्यकल्पिताहंकारादिविषयत्वाभावे ऽपि श्रुतिकल्पितरथाश्वप्रग्रहादिविषयत्वादिति भावः† ॥

आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥ ४१० । ३

महाभूतसर्गोपसंहारात्पादसंगतिरिति । अग्रे वक्ष्यमाणे महाभूतसर्गानुपसंहाररूपे पादार्थे अनेकविषयवाक्योदाहरणपूर्वकं विद्याभेदपूर्वपक्षं कृत्वा विद्यैक्यसमर्थनेन गुणोपसंहारस्यानिरूपणात्पादसंगतिर्नास्तीति यो मन्यते तत्परितोषार्थं वर्णकान्तरमारभतइत्यर्थः । यद्यपि निर्गुणविद्यासु गुणोपसंहारमात्रं विचार्य्यं न तु विद्यैक्यमित्युक्तमाचार्यैः पादारम्भे आनन्दादय‡ इत्यधिकरणे च निर्गुणविद्यैक्यमनाक्षिप्यैव गुणोपसंहारमात्रं चिन्तितं तथापि नैतस्मिन्नधिकरणे सगुणविद्याधिकरणेष्विवानेकविषयवाक्यस्पर्शोऽस्ति किं प्रथमाध्यायाधिकरणेष्विव कस्य चिद्विषयवाक्यस्यार्थविशेषनिर्धारणमात्रं तत्प्रथमाध्यायएव सङ्गतमिति यो मन्यते तत्परितोषार्थं वर्णकान्तरारम्भ इति तात्पर्यम् । विद्यैक्यगुणोपसंहाराऽनिरूपणादित्यस्य सर्वाभेदाधिकरणादिष्विव विद्यैक्यस्यानन्दाधिकरणइवानेकविषयवाक्योदाहरणपूर्व-

---

* व्या· सू· अ· १ पा· ४ सू· १ । † अत्र सप्तमम् आध्यानाधिकरणं पूर्णम् ।
‡ व्या· सू· अ· ३ पा· ३ सू· ११ । § व्या· सू· अ· ३ पा· ३ सू· १० ।

४१२ । २ कगुणोपसंहारस्य चानिरूपणादित्यर्थः । **भिन्नार्थोपक्रमेणेति** । आत्मा-
नात्मसु सत्तासामान्ययोगेन प्रयुज्यमानः सच्छब्दः सत्तासामान्यस्यैव वाचकः ।
विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे इति न्यायात् । सन् घट इत्या-
दिप्रयोगे तु घटशब्दादिसामानाधिकरण्याद्धर्मिपर्यन्तता । न च सदेव
सोम्येदमित्यत्र धर्मिपर्यन्तपदसामानाधिकरण्यमस्ति । ततः सतोपक्रमाच्छा-
न्दोग्यवाक्यमात्मोपक्रमाद्वाक्याद्भिन्नार्थमिति विद्याभेद इति पूर्वपक्षयतो-
त्यर्थः । **ननु छान्दोग्यइति** । अस्तिधातोः सत्तावाचिनः शतृप्रत्ययान्तः
सन्शब्दः सत्ताविशिष्टधर्मिवाची सत्ता त्वात्ममात्रवृत्तिः प्रपञ्चस्यानिर्वाच्यत्वा-
दित्याकाशशब्दवदेकव्यक्तिवचन इत्युपक्रमस्यासंदिग्धार्थत्वं शक्यमुपपाद-
यितुम् । अतो यथा वासः परिधत्त इत्यत्र वासःशब्दस्य त्वविशेषे पर्यव-
सानमिति संदिग्धार्थस्य क्षौमे पर्यवसानार्थम् एतद्वै सर्वदेवत्यं वासो यत्
क्षौममित्युपसंहारापेक्षा एवमिह सच्छब्दस्यात्मनि पर्यवसानार्थे नोपसंहारा-
पेक्षा ऽस्तीति शङ्कार्थः । **अभ्युपेत्यापि सच्छब्दस्य सामान्यवाचि-
त्वमिति** । आत्माऽनात्मसाधारण्येन सत्ताविशिष्टमात्रवाचित्वमिह सामा-
न्यवाचित्वं न तु सत्तासामान्यवाचित्वम् । आत्मरूपविशेषपर्यवसानोक्तिवि-
रोधापत्तेः । **श्रुतिद्वये ऽपि विद्यैक्यइति** । ननु सकलशाखास्वपि निर्गुण-
विद्यैक्यमस्ति तस्मिन् सत्यप्यानन्दवल्लीप्रतर्दनाख्यायिकाकठवल्लीमुण्डकादि-
षूपक्रमभेदो दृश्यते तथेहाप्युपपद्यते कोऽत्र विशिष्योपक्रमभेदफलप्रश्नः ।
उच्यते । सत्यपि सकलशाखाम्नातनिर्गुणविद्यैक्ये विशिष्य छान्दोग्यवाज-
सनेयकयोर्निर्गुणविद्यैक्यमुच्यमानमत्यन्तसादृश्यविशेषकृतं भवितुमर्हति तथा-
त्यन्तसदृशयोरुपक्रमभेदस्य किं फलमिति प्रश्नः । अनयोरौपसंहारिक-
प्रत्यग्ब्रह्मैक्यवेदने* परस्परोपकारप्रयुक्तमिह विद्यैक्यं विवक्षितं परस्परोप-
कारश्च सदात्मोपक्रमभेदेनैव भवति नान्यथेत्युपक्रमभेदफलं न्यायसंग्रहे
४१३ । ३ विवरणाचार्यैरुक्तं दर्शयति **तद्यथेति** । अयमर्थः । तत्त्वमसीत्यत्र तत्त्व-
म्पदयोः श्रौते सामानाधिकरण्ये वाच्यार्थयोः सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिवि-
रुद्धधर्माक्रान्तयोरभेदायोगेनानुपपन्ने सति तत्परिहारार्थं तत्त्वंपदयोर्विरुद्धवि-
शेषणांशत्यागेन ब्रह्मजीवस्वरूपमात्रे लक्षणा ऽऽश्रीयते तथा लक्ष्यमाणावपि

* ब्रह्मैक्यभेदेनेति २ पु. पा ।

ब्रह्मजीवौ भेदेनैव प्रतीयेयातां लक्ष्यकोट्यननुप्रविष्टस्यापि हि भेदस्य तत्त्वमिति नामभेदप्रयुक्ता प्रतीतिरनिवार्या । अथैष ज्योतिरित्यादौ नामभेदस्यार्थभेदप्रत्यायकताया: क्लृप्तत्वात् । ततश्च भेदकप्रतीतावप्यघटमानस्याभेदस्य साक्षाद्भेदप्रतीत्या ऽत्यन्तमघटना स्यात् । अतो भेदकविशेषणयोरिव भेदस्यापि त्यागार्थं लक्षणान्तरमाश्रयणीयं तदपि लक्षणान्तरं तत्त्वंपदयोरेवेति पुनरपि नामभेदत्यागाय लक्षणान्तरमाश्रयणीयमित्यनवस्था भवेत्तत्परिहाराय लक्ष्यमाणतादशायामेव प्रत्यग्ब्रह्मैक्यब्रह्मप्रतीतिदशायामेव शाब्दस्याभेदस्य प्रतीतेर्नामभेदन्यायलभ्यो भेदो नोन्मज्जति । अतस्तत्त्वंपदार्थौ जीवब्रह्मपर्यन्तौ लक्षणीयौ तत्पर्यन्तलक्षणा च लक्षणीयार्थप्रसिद्धिमपेक्षते । तत्र छान्दोग्यवाक्यं तत्त्वमसीत्यत: प्राक्तनं तदर्थं त्वमर्थपर्यन्तमानयति सर्वविज्ञानप्रतिज्ञानादिना वाजसनेयिवाक्यं स वा एष महानज आत्मेत्यत: प्राक्तनं त्वमर्थं तदर्थपर्यन्तमानयति अत ऊर्ध्वं विमोक्षाय ब्रूहीति प्रश्नोत्तरतालिङ्गेन । अत: परस्परोपकाररूपप्रयोजनैक्याद् विद्यैक्यमपि । यद्यपि तत्पदार्थे विशेषणांशत्यागाय छान्दोग्ये वाचारम्भणादिश्रुतिरुपकरोति त्वंपदार्थे विशेषणांशत्यागाय वाजसनेयके अनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष इत्यसङ्गत्वश्रुतिरुपकरोतीत्येवमपि परस्परोपकारो वक्तुं शक्य: तथापि स्पष्टत्वात्तमंशं विहाय तत्त्वंपदार्थयोर्जीवब्रह्मपर्यन्तताप्रतिपादनेन परस्परोपकारकत्वमुक्तम् । एतेनेयमपि शङ्का निरस्ता इहापि वर्णके विद्यैक्यं गुणोपसंहारो वा न निर्द्धार्यते किं त्वैतरेयकवाक्यपूर्ववर्णकइव छान्दोग्यवाक्यस्य प्रतिपाद्यविशेष्यमात्रं निर्द्धार्यते विद्यैक्यचिन्तापर्यवसानकल्पनार्थं परं वाजसनेयिवाक्यमपि उदाहृतम् । इदं पूर्ववर्णके ऽप्युदाहृत्य किमैतरेयकवाक्ययोर्विद्याभेद उत विद्यैक्यमिति शक्यं विचारयितुमिति । क्व चि*द्ब्रह्मणो जीवैक्यप्रतिपादनमित्यत्र जीवस्य ब्रह्मैक्यप्रतिपादनं चोपसंहारार्थमुपकर्तुर्ब्रह्मणो जीवपर्यन्ततायां जीवस्य ब्रह्मपर्यन्ततायाश्चोपक्रमे प्रतिपादनस्य छान्दोग्यवाजसनेयकयोरेव सद्भावात्पूर्वपक्षे सत्तासामान्यविषयतया छान्दोग्यवाजसनेयकयोरिव जीवविशेषजीवसामान्यविषयतया ऐतरेयकवाजसनेयकयोर्विद्याभेदस्योपपादयितुमशक्यत्वाच्च जीवविशेषे जीवसामान्यविषयतया वचनानामुपसंहारेण विद्यैक्योपपत्ते:† ॥

---

* क्व चिदिति नास्ति २ पु० ।   † अत्राष्टमम् आत्मगृहीत्यधिकरणं पूर्णम् ।

कार्याख्यानादपूर्वम् ॥ १८ ॥

ज्योतिष्टोमाङ्गत्वेनार्थवानिति । मीमांसकैर्दर्शपूर्णमासयोर्नानृतं वदेदिति श्रूयते स निषेधः क्रत्वर्थः तेन यो दर्शपूर्णमासावनुतिष्ठन् तदुपयोगिद्रव्यसंपादनार्थितया पुरुषार्थं निषेधमुल्लङ्घ्याऽनृतं वदेत्तस्य न केवलं पुरुषार्थनिषेधातिलङ्घनेन प्रत्यवायमात्रं किं तु क्रत्वर्थनिषेधातिक्रमेण क्रतोर्वैगुण्यमपीति निर्णीतं कर्त्रधिकरणे* । इह नोदाहरणमादरणीयमिति न्यायमनुसृत्य दर्शपूर्णमासपदस्थाने ज्योतिष्टोमपदं निवेशितम् । ज्योतिष्टोमप्रकरणे ऽपि वा नानृतं वदेदिति वाक्यान्तरं दृष्ट्वा न्यायसाम्येन तन्निवेशितम् । **आचमनपर्यालोचनयेति ।** अनग्नतावादः सावादाचमनस्य न स्तुतिर्भवति किं त्वाचमनीयानामपां वासस्त्वकीर्तनात्तद्द्वारेणाचमनस्तुतौ पर्यवसानं वाच्यं तदपि न संभवत्याचमनस्याविधेयत्वादित्यर्थः । **अनग्नतासंकल्पपर्यालोचनयेति ।** अनग्नतासंकल्पो विधेयः । सर्वाङ्गदृष्टिविधिसाहचर्यात् । लम्भुको ह वासो भवत्यनग्नो भवतीति छान्दोग्ये फलार्थवादश्रवणात् । छान्दोग्यकाण्वशाखयोर्वासस्त्वकीर्तनवदाचमनविधेरश्रवणेन तत्र वासस्त्वकीर्तनएव विधिपर्यवसानस्य वक्तव्यत्वाच्च । अतो विधेयेनाविधेयस्य स्तुतिकल्पनमत्यन्तमन्याय्यमित्यर्थः । **प्राणविद्याङ्गत्वेन यदाचमनं विधीयतइति ।** प्राणद्वारा सर्वकर्मसाधारणाङ्गात् स्मार्ताचमनादन्यत्प्राणविद्यायाम् असाधारणाङ्गमाचमनान्तरं विधेयमभ्युपगम्यते स्मार्तात्सर्वसाधारणात्प्राणाग्निहोत्रादन्यदेव वैश्वानरविद्याङ्गं प्राणाग्निहोत्रं तदा नैमित्तिकेन नित्यस्य प्रसङ्गसिद्धकार्यतया ऽऽवृत्त्यनपेक्षणादेकमेवाचमनमुभयकार्यार्थमङ्गीकरणीयमिति कल्पनागौरवं भवेन्न सिद्धान्तइत्यर्थः† ॥

४१४ । २४

समान एवं चाभेदात् ॥ १९ ॥

ऋग्वेदे यजुर्वेदे चेति । सामवेदे यजुर्वेदे च ज्योतिष्टोमः श्रूयतइति पूर्वमीमांसकैर्लिखितम् । इह तूदाहरणानास्थया ऋग्वेदे इत्युक्तम् । अथ वा सामवेदएव योनिग्रन्थोत्तराग्रन्थरूपसामाधारऋक्संहितावत्त्वादृग्वेदशब्देनोक्तः । **सिद्धान्तितं भेदलक्षणइति ।** शेषलक्षणे इति लेखनीये

---

* व्या० सू० अ० २ पा० ३ सू० ३३ ।

† अत्र नवमम् कार्याख्यानाधिकरणं पूर्णम् ।

प्रमादाल्लेखकैर्भेदलक्षणे इति लिखितम् । तृतीयाध्याये हि वाक्यपादे भूयस्त्वेनोभयश्रुती*त्यधिकरणं प्रयोगविधिस्तत्र निर्णीत इति उच्चैर्ऋचा क्रियते उपांशु यजुषा उच्चैः साम्नेति वाक्यैः ऋग्वेदयजुर्वेदसामवेदैरनुष्ठाप्यानां कर्मणां क्रमादुच्चैष्ट्वोपांशुत्वोच्चैष्ट्वरूपाः स्वरा विहिताः । यस्मिन्वेदे यस्य कर्मणः प्रयोगविधिस्तत्कर्म तेन वेदेनानुष्ठाप्यते प्रयोगविधिमूलत्वादनुष्ठानस्य । अतो ज्योतिष्टोमस्य सामवेदे यजुर्वेदे च साधिकारविधिश्रवणे सति तस्मिन् कतरस्य वेदस्य स्वरो भवतीत्याकाङ्क्षायां यजुर्वेदस्य स्वर इति निर्णेतुमङ्गभूयस्त्वेन यजुर्वेदप्रयोगविधिस्तस्मिन्नधिकरणे निर्णीत इत्यर्थः । प्रकृते विद्यैक्याऽसिद्धिदूषणं प्रत्याचष्टे **यतोऽत्रापीति ।** अङ्गभूयस्त्वं प्रयोगविधेरेव निर्णायकमुत्पत्तिविधिनिर्णयानुपयोगीति दूषणमनूद्य निराकरोति **न चाङ्गभूयस्त्वमिति ।** अङ्गसाकल्यधीसापेक्षं प्रयोगविधिकल्पनं यत्राङ्गबाहुल्यं तत्राङ्गसाकल्यधीर्भवति न तु यत्राङ्गानामल्पीयस्त्वं तत्रापि । न हि महति तरुषण्डे† कतिपयतरुहानेऽपि वनबुद्धिवत् पञ्चषट्तरुवृन्दे वनबुद्धिर्भवति । अतोऽङ्गभूयस्त्वं प्रयोगविधेरेव नियामकं नोत्पत्तिविधेरिति प्रकृतानुपयोगवाद्यभिप्रायः । **प्रयोगाऽविनाभूतत्वेनेति ।** प्रयोगविधिव्याप्यस्य प्रयोगविधिसमव्याप्तम् उत्पत्तिविधिं प्रत्यपि व्याप्यत्वमस्तीति भावः‡ ॥

संबन्धादेवमन्यत्रापि ॥ २० ॥ ४१६ । १

विषयशुद्ध्यर्थं विद्योपक्रमश्रुतिमुदाहृत्य विवृणोति **आप इति ।** आपो ऽत्र पञ्चाग्निविद्यायामापः पुरुषवचसो भवन्तीत्यत्रेहामुत्र च संचरतां जीवानामिव प्रथमजीवस्य हिरण्यगर्भस्य शरीरारम्भार्था भूतान्तरसहिता आप उच्यन्ते सूक्ष्मावस्थास्ता एव इदं सर्वं व्याकृतं समस्तं जगद्धिरण्यगर्भशरीररूपम् अग्रे नामरूपव्याकरणात्प्रागासुः नान्यद्विकारजातमासीदित्यर्थः । तावेतावादित्याक्षिपुरुषावन्योन्यस्मिन्नादित्यपुरुषो ऽक्षिपुरुषश्चादित्यपुरुषे परस्परोपकारं कुर्वन्तौ प्रतिष्ठितौ एष आदित्यपुरुषः अस्मिन्नक्षिपुरुषे रश्मिभिः प्रकाशदानेनानुग्रहं कुर्वन्प्रतिष्ठितः । अक्षिपुरुषः अमुष्मिन्नादित्यपुरुषे प्राणैरनुग्रहं कुर्वन् प्रतिष्ठितः । प्राणैरादित्यपुरुषस्यानुग्रहस्तस्य

* जै· सू· अ· ३ पा· ३ सू· १० ।

† वृन्दे इति २ पु· पा· खण्डे इति १ पु· पा· ।

‡ अत्र दशमं समानाधिकरणं पूर्णम् ।

प्राणसूत्त्रस्वरूपत्वात्तथात्वं च तस्य पुरुषविद्याधिकरणे अक्षितमसीत्यादिमन्त्रत्रयव्याख्यानेन स्पष्टीकरिष्यते * ॥

४१७ । १७ **संभृतिद्युव्याप्त्यपि चातः ॥ २३ ॥**

नन्वाधिदैविकविभूतिब्रह्मप्रत्यभिज्ञानमात्रमन्यत्राम्नातगुणानामुपसंहारे न हेतुः वैश्वानरषोडशकलादिविद्याम्नातगुणानामपि परस्परोपसंहारप्रसङ्गादित्याशङ्क्य तदुभयप्रत्यभिज्ञानमात्रमिह नोपसंहारहेतुत्वेन विवक्षितं किं तु विध्यश्रवणेन खिलग्रन्थपठितत्वेन चोपष्टब्धं तदित्याह **यद्यपीत्यादिना** † ॥

४१८ । १२ **पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥ २४ ॥**

पुरुषो वाव यज्ञ इत्यादिखण्डद्वये विषयविवेकार्थमपेक्षितानि तत्र तत्र स्थितानि वाक्यानि संकलय्य दर्शयति **पुरुषो वावेति** । ता अस्य दीक्षेति श्रुतिपाठः सा ऽस्य दीक्षेति दीक्षाशब्दसामानाधिकरण्येनार्थानुसारादेकवचनेन पठितम् । यद्धसति जक्षति यन्मैथुनं चरति स्तुतशस्त्रैरेव तदेतीति श्रुतिरर्थतो ऽनूदिता । **शब्दवस्तुसामान्यादिति** संपत्तिहेतुभूतं साम्यं श्रुतिविवक्षितं स्वयं विवृतम् । तं चेदेतस्मिन् वयसि किं चिदुपतपेदिति श्रुतिपाठः । किं चिदित्येतद्व्याख्यानार्थं व्याध्यादीत्युक्तम् । अक्षितमसीत्यादितन्मन्त्रत्रये पुरुषयज्ञे सवनदेवतात्वेन प्रस्तुतानां प्राणानां सूक्ष्मरूपमाधिदैविकमादित्यात्मकमक्षितमित्यादिशब्दैरुच्यते । अक्षितमक्षीणमक्षतं वा अच्युतं स्वस्वरूपात्प्रच्युतं प्राणसंशितं प्राणरूपं च सूक्ष्मतत्त्वात्सम्यक् तनूकृतं च प्राणसूक्ष्मरूपं सावित्रं तत्त्वमित्येतत्तत्रैते ऋचौ भवतः आदित्प्रत्नस्य‡रेतस उद्वयं तमसस्परीत्यादिना सावित्रमन्त्रद्वयस्य यजुस्त्रयप्रतिपादितार्थप्रतिपादकत्वेनावतरणात्स्पष्टम् । ननु छान्दोग्यबृहदारण्यकगतोद्गीथविद्ययोर्बहुतरप्रत्यभिज्ञाने सत्यप्यल्पवैरूप्यमात्रेण भेदो ऽन्यथात्वं शब्दादित्यधिकरणे§ व्युत्पादितः कथमिह छान्दोग्यतैत्तिरीयकाम्नातपुरुषविद्ययोर्बहुतरवैरूप्ये जाग्रति मरणावभृथत्वसाम्यमात्रेणाभेदः शङ्क्यते । उच्यते । उद्गीथविद्ययोर्बहुतरप्रत्यभिज्ञाने सत्यप्युपक्रमभेदात्प्रधानोपास्यभेदाच्च भेद उक्तः । इह तु छान्दोग्ये यत्पुरुषस्य

---

* अत्र एकादशं संबन्धाधिकरणं पूर्णम् ।   † अत्र द्वादशं संभृत्यधिकरणं पूर्णम् ।

‡ आदितप्रलस्येति १ पु. पा. ।   § जै. अ सू. ३ पा. ३ सू. ६ ।

यज्ञत्वं प्रधानमुपास्यमुपक्रान्तं तदेव तैत्तिरीयके ऽपि विदुषो यज्ञस्येति सामानाधिकरण्याद्विद्वत्संबन्धिनः कस्य चिद्यज्ञस्य तथाऽसंपादितत्वाच्च यज्ञावयवा एव हि तत्र संपादिताः । अतः प्रधानसारूप्यादवयवसारूप्यमष्टाकपालत्वद्वादशकपालत्वादिवद्विकल्पयिष्यते । एकमपि प्रधानमेव ह्यनुरोध्यं न बहवो ऽपि गुणाः । अत एव यूपप्रकृतिर्मुख्यः खादिरो यदा तनुत्वेन* तक्षणादिसंस्कारायोग्यो लब्धः कदरस्तु स्थूलस्तद्योग्यो लब्धः तदा बहूनां संस्कारशास्त्राणामनुग्रहाय कदरो ग्राह्य इति पूर्वपक्षे एकस्यापि मुख्यस्यानुग्रहाय खादिर एव ग्राह्यः असंभवतां संस्काराणामस्तु लोप इति सिद्धान्तितं षष्ठे इत्यधिकाशङ्कया ऽत्र पूर्वपक्षे इत्यमधिकाशङ्का इह त्वसाधारणगुणप्रत्यभिज्ञानाद्विद्यैक्यमिति पूर्वपक्षयतीत्यवतारिकया पुरुषयज्ञत्वमुभयत्राप्यविशिष्टमिति टीकाग्रन्थेन च दर्शिता. भाष्याद्युक्तप्रकारेण विदुषो यज्ञस्येत्यत्र वैयधिकरण्यकल्पनाद् वक्ष्यमाणमात्मादिषु यजमानादिकल्पनामालोच्य तदर्थसमूहस्य यज्ञत्वेन प्रकरणलब्धेन विद्वत्संबन्धित्वेन चानुवादसंभवाच्च अत्राप्युपक्रान्तप्रधानभेद एवास्तीति सिद्धान्तः† ॥

वेधाद्यर्थभेदात् ॥ २५ ॥ ४२१ । १

सन्निधिलक्षणमिति । यद्यपीतिकर्तव्यताकाङ्क्षालक्षणं चतुर्थे सन्निधिस्तु स्थानप्रमाणावान्तरभेदरूपं पञ्चमं प्रमाणं तथापि मीमांसकैः स्थानप्रमाणविशेषरूपो ऽपि सन्निधिस्तत्र तत्र प्रकरणशब्देनापि व्यवह्रियते । गोदोहनस्य प्रकरणात्प्रणयनरूपाश्रयलाभ इत्यादिस्थलेषु तद्व्यवहारमनुरुध्यात्र संनिधावपि प्रकरणत्वोक्तिरितिकर्तव्यताकाङ्क्षा पारिभाषिकं प्रकरणं सन्निधिर्लौकिकप्रकरणमिति विशेषः । **काम्येष्टीनाम्** इत्यादि **विशेषसंबन्धो दृष्ट** इत्यन्तस्यायमर्थः । काम्येष्टिकाण्डे प्रथममिन्द्राग्निदेवत्यं काम्येष्टिद्वयं ततो वैश्वानरदेवत्यं काम्येष्टिद्वयमित्येवंप्रकारेण काम्येष्टयः पठिताः । काम्ययाज्यानुवाक्याकाण्डे प्रथममिन्द्राग्निदेवत्यं याज्यानुवाक्यायुगलद्वयं ततो वैश्वानरदेवत्यमित्येवंक्रमेण याज्यानुवाक्यामन्त्राः समाम्नाताः । तत्र काम्येष्टिकाण्डस्य याज्यानुवाक्याकाण्डस्य च समाख्यायाः संज्ञाया एकत्वात्सामान्यतः

---

* खादिरोपादानत्वेनेति पु० पा० ।

† अत्र त्रयोदशं पुरुषविद्याधिकरणं पूर्णम् ।

संबन्धः सिध्यति एतासामिष्टीनामेते याज्यानुवाक्यामन्त्रा इति विशेषस्तु संबन्धः प्रथमाया इष्टः प्रथमं याज्यानुवाक्यायुगलं द्वितीयाया द्वितीयमित्येवंरूपः सन्निधिवशादिति । अत्रेष्टिकाण्डस्य मन्त्रकाण्डस्य च संज्ञैक्येनेष्टीनां मन्त्राणां च संबन्धो मीमांसकैर्नोक्तः किं तु मन्त्रकाण्डस्यैव काम्ययाज्यानुवाक्याकाण्डमिति संज्ञया । आचार्यैस्तु न्यायसंग्रहोक्तं समाख्यालक्षणमनुसृत्य संज्ञैक्यमुक्तम् । न्यायसंग्रहे हि समाख्या यौगिकी संज्ञेति मीमांसकोक्तप्रकारं विहाय प्रकारान्तरमाश्रितम् । प्रदेशद्वयाम्नातयोः संबन्धनिमित्तं संज्ञैक्यं सामाख्या यथातिमुक्तिहोमानामग्निर्येत्तं नयतु प्रजानन्नित्यादिमन्त्राणां च संबन्धनिमित्तमाध्वर्यवसंज्ञैक्यमिति । अत्रापीष्टिमन्त्रकाण्डयोः काम्येष्टिकाण्डमित्येवमादिरूपैका संज्ञा ऽस्तीत्याचार्याणामभिप्रायः । इह सन्निधिवशाद्विशेषसंबन्धलाभ इति यदुक्तं तत्राप्यस्ति मीमांसकानां विमतिः ।

ते खल्वित्थमाहुः । द्विविधस्तावदाम्नानसादेश्यरूपः क्रमः यथासंख्याम्नानं सन्निध्याम्नानं चेति । तत्रोदोनोदाहृतानामिष्टिमन्त्राणां संबन्धः न तु सन्निधिना भिन्नप्रदेशाम्नातानां तेषां परस्परसन्निध्यभावात् । सन्निधिना तु शुन्धध्वं दैव्यायेति मन्त्रस्य सान्नाय्यपात्रशुन्धने* विनियोग इत्यतो ऽत्र सन्निधिशब्दः सादेश्यमात्रे यथासंख्यरूपविशेषपर्यवसायी व्याख्येयः । ननु प्रकृते मन्त्रकर्मणां विद्यासन्निध्याम्नानमस्त्यतो दार्ष्टान्तिकसारूप्यायान्यतो लब्धसामान्यसंबन्धानां विशेषसंबन्धमात्रे सन्निधिः प्रभवति यथा प्रकरणापादितक्रत्वपूर्वसंबन्धानां शुन्धनमन्त्रादीनां सान्नाय्यपात्रादिसंबन्धे । न च इह सामान्यसंबन्धापादकं प्रकरणमस्त्यतः सन्निधिरत्र न प्रभवतीत्युदाहर्तव्यम् । सत्यमित्थमुदाहरणं न हि यथा दर्शपूर्णमासावारभ्येत्यादिटीकाग्रन्थेन प्रकृते प्रकरणाऽभावं प्रदर्शयता ऽवगन्तुं शक्यमिति तद्विहाय प्रकरणान्तरेण दार्ष्टान्तिकसारूप्यार्थमाचार्यैर्यथासंख्योदाहरणं कृतम् । दार्ष्टान्तिके हि तदुपनिषदाम्नाताभिर्बह्वीभिर्विद्याभिर्मन्त्रकर्मणां सामान्यसंबन्धापादकं किं चिन्नास्तीति प्रतिपिपादयिषितम् । तत्र यथा काम्ययाज्यानुवाक्यानां बह्वीभिरिष्टिभिः सामान्यसंबन्धापादकं समाख्यैक्यमस्तीति व्यतिरेकदृष्टान्तोदाहरणम् । अङ्गप्रधानयोरित्यादिपूर्वपक्षोपपादकग्रन्थस्यायमाशयः । यथा सांग्रहण्यादिविकृतीनां

* सान्नाय्यतोशुन्धने इति १ पु. पा. ।

क्रतूपकारप्राकृताङ्गसंबन्धेन प्रथमभाविना नैराकाङ्क्ष्ये ऽप्यामनहोमादीनां
प्रधानान्वयसाकाङ्क्षाणां सन्निधानतस्तासामाकाङ्क्षोत्थापनादभिव्यक्तेन प्रकरणेन
सामान्यसंबन्धसिद्धौ सन्निधानादामनहोमादीनां यथासामर्थ्यमारादुपकारक-
त्वादिना ऽन्वयस्तथेहापीति ।

भाष्यगतस्यासात्रित्यस्य व्याख्यानं **सन्निधिरिति** । अकस्मादि- ४२१ । २४
त्यस्य व्याख्यानं **विना विषयेणेति** । विना फलेनेत्यर्थः । अर्थवत्त्वे संभ-
वतीति ह्युपक्रान्तम् । **आश्रयितुम्** । अङ्गीकर्तुम् । **न युक्त इति** ।
न हीत्यत्रत्यस्य नञो युक्त इत्यत्रान्वयो दर्शितः । अनेन सन्निधेः साफ-
ल्यसंभवे निष्फलो ऽसावङ्गीकर्तुं न युक्त इति भाष्यार्थ उक्तो भवति । ननु
तदर्थं शास्त्रादिहेतुभिर्मन्त्राणामर्थविवक्षा नास्तीति पूर्वपक्षे प्राप्ते अविशि-
ष्टस्तु वाक्यार्थः* इति सूत्रे इव लोके इव मन्त्रेष्वपि वाक्यार्थविवक्षा ऽस्ती-
त्येतावन्मात्रमुच्यते न तु तेषां प्रयोगसमवेतार्थप्रकाशेनेनोपयोगः । अतः
प्रयोगसमवेतार्थेत्यादिटीका ऽनुपपन्नेत्याशङ्क्य तात्पर्यगत्या तावत्पर्यन्तः
सूत्रार्थ इति व्याचष्टे **लोकवेदयोरिति** । **तत्सर्वार्थमविशेषादिति** ।
अनारभ्य विधानानां प्रकृतिगामित्वमिति निर्णयार्थस्य पर्णमय्यधिकरणस्य
षष्ठपादादिमस्य पूर्वपक्षसूत्रं सर्वार्थमप्रकरणा†दित्येवंरूपं तदिहार्थतः पठितम् ।
तत्सर्वार्थमविशेषादित्येवंरूपं तु शेषलक्षणे तृतीयपादे पौष्णापेषणाधिक-
रणस्य पूर्वपक्षसूत्रम् ।

न प्रवर्ग्यसंबन्धविशेषहेतुत्वमिति ज्ञापनार्थ इति । यद्यपि
प्रवर्ग्यस्य ज्योतिष्टोमसंबन्धरूपे संबन्धविशेषे हेतुत्वमुपसदामस्त्युपसदुप-
स्थापिते एव ज्योतिष्टोमे प्रवर्ग्यसंबन्धस्य बोधनीयत्वात् तथापि न तद-
भावज्ञापनार्थत्वमिहोपसदा सहेत्यस्योक्तं किं तु प्रवर्ग्योपसदोरङ्गाङ्गिभावरूप-
संबन्धविशेषाभावज्ञापनार्थत्वम् । तेन पुरस्तादुपसदामित्यादिवाक्यं प्रवर्ग्य-
स्योपसदुपस्थापितक्रत्वङ्गत्वबोधकं मा भूदुपसदङ्गत्वबोधकमस्तु राजन्य-
वासिष्ठानां नाराशंसो द्वितीयः प्रयाज इत्यत्रेवोपसदामित्यत्र षष्ठ्याः शेषि-
विषयत्वोपपत्तेरिति शङ्का पुरस्ताच्छब्दसत्त्वाद्विनियोगलक्षणे षष्ठीयं न शेषि-

---

* जै॰ सू॰ अ॰ १ पा॰ २ सू॰ ४० ।
† जै॰ सू॰ अ॰ ३ पा॰ ६ सू॰ १

विषया । न च प्राप्तानुवादेन पूर्वकालत्वे विधीयमाने ऽङ्गाङ्गिभावो ऽपि विधातुं शक्यते वाक्यभेदप्रसङ्गादिति परिहारसूचनेन व्यावर्तिता । एवमेव चतुर्था-ध्याये पुरस्तादुपसदां सौम्येन प्रचरन्तीति राजसूयान्तर्गतवाक्ये सौम्यच-
४२३ । ३ रूपसदोरङ्गाङ्गिभावो विधीयतइति पूर्वपक्षो निरस्तः । **इतरपदानामपि समवेतार्थत्वमिति** । यद्यपि निर्वापमन्त्रे सवित्रादिपदान्यसमवेतार्थान्येव असमवेतानामपि समवेतविशेषणतया ऽभिधानमदृष्टार्थम् । अत एव तेषां प्रकृतिष्वनूह इति नवमाध्याये निर्णीतं तथापि तद्विशिष्टाग्न्यर्थनिर्वापरूप-समवेतार्थपर्यवसानाभिप्रायेण समवेतार्थत्वमुक्तम् । **तदिह सन्निधिरिति** । यदि सन्निधिर्वाक्यगम्यमर्थं प्रत्याख्यातुं प्रवर्तेत तर्ह्येव बलवता वाक्येन सन्निधिर्बाध्येत न त्वेवमस्तीत्यर्थः । ननु विरोधाभावेन प्रबलप्रमाणलभ्य-विनियोगद्वयाभ्युपगमे बलाबलाधिकरणविरोधः स्यात् श्रुत्यादिभिः क्व चन विनियुक्तानां विरोधाभावेन लिङ्गादिभिरन्यत्रापि विनियोगोपपत्तेरित्याशङ्क्याह **तदनेनेति** । तत्राप्येवमेवास्त्विति पूर्वपक्ष्याशय इति भावः । क्त्वः समान-कर्तृत्वमवगम्यतइत्यत्र क्त्व इत्यस्यार्थमाह **क्त्वाप्रत्ययस्येति** । क्त्वाप्रत्यया-दिति व्याख्यातव्यं षष्ठ्यन्तपाठस्तु लेखकप्रमादागतः । धातुसंबन्धे प्रत्ययाः इति सूत्राद्धातुसंबन्धइत्यस्यानुवृत्त्या ऽनुवृत्तस्य द्वयोर्धात्वर्थयोर्गुणप्रधान-भावेन संबन्धो ऽर्थ इत्येतदुपपादयति **धातुसंबन्धइत्युक्तइत्यादिना** । धातोरित्येकत्वाधिकारादिति हेतुः धातुद्वयात्प्रत्ययविध्यनुपपत्तौ धातु-द्वयापत्तौ त्वेकस्य धातोः स्वेनैव संबन्धायोगो हेतुः । **समानकर्तृकत्वा-देकप्रयोगतामिति** । यद्यपि शरदि वाजपेयानन्तरं बृहस्पतिसवस्य कालः वसन्ते कर्तव्य इति चतुर्थएव निर्णीतत्वाद् बृहस्पतिसवस्य तद्व्यतिरिक्तसक-लाङ्गसहितवाजपेयप्रयोगात् पृथक् प्रयोगो ऽस्ति तथापि स्वाराज्यफलार्थि-राजसूयकर्त्रैक्यप्रयुक्तं महाप्रयोगैक्यमस्तीत्याशयः । **प्रयोगो भिद्येतेति** । महाप्रयोगैक्यमपि न भवेदित्यर्थः ।

४२४ । ११ **न चैकमेव वाक्यं दूरस्थं कर्म सन्निधापयति अन्याङ्गत्वेन च वि-धत्तइति युज्यतइति** । सन्निधिना विपरिवृत्तौ सत्यां वाक्यं विधिमात्रपरं दृष्टम् । यथा ऽग्निहोत्रविधिसन्निधौ श्रूयमाणं दध्ना जुहोतीति वाक्यम् । एष न सन्निधिस्तत्रैकेन वाक्येन विपरिवृत्तौ कृतायाम् अन्यद्वाक्यं विधिपर

दृष्टम् यथा गवामयनादिगतैर्ज्योतिर्गौरायुरित्याद्यहःक्लृप्तिवचनैर्ज्योतिरादयभि-धानानामेकाहक्रतुरूपाणां सोमयागानां विपरिवृत्तौ कृतायां यं कामं कामयते तमेतेनाप्नोतीति वचनान्तरेण तत्रैकदेशतया फले विधानम् । एवमेव प्रकर-णान्तराधिकरणे वार्तिककृतैतद्वचनमुदाहृत्योक्तम् एकेन वचनेन पर्युपस्थाप्या-परेण फले विधीयन्तइति । न चेह तथा वाक्यद्वयमस्ति । न चैतद्वाक्यं प्रसि-द्धम् । बृहस्पतिसवप्रत्यभिज्ञापनार्थमेवास्तु प्रत्यभिज्ञापनावैयर्थ्याय तस्याङ्गत्वेन विधिः कल्प्यतामिति वाच्यम् । क्त्वाप्रत्ययश्रवणादेव वाक्ये वाजपेयोत्तर-काले बृहस्पतिसवविधेरप्यङ्गीकर्तव्यत्वात् । तस्मात्प्रत्यभिज्ञानाभिधानरूप-व्यापारद्वयावेशो वाक्यभेदप्रसङ्गाद्विधानावश्यंभावेन प्रत्यभिज्ञानविरहे सति कर्मान्तरविधानमेव प्राप्नोतीत्यर्थः । **मतद्वयेपि संमतमिति*** । मतद्वय-माचार्यमतं गुरुमतं च ।

सत्यमभ्युपेत्यवाद इति । किमर्थं समाधीयते मीमांसकानां ४२४ । १५
मुद्राभङ्ग इह चिकीर्षित एव कृत इति किमिति नोच्यते विधानं प्रत्यभिज्ञानं चैकस्मिन् वाक्ये न संभवतीति मीमांसकमुद्रा हि नि-रालम्बना प्रत्यभिज्ञानं पदकृत्यं विधानं वाक्यकृत्यमित्येकस्मिन् वाक्ये तदुभयसमावेशसंभवात् । अन्यथा आज्यभागौ यजतीत्यत्र का गतिः । न हि तत्राज्यभागानां व्यतिरेकेण प्रसिद्धाज्यभागयोः प्रत्यभिज्ञापकमस्ति । न च चोदकः प्रत्यभिज्ञापकः । चोदकलोपाङ्गीकारान्न वा तत्र विधायकम-न्यदस्ति । न च प्रत्यभिज्ञापनावैयर्थ्याय विधिः कल्पनीयोऽस्त्विति शङ्कितुं शक्यम् । क्लृप्तोपकारप्राकृताङ्गविषयप्रत्यक्षविधिना नैराकाङ्क्ष्येण हि तत्र चोदकलोप इष्यते आज्यभागयोरिति चेद्विधिः कल्पनीयः । चोदक एव किमिति न कल्प्येत तथात्वे हीतिकर्तव्यताकाङ्क्षा प्रकामं परिपूर्णा भवेत् । आज्यभागौ यजतीत्येतच्च यदाग्नेयोऽष्टाकपालोऽमावा-स्यायां भवतीतिवदनुवादमात्रं स्यात्तस्मादाज्यभागौ यजतीत्यत्रैव विधानं प्रत्यभिज्ञानं चेत्यभ्युपगन्तव्यम् । एवमेवोक्तं भाष्यादिष्वपि । एवं तर्हि मासाग्निहोत्रमपि नित्याग्निहोत्रान्न भिद्येत । नित्याग्निहोत्रस्यैव नाम्ना प्रत्य-भिज्ञापितस्य तत्रापि विधानसंभवादिति चेद् अस्तु का हानिः । संप्रति-

* मतद्वयेन समानमिति च पु॰ पा॰ ।

पन्नं हि नित्याग्निहोत्रस्य प्रकरणान्तरे ऽप्यग्निहोत्रनाम्ना प्रत्यभिज्ञानम् । यथा शतपथब्राह्मणे दर्शपूर्णमासप्रकरणे चातुर्मास्येषु गृहमेधीयप्रकरणे च स* यवाग्वैतां रात्रिमग्निहोत्रं जुहोतीति अश्वमेधप्रकरणे च वाग्यतस्यैतां रात्रिमग्निहोत्रं जुहोतीति । एतेन धातुना पूर्वापरीभूततया प्रतीतस्य नाम्ना प्रत्यभिज्ञानं न संभवतीत्यपि शङ्का निरस्ता । कथं च धात्वर्थोपस्थापकत्वाभावात्तन्नामत्वमग्निहोत्रशब्दस्य भवेत् । ननु विहितस्य नित्याग्निहोत्रस्य पुनर्विधानाऽयोगेन विधियोग्यकर्मान्तरपरत्वावश्यंभावेन तत्परतन्त्रं नामापि कर्मान्तरपरं स्यादिति चेद् न । स्वातन्त्र्येण विहितस्यापि नित्याग्निहोत्रस्य सत्राङ्गत्वसिद्धये पुनर्विधानसंभवेनाख्यातस्य भेदौदासीन्ये सति कांस्यभोजिन्यायादाख्यातेनैव नाम्नो ऽनुवर्तनीयत्वान्नाम्नो ऽप्रसिद्धार्थतायामाख्यातपारतन्त्र्ये ऽपि प्रसिद्धार्थतायामाख्यातस्यैव नामपारतन्त्र्याच्च । न चैवं सति प्रकरणान्तराधिकरणविरोधः । तस्य धात्वर्थाभेदे ऽप्यध्यायार्थभूतो भावनाभेदः स्वतन्त्रपरतन्त्रविध्यायत्तो ऽस्तीत्येतत्परत्वात् । उक्तं च वार्तिककृता तस्मिन्नधिकरणे ।

नाम्ना धात्वर्थमात्रं च सन्निधाप्येत शक्तितः ।
भावना त्वनुपस्थानाद्विद्यमाना न वार्यते ॥ इति ।

ननु तथापि उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्या†दिति सप्तमाधिकरणेन मासाग्निहोत्रे नित्याग्निहोत्रधर्माणां नाम्ना ऽतिदेशं प्रतिपादयता विरोधः स्यादिति चेन्न । तस्य नित्याग्निहोत्रप्रकरणइव मासाग्निहोत्रस्थले ऽपि देवताविधानकृताऽग्निहोत्रनाम्नः प्रवृत्तिनिमित्ताभिव्यक्तिर्नास्तीत्यस्फुटशक्तिकत्वाभिप्रायत्वात् । प्रत्यक्षाद्गुणसंयोगात्क्रियाभिधानं स्यात्तदभावे ऽप्रसिद्धं स्या‡दिति तदधिकरणसूत्रेण तथा तदभिप्रायस्फुटीकरणात् । तस्मात्स्वतन्त्रबृहस्पतिसवस्यैव वाजपेयाङ्गतायां न कश्चिद्विरोध इत्येवं सैद्धान्तिकः पक्षो ऽभ्युपगन्तुं युक्तः । अत एव विवरणाचार्यैरपि पुरुषार्थस्य सौत्रामणिबृहस्पतिसवादेरग्निचयनवाजपेयादिप्रकरणान्तरेषु तत्तत्कर्माङ्गतया विधानं सिद्धवत्कृत्य व्यवहृतम् । तस्मादभ्युपेत्य-

---

* स इति नास्ति २ पु० ।
† जै० सू० अ० ७ पा० ३ सू० १ ।
‡ जै० सू० अ० ३ पा० ३ सू० ४ ।

षाद (इति न वक्तव्यमिति चेत् सत्यम् । अभ्युपेत्यवादत्वोक्तिरेवेयम् । एतावद्दूरविवेचनाऽसमर्थान् विनेयान् प्रत्यभ्युपेत्यवाद*) रूपा । अथ वाऽङ्गं बृहस्पतिसवः कर्मान्तरमित्यभ्युपगतवतां मीमांसकानां कर्मान्तरत्वपक्षोऽप्यभ्युपेत्यवादरूपोऽस्तीत्येतत्परेयमभ्युपेत्यवादत्वोक्तिः । गुरुणा हि निबन्धनटीकायामङ्गसोचामणिबृहस्पतिसवयोः कर्मान्तरत्वं प्रसाधितवतापि विवरणटीकायामकर्मान्तरत्वं† व्यवहृतम् । एवमिदं मीमांसकदृष्ट्या न व्यवस्थितमुदाहरणमिति मत्वैवं तन्मते व्यवस्थितोदाहरणं खदिरत्वादीत्युदाहरणान्तरमन्विष्टम् ।

नाङ्गाङ्गित्वबोधकमिति । नाम्ना प्रसिद्धयोर्दर्शपूर्णमासयोः सोम- ४२४ । १९
द्रव्येण प्रसिद्धस्य सोमयागस्य च प्रत्यभिज्ञानात्तेषां च साधिकारत्वेन विनिगमनाविरहान्न किंचिदङ्गत्वेनान्यविधानं शक्यमित्यर्थः । ननु सोमयागे विधिश्रवणं तस्याङ्गत्वेन विधाने‡ विनिगमकमस्तीति चेदुच्यते । सोमस्य दर्शपूर्णमासाङ्गत्वे तद्विकृतीनां दीक्षणीयादिसोमयागाङ्गेष्टीनामपि सोऽङ्गं स्यादिति दीक्षणीयादिसहितस्य सोमयागस्य सिद्धौ दीक्षणीयादीनां साङ्गत्वसिद्धिः सोमयागसहितानां दीक्षणीयादीनां सिद्धौ सोमयागस्य साङ्गत्वसिद्धिरिति परस्पराश्रयः स्यात् । तत्परिहाराय दीक्षणीयादिषु सोमयागव्यतिरिक्तेष्टिकविध्यन्तरातिदेशः कल्पनीयः । दर्शपूर्णमासयोः सोमाङ्गत्वे विधेर्गुणसंक्रमणं कल्पनीयमेवं प्राप्तौ किमत्र कल्पनीयमित्यत्र विनिगमनाविरहो विवक्षितः ।

ननु क्वचित्सोमयागप्रकरणे इति । ननूत्पत्तिकालविशय§इति चतुर्थाध्यायाधिकरणप्रथमसूत्रे यदनुक्रान्तं तत्र दर्शपूर्णमासाङ्गसोमद्रव्यकयागान्तरविधिरिति पूर्वपक्षो दर्शितः स कथमुपपद्यते । अस्य वाक्यस्य सोमप्रकरणे श्रवणात्तदा हि सोमाङ्गत्वेन दर्शपूर्णमासविधिरिति पूर्वपक्षः कार्यः । सत्यमिदं वाक्यं दर्शपूर्णमासप्रकरणे श्रूयतइति भाष्यकारमत्या तत्र भाष्यकारोक्तप्रकारेण तदधिकरणमनुक्रान्तम् इह वार्तिककारमतानुसारिटीकोक्तप्रकारेण सोमयागे बृहस्पतिसववैषम्यं दर्शितमिति न विरोधः ।

---

* ( ) एतदन्तर्गतो ग्रन्थो नास्ति १ पु० ।
† कर्मान्तरत्वमिति २ पु० पा० ।
‡ विधाने इति त्रुटितं २ पु० ।
§ जै० सू० अ० ४ पा० ३ सू० ३ ।

अनुवादे लाभमाहेति । प्रकरणिसोमाङ्गतया दर्शपूर्णमासयोर्विधौ स्वतन्त्राधिकारयोस्तयोरङ्गतया विधानेनाचापातत: प्राधान्यपरित्यागस्याभावो लाभ: । दर्शपूर्णमासोत्तरकाले सोमयागविधौ विधि: समानपदोपात्तविषयो भवति पक्षान्तरे तु गुणसंक्रान्तौ विधि: स्यादिति तत्प्रसक्त्यभावो ऽपि लाभ इति द्रष्टव्यम् । अत एव विनियुक्तविनियोगे ऽपि क्रत्वर्थतया विनियुक्तस्य खादिरादे: पुरुषार्थतया विनियोगान्तरं विनियुक्तविनियोग: ।

४२६ । १६ **स्वार्थबोधे श्रुते: शीघ्रप्रवृत्त*रिति** । वाक्यसमर्पणीयविशेषणविशेष्यभावोपेतस्य श्रौतस्य शेषशेषिभावस्य लैङ्गिकविनियोगेन विरोध: समर्थनीय इति श्रुतिवाक्ययोरन्योन्यापेक्षयोर्लिङ्गेन विरोधे ऽपि श्रुते: स्वप्रमेये वाक्यत: शीघ्रं प्रवृत्ते: श्रुतिलिङ्गविरोधे एवेदमुदाहरणमित्यर्थ: । तथा श्रौतस्य शेषशेषिभावस्य प्रतियोगिविशेषसमर्पणेन गुणभूतं वाक्यं प्रधानेन च विरोधो लक्षणीय इत्यतो ऽपि श्रुतिलिङ्गविरोधे एवेदमुदाहरणम् । अपि च लिङ्गे बलीयसि यस्य बाध: तल्लिङ्गेन विरुध्यते न चात्र बलीयसि वाक्यं बाध्यते किं तु गार्हपत्यश्रुतिरिन्द्रे लक्षणया द्वितीयाश्रुतिर्वा सामीप्ये लक्षणया बाध्यते वाक्यं तु पदत्रयसमभिव्याहाररूपं तथैवावतिष्ठते तर्हि लिङ्गवाक्यविरोधोदाहरणे लिङ्गबाध्यस्य स्योनं ते इत्यादे: सुमनस्यमान इत्यन्तस्य वाक्यस्य लिङ्गेन बाधे वाक्यद्वयकल्पना ऽस्ति । अतो ऽपि श्रुतिलिङ्गविरोधे एवेदमुदाहरणम् ।

ननु उपस्थापयितव्य इत्यस्य प्रकाशयितव्य इत्यर्थ: कुतो लब्ध इत्याकाङ्क्षायामाह **ऋच इति** । उपान्मन्त्रकरणे इति सूत्रेण उपपूर्वात्तिष्ठतेर्धातो: मन्त्रकरणके ऽर्थे वर्तमानादात्मनेपदं विहितम् । मन्त्रकरणं मन्त्रकार्यं तच्च प्रकाशनमेवेत्युक्तार्थलाभ इति भाव: । के चित्तूपपूर्वात्तिष्ठतेर्धातोरात्मनेपदं तदर्थं एव समीपावस्थाने मन्त्रकरणके विधीयते समीपोपस्थानं मन्त्रकरणकं तदा स्याद्यद्यभिधानफलकं स्यात्तथा चोपस्थापयितव्य इत्यस्य समीपे ऽवस्थाय प्रकाशयितव्य इत्यर्थ इत्याहु: । नन्वाचार्यैरनेन श्रुतिलिङ्गाधिकरणमप्याक्षिप्तमिति पूर्वग्रन्थेन प्रबलदुर्बलाभ्यामपि

---

* शीघ्रतरप्रवृत्तेरिति १ पु॰ पा॰ ।

प्रमाणाभ्यामुभयत्र विनियोगोऽस्तु विरोधाभावादिति पूर्वपक्ष: श्रुतिलिङ्गाधिकरणे निराकृत इति सूचितं कथमिह लैङ्गिक एव विनियोगो न श्रौत इति पूर्वपक्ष: क्रियते । उच्यते । वस्तुतस्तथैव श्रुतिलिङ्गाधिकरणे पूर्वपक्ष: । लैङ्गिक एव विनियोगो न श्रौत इति पूर्वपक्षवचनात् । यथार्थैमैन्द्री स्यादित्यधिकरणे निराकृतत्वात् तथापि टीकाकारैरिह ऐन्द्र्यधिकरणं लिखितवद्भि: प्रबलस्तदधिकरणपूर्वपक्ष एव श्रुतिलिङ्गाधिकरणपूर्वपक्षत्वेन लिखित इत्याचार्यैरपि तदनुवर्तनं कृतम् । **श्रुतेः शेषत्वे ज्ञाते ऽनन्तरमर्थे तादृशी शक्तिः कल्प्यतइति ।** अग्निना सिद्ध्येदित्यत्र शक्तिकल्पनस्य बाधितत्वादप्रामाण्यमिति भाव: ।

गौणमपि सामर्थ्यमिति । गौणशब्द इह स्वगुणाऽन्यगुणसाधा- ४२१ । ११
रण्येन गुणयोगनिमित्तकत्वमात्रपरो योगगौणवृत्तिसाधारण: । अत इन्द्रशब्दस्य यौगिकत्वप्रदर्शकेन* प्रभवति हि स्वोचितायामित्याद्यग्रिमग्रन्थेन न विरोध: । इदि परमैश्वर्ये इति धातोरिन्द्रशब्द इत्ययं योग: प्रदर्शित: । यदि ऋज्रेन्द्राग्रवज्रेत्यादिसूत्रेणेन्धिधातो† रन्प्रत्ययान्ततया निपातननिष्पन्न इन्द्रशब्द इष्यते तदा गार्हपत्ये योग: सुतरां संगच्छते । अग्नावेव खल्विन्धि दीप्ताविति धात्वर्थ: सुप्रसिद्ध: । ननु श्रौते गार्हपत्यशेषत्वे सुप्रसिद्धे ऋगाम्नातस्येन्द्रशब्दस्य तस्मिन् यौगिकी वृत्ति: कल्पनीया । तदेव कथं सिध्यति । न ह्यैन्द्रीति तद्धितान्तेन प्रातिपदिकेन इन्द्रशेषतया ऽनूदिता ऋग्गार्हपत्यशेषत्वेन तृतीयया विधातुं शक्या । प्रयाजशेषेण हवींष्यभिघारयतीत्यत्र सत्यामपि तृतीयायां प्रयाजशेषतया ऽनूदितस्य हि द्विरभिघारणशेषत्वेन विधानं न संभवतीति तृतीयामविगणय्य प्रयाजशेषं हविष्षु क्षारयेदिति प्रयाजशेषप्रतिपत्तिविधानार्थत्वं वाक्यस्य समाश्रितं तथेहापीन्द्रशेषत्वेनानूदिताया ऋचो गार्हपत्यशेषत्वेन विधानं न संभवतीति गार्हपत्यसमीपे स्थित्वेन्द्र: प्रकाशयितव्य इत्यर्थसमाश्रयणं युक्तमिति चेदुच्यते । ऐन्द्रीप्रातिपदिकेनेन्द्रप्रकाशकतामात्ररूपमिन्द्रशेषत्वमुच्यते न त्विन्द्रोपस्थानविनियुक्तत्वरूपं तद्विनियोजकबुद्ध्यभावात् । इन्द्रप्रकाशकत्वं

---

* प्रदर्शनं केनेति २ पु॰ पा॰ ।

† सूत्रेणेदिधातोरिति २ पु॰ पा॰ ।

च न गार्हपत्योपस्थाने विनियोगेन विरुध्यते मुख्यतयेन्द्रप्रकाशकस्यापि गौणवृत्त्या गार्हपत्यप्रकाशकत्वसंभवादतो विरोधाभावाद्विधिवाक्ये क्व चिदप्यपदे जघन्यवृत्तिर्नाभ्युपगन्तव्या । अवश्यं क्व चिदाश्रयणीया जघन्यवृत्तिरनुवादके तेन विधिना विनियोज्ये मन्त्र एवाश्रयितव्येति युक्तम् । **प्रकरणाम्नानसामर्थ्या**दित्यस्य दर्शपूर्णमासप्रकरणाम्नानसामर्थ्यादिति व्याख्यानं कोशेषु दृश्यते तत्प्रायो लेखकप्रमादापादितम् अग्निचयनप्रकरणे खल्वैन्द्या गार्हपत्यमुपतिष्ठतइति विधिराम्नायते ।

४२७ । १६ **ननु यथा प्रत्यक्षेणाग्निर्बाध्यते इति ।** ननु श्रुतिलिङ्गाभ्यां तुल्यबलाभ्यामस्य मन्त्रस्य गार्हपत्यशेषत्वमिन्द्रशेषत्वं चास्तीति शङ्का न पूर्वपक्षियोग्या युक्ता । लिङ्गादिन्द्रशेषत्वमेवेति हि पूर्वपक्षः कृतः । तथाशङ्कायां च यथा प्रत्यक्षानुमानाभ्यां वन्हिर्बाध्यते इति न दृष्टान्तीकर्तुमुचितं किं तु यथैकस्य पर्वतस्य प्रत्यक्षानुमानाभ्यां ह्रदवत्त्वं वह्निमत्त्वं चेति दृष्टान्तीकर्तव्यमिति चेत् । उच्यते । लिङ्गेन साक्षाद्विनियोगो न कल्पनीय इति प्रतिज्ञायां हि श्रौताद्विनियोगात्कल्पनीयस्यार्थविप्रकर्षादिति टीकायां हेतुरुक्तः स च लिङ्गस्य साक्षाद्विनियोजकत्वशङ्कां सोपपत्तिकामवतार्य तन्निरासार्थत्वेनावतारणीयस्तस्य साक्षाद्विनियोजकत्वे च श्रुत्या हि लिङ्गस्य तुल्यबलत्वमेवायाति नाधिकबलवत्त्वम् । श्रुतेर्लिङ्गसापेक्षत्वस्य निराकृतत्वादत इह श्रुतिलिङ्गाभ्यां विनियोगद्वयमिति पूर्वपक्षो ऽपि टीकाशयस्थ इत्यभिप्रेत्याभ्यां तुल्यबलाभ्यामुभयत्र विनियोग इति शङ्का कृता दृष्टान्तस्तु श्रुतिवल्लिङ्गेनापि स्वातन्त्र्येण स्वविषयबोधनं संभवति वह्निविषयप्रत्यक्षवत्तद्विषयानुमानेनापि तत्प्रत्यक्षनिरपेक्षेण वह्निबोधदर्शनादित्येतावन्मात्रे योजनीयः । यद्वा इन्द्रे विनियोगः श्रुत्येव लिङ्गेनापि बोधयितुं शक्य इत्यस्मिन्नर्थे दृष्टान्तोयम् । अत्र दार्ष्टान्तिकांश उन्नेयः । इत्थं लिङ्गस्य स्वातन्त्र्ये सति फलितं श्रुतिलिङ्गयोस्तुल्यबलत्वमवलम्ब्योभयत्र विनियोगाशङ्का एवं लिङ्गश्रुतिभ्यामित्यादिना दर्शिता तत्रैवमित्यस्य एवं सतीत्यर्थ इति न किं चिदवद्यम् ।

। २१ **अनुयोग आक्षेप इति ।** यद्यपि प्रश्नो ऽनुयोगः पृच्छा चेत्यनुयोगशब्दः प्रश्ने ऽनुशिष्टस्तथापि शास्त्रेषु प्रश्न आक्षेपपर्यवसायीत्येवं व्याख्यातम् । **यत्तत्पदसमभिव्याहार इति ।** तत्पददर्शनादध्याहृतं

यत्पदमित्युभयसमभिव्याहार उक्तः । **तावत्युक्ते इति ।** विभज्यमानत्वे
सति साकाङ्क्षत्वमिति लक्षणे विभज्यमानमित्येतावत्युक्ते इत्यर्थः । **अर्थैक-
त्वविशेषणस्य त्विति ।** यद्यपि विभज्यमानसाकाङ्क्षत्वमात्रं तप्ते पयसि
दध्यानयति सा वैश्वदेव्यामिक्षेत्यत्रातिव्याप्तं तत्राप्युत्तरवाक्ये तत्पदसद्भा-
वेन विभागे पूर्वसाकाङ्क्षतायाः सद्भावात् तथापि यजुःशब्दाभिधेयेषु प्रश्लि-
ष्टपठितमन्त्रेषु परिमाणं दुर्ज्ञानमिति तज्ज्ञानाय निरूपिते ऽस्मिन् लक्षणे
यजूरूप*मेव विशेषणव्यावर्त्यं वक्तव्यं तत्तु स्योनं ते इत्यादिकमेव विभ-
ज्यमानसाकाङ्क्षयजुष्ट्वस्यान्यत्रातिव्याप्तिशङ्काभावात् स्योनं ते इत्यादिमन्त्रे
च पूर्वपक्षदशायां वाक्यभेदो न सिद्ध इति व्यावर्त्याभावादर्थैक-
त्वविशेषणं नोपात्तमित्यर्थः । **अग्नये निर्वपामीति पदाभ्यामेकवाक्य-
तां कल्पयित्वेति ।** यद्यप्येकवाक्यता स्वत एव प्रतीयते तथाप्यसमवे-
तार्थत्वेन वाक्यानन्तर्भावशङ्कां परिहृत्य प्रतीतैकवाक्यता निर्वहणीयेति
कल्पयित्वेत्युक्तम् । **अभिधानसामर्थ्यं कल्प्यतामिति ।** निर्वापान्वयो- ४२८ । १२
पयोगितत्प्रशंसाभिधानसामर्थ्यं कल्प्यतामित्यर्थः । न तु निर्वापाभिधान-
सामर्थ्यं कल्प्यतामिति निर्वपामीत्यनेन पौनरुक्त्यापत्तेः । एवं दार्ष्टान्तिके
ऽपि कृत्स्नमन्त्रस्य यदा सदनकरणे विनियोगस्तदोत्तरभागस्य प्रतिष्ठापना-
र्थत्वरूपतद्विशेषाभिधानसामर्थ्यकल्पनेति द्रष्टव्यम् । **अत्रैकशब्दः प्रयुक्त
इति ।** सिद्धान्ते यजुःपरिमाणलक्षणे अर्थैकत्वविशेषणस्यापेक्षितत्वादेक-
शब्दः प्रयुक्त इत्यर्थः । तदपेक्षायां हेतुं सिद्धान्ते तद्व्यावर्त्यसिद्धं दर्श-
यति† **स्योनं तइत्यस्येति ।** एवमेकत्वविशेषणे कृते तत्प्रयुक्तलक्षणा-
संभवपरिहारार्थं प्रधानमिति विशेषणमित्याह **एकस्मिन् वाक्ये इति ।
प्राप्तिमात्रोपपादि चेति ।** निःश्रेण्यारोहणप्राप्यं प्रासादादि प्राप्तिमात्रेण लभ्य-
मित्यर्थः । विलम्बेन लभ्यं चेत्पश्चादारूढो ऽपि कदा चित्फलं गृह्णीयादि-
त्याशङ्कापरिहारार्थमिदं विशेषणम् । **पश्चिमो ऽवतरेन्मुधेति ।** एवमेव
वाक्यमूलकसामर्थ्यादिकल्पनाक्रमो विनियोगलक्षणं फलमगृहीत्वा‡ परावर्त-
तइति दार्ष्टान्तिके योजनीयम् । **भेदेन विनियोगः स्यादिति ।** अग्नये

---

* यज्ञरूपमिति २ पु· पा· ।

† व्यावर्त्यं दर्शयतीति २ पु· पा· ।

‡ गृहीत्वेति २ पु· पा· ।

जुष्टं निर्वपामीत्येतदतिरिक्तानां देवस्य त्वेत्यादिपदानामिति शेषः । तथा सत्यतिप्रसङ्गान्तरमप्यापतेदित्याह **तथा चेति ।** सदनादिपदातिरिक्तपदानां स्योनमादिपदानाम् । यत्र तु विरोधि* लिङ्गम् अस्य तु विवरणं **पृथगिति । अगतेर्वरमिति ।** यदि पृथक्कर्मवर्तिपदार्थाप्रकाशकपदानां वा सामर्थ्य-कल्पनेन विनियोजकत्वं न स्यात्तदा तेषां गत्यन्तराभावेन वैफल्यं† स्यात्ततो वरं तेषां वाक्यं विनियोजकमित्याश्रयणमित्यर्थः । उदाहृतश्लोक-स्थमेवमिति पदमुपादाय व्याचष्टे **लिङ्गाद्वाक्यभङ्ग इत्यर्थ इति । कार्या-न्तरापेक्षावशेनेति ।** कार्यान्तरमितिकर्तव्यता तथा च सन्निध्याम्नात-पदार्थसंबन्धापादकेतिकर्तव्यताकाङ्क्षावत्प्रधानवचनं प्रकरणमित्युक्तं भवति तद्विशेषणाभावात् क्व चिदितिकर्तव्यताकाङ्क्षावशेन सन्निहितवाक्यान्तरसंबन्धः प्रकरणमिति व्यवह्रियते । क्व चिदितिकर्तव्यताकाङ्क्षैव प्रकरणमिति व्यव-ह्रियते । इदं कर्मप्रकरणमात्रसाधारणं प्रकरणलक्षणम् । ब्रह्मप्रकरणसा-धारणं तु तल्लक्षणमाकाङ्क्षायामितिकर्तव्यताकाङ्क्षाविषयत्वविशेषणं‡ विहाय निर्वक्तव्यम् ।

४३० । २ **सन्निहितकरणोपकारे संभवतीति ।** सन्निध्याम्नातस्य करण-स्योपकारे आकाङ्क्षावशाद्बुद्धिस्थे फले संभवत्यबुद्धिस्थस्वर्गफलकल्पना न युक्तेत्यर्थः । अयमेव हेतुरनुषङ्गार्थवादिकफलाकल्पनयोरपि । स्वर्गस्याना-काङ्क्षत्वादित्यभ्युच्चयमात्रं स्वर्गस्य दर्शपूर्णमासकरणान्वये ऽनाकाङ्क्षत्वे ऽपि प्रयाजादीनां फलाकाङ्क्षया तदन्वयसंभवात् । या ते अग्ने अयाशयेत्यादि-मन्त्रान्वयेन निराकाङ्क्षस्यापि तनूर्वर्षिष्ठेत्यादिवाक्यशेषस्य या ते अग्ने रजा-शया या ते अग्ने हराशयेति मन्त्रयोरपि तदाकाङ्क्षामात्रेणानुषङ्गस्य द्वितीये ऽध्याये निर्णीतत्वात् । चतुर्थाध्याये वैश्वदेवीं सांग्रहणीं निर्वपेद् ग्रामकाम इत्यत्र श्रुतस्य फलस्य सांग्रहणीष्टिरूपकारणान्वयेन निराकाङ्क्षत्वे ऽप्यामन-मस्यामनस्यदेवा इति तिस्र आहुतीर्जुहोतीति तत्सन्निध्याम्नातानां होमानां फलाकाङ्क्षया ऽनुषङ्ग इति पूर्वपक्षं कृत्वा सांग्रहणीतिकर्तव्यतारूपेण तदु-पकारात्मकफले संभवति नानुषङ्गः कल्पनीय इति सिद्धान्तितत्वाच्च ।

---

* विरोधिकमिति २ पु॰ पा॰ । † वैकल्यमिति १ पु॰ पा॰ ।
‡ इतिकर्तव्यताविशेषणमिति २ पु॰ पा॰ ।

वमकरणादीति । वर्म वा एतद्यज्ञस्य क्रियते वर्म यजमानस्य यत्प्रयाजानूयाजा इज्यन्ते इत्यर्थवादोक्तं फलं रात्रिसत्रन्यायेन न विपरिणमनीयमित्यर्थः । **देवतासंबोधनप्रधानइति** । परसंबोधनार्थलोडन्ताख्यातयुक्तः पदसमूहो निगद इति यद्यपि निगदाधिकरणे वर्णितं तथापि सूक्तवाकनिगद इडानिगद इत्यादिव्यवहारदर्शनादन्यत्रापि नितरां गद्यत इत्युच्चैष्प्रयोगेन तद्व्यवहारोऽस्तीति भावः । **दधिपयसोरभावइति** । यद्यप्यसोमयाजिनो दधिपयसोरभाव ऐन्द्राग्नपुरोडाशश्चेत्युभयं तत्तद्वचनबलान्मिलितं न तु प्रयोज्यप्रयोजकभावात् । अन्यथा वैपरीत्यमेव किं न स्यात् तथाप्यर्थसमाजमात्रमवलम्ब्य प्रयोज्यप्रयोजकभाव उपचरितः । **अवीवृधेतामित्यादिमन्त्रशेष इति** । इदं हविरजुषतामित्यंशस्याप्युपलक्षणमेतत् । **नानेष्टिपशुसोमसमुदाय इति** । अनुमत्यादिदेवताकानामिष्टीनामग्न्यादिपशुकानां पशुबन्धानां सोमयागानां च सन्निधौ पठिते राजा स्वाराज्यकामो राजसूयेन यजेतेत्यधिकारवाक्ये श्रुतस्य राजसूयस्य नामधेयस्याप्रसिद्धार्थत्वेनाख्यातपारतन्त्र्यादाख्यातस्य च सन्निहितसकलयागानुवादस्वारस्यात्सन्निहितसकलेष्टिपशुसोमसमुदायो राजसूय इत्यर्थः ।

शौनःशेफाख्यानं विवृणोति **शुनःशेफः किलेति** । तदित्थम् । हरि- ४३१ । ४
श्चन्द्रस्य राज्ञः शतं जाया बभूवुः । तासु पुत्रमलभमानः स्वगृहे वसन्तं नारदं पुत्रप्रयोजनं पप्रच्छ । स पुत्रवतः प्रशंसया तद्रहितस्य निन्दया च पुत्रलाभमतितरां प्रशस्य जातेन पुत्रेण वरुणं यक्ष्ये इति संकल्पे कृते तव पुत्रो भवितेत्युवाच । हरिश्चन्द्रस्तथेति सङ्कल्प्य रोहितं नाम पुत्रं लेभे । तदैव वरुणेन मामनेन यजस्वेति पृष्टो दन्तोत्पत्त्यनन्तरमिति तदनन्तरं पृष्टो दन्तपतनानन्तरमिति ततः पृष्टो द्वितीयदन्तोत्पत्त्यनन्तरमिति तदनु पृष्टः कवचधरे जाते इति च तावत्पर्यन्तं कालं पशुभावानर्हतोद्भावनेन क्षपयामास । कवचधरं कुमारं दृष्ट्वा मामनेन यजस्वेति वरुणेन पृष्टे कुमारो धनुर्गृहीत्वा वनं प्रतस्थे । हरिश्चन्द्रो वरुणगृहीतो जलोदरव्याधियुक्तो जज्ञे । रोहितः संवत्सरं वने चरित्वा प्रत्यागतः संचारे फलं प्रदर्शयतेन्द्रेणोपदिष्टः पुनरपि संवत्सरं वने चरित्वा प्रत्याजगाम । एवं पुनरिन्द्रस्योपदेशात् षड्वारानेकैकं संवत्सरं वने चचार । षष्ठे पर्याये पुत्रवन्तमजीगर्त-

नामानं ऋषिं वने दृष्ट्वा तमेकं पुत्रं ययाचेति हरिश्चन्द्रेण कर्तव्ये वरुणयज्ञे पशुत्वेन नियुज्य स्वात्मनिष्क्रयार्थं तदा पिता ज्येष्ठं माता कनिष्ठपुत्रं च दातुं नान्वमन्यत। अर्थान्मध्यमः शुनःशेफो देयः पर्यवसितः। तं क्रीत्वा समागत्य वरुणं यष्टुं पुत्रो ददौ। पिता च हरिश्चन्द्रो राजसूयं प्रारभ्याभिषेचनीये शुनःशेफं पशुं सङ्कल्पयामास। अजीगर्तः पुनः शतं गृहीत्वा तं विशसितुमुद्युक्तः। तस्मिन्विशसितुमुद्युक्ते शुनःशेफो वरुणं तुष्टाव। वरुणस्य प्रीत्या पाशाद्विमुक्तस्तत्र यज्ञे होतारं विश्वामित्रं प्राप्य तस्य पुत्रो बभूवेति। आचार्यैर्हरिश्चन्द्रेण कर्तुं प्रारब्धो राजसूय एव पुरुषपशुकत्वेन पुरुषमेध उपचरितः।

३१।१० **विकल्पेन पूर्वपक्षं वक्ष्यन्निति** *। संदेहटीकायामभिषेचनीयस्यैवाङ्गमिति पूर्वपक्षकोटिप्रदर्शनमुपक्रममात्रमिति भावः। नन्वाकाङ्क्षितमपि सन्निहितमेवान्वेति सन्निहितमप्याकाङ्क्षितमेवान्वेतीत्याकाङ्क्षासन्निधानयोर्लोके परस्परापेक्षादर्शनेन प्रकरणसन्निधानयोस्तुल्यबलतया प्रकरणाद्राजसूयस्य वाङ्गं सन्निधानादभिषेचनीयस्य वाङ्गमिति विकल्पेन पूर्वपक्ष इत्येतन्न युज्यते राजसूयस्य प्रकरणसिद्धेस्तदन्तर्गतानामिष्ट्यादीनां विकृतित्वेन क्लृप्तोपकारप्राकृताङ्गसंबन्धनिराकाङ्क्षत्वात्प्रकरणासत्त्वे ऽपि सन्निध्यनुरोधपक्षइव प्रकरणानुरोधपक्षे ऽप्यभिषेचनीयाङ्गत्वस्यावश्यंभावेन नित्यस्य तस्य वैकल्पिकत्वासंभवाच्चेति चेत्। उच्यते। इष्ट्याद्यात्मना नैराकाङ्क्ष्ये ऽपि राजसूयात्मना ऽस्त्याकाङ्क्षा पवित्रादारभ्य क्षत्रस्यधृतिपर्यन्तं राजसूयो यज्ञैता उत्पुनातीत्यादिष्वङ्गवाक्येषु राजसूयपरामर्शानुवृत्त्या तदात्मनेतिकर्तव्यताकाङ्क्षोत्थापनात्। विकल्पोक्तिस्तु अभिषेचनीयातिरिक्तपवित्रादिप्रधानान्तरविषया। एवं च संदेहटीका ऽप्यङ्गशब्दस्य नित्याङ्गत्वविषयतया अथ क्रम इत्येतदनन्तरं प्रकरणतुल्यवत इत्यध्याहारेण चोक्तार्थे सुयोजेति नोपक्रमविरोधो ऽपि। **न तु प्रकरणाद्राजसूयार्थत्वमिति**। विरोधे हि प्रकरणसन्निधानयोः पाक्षिकप्रवृत्तिर्वाच्या सकलराजसूयाङ्गत्वाभिषेचनीयाङ्गत्वयोर्नास्ति विरोधः। न च सन्निधानेनाभिषेचनीयमात्राङ्गत्वं बोध्यमिति विरोधः शङ्कनीयः। प्रकरणसन्नि-

---

* वक्ष्यतीति २ पु०।

धानयोस्तुल्यबलत्वपूर्वपक्षे ऽपि प्रकरणबोध्यस्य प्रधानान्तराङ्गत्वस्याप्रतिक्षे-
प्यतया सन्निधिना तन्मात्राङ्गत्वालाभादतो विरोधाभावात्समुच्चयो ऽस्त्विति
भावः । सन्निधिबोध्यमभिषेचनीयाङ्गत्वं पवित्रादिसकलप्रधानाङ्गत्वं बोधयता
प्रकरणेनैव बोधितमिति सन्निधिबोध्यस्य समुच्चयस्याभावान्न समुच्चयः संभ-
वति । अथोच्येत सन्निधिबलादभिषेचनीयार्थत्वेन किं चिदनुष्ठानं प्रकरणबला-
त्सकलराजसूयार्थत्वेनान्यदित्यनुष्ठानसमुच्चयः संभवतीति तत्राह अभिषे- ४३१ । १९
चनीयस्यापीति* । अभिषेचनीयार्थं यत्राभिषेचनीयमाहेन्द्रस्तोत्रकाले उपा-
ख्यानाद्यनुष्ठेयं तत्रैव सकलराजसूयार्थमप्यनुष्ठेयम् । अभिषेचनीयानन्तरमा-
म्नातस्यापि साम्राज्याभिषेकात् प्राचीनस्योपाख्यानादेर्माहेन्द्रस्तोत्रं प्रत्यभिषि-
च्यतइति साम्राज्याभिषेकापकर्षविधिप्रयुक्तस्य तदन्तापकर्षन्यायसिद्धस्यापक-
र्षस्य पक्षद्वये ऽप्यविशेषात् । तथा च देशकालकर्त्रैक्यादिदमनुष्ठानमभिषेच-
नीयार्थमेव न तु सकलराजसूयार्थमिति विशेषग्रहणाभावादभिषेचनीयार्थमे-
वानुष्ठानं सकलराजसूयार्थमपि भवेदतो ऽभिषेचनीयमात्रार्थं पृथगनुष्ठाना ऽला-
भादनुष्ठानभेदेनापि समुच्चयोपपादनं न संभवतीति कदा चिदभिषेचनीयार्थं
कदा चित्सकलराजसूयार्थमिति विकल्पेनैवानुष्ठानमप्युपपादनीयमिति भावः ।
न चैवं चिन्तावैयर्थ्यमिति । एवं हि सति न कश्चिदुपाख्यानाद्यनुष्ठाने
विशेषः । न च तदननुष्ठाने ऽभिषेचनीयमात्रवैकल्यं पवित्रादिसकलवैकल्यं
वेत्यतो विशेषः पक्षद्वये ऽपि परमा ऽपूर्वा ऽनुत्पत्तिदोषस्यैकरूपत्वात् । तस्मा-
देषा चिन्ता व्यर्थेति न शङ्कनीयमित्यर्थः । **तत्सिद्धयइति** । तदीयसर्वाव-
यवार्थत्वसिद्धयइत्यर्थः । तत्सिद्धौ राजसूयान्तर्गतसकलेष्टिपशुसोमविकृतिष्व-
तिदेशेन नित्योपाख्यानादिप्राप्तिः पूर्वपक्षे त्वभिषेचनीयविकृतावेव नित्या
तत्प्राप्तिः अन्यविकृतिषु वैकल्पिकीति फलभेद इति भावः । **क्षत्रस्य-** ,, । २४
धृतिरिष्टिरिति । अग्निष्टोममन्तत आहरति अग्निः सर्वा देवता देवता-
स्वेव प्रतितिष्ठतीति राजसूयप्रकरणान्ते श्रवणात् क्षत्रस्य धृतिः सोमयागविशेष
इत्यवगम्यते । क्षत्राणां धृतिस्त्रिष्टोमो ऽग्निष्टोमः पञ्चापवर्गः । तेन अन्ततो
यजेत संतिष्ठते राजसूय इत्यापस्तम्बवचनादपि तथा ऽवसीयते । इष्टिरिति
त्वाचार्यैः शाखान्तरं कल्पसूत्रान्तरं वा दृष्ट्वोक्तम् ।

---

* अभिषेचनीयापीति १ पु॰ पा॰ ।

४३२ । १ **प्रधानस्याकाङ्क्षायामनुवर्तमानायामिति** । राजसूयस्याकाङ्क्षा पविचादारभ्य प्राक्सिद्धा ऽनुवर्तते अभिषेचनीयसन्निधिना तु तदानीमुत्थापनीया । अतः सह प्रस्थितयो राजसूयाकाङ्क्षाभिषेचनीयसन्निधानयोराद्या शीघ्रं विनियोगफलं गृह्णीयादिति भावः । स्यादेतत् । क्रमप्रकरणविरोधोदाहरणमिदमयुक्तम् । उपाख्यानविदेवनादीनामभिषेचनीयमध्यगतत्वेन तदङ्गत्वस्यैवोचितत्वात् । नन्वनुष्ठानमेव तेषामभिषेचनीयमध्यगतमाम्नानं त्वभिषेचनीयानन्तरम् । एवमनन्तरमाम्नाने ऽपि तेभ्यः पश्चादाम्नातस्याभिषेकस्य माहेन्द्रस्तोत्रं प्रत्यभिषिच्यतइत्यभिषेचनीयाङ्गमाहेन्द्रस्तोत्रकाले ऽपकृष्टतया तदन्तापकर्षन्यायेन तेषामपि तत्रापकर्षात्तन्मध्ये ऽनुष्ठानमात्रम् । ततश्च तेषां महाप्रकरणेन राजसूयसंयोगादभिषेचनीयमध्ये ऽनुष्ठानमात्रेण न तेष्वभिषेचनीयाङ्गत्वापादकं तदवान्तरप्रकरणमुन्मिषति । असंयुक्तं प्रकरणादिति न्यायात् । एवमेव च चतुर्थपञ्चमयोर्निर्णीतमिति चेत् । स्यादेतदेवं यद्यभिषेचनीयमध्ये तेषामाम्नानं न स्यात् । अस्ति तु तद्विशोभयं राजा ऽभूदिति । पञ्चाशान् प्रयच्छतीति शौनःशेफमाख्यायते इति च । एतदनन्तरमपि हि मारुतस्य चैकविंशतिकपालस्य वैश्वदेव्ये चामिक्षाया अग्नये स्विष्टकृते समवद्यतीति प्रागुपक्रान्ताभिषेचनीयाङ्गेष्टिशेषानुवर्तनम् । अपांनप्त्रे स्वाहोर्जोनप्त्रे स्वाहा ऽग्नये गृहपतये स्वाहेति तिस्र आहुतीर्जुहोतीत्यभिषेचनीयाङ्गहोमविशेषविधानं च दृश्यते ऽतोऽभिषेचनीयाङ्गसदृशाद्विदेवनादेस्तदवान्तरप्रकरणसद्भावः स्पष्ट एव । यदि शाखान्तरे क्वचित्तेषामभिषेचनीयसमाप्त्यनन्तरमाम्नानं स्यात् तथाप्यत्रावान्तरप्रकरणेन सिद्धं तदङ्गत्वम् अन्यत्राप्यप्रत्याख्येयं महाप्रकरणादवान्तरप्रकरणस्य बलीयस्त्वादिति चेत् । उच्यते । नोदाहरणमादरणीयं न्यायमात्रनिष्ठमधिकरणं यत्र क्रमस्यैव प्रकरणेन विरोधः नावान्तरप्रकरणसद्भावशङ्कास्ति तदत्र मुख्यमुदाहरणं भविष्यति कृत्वाचिन्तया त्विदमुदाहरणमिति न कश्चिद्विरोधः ।

,, । ११ **संबन्ध आनुमानिक इति** । पदार्थान्तररूपेण वैशिष्ट्येन संबन्धो ऽनुमेय इत्यर्थः । ननु वैशिष्ट्यवाचकत्वे ऽपि वैशिष्ट्यं तत्प्रतियोग्यनुयोगिनो चेति त्रयो वाच्याः प्रसज्येरन्निति तुल्यो दोषः । प्रतियोगिविशेषविशिष्टं द्रव्यमुच्यतइति विशिष्टरूपेण वाच्यैकसमर्थनं तत्संबद्धद्रव्यमुच्यतइति संबन्ध-

वाचकत्वपक्षे ऽपि संबन्धसामान्यमेव श्रुत्या लभ्यते न तु विनियोगरूपः
संबन्धविशेष इत्याह **अपि च भवत्विति । सन्निधिमुपकल्पयतीति** । ४३२ । २१
ननु सन्निध्यभावे ऽपि ।

यस्य येनार्थसंबन्धो दूरस्थेनापि तेन सः ।
अर्थतो ह्यसमर्थानामानन्तर्यमकारणम् ॥

इति न्यायात् संबन्धो घटते । अशक्यं चान्यत्राम्नातानामन्यत्रसन्निध्याम्नानकल्पनम्* । तस्मात्समाख्यया सन्निधिकल्पनं तावदयुक्तम् । तथा सन्निधिना ऽऽकाङ्क्षाकल्पनमपि न युक्तम् । सन्निध्यभावे ऽपि पुरोडाशपात्रशुन्धनस्यानुष्ठानाय स्मृतिजनकाकाङ्क्षासत्त्वात् । तथा ऽऽकाङ्क्षयैकवाक्यत्वकल्पनमपि न युक्तम् । शुन्धनविधेः शुन्धनप्रकाशकमन्त्रविनियोजकविध्येकवाक्यत्वाद्व्रीह्यादिरीत्या विनियोज्यपदार्थरूपेण मन्त्रेणैकवाक्यत्वानपेक्षणात् । वाक्येन सामर्थ्यकल्पनमपि न युक्तम् । शुन्धनप्रकाशनसामर्थ्यस्य स्फुटतरत्वात् । स्फुटतरतत्प्रकाशनसामर्थ्यलब्ध एव हि शुन्धनसंबन्धः समाख्यया पुरोडाशपात्रशुन्धने बोधनीयः स्थानेन सान्नाय्यपात्रशुन्धने वेति संदेहो दर्शित इति चेत् । उच्यते । संबन्धेनाम्नानसन्निधेः कल्पनमिह न विवक्षितं किं त्वनुष्ठानसन्निधेः । स तु घटत एव । अन्यत्राम्नातस्याप्यन्यत्रानुष्ठानसन्निधिना च सन्निध्यनुष्ठीयमानमन्त्रविशेषाकाङ्क्षाकल्पनं विवक्षितं तत्तु प्राङ् न सिद्धम् । अनुष्ठेयार्थस्मृतिजनकमात्रापेक्षा ऽपि हि प्राक्सिद्धा तदाकाङ्क्षया चैकवाक्यत्वं पुरोडाशपात्रशुन्धनविधेर्मन्त्रसंबन्धमात्ररूपं विवक्षितं तत्तु प्रकाश्यप्रकाशकभावरूपमुपपद्यते तत्प्रकाशकत्वनिर्वाहार्थं च शुन्धनसामान्यप्रकाशकस्य मन्त्रस्य पुरोडाशपात्रशुन्धनप्रकाशनसामर्थ्यं कल्पनीयमिति तत्कल्पनं विवक्षितम् । अतः सर्वमेतदुपपन्नम् ।

अर्थेषु प्रतीतिविरोधो न वस्तुविरोध इति टीकायां वस्तुविरोधा-
भावे विवक्षितं हेतुमाह **दध्न उभयार्थत्वदर्शनादिति** । प्रतीतिविरोध- ४३३ । २२
सद्भावे विवक्षितं हेतुमाह **अन्यशेषस्येति** । ननु अन्यशेषस्यान्यशेषत्वरूपं वस्तुतो न विरुद्ध†मित्यनुपदमेवोक्तं कथं तद्विरोधो हेतूक्रियते ।

---

* सन्निध्याम्नानाकाङ्क्षासत्त्वात्कल्पनमिति २ पु॰ पा॰ ।

† वस्तु न विरुद्धमिति २ पु॰ पा॰ ।

अथान्यशेषत्वेनानूदितस्यान्यशेषत्वेनानुवादादन्यस्यैव शेष इत्ययमर्थो लभ्यते व्यावर्तकस्वभावानां विशेषणानामन्ययोगव्यवच्छेदस्वारस्यात् तथा चानूद्यमानविधीयमानार्थयोर्विरुद्धयोः प्रत्यायनमेकेन वाक्येन न संभवतीत्येवंरूपः प्रतीतिविरोधो विवक्षितः । अनेनैवाभिप्रायेण दृष्टान्त उक्तः यद् देवत्तीयं तद्यज्ञदत्तशेष इतिवदिति । **यदिति ।** अत्र हि यद्देवदत्तीयमित्यनेन देवदत्तस्यैव स्वमुच्यते न तु यज्ञदत्तस्यापि साधारणम् । तथा सति देवदत्तस्य स्वसंबन्धे यज्ञदत्तसापेक्षतया सामर्थ्याभावेन तद्धितानुत्पत्तिप्रसङ्गात् । **तर्ह्यधिष्ठानलक्षणयेति ।** यत्रानुवादे ऽन्यशेषत्ववाचकः शब्दो ऽस्ति पुरोडाशकपालेन तुषानुपवपति परिधौ पशुं नियुञ्जीतेत्यादौ तद्विषयेयमधिष्ठानलक्षणोक्तिः । तत्र हि पुरोडाशशेषत्वादिरूपविशेषणांशं विहाय वस्तुतस्तदधिष्ठाने कपालादिविशेष्यमात्रे लक्षणा पुरोडाशकपालादिशब्दस्याभ्युपेता प्रकृतदधिबृहस्पतिसवविषया न भवति त्वियमधिष्ठानलक्षणोक्तिः । तयोरन्यशेषत्वसमर्पकशब्दाभावात् ।

४३३ । २५ **तत्तुल्यमिति ।** नन्वधिष्ठानलक्षणया विरोधसमाधानं विद्यायां मन्त्रस्य विनियोगे ऽपि तुल्यमिति न वक्तव्यम् । सन्निधिकल्पनीये विद्याविनियोगवाक्ये वेधादिमन्त्रस्य दधिबृहस्पतिसववत्स्वरूपेण ग्रहणस्योपपन्नतया ऽन्यशेषत्वेनोपादानाभावात् । अतो यद्यप्यत्रैष प्रतीतिविरोधो न वस्तुविरोध इति शङ्कानन्तरं स विद्याविनियोगे ऽपि तुल्य इति टीकाग्रन्थस्य विरोधतौल्यार्थकत्वं परिहृत्य विरोध*समाधानार्थकत्वमुपपादयितुं शङ्काग्रन्थस्यैव कस्मिंश्चिद्विरोधसमाधाने तात्पर्यमुक्त्वा विद्याविनियोगे तत्तौल्यवचनस्यापि तत्समाधानतौल्यपरत्वं वक्तव्यं तदा ऽप्येवं वक्तुमुचितम् । दधिबृहस्पतिसवयोरनूद्यमानयोरन्यशेषत्वप्रत्यायकविशेषणाभावान्नास्ति विरोध इति चेद्विद्यायां मन्त्रस्य विनियोगे ऽपि तुल्यमिति । तस्मादधिष्ठानलक्षणया विरोधसमाधानतौल्यवचनमयुक्तमिति चेत् । उच्यते । अन्यशेषत्वप्रत्यायकविशेषणसत्त्वे ऽप्यधिष्ठानलक्षणया विरोधसमाधानेन विनियुक्तविनियोगः कर्तुं शक्यते इह तदभावे किमु वक्तव्यमिति कैमुतिकन्यायोद्घाटनार्थमनया भङ्ग्या विरोधसमाधानतौल्यमुक्तमिति न का चिदनुपपत्तिः ।

---

* अविरोधेति २ पु॰ पा॰ ।

एकस्मिन् प्रयोगे मन्त्रावृत्तिप्रसङ्गादिति । यद्यप्ययं न दोषः ४३३ । २३
ज्योतिष्टोमप्रकरणाम्नातस्य अग्न आयाहि वीतये इति मन्त्रस्य यजुर्वेदे
आग्नेय्याग्नीध्रमुपतिष्ठत इत्याग्नीध्रोपस्थाने ऽपि विनियोगदर्शनात् तत्र विनि-
योजकप्रमाणद्वयानुसारेण यद्येकस्मिन्नपि ज्योतिष्टोमप्रयोगे मन्त्रावृत्तिस्तर्ह्यै-
न्द्र्यादावपि तथा स्यादिति चेत् । एवं तर्हि श्रुतिलिङ्गाधिकरणमप्याक्षि-
प्यैतदधिकरणप्रवृत्तिरित्यस्तु । एवमेव खल्वाचार्यैरुक्तं पूर्वपक्षे । ननु बृह-
स्पतिसवन्यायेन विनियुक्तविनियोगोपपादनं न युक्तम् । अङ्गबृहस्पतिसवस्य
स्वतन्त्रबृहस्पतिसवादन्यत्वस्य मीमांसकैरुक्तत्वादित्याशङ्क्याह **बृहस्पतिस-
वोदाहरणं त्विति** । अत्र वक्तव्यं प्रागेवोक्तम् । अस्याधिकाशङ्केति
टीकाया अर्थमाह **अस्य पुनः स्मारणस्येति** । ननु टीकायां नेहेत्यादि-
श्लोकतद्विवरणाभ्यामधिकाशङ्कापरिहारो यः कृतः सो ऽपि श्रुतिलिङ्गाद्यधि-
करणस्य एव । तथा हि । द्विविधो बाधः प्राप्तबाधो ऽप्राप्तबाधश्चेति । तत्र
दशमे वैकृतविधिवाक्यशेषेण चोदकेन कृष्णलादिषु प्राप्तस्यैवावहननादेर्द्वार-
लोपादिना बाधो निरूपितः । तृतीये तु श्रुत्यादिभिर्लिङ्गादीनां स्वस्व*प्रमेय-
परिच्छेदप्राप्तिरहितानामेव नैराकाङ्क्ष्येण प्राप्तिनिरोधलक्षणो ऽप्राप्तबाधो निरूपित
इति पूर्वमीमांसकैः कृतो विभागस्तदनुसारेण टीकायामपि बलाबलाधिकरणा-
नुक्रमणे ऐन्द्रीमन्त्रादीनां प्रथमप्रवृत्तश्रुत्यादिभिर्नैराकाङ्क्षीकरणेनाप्राप्तबाध एव
वर्णितः । तथा चेयमधिकाशङ्कापरिहारोक्तिरयुक्तेत्याशङ्कते **यद्यपीति** ।

श्रुत्यादिभिर्लिङ्गादिबाधः पूर्वन्त्रनिरूपितो ऽप्राप्त†बाधः सन्नपि प्रका-
श्यस्यैन्द्रादेः प्रकाशकमन्त्राद्याकाङ्क्षावशात्प्राप्तबाधत्वशङ्कामात्रस्यापि विषयो
भवति इह तु तदपि नास्ति विद्यायाः मन्त्राकाङ्क्षाविरहादिति भेदप्रदर्शनेन
पौनरुक्त्यं परिहरति **तथापीति** । नन्विन्द्रस्य नास्ति प्रकाशकमन्त्राकाङ्क्षा ४३४ ।
अग्निचयनप्रकरणे तस्य यष्टव्यत्वादिना ऽनाम्नातत्वेन प्रकाशनाऽनपेक्षणा-
दिति चेत् सत्यम् । नोदाहरणमादरणीयम् उदाहरणान्तरं भविष्यति इमा-
मगृभ्णान् रशनामृतस्येति मन्त्रस्य इत्यश्वाभिधानीमादत्त इतीतिकारश्रुत्या
तृतीयाश्रुतिसमानार्थया ऽश्वरशनाग्रहणे विनियोगे कृते ऽपि रशनाग्रहणप्र-

---

* स्वशब्दः सकृत् २ पु० ।　　　† निरूपितो वस्तुप्राप्तेत्यादिः पाठः ५ पु० ।

काशनसामर्थ्यरूपाल्लिङ्गाद् गर्दभरशनाग्रहणे ऽपि प्राप्तिः शङ्कितुं शक्यते तस्याप्यश्वरशनाग्रहणवदग्निचयने ऽनुष्ठेयस्य तन्मन्त्राकाङ्क्षत्वानदिहोदाहरणम् । ननु प्राप्तिशङ्कासद्भावतदभावाभ्यां विशेषकथने वेधाद्यधिकरणानारम्भकशङ्केव स्थिरीकृता स्यात् प्राप्तिमत्त्वशङ्कास्पदस्यापि लिङ्गादेः श्रुत्या बाधे पूर्वतन्त्रे निरूपिते सति तच्छङ्काऽनास्पदस्य विद्यासन्निधेर्लिङ्गादिभिर्बाधस्य कैमुतिकन्यायेन सिद्धेरिति चेदुच्यते । शास्त्रभेदान्न पौनरुक्त्यमित्येव मुख्यः परिहारो ऽभिसंहितः । क्वचित्प्रौढ्या व्यवहृतमेकशास्त्र्यपक्षं यथाकथंचित्समर्थयितुमभ्युच्चयरूपेयमधिकाशङ्कापरिहारयोरुक्तिः । अधिकाशङ्कापि वस्तुतो ऽत्र नास्त्येव अविरोधे प्रबलदुर्बलयोरपि श्रुतिलिङ्गयोर्न बाध्यबाधकभाव इत्यतः श्रुत्या क्वचिद्विनियुक्तस्यापि लिङ्गेनान्यत्र विनियोगो घटत इत्येव श्रुतिलिङ्गाधिकरणे पूर्वपक्षकरणात् । एकशास्त्र्यपक्षे भाष्यादिष्वधिकशङ्कापरिहारावन्यावपि सूचितौ लिङ्गादिभिरन्यत्र विनियुक्तानां मन्त्रादीनां विद्यायामपि सन्निधिना विनियोगः कल्पनीयः । अन्यथा विद्यासन्निध्याम्नानवैयर्थ्यप्रसङ्गात् । अथातो ऽग्निष्टोमेनानुयुञ्जन्तीति वाक्येनाहवनीयाधारतया चित्याग्नौ प्रकृत्यग्निष्टोमे प्राप्ते ऽप्युत्तरवेद्याः प्रकरणाम्नानवैयर्थ्यपरिहारार्थं तदाधारतया प्राप्तिमङ्गीकृत्य विषमशिष्टयोरप्युत्तरवेद्योर्विकल्पो ऽप्यभ्युपगम्यते अत्र विकल्पाऽप्रसक्तौ सन्निधिवैयर्थ्यं परिहर्तव्यमिति किमु वक्तव्यमित्यधिकाशङ्काविद्यासन्निध्याम्नानम् आरण्यकत्वप्राप्यर्थत्वेनान्यथासिद्धम् अन्यत्र विनियोगेन निराकाङ्क्षाणां नान्यत्र विनियोगकल्पनक्षममिति परिहारः । यक्षेतेत्यादिसमानपदश्रुतौ प्रकृतिप्रत्यययोरन्योन्यापेक्षासत्त्वादव्याप्तिवारणाय पदे ऽन्यस्मिन्निति विशेषणम् । तथा च स्वार्थाभिधाने पदान्तरनिरपेक्षः शब्दः श्रुतिरिति लक्षणार्थः । बर्हिर्देवसदनं दामीत्यादिमन्त्रेषु शब्दशक्तिवत् स्रुवेणावद्यतीत्यादिविधिषु स्रुवादीनां द्रवद्रव्याद्यवदानशक्तिरपि लिङ्गमिति तत्साधारण्याय भावगतेत्युक्तम् । समानदेशत्वं यथासंख्येन सन्निधिना वा सन्निधिरप्याम्नानसन्निधिरनुष्ठानसन्निधिरिति द्विविधः ।

४३५ । ५ **त्रैलोक्यमिति ।** अन्तरिक्षोदरः कोशो भूमिबुध्नो न जीर्यति । दिशो ह्यस्य स्रक्तयो द्यौरस्योत्तरं बिलं स एष वसुधान इत्यादिना त्रैलोक्यस्य कोशत्वेन कर्मफलरूपवसुनिधानार्थपेटिकात्वेनोपासना पुत्रदीर्घायुष्ट्व-

फलार्थं विहिता तस्य कोशस्य भूमिर्मूलावयवः अन्तरिक्षमुदरं द्यौः पिधानार्थं ऊर्ध्वावयवः दिशः कोणा इति प्रसिद्धकोशसादृश्यापादकावयवकल्पना कृता । **भूरिति इमं लोकमित्यर्थ इति ।** इदं मन्त्रगतशब्दमात्रं गृहीत्वा व्याख्यातम् । श्रौते तु वाक्यशेषे भूरित्यस्य लोकत्रयपरत्वेन व्याख्यानं दृश्यते । अथ यदवोचं भूः प्रपद्यइति पृथिवीं प्रपद्ये अन्तरिक्षं प्रपद्ये दिवं प्रपद्ये इत्येतदवोचमिति * ॥

हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दः-
स्तुत्युपगानवत्तदुक्तम् ॥ २६ ॥ ४३५ । ८

परत्रावस्थानसापेक्षत्वादिति । अवश्यं हि कुतश्चित्प्रहीणं किंचिदुपैति यथा ऽश्वात्प्रहीणं रोमवृन्दं भूप्रदेशमिति हानस्योपायनापेक्षा विद्यमानयोः सुकृतदुष्कृतयोः फलजननावश्यम्भावादपि तदपेक्षा ऽस्तीति भावः । **समिध इति ।** उद्गातॄणां प्रस्तावकर्मणि स्तोत्रसंख्यागणनार्था दारुशलाकाविशेषा इत्यर्थः । **औदुम्बरा इति विशेषणादिति ।** अनेन शाट्यायनिशाखायां कुशशब्दः पुल्लिङ्ग इति सूचितम् । स्त्रीलिङ्गत्वे त्वौदुम्बर्य इति स्यात् । **यदि तु कस्यां चिदिति ।** औदुम्बर्य इति भाष्यप्रयोगं दृष्ट्वा तदनुकार्य्य प्रत्युन्नयनम् ।

पर्युदासाधिकरणविषयमाहेति । ननु नदीक्षिताधिकरणसि- ४३६ । २१
द्धान्तसूत्रं भाष्यकारैः पठितं तत्किमिति टीकाकारैः पर्युदासाधिकरणसिद्धान्तसूत्रमत्र पठितमापाद्य पर्युदासाधिकरणमनुक्रम्यते किमिति च तदनुमोदनमाचार्यैः क्रियते । इत्थं हि नदीक्षिताधिकरणम् । दीक्षितो न जुहोतीति ज्योतिष्टोमप्रकरणाम्नातं वाक्यं क्रत्वर्थपुरुषार्थसाधारण्येन सर्वेषामपि होमानां प्रतिषेधकम् अथ वा क्रत्वर्थेषु प्रत्यक्षशिष्टान् विहायातिदेशप्राप्तानां क्रत्वर्थानां पुरुषार्थानां च होमानां प्रतिषेधकमिति पूर्वपक्षे ऽप्यग्निहोत्रादिहोमानां स्वस्वविधिभिः क्रतुमध्ये कर्तव्यतया नदीक्षितवचनेनाकर्तव्यतया च पर्युदासाधिकरणपूर्वपक्षन्यायेन प्रतिषेधाङ्गीकारे विकल्पः स्यात्तत्परिहाराय नदीक्षितवाक्यस्याग्निहोत्रादिवाक्यशेषत्वमभ्युपगम्य नञः पर्युदासवृ-

---

* अत्र चतुर्दशं वेधाद्यधिकरणं पूर्णम् ।

त्तिराश्रयणीया तेनादीक्षितो यावज्जीवमग्निहोत्रं जुहोतीत्यग्निहोत्रादिशास्त्राणामर्थः संपद्यत इति । तदेव चाधिकरणं प्रदेशान्तरस्थवाक्यस्य प्रदेशान्तरस्थवाक्यशेषतायां प्रसाधनीयत्वेन प्रस्तुतायां दृष्टान्तत्वेनोदाहर्तुं युक्तं न पर्युदासाधिकरणमिति चेत् । उच्यते । नदीक्षितवाक्ये प्रतिषेधाश्रयणे वस्तुतो विकल्पो न प्रसज्यते । होमनिषेधः क्रत्वर्थो होमः पुरुषार्थ इति विधिनिषेधयोर्विषयभेदात् । उभयोरपि क्रत्वर्थत्वेन विषयैक्ये हि षोडशिग्रहणाग्रहणरीत्या तयोरन्यतरस्य यस्य कस्य चित्परिग्रहे ऽपि क्रतोः साद्गुण्याद्विकल्पो भवेत् । इह तु होमनिषेध एव क्रत्वर्थ इति होमपक्षे क्रतोर्वैगुण्याद्विकल्पस्य न प्रसक्तिः । कृत्वा चिन्तया तु तत् सूत्रं प्रवृत्तम् । यदि प्रतिषेधाश्रयणे विकल्पः प्रसज्यते तदा नदीक्षितवाक्यस्याग्निहोत्रादिवाक्यशेषत्वमङ्गीकृत्यापि सुपरिहरणीयम् । किंचित्प्रकरणाम्नातस्यैकस्य शब्दस्य प्रदेशान्तराम्नातानेकवाक्यशेषभावादपि पापीयान् विकल्प इति न्यायं व्युत्पादयितुमतः पर्युदासाधिकरणपूर्वपक्ष एव वस्तुतो विकल्पप्राप्तिरिति तदधिकरणसिद्धान्तसूत्रमेवात्र पठितव्यमित्याशयेन टीकाकारैर्भाष्यमन्यथा कृतम् आचार्यैश्च तदनुमोदितम् । भाष्यकाराणां त्वयमाशयः । प्रतिषेधपक्षे विकल्पो भवत्येव । अग्निहोत्राद्यनुष्ठाने सोमयागवैकल्यं तदननुष्ठाने यावज्जीवाग्निहोत्रसंकल्पवैकल्यमित्यन्यतरवैकल्याभ्युपगमेनाग्निहोत्रज्योतिष्टोमानुष्ठानस्य तयोर्विकल्पं विना गत्यन्तराभावात् । किं च चोदकप्राप्तक्रत्वर्थहोमप्रतिषेधे पर्युदासाधिकरणपूर्वपक्षन्यायेन प्रत्यक्षशिष्टहोमप्रतिषेधे च चतुर्विंशन्मन्त्रतत्प्रतिषेधन्यायेनानिवार्यो विकल्पः । यदि च विकल्पप्रसक्त्यभावे ऽपि प्रदेशान्तरस्थवाक्यशेषभावेन तदन्वयादपि विकल्पः पापीयानिति न्यायव्युत्पादनार्थं नदीक्षिताधिकरणं स्यात्तदा सुतरां तदधिकरणसूत्रोदाहरणं प्रकृतोपयोगि प्रदेशान्तरस्थानां कुशाच्छन्दःस्तुत्युपगानविशेषवाक्यानां हानोपादानोभयविषयवाक्यस्य च प्रदेशान्तरस्थवाक्यशेषभाव एव युक्तो न विकल्प इत्युपपादयितुं खलूदाहरणमन्विष्यत इति ।

ननु न तौ पशौ करोतीत्यर्थवाद इति टीकोक्तमयुक्तं पूर्वमीमांसकैः खल्वपूर्वे चार्थवादः स्या*दित्यधिकरणे न तौ पशौ करोतीति पशावाज्यभागयोः प्रतिषेधार्थः न तु दार्शपौर्णमासिकाज्यभागस्तुत्यर्थो ऽनुवादः

* जै० सू० अ० १० पा० ८ सू० ५ ।

पशावाज्यभागप्रतिषेधस्याप्राप्तत्वात् । अधिकरणं तु न सोमे ऽध्वरइत्येत-
द्विषयम् । तदित्यम् । अयं प्रतिषेधो ऽर्थवादो वेति संशये सोमाङ्गेषु दीक्ष-
णीयादिषु चोदकप्राप्तयोराज्यभागयोरयं प्रतिषेधः तस्यैकशतं प्रयाजानूयाजा
इत्यत्र दीक्षणीयाद्यङ्गानां प्रयाजानूयाजानामिव तथाभूतयोराज्यभागयोरपि
सोमसंबन्धित्वेन कीर्तनोपपत्तेरिति प्राप्ते तथा सति न तौ पशौ करो-
तीत्येतद्वैयर्थ्यं स्यात् । न सोमे ऽध्वरइत्यत एव दीक्षणीयादिवत्सोमाङ्गे
अग्नीषोमीयपशौ तद्विकृतिषु सवनीयादिषु चाज्यभागप्रतिषेधलाभात् । अतस्तौ
न पशावित्यस्यायं प्रतिवस्तूपमाविधया दृष्टान्तसमर्पणेन स्तुत्यर्थो ऽर्थवाद
इति । तस्मादयुक्तं तौ न पशावित्यस्य टीकोक्तमर्थवादत्वमित्याशङ्क्याह
तथा क्वचित्पशुप्रकरणे ऽपीति । अयमाशयः । तौ न पशौ करोतीति ४३८ । ६
पशुप्रकरणे ऽपि किं चिद्वाक्यं टीकाकारैर्दृष्टमस्ति तस्याज्यभागवर्ज्यं प्रकृतिव-
त्कुर्यादिति पर्युदासवृत्त्या प्रकृतिवच्छब्दशेषत्वेनान्वये सति तल्लब्धस्य पशा-
वाज्यभागाभावस्यानुवादो न तौ पशाविति न सोमे इति सोमे नित्यप्राप्तस्य
तदभावस्यानुवादः । उभयमपि विधेयाज्यभागस्तुत्यर्थमिति । एवं च प्रति-
षेधपक्षे पशावाज्यभागयोर्विकल्पः पर्युदासपक्षे नित्यमेव वर्जनमिति विशेषः ।
यद्यपि दर्शपूर्णमासप्रकरणाम्नातस्यैव न तौ पशावित्यस्य प्रकरणादुत्कृष्टस्य
पर्युदासवृत्त्या पाशुकप्रकृतिवच्छब्दशेषत्वं वक्तुं शक्यम् प्राभाकरैरपि पर्युदा-
सपक्षं समर्थयमानैस्तथैवोक्तं तथापि टीकोक्तमनुवादत्वं पशुप्रकरणे तथाभूतं
वाक्यं विना न निर्वहतीति तत्सद्भावो ऽङ्गीकृतः । **अवधूतेति** । लोके
त्यक्तसकलकर्माणमवधूतमाहुस्तत्र धूननस्य त्यागार्थत्वं प्रसिद्धमित्यर्थः ।
यद्यप्यवधूतशब्दस्योक्तार्थपरतायामवधूतकर्मेति प्रयोक्तव्यं तथापि विभक्तध-
नेषु भ्रातृषु विभक्ता भ्रातर इतिवद्गम्यमानत्वादुत्तरपदस्याप्रयोगः । धातूनां
निर्दिष्टार्थव्यतिरेकेणाप्यर्थान्तरसद्भावे शाब्दिका ज्ञापकमाहुः । धातुपाठे कुर्द
खुर्द गुर्द गुद क्रीडायामेवेत्येवकारः पठ्यते स धात्वन्तराणां धातुपाठे
निर्दिष्टादर्थान्तरमप्यस्तीति ज्ञापयति अन्यथा ऽर्थनिर्देशादेव क्रीडामात्रार्थ-
त्वसिद्धेरेवकारवैयर्थ्यादिति* ॥

---

* अत्र पञ्चदशं ह्रान्यधिकरणं पूर्णम् ।

४३९ । २१ **सांपराये तर्तव्याभावात्तथा ह्यन्ये ॥ २७ ॥**

सुकृतदुष्कृतत्त्वयस्त्विति । न च वाच्यं पर्यङ्कविद्यायामर्चिरादिपथं प्राप्तस्य मध्ये चन्द्रेण सह संवादोक्तेः संवादस्य शरीरसाध्यत्वात्तदर्थं कर्मापेक्षा ऽस्तीति विद्यासामर्थ्यादेव मार्गे ऽपि शरीरलाभोपपत्तेः । अवश्यं हि विद्यायाः दिव्यशरीरोत्पादने ऽपि सामर्थ्यं वक्तव्यम् । अन्यथा पर्यङ्कविद्यायामेव देवयानेन पथा ब्रह्मलोकं प्राप्तस्य पर्यङ्कस्थेन ब्रह्मणा सह संवादोक्तेः का गतिः* ॥

४४१ । ११ **गतेरर्थवत्त्वमुभयथा ऽन्यथा हि विरोधः ॥ २९ ॥**

एनसः पापात् परीति । अपपरी वर्जने इति वर्जनार्थो ऽत्र परिशब्दः पञ्चम्यपाङ्परिभिरिति तद्योगे पञ्चमी । स्वकृतमन्यकृतं चास्मदनुभाव्यफलमेनो वर्जयित्वा विनाश्य परिपालयतेति योजना । **पिपृतेति ।** पॄ पालन पूरणयोरिति धातुः । यदेनश्चकृमा वयं यद्वा ऽन्यकृतमारिम अनया समिधा वयं सर्वं तदपमृन्महे इति सामवेदमन्त्रे इन्द्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः तेनो मुञ्चन्त्वेनसो यदन्यकृतमारिमेति । यजुर्वेदमन्त्रे चान्यकृतपापस्यान्यत्र सङ्क्रमणं स्पष्टमेव श्रूयते । एवमनेकश्रुतिप्रतिपन्ने ऽर्थे शङ्कानुत्थानान्न तद्व्यावर्तनार्थत्वेन सूत्रं योजनीयमित्यपि द्रष्टव्यम्† ॥

४४२ । १ **अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥ ३१ ॥**

उभयत्रापीति । नारिष्टहोमानामप्यङ्गप्रधानार्थैर्बर्हिराज्यादिधर्मैः कतिपयधर्मवत्त्वमस्तीति भावः । **श्रुत्यादयो हि द्विप्रकारा इति ।** नन्विदं विशेषकथनमनुपपन्नं व्रीहिश्रुतेर्निरुप्ताऽनिरुप्तव्रीहिष्विवैन्द्रीश्रुतेरप्यस्ति प्रकरणाम्नाताऽनाम्नातानेकैन्द्रीषु साधारण्यात् । प्रकृताऽनुपयुक्तं चेदं प्रकारद्वयकथनम् । न चैवमिति यथापीति च टीकाग्रन्थयोः प्रकरणाम्नाताऽनाम्नातश्रुत्यादिविषयत्वस्यैव स्पष्टं प्रतीयमानतया तयोः सामान्यविशेषविषयश्रुत्यादिविषयत्वाप्रतीतेः । उच्यते । इन्द्रो देवता अस्या इति विग्रहवाक्यसमानार्थत्वादैन्द्रीश्रुतेर्विग्रहवाक्यस्थस्य च सर्वनाम्नः कदा चन स्तरीरसीति

---

* अत्र षोडशं सांपरायाधिकरणं पूर्णम् ।

† अत्र सप्तदशं गतेरर्थवत्त्वाधिकरणं पूर्णम् ।

प्रकृतैन्द्रीविषयत्वादैन्द्रीश्रुतेर्विशेषविषयत्वमुक्तम् । यच्चापीति टीकाग्रन्थस्य प्रकरणाभावे श्रुत्यादिकृतविनियोगनिर्वाहाय प्रकरणं कल्पनीयमित्येतदर्थपरत्वं न युक्तम् । न हि यदाहवनीये जुहोतीत्यनारभ्याधीतश्रौतविनियोगे यस्य पर्णमयी जुहूर्भवतीत्यनारभ्याधीतवाक्यविनियोगे च श्रुतिवाक्याभ्यां प्रकरणकल्पनमिष्यते । तथा सति श्रुत्यादिषूत्तरोत्तरमेव पूर्वपूर्वकल्पनामपेक्ष्य प्रमाणं न तु पूर्वपूर्वमुत्तरोत्तरकल्पनामपेक्ष्येति बलाऽबलाधिकरणमर्यादाभङ्गापत्तेः । तस्मात् क्लृप्तकल्पनीयप्रकरणकश्रुत्यादिविषयत्वमुदाहृतटीकावाक्यद्वयस्यानुपपन्नमित्यालोक्याचार्यैर्विषयान्तरं दर्शितम् । वस्तुतस्त्वप्रकरणाम्नातश्रुत्यादिकृतविनियोगनिर्वाहाय प्रकरणकल्पनमपि टीकोक्तमुपपादयितुं शक्यम् । श्रुत्यादिषूत्तरोत्तरस्य स्वापरिच्छेद्यप्रमेये पूर्वपूर्वकल्पनापेक्षा हि बलाबलाधिकरणदौर्बल्यहेतुत्वेन दर्शिता सा ऽत्र नोच्यते किं त्वनारभ्याधीतश्रुत्यादिकृतविशेषविनियोगनिर्वाहायापूर्वदमर्थ्यरूपसामान्यविनियोगहेतुत्वाकाङ्क्षालक्षणप्रकरणकल्पनमुच्यते । न च प्रमेयभेदेनान्यापेक्षामात्रं स्वप्रमेयपरिच्छेदार्थां श्रुत्यादिप्रवृत्तिं निरुन्धे येन प्रकरणादिह श्रुत्यादीनां बलाबलाधिकरणोक्तदौर्बल्यमापतेदिति ।

प्रकरणस्य वाक्याद्बाधमाशङ्क्याहेति । यद्यपि वाक्यस्यापि ४४२ । ८
स्वप्रमेयविशेषविनियोगनिर्वाहाय सामान्यविनियोगहेतुप्रकरणापेक्षणमनुपदमेवोक्तमिति वाक्येन स्वापेक्षितप्रकरणबाधनमशक्यशङ्कं तथापि यथा कथंचित्प्रकरणबाधकत्वेन शङ्कनीयं वाक्यमप्यत्र नास्तीति दर्शयितुं शङ्कोत्थापनमिति द्रष्टव्यम् । सिद्धान्ते प्रकरणस्य वाक्याविरोधिन एव वाक्येन सामान्यसंबन्धनिर्वाहायान्वेषणं न तु विरोधिनो ऽपीति यदुक्तम् इदं सर्वासां विद्यानां गत्यपेक्षालक्षणलिङ्गस्यापि समानम् । लिङ्गमपि हि स्वविरोधिप्रकरणं नानुरुन्धे दर्शपूर्णमासप्रकरणादिभ्यः पूषाद्यनुमन्त्रणमन्त्राणां पूषदेवताकयागादिषूत्कर्षाभ्युपगमात् । ननु विद्याद्वये गत्याम्नानमनुचिन्तनार्थमित्येतदयुक्तम् । सर्वास्वपि विद्यासु गतिरनुचिन्तनीया तत्क्रतुन्यायाद्गतेरप्यान्तरालिकविद्याफलत्वात् एतमितः प्रेत्याभिसंभवितास्मीति शाण्डिल्यविद्यायां ब्रह्मप्राप्तिवद्गतेरप्यनुचिन्तनीयकोटौ निवेशनात् । तत्र हि प्रेत्येति प्रकर्षेण गमनं दूराध्वगमनमुच्यते तत्तु देवयानमार्गगमनमेव भवति । सूत्रकारे-

णापि चतुर्थाध्याये गत्यनुचिन्तनस्य सकलविद्यासाधारण्यमुक्तं विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्चेति । गतिचिन्तनस्य सर्वब्रह्मविद्यासाधारण्ये ऽपि पञ्चाग्निविद्यायां ब्रह्मविषयायां प्राप्त्यर्थत्वेन तद्यइत्थं विदुरिति वचनं सफलम् । उपकोसलविद्यायाम् अथ यदु चैवास्मिन् शव्यं कुर्वन्ति यदु चनेत्यारभ्यार्चिरादिमार्गकथनम् अक्षिपुरुषोपासकस्य पुत्रैर्दहनकर्मणो ऽकृतत्वे ऽपि त्वरितमेवार्चिरादिगतिप्राप्तिरस्ति न विद्यान्तरशीलिनामिव तत्प्राप्तौ विलम्बो ऽस्तीति विशेषप्रदर्शनार्थत्वेन सफलम् । एतेन प्रतिपद्यमाना इमं मानवं नावर्तन्तइत्यनावृत्तिफलरूपविशेषप्रदर्शनेनापि सफलम् । तस्मादुभयथाम्नातमनुचिन्तनार्थमित्येतत्कथमुपपादनीयमिति चेत् । इत्थम् । यत् प्राप्त्यर्थमाम्नानं यच्च विशेषप्रदर्शनार्थं तदनुचिन्तनार्थमपि भवति । अनुचिन्तनमेव हि साक्षाद्विद्याशेषः तद्विषयभूता गतिः क्वचित्कस्तदीयो विशेषश्चानुचिन्तननिर्वाहार्थत्वेन कथितो ऽतः प्राधान्यादनुचिन्तनं फलत्वेनोक्तमिति न कश्चिद्दोषः* ॥

४४४ । ६ **यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥**

ऐश्वर्यफलकत्वमिति । निर्गुणविद्यायाः परममुक्तिफलकत्वाऽसंभवे निर्गुणविद्यावाक्यशेषाम्नातं स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वेत्यादिसगुणविद्याफलकीर्तनं निर्गुणविद्याफलमेवाभ्युपेतं स्यादिति भावः† ॥

४४५ । २४ **अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ ३३ ॥**

वारवन्तादिपदवन्तीति । अश्वं नत्वा वारवन्तमिति वारवन्तपदवत्यामृचि गीतं साम वारवन्तीयम् । यज्ञायज्ञा वो अग्नयइति यज्ञायज्ञापदवत्यामृचि गीतं साम यज्ञायज्ञीयम् । वामदेव्यं तु वामदेवेन दृष्टं साम । वारवन्तादिपदवन्तीति बहुवचनं छत्रिन्यायेन योज्यम् । **उत्पत्त्यादिषु मध्यइति** । यद्यपि सर्वेषां विधीनामुत्पत्तिविनियोगप्रयोगाधिकारशक्तिरस्ति तथापि लाघवार्थं विधयो विध्यन्तरप्राप्यांशं विहायाप्राप्तांशमात्रे

---

* अत्र अष्टादशम् आनियमाधिकरणं पूर्णम् ।

† अत्र ऊनविंशम् यावदधिकाराधिकरणं पूर्णम् ।

विश्राम्यन्ति यथा दर्शपूर्णमासयोर्यदाग्नेयो ऽष्टाकपाल इत्यादय उत्पत्तिविधयः । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यधिकारविधिः । स एवाङ्गवाक्यैरेकवाक्यतापन्नो विनियोगविधिः । पौर्णमास्यां पूर्णमास्या यजेत अमावास्यायाममावास्यया यजेतेति प्रयोगविधिः । विध्यन्तराभावे त्वेकस्यैव विधेश्चातूरूप्यम् । यथा ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इति* ॥

इयदामननात् ॥ ३४ ॥ ४४७ । २३

अत्र गुहाधिकरणेन पौनरुक्त्यमाशङ्क्य तत्रोक्ता पिबच्छब्दस्य लक्षणा न युक्ता मुख्यार्थसंभवात् । न च प्रकरणेन वाक्यशेषेण वा लक्षणा । ताभ्यां बलीयसो वाक्यस्य बाधायोगादित्यधिकाशङ्कामुद्भाव्य न केवलं प्रकरणेन वाक्यस्य बाध उच्यते किं तूपक्रमोपसंहारैकरूप्यावगमितमहावाक्यविरोधेनावान्तरवाक्यस्य बाध उच्यतइति परिहारव्युत्पादनार्थत्वेनाधिकरणस्य साफल्यमुक्तमिति प्रतीयते । तत्रोपक्रमोपसंहारानुसारेण मध्यमवाक्यं नेयमित्येतदपि प्रतर्दनाधिकरणादिषु बहुशः सुगमम् । तस्मादित्थमधिकरणस्य साफल्यं वक्तव्यम् । मन्त्रयोरौत्पत्तिकद्वित्वविशिष्टमाध्यात्मिकं वस्तुद्वयं तावत्प्रतिपाद्यं तच्चोभयत्राप्यभिन्नमिति प्रतीयते । तुल्याभिधानरूपसमाख्याप्रमाणवशादिति टीकोक्तन्यायव्युत्पादनार्थमिदमधिकरणम् । न च समाख्यायाः किं चिद्बाधकमस्ति प्रत्युतानुग्राहकमेवास्तीति बाधकाभावं व्यतिरेकमुखेन व्यवस्थापयितुमुपक्रमोपसंहारप्रदर्शनमिति† ॥

अन्तरा भूतग्रामवत्स्वात्मनः ॥ ३५ ॥ ४४८ । १७

युवेति । अपत्यं पौत्रप्रभृति गोत्रं जीवति तु वंश्ये युवेति पाणिनीयोक्तलक्षणं युवापत्यमित्यर्थः । **अपरोक्षादिति ।** व्यत्ययो बहुलमिति छान्दसेन विभक्तिव्यत्ययेन प्रथमार्थे पञ्चमी । **अभ्यासात् सर्वान्तरत्वप्रत्यभिज्ञानाच्चेति ।** ननु द्वावत्र पूर्वपक्षौ । उभयत्र वेद्यभेद इत्येकः । वेद्याऽभेदे ऽप्यभ्यासाद्विद्याभेद इति द्वितीयः । तत्राद्यनिराकरणएव सर्वान्तरत्वप्रत्यभिज्ञायुक्तिः न द्वितीयनिराकरणे सर्वान्तरत्वप्रत्यभिज्ञानस्याविशेष-

---

* अत्र विंशम् अक्षरध्यधिकरणं पूर्णम् ।

† अत्र एकविंशम् इयदधिकरणं पूर्णम् ।

पुनःश्रवणरूपाभ्यासोपपादकतया द्वितीयपक्षएवोपपादकत्वस्याचार्यैरग्रे वक्ष्यमाणत्वात् । तस्य तु निराकरणम् अभ्यासासिद्ध्यन्यथासिद्धिभ्यां करिष्यते । सत्यम् । प्रथमपूर्वपक्षनिराकरणयुक्तिरेवात्र सिद्धान्तकोट्युपपादकयुक्तित्वेन लिखिता द्वितीयपूर्वपक्षे निराकरणयुक्तिस्तु वक्ष्यमाणा ज्ञातुं शक्येति न लिखिता* ॥

४५० । ३ **व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३७ ॥**

भाष्यकारैरधिकरणान्ते जाबालैरितरैश्चिभिश्च प्रदर्शितस्य व्यतिहारस्य समाने विषये उपसंहारः कार्य इत्युक्तम् । तत्र समाने विषये इत्येतत्समानगुणविद्यान्तरविषयं सकलाहंग्रहोपासनापरं वा† ॥

,, । १० **सैव हि सत्यादयः ॥ ३८ ॥**

नन्विहाधिकरणे सत्यविद्याभेदाभेदचिन्तावत्सत्यहृदयविद्याभेदाभेदचिन्ता ऽपि कर्तुं शक्यते सत्यविद्यायां जयतीमान् लोकानिति फलनिर्देशः हृदयविद्यायामेष प्रजापतिर्यद्धृदयमेतद्ब्रह्मैतत्सर्वं तदेतत् त्र्यक्षरं हृदयमिति हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद इत्येकमक्षरं द इत्यस्मै स्वाश्चान्ये च य एवं वेद यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेदेति फलनिर्देशभेदः पूर्वपक्षन्यायस्तुल्यः । तच्छब्दद्वयेन प्रकृतहृदयब्रह्मस्वरूपप्रकारपरामर्शेन तस्यैव हृदयाख्यस्य ब्रह्मणः सत्यरूपतोच्यतइति वेद्याभेदान्न विद्याभेदः । फलनिर्देशभेदस्त्वसिद्धः जयतीमान् लोकानिति प्रधानब्रह्मोपासनायाः फलवत्त्वे सिद्धे तदङ्गहृदङ्गहृदयनामाक्षरोपासनाफलनिर्देशस्यार्थवादत्वात् । प्रधाने ऽप्येवंकामपदेन फलनिर्देशाभावात् । सत्रन्यायेन फलविपरिणामे कल्पनीये प्रधाने तदवयवे यत्किञ्चित्फलं श्रुतं सर्वस्यापि जातेष्टिफलन्यायेन समुच्चयकल्पनोपपत्तेश्चेति सिद्धान्तन्यायो ऽपि तुल्यः । अथ एष प्रजापतिर्यद्धृदयमित्यारभ्य तस्योपनिषदहमिति हन्ति पाप्मानं जहाति च य एवं वेदेत्यन्तेन संदर्भेण विधीयमानैकैव विद्येत्येवमधिकरणव्युत्पाद्यो ऽर्थे वक्तव्ये किमिति स यो ह वैतदिति मध्ये गृहीत्वा भेदाभेदचिन्ता ।

---

* अत्र द्वाविंशम् अन्तरत्वाधिकरणं पूर्णम् ।

† अत्र त्रयोविंशं व्यतिहाराधिकरणं पूर्णम् ।

उच्यते । एकदेशे कृता चिन्ता तुल्यन्यायतयैकदेशान्तरे ऽपि संचारयितुं शक्येति क्व चिदियं चिन्ता कृता* ॥

कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥ ४५१ । २०

तस्य न स्थानतो ऽपीति। उपलक्षणमेतत्। इहाप्यधिकरणे भाष्यकारैर्बृहदारण्यकोक्ता निर्गुणविद्या तत्पूर्वोत्तरसन्दर्भोदाहरणेन छान्दोग्यवर्णिता सगुणविद्येत्येतांश्च सत्यान् कामानिति तद्वत्यवाक्योदाहरणेन च स्पष्टीकृतम् । एतांश्च सत्यान् कामानित्येतदुदाहरणेनापि बृहदारण्यकोक्ता विद्या निर्गुणविद्येति व्यञ्जितम् । कथमिति चेत् । इत्थम् । विद्यान्तरेषूपास्यगुणानामुपदेशमात्रं कृतं तावतैव गुणविशिष्टोपासना सिद्ध्यतीति । इह तु गुणानामप्युपासना विधीयते तत्किमर्थं बृहदारण्यके उपसंहृता एते निर्गुणप्रकरणानुसारेणानुपास्यास्तथेहाप्यनुपास्या मा भूवन्नित्येतदर्थमित्येव कल्पनीयम् प्रयोजनान्तराभावात् । कामशब्दसंगृहीतगुणजातव्यतिरिक्तद्यावापृथिव्यादिसमानाधारत्वप्रमुखगुणानामनुपास्यतायाः प्रयोजकत्वकल्पने परिसंख्यार्थत्वप्रसङ्गात् । गुणानां पृथगुपासनासिद्ध्यर्थत्वं स्यादिति चेन्न तावद्धर्मिणं विना उपासना पृथगुपासनाश्रुतौ सत्यकामादिशब्दानां धर्मिपर्यन्तत्वेन गुणोपासनाविधाने ऽपि गुणविशिष्टधर्म्युपासनाप्राप्तेः । नापि धर्मिविशेषणतयैव गुणानां क्रमेणोपासना पृथगुपासना शाण्डिल्यविद्यादिषु मनोमयादिगुणानामपि तथैवोपासनेति ततो विशेषाभावात् । नापि गुणविशेष्यकोपासना पृथगुपासना । तस्यापि विवक्षितत्वे अस्मिन् कामाः समाहिता इति गुणविशेष्यकोपदेशतस्तल्लाभात् । तस्मादस्मदुक्तमेव तत्प्रयोजनमिति युक्तम् । तन्मुखेन च भाष्यकारैर्वाजसनेयोक्तविद्याया निर्गुणविद्यात्वं व्यञ्जितम् । ननु छान्दोग्यवाजसनेयकोक्तविद्ययोः सगुणनिर्गुणविषयतया भेदे ऽप्यायतनत्वादिसाम्यमात्रेण परस्परगुणोपसंहारे समाख्याभेदेन भिन्नयोर्दहरशाण्डिल्यविद्ययोरपि परस्परगुणोपसंहारः स्यात् तयोरपि हृदयायतनत्वमेतत्सत्यं ब्रह्मपुरं मनोमयो ऽयं पुरुषो भाः सत्यमित्युक्तं सत्यत्वम् । अथ य आत्मा स सेतुर्विधृतिः सत्यधृतिरित्युक्ता धृतिः । सत्यकामः सत्यसङ्कल्पः भारूपः सत्यसङ्कल्प इत्युक्तं सत्यसङ्कल्प-

---

* अत्र चतुर्विंशं सत्याद्यधिकरणं पूर्णम् ।

त्वम् । सर्वस्येशानः सर्वस्याधिपतिरित्युभयथाप्युक्ते सर्वेश्वरत्वसर्वाधिपतित्वे चेत्येवं बहवो गुणाः समाना दृश्यन्त इति चेत् । नात्र साक्षान्मुख्य उपासनार्थगुणोपसंहार उच्यते । किं त्वेकैकत्र श्रुतानां गुणानामन्यत्रापि सत्यकामत्वादिसामर्थ्येन हृदयायतनत्वादिसाम्येन चोपस्थितानां स्तुतिप्रकर्षमात्रप्रयोजनतोच्यते । एवमेव हि ध्येयत्वमपूर्वमित्यादिना अतो ऽन्तर्भावमात्रमुपसंहार इत्यन्तेन प्राक्तनग्रन्थेनोक्तम् । अन्यथाप्ययं न्यायो भवत्विति चेद् भवतु नाम नैतावता विद्याभेदे ध्यानार्थगुणोपसंहारप्रसङ्गः* ॥

४५२ । १३ **आदरादलोपः ॥ ४० ॥**

पूर्वातिथिभ्य इत्यादिस्तुत्युपपत्त्यर्थमिति ॥ यद्यपि पूर्वो ऽतिथिभ्यो ऽश्नीयादित्ययं विधिः यथा वै स्वयमहुत्वेत्यादिस्तदर्थवाद एव स्तावकः तथाप्यर्थवादो यथा विधेये आदरावहः एवमिह पूर्वातिथिभ्य इति विधिरपि प्राणाग्निहोत्रे आदरावह इति साम्याद्विधिरपि स्तुतिकोटौ निवेशितः । यद्वा पूर्वोतिथिभ्यो ऽश्नीयादित्ययमादिर्यस्येत्यतद्गुणसंविज्ञानबहुव्रीहिणा ऽर्थवादांश एव गृहीतः । **यदेतदक्षाभ्यञ्जनमिति** । अक्षाभ्यञ्जनमप्येकहायनीनयनस्य प्रयोजकं चेदक्षाभ्यञ्जनात्प्राक् पदपांस्वपचारे तत्संपादनार्थं पुनरप्येकहायनीनयनं कार्यम् अप्रयोजकं चेत्पुनस्तन्न कार्यम् अक्षाभ्यञ्जनं तु पांस्वन्तरेणान्येन वा कार्यमिति फलभेदः । (नन्वेकहायनीक्रयार्थानयनं क्रयाभ्यञ्जनोभयार्थमस्तु । उभयोरपि नयनसाध्यत्वाविशेषादित्याशङ्क्याह **यदर्था च सेति** । यदर्थं द्रव्यं तत्संस्कारोपि द्रव्यद्वारा तदर्थ एव स्यादिति भावः । **सप्तमपदपांशुग्रहणमित्यर्थ इति** । एवं च टीकाकारपक्षे पदकर्मेति सूत्रपदेन पदपांशुग्रहणं विवक्षितं तद्विषयः प्रयोजकत्वाप्रयोजकत्वविचार इति प्रथमं शिलायां सप्तमपदनिधाने पदपांशुग्रहणार्थं पुनरप्येकहायनीनयनं पूर्वपक्षे कार्यं सिद्धान्ते नेति फलभेदः† ।) पक्षद्वये ऽपि पूर्वपक्षसिद्धान्तन्यायौ समानौ वस्तुतः पांशुग्रहणमक्षाभ्यञ्जनं चेत्युभयमप्यधिकरणस्योदाहरणम् । एकस्मिन्नुदाहृते न्यायसाम्यादन्यदप्युदाहरणमुपगन्तुं शक्यमित्यभिप्रेत्य टीकाकारैः प्रथमातिक्रमे कारणं नास्तीति पांशुग्रहणमुदाहृतम् । आचार्यैस्त्वक्षाञ्जनमप्यु-

---

* अत्र पञ्चविंशं कामाद्यधिकरणं पूर्णम् । † ( ) एतन्मध्यगो ग्रन्थो नास्ति २ पु॰ ।

दाहरणमिति स्पष्टीकर्तुं तदुदाहृतम् । तस्यैकहायनीनयनसाध्यतायाः पांशुग्रहणद्वारकतया तस्यैकहायनीनयनप्रयोजकत्वसमर्थनेनैव पांशुग्रहणस्यापि तत्प्रयोजकत्वसामर्थ्यात्समर्थितं भवतीति तन्नोदाहृतम् ।

प्राशुच्यमानमशनमप्य*ग्निहोत्रमेवेति । अत एवाधिकरणा- ४५३ । ११
रम्भे पादसङ्गतिः । टीकायां प्राणाग्निहोत्रमेव पूर्वभोजनशब्देनोक्तम् । **स्वामिभोजनमित्यध्याहार इति ।** यदतिथिभोजनोत्तरकालं विहितं स्वामिभोजनं समयादपकृष्येत्यत्र विद्यमानं स्वामिभोजनपदम् अपकर्षकर्मसमर्थकतया द्वितीयान्तमित्यभिप्रेत्य विहितमित्यस्यान्वयार्थं प्रथमान्तस्य स्वामिभोजनपदान्तरस्याध्याहार उक्तः । वस्तुतस्तु तदेव पदं प्रथमान्तं वक्तुं शक्यम् । अपकृष्य विहितमित्यत्र विधानरूपप्रधानक्रियाकर्मणो ऽभिहितत्वमात्रेणाश्रुतपदस्य प्रथमान्तत्वोपपत्तेः । अयं ब्राह्मणस्ततो ऽपकृष्यात्र नीत इत्यादिप्रयोगदर्शनात् । अतो नाध्याहारानुषङ्गापेक्षा । **उपसदादिधर्म इति ।** उपसद आदयो यस्याग्निहोत्रस्य तदुपसदादि । भावप्रधानो निर्देशः । तथा चोपसदादित्वधर्मः उपसदानन्तर्यधर्म इत्यर्थः । **देवतान्तरावरुद्धत्वादिति ।** आग्नेयमष्टाकपालमग्नीषोमीयमेकादशकपालमित्यादिविधिभिः कृत्स्नस्य पुरोडाशस्य देवतान्तरार्थत्वावगमादित्यर्थः । न च स्रुवदानमात्रस्याग्नौ प्रक्षेपात्तावदेवाग्न्याद्यर्थमिति शङ्कनीयमुत्पत्तिवाक्यानुसारात् । कृत्स्नेन पुरोडाशेनाग्न्यादियागः प्रक्षेपमात्रं स्रुवदानस्य तेन स्रुवदानप्रक्षेपकाले कृत्स्नः पुरोडाशो ऽग्न्यादिदेवतायै मनसा त्यक्तव्य इति सर्वप्रदानाधिकरणे वार्तिककारैः स्थापितत्वात् । **प्राणिमात्रस्य** वराहमेषहरिणादेः । उक्तं च वार्तिके ऽपि जाघन्यधिकरणे । नावश्यमिति यच्छागादेव ग्रहीतव्या जाघनी जाघनीनामकावयवमात्रश्रवणादिति । **अनित्यानां च प्रारब्धानामिति ।** प्रारब्धकाम्यकर्मणामित्यर्थः । **अविशिष्टत्वेन प्रत्यभिज्ञानादिति ।** प्रतिनिधिद्रव्येषु नीवारादिषु मुख्यव्रीह्यादिद्रव्यावयवानुप्रवेशप्रयुक्तसादृश्यमूलात्प्रत्यभिज्ञानादित्यर्थः । **नाग्निहोत्रहवणीति ।** ४५५ । ४
यद्यप्यग्निहोत्रं यया होष्यते सा ऽप्यग्निहोत्रहवणीति वक्तुं शक्या ल्युटो हि भूतकाले विधानाभावात् तथापि भाव्यर्थे प्रमाणाभावात् प्रवृत्तिनि-

* उच्यमानमप्यशनमिति २-५ पु॰ पा॰ ।

मित्तनिर्धारणाय यथा ऽग्निहोत्रं हुतं सैवाग्निहोत्रहवणी ग्राह्येति भावः ।

४५५ । ४ **तद्विशिष्टत्वेन श्रुतस्येति ।** यद्यपि चतुरो मुष्टीन्निर्वपतीति संख्यामुष्टिविशिष्टे निर्वापे विहिते अग्निहोत्रहवण्येति वाक्यान्तरेण तत्साधनमात्रं विधीयेत तथापि तस्मिन्वाक्ये साधनविशेषविशिष्टत्वप्रतीतिरस्तीति तद्विशिष्टत्वश्रवणमुक्तम् । **पश्चात्प्राप्नोतीति ।** यद्यप्यखण्डोपकारमुखेन सकलपदार्थानां युगपदेव प्रापकश्चोदकः न तु चोदकस्य प्रतिपदार्थं पृथग्व्यापारो ऽस्ति न वा प्रतिपदार्थं चोदकभेदो ऽस्ति तथापि प्रकृतिवच्छब्देन युगपत्प्राप्तिष्वपि पदार्थेष्वनुष्ठानकाले तत्तदवान्तरोपकारापेक्षाक्रमेण तत्तदुपकारजनकपदार्थानुष्ठानापेक्षितबुद्धिक्रमो ऽस्तीत्येतदवलम्ब्य प्राप्तिपौर्वापर्यमुक्तम् । **अर्थवादगतस्त्विति ।** सोमो वै वाजिनमित्यर्थवादे सोमे वाजिनशब्दवदेष वै दर्शपूर्णमासयोरवभृथ इति अर्थवादे अपां व्युत्सेके अवभृथशब्दवच्च सिद्धवादृश्यमात्रपर इत्यर्थः । **परिमाणविशेषवानिति ।** गुञ्जाबीजपरिमाणं परिमाणविशेषः । **अवघातादयइति ।** आदिशब्देन निष्फलीकरणग्रहणम् । ननु वितुषीभावादिलक्षणद्वाराभावे बाध एव युक्त इति कथं पूर्वपक्ष इत्यत आह **अचराविति ।** अनवस्रावितान्तर ऊष्मपक्वौदनविशेषवाची चरुशब्द इति दशमे निर्णीतम् । तथा चाचरौ चरुशब्दोयं चरुधर्माणाम् अवघातादीनामतिदेशकः स्यादित्यर्थः । **सत्यां गतौ विधौ गौणत्वायोगादिति ।** अग्निहोत्रशब्दस्तु द्रव्यदेवतापेक्षावशाद्विधिगतौ गौणो ऽभ्युपगतः । न चेहावघाताद्यपेक्षा ऽस्तीति वैषम्यमिति भावः । **गत्यभावादिति ।** द्वारलोपात् अपणवद्विशेषविध्यभावाच्चेति भावः । नन्वतिथिभोजनोत्तरकालमित्यादिशङ्कायाः पूर्वपक्षोपयोगं दर्शयति **ननु स्वामिभोजनस्येति । अतः प्राणाग्निहोत्रस्यैवेति ।** तथा चादरलिङ्गस्य न परिहारसिद्धिरिति भावः:* ॥

४५६ । ८ **तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४२ ॥**

रात्रिसत्राणामगत्या विपरिणाम आश्रित इति । ननु विपरिणामाऽनाश्रयणे अर्थवादमात्रता स्यात् सा च फलविपरिणामाश्रयणाज् जघ-

* अत्र षड्विंशम् आदराधिकरणं पूर्णम् ।

न्येत्यनुपदमेव टीकाकारो वक्ष्यति अर्थवादमात्रत्वे ऽत्यन्तपरोक्षा वृत्तिर्यथा
न तथा फलपरत्वइति आचार्या अपि तत्तथैवानुमोदिष्यन्ते अतः पूर्वाप-
रविरोध इति चेत् । उच्यते । अर्थवादभावात् फलविपरिणाम एव जघन्यः ।
तत्र हि ये प्रतितिष्ठन्ति तएता रात्रीरुपेयुरिति यत्तदोर्व्यत्यासः सनर्था-
न्तर्भावश्चेति बह्वी क्लिष्टकल्पना । उदाहृतटीकावाक्यं तु प्रकृतोद्गीथोपास-
नाद्यभिप्रायम् । तासां क्रत्वर्थपक्षे हि पर्णतावाक्यइवाव्यभिचरितलिङ्गोप-
स्थापितक्रतुलक्षणां* विधावङ्गीकृत्य वाक्यशेषस्य प्राशस्त्यलक्षणा ऽप्यङ्गीक-
र्तव्या ततो वरं वाक्यशेषमात्रस्य फलविपरिणामकल्पनेति । अत एव यत्र
प्रकरणात् क्रतुसंबन्धसिद्धिः क्रतूपस्थित्यर्थं विधौ लक्षणा न वक्तव्या तत्र
वर्मकरणादिवाक्यशेषे टीकायामप्यर्थवादतैवाङ्गीकृतेति न कश्चिद्विरोधः ।

क्रतूपकारस्य सिद्धत्वादिति । प्रयाजाञ्जनयोः प्रकरणात् क्रतू- ४५१ । ५
पकारसिद्धिः पर्णतायास्तु फलकल्पनापक्षे ऽपि क्रतूपस्थित्यवश्यंभावात् । **सा
सप्तम्यर्थेति ।** नन्वादित्यादिमतय† इत्याद्यधिकरणे द्वितीया सप्त-
म्यर्थेति न वक्ष्यते किं तु कर्मार्थैव । सप्तमी तु तृतीयार्था । तेन लोकश-
ब्दस्य लोकदृष्टिपरत्वमङ्गीकृत्य लोकदृष्ट्या सामोपासीतेत्यर्थ इति वक्ष्यते ।
सत्यम् । इह सप्तम्यर्थेति वक्ष्यतइत्यस्यायमर्थः । सामदृष्ट्या लोकानुपासीतेति
तदधिकरणपूर्वपक्षे लोकेष्विति सप्तम्या यो ऽर्थः अनीप्सितकर्मत्वं लोकाना-
मन्यत्रापि नियुक्तानाम् असंस्कार्यतयेप्सितकर्मत्वायोगात् तदेव तत्सि-
द्धान्ते सामेति द्वितीयाया अर्थ इति वक्ष्यतइति । यद्यपि कर्मार्थापरित्या-
गमात्रं वक्ष्यते न तु कर्मणो ऽनीप्सितत्वं तथाप्युपासनायाः कर्मार्थत्वासं-
भवाद् अर्थादनीप्सितत्वे पर्यवसानं भवति कर्मणामुपासनार्थतायां हि
दृष्टार्थता लभ्यते निरालम्बनोपासनानुपपत्तेरालम्बनस्य तदपेक्षितत्वात् ।
उपासनायाः कर्मार्थत्वे ऽदृष्टार्थता स्याद् उपासनेनोद्गीथादिषूत्पत्तिप्राप्तिविकृ-
तीनामसंभवेनादृष्टसंस्कारस्यैव वक्तव्यत्वात् । दृष्टादृष्टफलपर्यवसाय्यन्वयद्वयसं-
भवे च दृष्टफलपर्य्यवसाय्येवान्वयो ग्राह्यः । अत एव खलेवाली यूपो भव-
तीत्यस्य यः खादिरादिः प्रकृतितः प्राप्तो यूपः तस्य खलेवाल्याकृतिपरतायां
त्वदृष्टार्थता स्यादिति विधेर्दृष्टार्थत्वलिप्सया खलेवाल्या यूपकार्ये विधिरा-

* क्रतुप्रकरणानुगततामिति २ पु॰ पा॰ । † आदित्यादित्यादिमतय इति २ पु॰ ।

श्रितः । ननु तेनोङ्कारेणोभावपि कुरुत इत्यादिना आप्यादिगुणकविज्ञानस्य षोडशिग्रहणवदनियताङ्गत्वमङ्गीकृत्य तद्विज्ञानाऽविज्ञानयोः फलाभेदं पूर्वपक्षयित्वा षोडशिग्रहणपक्षे इवाङ्गभूयस्त्वात् फलभूयस्त्वेन न्यायसिद्धेन सिद्धान्तः क्रियतइति । तेनोभौ कुरुत इत्यादिश्रुतिर्व्याख्याता । इदं व्याख्यानं विद्ययेति तृतीयाश्रुत्या विज्ञानस्य कर्माङ्गत्वप्रतीतेः वीर्यवत्तरमिति तरपा विज्ञानपक्षे फलभूयस्त्वप्रतीतेश्च श्रुतिस्वारस्यानुसार्यपि प्रकृताधिकरणार्थविरुद्धम् । उच्यते । श्रुतौ वीर्यशब्देन फलं नोच्यते । वीर्यं हि लोके कार्यानुकूलं बलमिति प्रसिद्धं न तु कार्यमेव । बलवत्तरत्वं च कर्मणः स्वफलजननप्रतिबन्धकापेक्षया वक्तव्यम् । अन्यस्य प्रकृतानुपयोगात् । अतः स्वफलदानोन्मुखेन विरोधिकर्मान्तरेणाप्रतिबन्ध्यरूपं फलान्तरवत्त्वं वीर्यवत्तरत्वमित्यौचित्यादवसीयते । एवं च विद्ययेति तृतीयाश्रुतिः फलान्तरार्थस्य विज्ञानस्य मुख्यं कर्मशेषत्वं न प्रतिपादयति किं तु कर्मभिरविलम्बेन फले जननीये तदुपकारकत्वरूपं मुख्यमेव शेषत्वमिति न श्रुतेरङ्गभूयस्त्वात् फलभूयस्त्वमित्यस्मिन्नर्थे स्वारस्यं किं तु पृथग्घ्यप्रतिबन्धः फलमिति सूत्रोक्तएवार्थे । तस्मादङ्गाधिक्यात्फलाधिक्यमित्याचार्यवचनम् अप्रतिबन्धोपकारजनकसाहित्यात् फलस्याविलम्बलक्षणम् इत्येतत्परतया व्याख्येयम्* ॥

४५८ । ५ **प्रदानवदेव तदुक्तम् ॥ ४३ ॥**

ननु वायुप्राणयोस्तत्त्वाऽभेदेऽप्यवस्थाभेदाद् भेदो न वायुक्रिये पृथगुपदेशादित्यधिकरणे निर्णीतः । ततः प्रयोगभेद उपपन्न इत्याशङ्क्य हेत्वन्तरमाह **तत्प्राप्तिलक्षणेति** । ननु वाजसनेयके अध्यात्मप्राणश्रैष्ठ्यानुचिन्तनस्य तेन ह वाव तत्कुलमाचक्षते यस्मिन् कुले भवतीति य एवं वेदेति फलमुक्त्वा अथाधिदैवतमित्युपक्रान्तस्य वायुश्रैष्ठ्यानुचिन्तनस्य तेन एतस्यै देवतायै सायुज्यं सलोकतां जयतीति फलान्तरमुक्तम् । अतो वाजसनेयके फलैक्यं सिद्धम्† । छान्दोग्ये अन्नवानन्नादो भवति य एवं वेदेत्युत्पत्तिवाक्यश्रुतफलैक्येपि तत्फलमुपास्यदेवताप्राप्तिरूपं न भवति । अतस्तत्प्राप्तिलक्षणफलैक्यादिति हेतोरुभयथापि नान्वय इति चेत् । उच्यते । वाजसनेयके यो

---

* अत्र सप्तविंशं **तन्निर्धारणाधिकरणं** पूर्णम् ।

† फलैक्यं सिद्धमिति २ पु० पा० ।

ऽयं मध्यमः प्राणः प्राणाद्वा एष सूर्य उदेतीत्युपक्रमोपसंहारैकरूप्यात् कृत्स्नमपीदं प्रकरणमेकविद्याविषयमिति उपसंहारश्रुतदेवतासायुज्यरूपफलैक्यमुक्तम् । अर्थवादान्तरप्राप्तं कुलश्रैष्ठ्यं फलान्तरं भवति चेद् भवतु नाम छान्दोग्ये तत्प्राप्तिलक्षणफलाऽश्रवणे ऽपि पूर्वपक्षे हेतुतया ऽपेक्षितस्य फलैक्यस्य सद्भावो ऽस्तीति तावता संगतिः । उपास्यभेदफलैक्ये यद्यपि सत्यविद्यायामपि स्तः तथापि तत्राक्ष्यादित्यस्थानभेदात्पृथगनुचिन्तनं व्यक्तमिति पूर्वपक्षसंभावनार्थं प्राणश्रैष्ठ्यविद्या संवर्गविद्या चोदाहृता । **वत्कारो धर्मस्येति** । दधितण्डुलादिवदिति वतिप्रत्ययो ऽध्यात्ममधिदैवतं च भिन्नस्य गुणजातस्योपमार्थ इत्यर्थः ।

देवताकाण्डाधिकरणस्येति । यद्यपि संकर्षकाण्डो* न देवतावि- ४५८ । २०
चारार्थं प्रवर्तितः किं तु द्वादशलक्षण्यविचारितनानाविषयन्यायविचारात्मकस्तत्परिशिष्टः तन्त्रप्रसङ्गवदुपदेशातिदेशसाधारण्येन प्रकीर्णकः प्रवर्तितः । न हि तत्र देवताविचारेणोपक्रम उपसंहारो वा ऽस्ति तत्र ह्यनुयजतीत्यनुवषट्कारश्चोद्यतइति सूत्रेण प्रथमं सोमस्याग्ने वीहीत्यनुयजतीत्यत्र किमैन्द्रवायवादियागेषु मन्त्रविधानमुत कर्मान्तरविधानमिति विचारेणोपक्रमः पशावुत्तमे प्रयाजे स्रुगादापनो न विद्यते संप्रेषितत्वाद् विद्यते वा ऽन्यकालत्वाद् यथाज्यसंप्रेषो यथा याज्यसंप्रेष इति सूत्राभ्यां पशौ प्रथमप्रयाजोपक्रमे होत्रा प्रयुक्तो ऽग्निर्होता वेत्वग्निर्होत्रं वेत्वित्यादिः स्रुगादापनमन्त्र उक्तः प्रयाजोपक्रमे न प्रयोक्तव्य उत तदानीमपि प्रयोक्तव्य इति विचारेण शास्त्रसमापनम् । तथापि संकर्षे देवताविधानरहितेषूपांशुयाजादिषु देवता ऽस्ति न वा प्रयाजादिषु देवतावाचिनस्समिद्बर्हिरादिशब्दाः दर्शपूर्णमासाङ्गप्रसिद्धसमिद्बर्हिरादिपरास्तदन्यपरा वा अग्निं होत्रायावह स्वं महिमानमावहेत्यत्र होत्रशब्दोक्तहोमद्रव्यार्थत्वेन श्रुतः स्विष्टकृदग्निराहवनीयो गार्हपत्यो वा पशौ वष्टव्या वनस्पतिदेवता पश्वङ्गयूपरूपा ऽन्या वा स्वाहा देवा आज्यपा जुषाणा इत्यत्राज्यपाः सकलप्रयाजानूयाजदेवताः उत्तमप्रयाजानूयाजमात्रदेवता वा ग्रहाणां वैराजस्य स्तोत्रायेत्यादिचतुर्थीनिर्दिष्टानि स्तोत्राणि देवता आग्नेयं गृह्णातीत्यादितद्धितनिर्दिष्टा अग्न्यादयो वा यां देवतां वषट्करिष्यन् स्यात्तां मनसा ध्यायेदिति देवतावाचिशब्दध्यान-

* संकर्षणकाण्ड इति २–५ पु॰ पा॰ । सर्वमपे ऽपि पाठद्वैविध्यं दृश्यते ।

विधि: देवतार्थध्यानविधिर्वा यजेति ब्रुवन् ये यजामह इति पञ्चाक्षरमिति विहितयोर्यजयेयजामहयोरग्निं विष्णुमित्यादिद्वितीयान्तदेवतानां निर्देश: कार्यो न वा आवह देवान्यजमानायेति प्राकरणिकसकलदेवताविषयो वा अग्निमग्न आवहेत्यादिनिर्दिश्यमानाग्न्यादिदेवतामात्रविषयो वा देवान् यजेति प्रथमानूयाजोपक्रमप्रैषे देवानिति शब्द: प्रथमानूयाजदेवताविषय: सर्वानुयाजदेवताविषयो वेत्यादिदेवताविचारभूयस्त्वाद् भूम्ना संकर्षकाण्डस्यैव देवताकाण्ड इत्यपि व्यवहारो ऽस्तीति तस्य तेनोपादानम् ।

५८ । २१ **पूर्वपक्षं सिद्धान्तं चाहेति ।** संकर्षे नानाप्रदानाधिकरणात् पूर्वाधिकरणे तेषां पृथक्कृतानां निरवदानं यथा ऽन्येषां हवि:पृथक्त्वादिति सूत्रेण ऐन्द्रादिपुरोडाशानामध्यर्धांशश्रपणे कृते अवदानवेलायां पुरोडाशान् पृथक्कृत्य पृथ*गवदानानि तन्मध्यपूर्वार्द्धाभ्यां ग्राह्याणि उत पुरोडाशत्रयादपि सहैवावदानानि ग्राह्याणीति संशये हविर्भेदात् पृथगिति पूर्वपक्षं प्रापय्य वचनात् सर्वेषां सहावदीयेतेति सूत्रेण सर्वेषामभिगमयन्नवद्यतीति वचनात् सर्वेषामिन्द्रादीनां त्रयाणां पुरोडाशानभिगमयन् प्रापयन्नवद्यति न पर्यायेणेत्येतदर्थकात्सहैवावदानं नास्ति वचनस्यातिभार: पुरोडाशानां मध्यभागे नलकप्रवेशनाद्युपायेन मध्यादपि युगपदवदानं ग्राह्यमिति सिद्धान्त: कृत: । ततस्तेषां पृथक् प्रदानमवदानैकत्वादिति सूत्रेणास्याधिकरणस्य पूर्वपक्ष: कृत: । अत्रावदानैकत्वादिति सौत्रहेतुरेव मिलितानां श्रपणाविशेषादिति टीकाग्रन्थे विवक्षित: ।

प्रथमपुरोडाशप्रदानइति । अस्या: त्रिपुरोडाशाया: त्रैधातवीयाख्याया इष्टेर्याज्यानुवाक्यारूपतया प्राच्यां दिशि त्वमिन्द्रोसि राज्येत्यादयस्तिस्र ऋच: समाम्नाता: । तत्र प्रथमयागे प्रथमानुवाक्यामध्यमा याज्या पुन:प्रयोगे द्वितीयभागे मध्यमानुवाक्या तृतीया याज्या पश्चात्तृतीयप्रयोगे तृतीयानुवाक्या या पूर्वं प्रथमप्रयोगे ऽनुवाक्या प्रथमा सा ऽत्र याज्येत्यर्थ: । संकर्षे नानाप्रदानाधिकरणस्यान्यार्थप्रदर्शनाच्चेति गुणसूत्रं भाष्यकृता भवस्वामिनेत्थं व्याख्यातम् । याज्या ऽनुवाक्याविनियोगपरं वचनं प्रदानभेदं प्रकाशयति

* पृथक् पृथगिति २ पु. पा. ।

(प्रथमामनूच्य मध्यमया यजेद् मध्यमामनूच्योत्तमया यजेद् उत्तमामनूच्य
प्रथमया यजेद् एवं सर्वा अनुवाक्याः सर्वा याज्या भवन्तीति)* । तदनुसारे-
णेत्थमाचार्यवचनं योजितम् ।

प्राणने प्राप्ते प्राण्यादिति† । अथेयं विषयशुद्धिः । अध्यात्मं प्राणं ४५९ । ७
वागादींश्चाधिदैवतं वायुमग्न्यादींश्चोपक्रम्य अथ यो हैताननन्तानुपास्ते
अनन्तं स लोकं जयतीति तेषामुपासनासाफल्यमुक्त्वा अथातो व्रतमीमांसेत्य-
ध्यात्मं प्राणस्याधिदैवतं वायोश्च व्रतं तदुपासकेन कार्य्यं न तु वागादी-
नामग्न्यादीनां वेति निर्धारणार्थं विचारं प्रस्तुत्य वागादीनामभिवदनादिनि-
यमरूपस्याग्न्यादीनां प्रज्वलनादिनियमरूपस्य च व्रतस्य तेषां श्रान्त्यस्तम-
याभ्यां भङ्गमुक्त्वा आध्यात्मिकाधिदैवतभेदभिन्नस्य प्राणस्य स्वव्यापारनिय-
मरूपव्रताभङ्गमुक्त्वा तस्मादेकमेव व्रतं चरेदित्यभग्नव्रतस्य प्राणस्यैव व्रतं
तद्व्यापाररूपमुपासनया प्राणात्मतां प्राप्त उपासकश्चरेन्न वागादिव्यापारमभिव-
दनादिरूपमितीतरनिवृत्तिं विधाय तत् किं प्राणव्रतमित्याकाङ्क्षायामिदमा-
म्नायते प्राण्याच्चैवापान्याच्चेति । तत्र जीवत उपासकस्य स्वरससिद्धयोः प्राणना-
ऽपाननव्यापारयोर्विधानं व्यर्थमित्याशङ्क्य प्राण्याच्चैवेति एवकारलब्धाप्रस-
क्तयोः प्राणनापाननव्यापारयोः कदा चिदिच्छया प्रसक्तस्य निरोधस्य निवृत्ति-
र्व्रतत्वेन विवक्षितेत्याचार्यैर्दर्शितम् प्राणने प्राप्ते प्राण्यादपानने प्राप्ते ऽपान्या-
त्प्राणापाननिरोधनं न कुर्यादित्यर्थ इति । नन्वेकमेवेति यावज्जीवं वागादि-
व्यापारनिवृत्तिः कथं विहिता अशक्यत्वादिति चेदुच्यते । वागादिव्यापारेष्वपि
प्राणव्यापारतादृष्टिः कर्त्तव्या वागादिभिरभग्नव्रतत्वेन प्राणस्य श्रैष्ठ्यं निर्द्धार्य
प्राणानामरूपत्वं प्राप्तमिति हन्तास्यैव सर्वे रूपमसामेति एतस्यैव सर्वे रूपम-
भवंस्तस्मादेतएतेनाख्यायन्ते प्राणा इतीति प्राचीनसंदर्भे प्रतिपादितत्वेन
वागादिव्यापारेषु प्राणव्यापारतादृष्टेरुचितत्वादिति तात्पर्य्यम् । अतो वागा-
दिव्यापारस्य स्वरूपतो निवृत्तिर्न विधेयेति नाशक्यानुष्ठानता । केषु चिन्मू-
लकोशेषु प्राणने प्राप्ते अपान्याद् अपानने प्राप्ते प्राण्यात् प्राणापाननिरोधं

* ( ) एतन्मध्यगो ग्रन्थो न दृश्यते २ पु॰ ।

† अपान्यादिति मुद्रितमूलपुस्तके तदादर्शपुस्तकेषु च पाठः । तत्रापि उपरितन एव
पाठः शोध्यः । स्फुटीभविष्यत्यनुपदमेवैवं परिमलात् ।

कुर्यादित्यर्थ इति पाठो दृश्यते । स पाठो बृहदारण्यके प्राणस्याभग्नव्रतत्वोपक्रमविरोधात्तद्भाष्यवार्तिककृद्व्याख्यानविरोधाच्च न सांप्रदायिकः ।

सायुज्यं समानदेहतामिति । दिह उपचयइति धातोर्घञन्तो देहशब्दो योगेनोपचयवाची भोगसमृद्धिपरः । अतः समानभोगतामित्यर्थः । न तु सारूप्यमित्यर्थः । उत्कृष्टोपासनाफलस्य भोगसाम्यरूपतायाः सूत्रकृता वक्ष्यमाणत्वात्* ॥

४५९ । १४ **लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ ४४ ॥**

प्रकरणेनेति । नन्वग्निरहस्यब्राह्मणे मनश्चिदादीनां क्रतोर्विनियोजकं क्रतुप्रकरणं नास्ति किं त्वनारभ्याधीतस्य क्रत्वङ्गस्याग्नेरेव प्रकरणं तावतश्च क्रत्वङ्गप्रायपाठलक्षणः संनिधिरेव लभ्यते । सत्यम् । संनिधिरेवात्र लौकिकप्रकरणलक्षणः प्रकरणशब्देनोक्तः । **अर्थगतमुदाहरतीति** । पशुना यजेतेत्यत्र तृतीयैकवचनार्थस्य एकत्वस्य समानपदोपात्तेन पशुना नान्वयः एकः पशुरिति किं तु समानप्रत्ययोपात्तेन करणकारकेणान्वयः । एकत्वसंख्या करणकारकमिति समानपदश्रुतेः समानप्रत्ययश्रुतेरन्तरङ्गतया बलीयस्त्वात् । तदुक्तम् ।

तथा पश्वङ्गमेकत्वं पदश्रुत्या प्रतीयते ।
समानप्रत्ययश्रुत्या बलीयस्या क्रियाङ्गता ॥ इति ।

एवं शब्दान्वये स्थिते संख्यायाः साक्षात्क्रियानिर्वर्तकत्वायोगाद् द्वारान्वयापेक्षायां संख्यैवावच्छेदसामर्थ्यरूपाल्लिङ्गात्पशुद्रव्यावच्छेदकतया ऽरुणैकहायनीन्यायेन पार्ष्णिकान्वय इति मीमांसका वदन्ति तदिहोदाहरतीत्यर्थः । **पत्नीसंयाजान्तान्यहानि संतिष्ठन्तइति वचनादिति** । ननु द्वादशाहप्रकरणाम्नातं सर्वेषामह्नामसाधारणमिदं वचनम् अहरन्तरमपि स्पृशेदेव अतो ऽहरन्तरपक्षे ऽप्येतद्वचनविरोधः समान इति चेत् । उच्यते । अहरन्तरपक्षे प्रायणीयादुदयनीयान्तानामह्नां बन्धक्रमत्वाद् मानसं त्रयोदशमहः स्यात् पत्नीसंयाजान्तवचनमुक्तम् अहर्वर्ज्जयित्वा अस्थितो हि तर्हि यज्ञ इति वाक्यशेषादिवशादिति पत्नीसंयाजान्तत्वं सर्वेषामविशेषादिति नावमिकाधिकरणे निर्णीतम् । अतो ऽहरन्तरपक्षे नास्ति वचनविरोधः ।

---

* अत्राष्टाविंशं प्रदानाधिकरणं पूर्णम् ।

दशरात्रस्य द्वादशाहविकृतित्वादिति । ननु द्वादशाहस्य प्राय- ४६० । ७
णीयो ऽतिरात्रः प्रथममहः ततः पृष्ठ्यः षडहस्ततश्छन्दोमचतुष्टयं तत उदयनीयो ऽतिरात्र इति द्वादशाहानि । तत्र चतुर्थे छन्दोमे अविवाक्ये ऽह्नि मानसग्रहः ततश्च द्वादशाहविकृतौ दशरात्रे द्वादशाहस्य प्रायणीयमारभ्य द्वादशानाम्* अह्नां धर्माः प्रवर्तेरन्निति तृतीयच्छन्दोमधर्म एव दशरात्रस्य दशमे ऽहनि प्रवर्ततेति तस्मिन्नविवाक्यधर्माप्रवृत्तेः कथं मानसग्रहप्राप्तिः । उच्यते । द्वादशाहविकृतिषु द्वादशाहस्य प्रायणीयोदयनीयौ वर्ज्जयित्वा मध्यमदशरात्रस्य धर्माः प्रवर्तन्तइति दशमे चोदनासु त्वपूर्वत्वाल्लिङ्गेन धर्मनियमः स्यात्† इत्यधिकरणे निर्णीतम् । तस्मिन्नधिकरणे द्वादशाहविकृतिषु द्विरात्रादिषु द्वादशाहस्य अह्नां धर्मा आदित आरभ्य प्रवर्तन्ते प्रथमातिक्रमे कारणाभावादिति प्रापय्य सिद्धान्तितं लिङ्गविशेषैः प्रायणीयोदयनीयौ वर्जयित्वा मध्यमदशरात्रधर्माणामेव विकृतिषु प्रवृत्तिः । तथा हि । द्विरात्रे श्रूयते यत्प्रथमं तद् द्वितीयं यद् द्वितीयं तत्तृतीयमिति । द्विरात्रे यत्प्रथममहः तद् द्वादशाहे द्वितीयं यद् द्विरात्रे द्वितीयं तद् द्वादशाहे तृतीयमित्यर्थः । इदमेकं लिङ्गम् । तथा द्विरात्रएव जगतीमं तर्यन्तीति पार्ष्ठिकस्य तृतीयस्याह्नो जागतस्यान्तरायः श्रूयते सो ऽपि पार्ष्ठिकेन द्वितीयेनाह्ना द्विरात्रस्य समाप्तिं प्रथयत् प्रायणीयवर्ज्यातिदेशलिङ्गतया द्वादशाहस्य मध्यमेषु दशसु अहःसु दशरात्रशब्दप्रसिद्धिरस्ति द्विरात्रादिचोदनास्वपि रात्रशब्दो ऽस्ति तच्चोदनालिङ्गं विशेषलिङ्गं सदहर्गणत्वसामान्यलिङ्गाद् बलीयः । तेन यत्प्रथमं तद् द्वितीयमित्यादिलिङ्गानुगृहीतेन द्विरात्रादिविकृतिषु मध्यमदशरात्रस्यैव प्रवृत्तिरिति । तस्मान्मध्यमदशरात्रे दशममहरविवाक्यमिति दशरात्रस्य दशमे ऽहनि तद्धर्मप्रवृत्त्या मानसग्रहप्राप्तिरस्ति । एवं च भाष्ये दशरात्रशब्दस्य द्वादशाहान्तर्गतमध्यमदशरात्रविषयतैवोपपन्नेति विकृतिदशरात्रान्वेषणमपि न कार्यमिति द्रष्टव्यम् ।

मनोवृत्तिष्वग्नित्वदृष्टिविधेरिति । क्रत्वङ्गानाश्रितत्वहेतुं षट्- ,, । १२
त्रिंशत्सहस्राणीत्यादिश्रुत्यर्थोपन्यासेनोपपादयति **षट्त्रिंशतं सहस्राणीति ।** अतावात्मनो ऽग्नीनित्यत्रात्मन इति षष्ठी अग्नीनां तद्वृत्तिषु दृष्टिविधा-

* द्वादशाहानामिति ९ पु॰ पा॰ ।   † जै॰ सू॰ अ॰ १० पा॰ ५ सू॰ १८ ।

नाद् वृत्तिमद्भावसंबन्धार्थेत्यभिप्रेत्य तदर्थं विवृणोति **चात्मनोवृत्तीरग्नीनिति** । नन्वतुल्यकार्यत्वेन विकल्पासंभवे स्पष्टे कथं विकल्पेन पूर्वपक्षः पूर्वविकल्प इति सूत्रेण कृत इत्याशङ्क्याह **क्रियानुप्रवेशमात्रमिति** । विकल्पः पूर्वपक्षे न विवक्षितः प्रसिद्धाग्निविलक्षणाग्निप्रकारभेदमात्रं सूत्रे विकल्पशब्देन विवक्षितमेऽमयमप्यग्निविकल्प इति भाष्ये तस्य व्याख्यातत्वात् । इह तु विकल्प इति मन्दशङ्कामात्रस्य निराकरणमित्यर्थः । इत्यवतारिकया टीकायां यदुक्तमित्येतदाशंसायां भूतवद्विधानाद् यदि वक्तुमिष्टं यदि विवक्षितइत्येवंपरतया व्याख्यातं भवति । **तदङ्गावेष्टावपीति** । तदन्तर्गतावेष्टावित्यर्थः । राजसूयान्तर्गतेष्टिपशुसोमानां सर्वेषां समप्रधानत्वेनावेष्टेरङ्गत्वाभावात् । **राज्यस्य कर्ता राजेति त्रैवर्णिकानां राजत्वादिति** । यद्यपि क्षत्रियस्यैव राज्यपरिपालनं धर्मः तथाऽप्युल्लङ्घितमर्यादौ ब्राह्मणवैश्यावपि राज्यं कुर्वाणौ दृश्येते अतस्तावपि राजशब्दवाच्यौ शब्दवाच्यतायां प्रवृत्ति*निमित्तसद्भावमात्रस्यापेक्षितत्वादिति भावः । **शास्त्रसहितेति** । शास्त्रसहितानामार्याणां प्रसिद्धेरित्यर्थः । **गावोनुधावन्ति** अनुकुर्वन्ति । **चतुष्पात्त्वेन शुक्लादिशब्देभ्य इति**† । जडादिशब्दानामुपलक्षणमेतत् । शुक्लादिशब्देभ्यो हि भावार्थमात्रे ष्यञिमनिचौ प्रत्ययौ विहितौ तत्र शुक्लस्य भावः शौक्ल्यं शुक्लिमेत्याद्युदाहरणम् । उदाहृतसूत्रे जाड्यादिगुणवचनेभ्यो ब्राह्मणादिभ्यश्च भावकर्मणोरर्थयोः ष्यञ्प्रत्ययमा विधीयते जाड्यं मौढ्यमित्यादि तदुदाहरणम् ।

४६२ । १८ **अनादिवृद्धव्यवहाररूढत्वादिति** । ननु तथात्वेऽपि स्वरवर्णादिभ्रंशे प्रत्यवायमनुसंदधानानामार्याणां प्रसिद्धिराप्तमूलत्वेन बलवती म्लेच्छानां तु गवादिविषये गाव्यादिशब्दमपभ्रंशं प्रयुञ्जानानां प्रसिद्धिरनाप्तमूलत्वेन दुर्बला अतः स्वरूपतस्तावन्न विशेषोऽस्तीत्येतदयुक्तम् । राजशब्दे‡ त्वार्यप्रसिद्धेर्नास्ति वेदानुग्रह इत्येतदप्ययुक्तम् । सोमोऽस्माकं ब्राह्मणानां राजा सोम ओषधीनां राजा तौ वा एतौ देवतानां यदग्नीषोमौ ।

---

* वाच्यतायां कुर्वन्ति च प्रवृत्तीति २ पु० पा० ।

† चतुष्पात्त्वादिशब्देभ्य इतीति प्रतीकाकारः २ पु० ।

‡ शब्देनेति २ पु० पा० ।

इन्द्रो राजा जगतश्चर्षणीनामित्यादिवेदानुग्रहसत्त्वात्तदभावे ऽपि स्वत एवार्थप्रसिद्धेर्बलवत्त्वविशेषसद्भावाच्च । विशेषमाहेत्यप्ययुक्तम् । स्मृत्यनुग्रहस्य वक्ष्यमाणरीत्योभयत्राप्यविशेषात् । स्मृत्यनुगृहीतो म्लेच्छप्रयोग आर्यप्रयोगाद्बलीयानित्यप्ययुक्तम् । राज्यशब्दे गुणवचनादिसूत्रविधीयमानष्यञ्प्रत्ययप्रकृतिभूतस्य ब्राह्मणादिगणपठितस्य राजशब्दस्य क्षत्रियार्थताया इव पालकार्थताया अप्युपपन्नतया स्मृतेरुभयसाधारण्यात् । न हि विधीयमानप्रत्ययार्थादन्यदेव* प्रकृत्यर्थप्रवृत्तिनिमित्तं ग्राह्यमिति नियमो ऽस्ति । काठकशब्दे कठप्रोक्तशाखाध्यायिनामाम्नाय इत्यर्थके गोत्रचरणादिसूत्रविधीयमानप्रत्ययार्थस्य कठप्रोक्ताम्नायस्य कठप्रोक्तशाखाध्यायिवाचककठशब्दरूपप्रकृत्यर्थप्रवृत्तिनिमित्तान्तर्भावदर्शनात् । घटस्य शौक्ल्यमित्यत्र वर्णदृढादिसूत्रविधीयमानस्य ष्यञ्प्रत्ययार्थस्य† शुक्लगुणस्यैव शुक्लगुणविशिष्टद्रव्यविषयशुक्लशब्दरूपप्रकृत्यर्थप्रवृत्तिनिमित्तत्वदर्शनात् । किं च । ब्राह्मणादिगणपठितस्य राजशब्दस्य पालकार्थत्वमेव ग्राह्यम् । अन्यथा यौवराज्येन संयोक्तुमैच्छत् प्रीत्या महीपतिरित्यादिप्रयोगेषु ष्यञ्प्रत्ययो न स्यात् । तत्र राजशब्दस्य क्षत्रियार्थत्वे युवत्वराजत्वयोः प्रागेव सिद्धतया संयोक्तुमिष्यमाणस्यालाभात् । न च तत्र मा भूत् ष्यञ्प्रत्ययः पत्यन्तपुरोहितादिभ्यो यगिति भावकर्मणोरेव विहितो यक्प्रत्ययो ऽस्तु पुरोहितादिगणे ऽपि राजशब्दस्य पाठादिति वाच्यम् । तत्र राजासे इत्येतदसमासगतस्य राजशब्दस्य पाठेन ततो युवराजशब्दाद्यगप्राप्त्या ष्यञ एवान्वेषणीयत्वात् । ब्राह्मणादिगणपठितस्यैव तस्यापि पालकार्थत्वोपपत्तेश्च । जनपदविशेषवाचिनो विदेहपञ्चालादिशब्दात् तस्य राजेत्यर्थे अपत्यार्थप्रत्ययातिदेशके तस्य राजन्यपत्यवदिति वार्तिके राजशब्दस्य पालकार्थतायाः संप्रतिपन्नत्वाच्च । विदेहानां राजा वैदेहः पञ्चालानां राजा पाञ्चाल इत्यादि हि तदुदाहरणम् । एवं राजपदस्य पालकार्थत्वाध्यवसाये सति यत्कर्म्मधारय इति ब्राह्मणकुमारयोरिति चानुक्तो राजेति (पूर्वपदं ब्राह्मणकुमारयोरुत्तरपदयोरन्यतरस्यां प्रकृतिस्वरो भवति पूर्वपदप्रकृतिस्वरविधायकस्य राजा चेति‡) सूत्रस्योदाहरणं राजब्राह्मण इति तदपि

* प्रत्ययार्थादेवेति २ पु॰ पा॰ ।

† प्रत्ययार्थस्य पालकार्थत्वमेवेति २ पु॰ पा॰ ।

‡ ( ) एतन्मध्यगो ग्रन्थो नास्ति १ पु॰ ।

राजत्वब्राह्मणत्वयोर्युगपत्सामानाधिकरण्यादाञ्जस्यं लभते । ननु मा भूद् राज्यशब्दव्युत्पादकस्मृत्या म्लेच्छप्रसिद्धेरनुग्रहः । राजश्वशुराद्यदिति स्मृत्या राजशब्दादपत्यार्थे यत्प्रत्ययविधानार्थया तु स्यात् क्षत्रियापत्यइव जनपदपालकब्राह्मणाद्यपत्ये राजन्यशब्दप्रयोगाभावेन तत्र प्रकृतिभूतस्य राजपदस्य क्षत्रियार्थताया एव ग्राह्यत्वादिति चेत् किं ततः । एवमार्यप्रसिद्धेरपि पाणिनिस्मृत्यनुग्रहो ऽस्तीति राजसूयवाक्ये क्षत्रियग्रहे नैव किं चिद्विनिगमकं लब्धम् । एतेन स्मृतिशब्देन आर्षं धर्मशास्त्रादिकमनुग्राहकत्वेन विवक्षितम् । गौतमीये हि धर्मशास्त्रे द्विजातीनामध्ययनमिज्या दानमिति त्रैवर्णिकानां साधारणधर्मोक्त्यनन्तरं ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहा इत्यादिना ब्राह्मणवैशेषिकधर्मानुक्त्वा क्षत्रियवैशेषिकधर्मोक्तिप्रस्तावे राज्ञो ऽधिकं रक्षणं सर्वभूतानामिति राजशब्दः प्रयुक्तः । न च तस्य पालकार्थग्रहणं युक्तं प्रकरणानुरोधात् पालकमेवोद्दिश्य पालनविधानायोगाच्च । न हि यः पालकः तेन पालनं कर्तव्यमित्यन्वेति । एवं धर्मशास्त्रान्तरमप्युदाहर्तव्यम् । स्मृतिग्रहणमत्र श्रुतेरप्युपलक्षणम् । अस्ति हि म्लेच्छप्रसिद्धेरनुग्राहिका राजानमभिषेचयेत् तिष्येण श्रवणेन वेति श्रुतिः । अत्र राज्ञः सतो ऽभिषेको विधीयते न च क्षत्रियत्वमिव पालकत्वं प्राक् सिद्धमस्ति । अभिषिक्तस्य स्मृतिषु पालनविधानात् । न च यूपं तक्षतीत्यत्र तक्षणेन यूपं कुर्यादितिवद् अभिषेकेण राजानं कुर्यादिति क्लिष्टयोजनं न्याय्यम् । यूपशब्दार्थस्येव राजशब्दार्थस्य प्राक्सिद्धस्यासत्त्वाभावाद् म्लेच्छप्रयोगप्रसिद्धस्य क्षत्रियस्य सत्त्वादिति निरस्तम् । एवमपि विनिगमनाविरहदूषणानतिलङ्घनाद् आर्यप्रसिद्धेरपि श्रुत्यनुग्रहस्य दर्शितत्वात् ।

नगरस्थो वनस्थो वा त्वं नो राजा जनेश्वर ।
विविक्ते देवराजानमिदं वचनमब्रवीत् ॥

इत्यादिस्मृत्यनुग्रहस्यापि सत्त्वात् । राज्यायैव ते ऽभिषिच्यन्ते तेनैतान् राजेत्याचक्षतइति श्रुतौ रञ्जनात् खलु राजत्वं प्रजानां पालनादपीति भारतवचने च पालकत्वं राजशब्दार्थे इति साक्षादेव प्रतिपादनाच्च । एतेनैव क्षत्रियवाचिनो राजपदस्य पालकत्वसादृश्याद् आर्याणां जनपदपरिपालके ब्राह्मणादौ प्रयोग इत्येतदर्थकाग्रिमग्रन्थस्याप्ययुक्तत्वं व्याख्यातम् । पाल-

कदाचिन एव पालकत्वयोग्यक्षत्रिये गौणतेति वैपरीत्यस्यापि वक्तुं शक्यत्वात् । तस्मात्सर्वो ऽयमनुपपन्नः सिद्धान्तग्रन्थ इति चेत् । उच्यते । विनिगमनाविरहादर्थद्वयसत्त्वे ऽपि राजसूयवाक्ये क्षत्रिय एवार्थो ग्राह्यः । सप्रतियोगिकौपाधिकधर्मरूपपालकत्वापेक्षया निष्प्रतियोगिकाखण्डरूपधर्मक्षत्रियजातेर्लघुत्वेन असति बाधके लघुप्रवृत्तिनिमित्तकार्थग्रहणौचित्यात् । न चावेष्टिवाक्यगतत्रैवर्णिकप्राप्तिद्योतकयदिशब्दस्वारस्याद् गुरोरप्यर्थस्य ग्रहणं स्यादिति वाच्यम् । द्योतकनिपातस्वारस्यानुरोधेन वाचकानां स्वारस्यभानायोगात् । वस्तुतस्तु श्रुतिस्मृतिप्रयोगवैयाकरणव्यवहाराणामुभयत्र साम्ये ऽपि क्षत्रियेष्वेव शक्तिस्तेषु* क्षत्रियजातेरिव पालकेष्वनुगताऽनतिप्रसक्तशक्यतावच्छेदकरूपाभावात् । तथा हि । न पालनमात्रं निमित्तं सर्वसाधारण्यप्रसङ्गात् । अस्ति हि सर्वेषामपि पुत्रदारधनादिविषयमन्ततः स्वशरीरविषयं वा पालनम् । नापि जनपदपरिपालनं निमित्तम् । राज्ञा नियुक्ते तत्तत्पदाधिकारिणि सत्यपि तस्मिन् राजपदाप्रयोगात् । नापि स्वतन्त्रपालनं निमित्तम् । सम्राजा नृपतिना देशविशेषे राजभावेनाभिषिक्ते तदभावात् । किं च विनापि पालकत्वं श्रेष्ठ्यमात्रेण राजपदप्रयोगो मृगराजः पक्षिराजो वृक्षराजश्चेतीत्यादिव्यवहारे दृश्यते । तस्य राजदन्तादिषु परमित्युपसर्जनपरनिपातविधायकपाणिनिस्मृत्यनुग्रहो ऽप्यस्ति । तस्मादनुगताऽनतिप्रसक्तजातिनिमित्तकः क्षत्रियार्थ एव राजशब्दः क्षत्रियेषु प्रायेण पालकत्वस्य तत्कृतस्य श्रैष्ठ्यस्य च सद्भावात्क्वचित् पालके केन चित्केन चिद्गुणेन श्रैष्ठ्ये च तस्य निरूढा लक्षणेत्येव युक्तम् । इत्थं राजशब्दस्यानेकार्थत्वे ऽपि राजसूयवाक्ये लाघवात् क्षत्रियार्थो ग्राह्य इति व्यवस्थापनं वस्तुतस्त्वस्य क्षत्रियार्थत्वमेवेति व्यवस्थापनं च तस्य क्षत्रियार्थत्वसद्भावाधीनं तत्तु स्मृत्याद्यनुगृहीतम्लेच्छप्रसिद्धिप्रसादलभ्यमिति तदुक्तिः । एवं च स्वरूपतस्तावन्न विशेषो ऽस्तीत्यस्य राजशब्दगोचरयोरार्यम्लेच्छप्रयोगयोर्गौगावीशब्दप्रयोगयोरिव स्वरूपतो वर्णविकाररूपः श्रुतिस्मृत्यनुग्रहसदसद्भावकृतो वा विशेषो नास्तीत्यर्थः । एवमिह म्लेच्छप्रसिद्धेरपभ्रंशत्वादिमूलकदौर्बल्यशङ्का निरस्ता । तदनन्तरवाक्येन यववराहादिशब्देष्वार्यप्रसिद्धेरेव वाक्यशेषानुग्रहः । अतस्तत्र

* तेष्वित्येतत्स्थाने म्लेच्छेष्विति २ पु॰ पा॰ ।

तदादर इति प्रकृताद्वधम्यमुक्तम् । नास्ति वेदानुग्रह इत्यनेन वाक्यशेषानुग्रहो नास्तीत्युक्तम् । यदि राजसूयवाक्यशेषानुग्रहः स्यादार्यप्रसिद्धेः तदा तद्वाक्यगतराजशब्दस्य वक्ष्यमाणरीत्या प्रवृत्तिनिमित्तगौरवं गौणवृत्त्यापत्तिं चाविगणय्य पालक एवार्थो ग्राह्यः स्यात् ।

गौण्या लक्षणया वापि वाक्यशेषेण वा पुनः ।
वेदो यमाश्रयत्यर्थं को नु तं प्रतिकूलयेत् ॥

इति न्यायात् । अतो वाक्यशेषाभाव उक्तः । विशेषमाहेत्यस्य राजसूयवाक्ये राजशब्दस्य क्षत्रियार्थग्रहणे प्रवृत्तिनिमित्तलाघवरूपं मुख्यवृत्तिलाभरूपं वा विशेषमाहेत्यर्थः । स तु विशेषः क्षत्रियप्रसिद्धेः स्मृत्यनुग्रहोऽन्यथा राजशब्दस्य क्षत्रिये शक्तिसद्भावव्यवस्थापनद्वारा सूचितः ।

४६३ । २४ **तद्व्यावर्तकत्वे वाक्यभेदप्रसङ्गादिति ।** विशिष्टोद्देशप्रयुक्तवाक्यभेदप्रसङ्गादित्यर्थः । ननु राजपदस्य कर्तृसमर्पकत्वे ऽपि वाक्यभेदस्तुल्यः । उत्पत्तिवाक्यविहितान् यागाननूद्यैकेन* फलसंबन्धस्य कर्तृसंबन्धस्य च विधानाऽयोगादिति चेत् । स्यादेवं वाक्यभेदः यदि कर्तृवत्फलमपि विधेयं स्यान्न त्वेवं तस्य कालवदनुपादेयत्वात् । अतः फलमनूद्य यागा विधेया इति तदङ्गाख्यातोपात्तसंख्यावच्छेद्यकर्तृविशेषरूपतया राजैव विशिष्टविधिना विधेयो न फलमिति न वाक्यभेदप्रसङ्गः । **न ह्यधिकारवाक्यान्तरगतमिति ।** तटस्थवाक्यविहितमङ्गम् अवेष्टिप्रयोगद्वयसाधारणं स्याद् राजा तु स्वाराज्याधिकारवाक्यश्रुत इति स्वाराज्यफलार्थायामेवावेष्टावङ्गं स्याद् न त्वन्नाद्यफलार्थायामपीत्यर्थः । तथाप्येतयेति प्रकृत†परामर्शि सर्वनामपदं यावद्विशिष्टावेष्टिः प्रकृता तावद्विशिष्टां तां परामृशेद् अतो ऽधिकारान्तरे ऽपि स्वाराज्यकामकर्तृका स्यादिति मन्दशङ्कामुद्भाव्य निराकरोति **यद्युच्येतेति ।**

४६४ । ११ **मध्ये निधानाऽसंभवादिति ।** मध्यदेशनिधानं हविषां यौगपद्ये एव संभवतीति भावः । ननु यत्रान्तरवेष्टौ सिद्धान्तिना तन्त्रभेदः समर्थनीयः न तत्र लिङ्गदर्शनमेकवचनं चास्ति यत्रास्ति बहिरवेष्टौ न तत्र तन्त्रभेदः सिषाधयिषित इति कथं लिङ्गदर्शनैकवचनाभ्यां पूर्वपक्षः । इत्थम् । उक्तहे-

* एकेन वाक्येनेति २ पु· पा· ।
† प्रकृतस्येति २ पु· पा· ।

तुभ्यां बहिरवेष्टौ तावदैकतन्त्र्यं निर्विवादम् । अतस्तत्र दक्षिणाशब्दो दक्षिणावयवपर इति मिलितैव दक्षिणा वाच्या । अन्यथा तत्र तन्त्रभेदप्रसङ्गात् । तथा चान्तरवेष्टावपि स दक्षिणाशब्दो दक्षिणावयवपरः स्यादिति दक्षिणाभेदाभेदादैकतन्त्र्यमिति । कथं तर्हि सिद्धान्तः । इत्थम् । वर्णोच्चयसंयुक्तो बहिरवेष्टिप्रयोगस्तावद्राजमात्रकर्तृकादन्तरवेष्टिप्रयोगाद् भिन्नः । तथा च तत्रागत्या दक्षिणाशब्दो दक्षिणावयवलक्षको जात इति प्रयोगान्तरे दक्षिणावाक्यान्वये ऽपि स लक्षको वक्तव्य इत्यत्र न मानमस्ति । ऐन्द्रमन्त्रस्याग्न्युपस्थाने लक्षकस्यैन्द्रे ऽपि कर्मणि विनियोगवशात् प्रयुज्यमानस्यैव मुख्यार्थेनोपपत्तेः । अतो दक्षिणाभेदादन्तरवेष्टौ तन्त्रभेद इति । इत्थं पूर्वपक्षसिद्धान्तप्रकारः सूत्रकृता क्रत्वर्थायामिति चेदिति सूत्रेणोद्घाटितः । तत्र क्रत्वर्थत्वं क्रत्वन्तर्भावमात्रं विवक्षितमिति न प्राधान्यविरोधः ।

न राजमात्रकर्तृकेति । राजमात्रकर्तृकत्वेन वर्णोच्चयसंयोगाभावा- ४६४ । १७
दन्तरिष्टौ न मध्यनिधानादिप्राप्तिरित्यर्थः । ततश्चैकतन्त्र्यहेत्वभावेन दक्षिणाशब्दस्य दक्षिणावयवे लक्षणाया अकल्पनीयतया दक्षिणाभेदात्तन्त्रभेद इति तात्पर्य्यम् । **विरुद्धत्वमाशङ्क्येति ।** अत्र नित्यः शब्दः कृतकत्वादितिवत् पक्षे साध्यसाधकत्वेन निर्दिष्टस्य हेतोः साध्याभावसाधकत्वरूपं विरुद्धहेत्वाभासत्वं नोच्यते अन्तरिष्टौ मध्यनिधानप्राप्त्यभावादिद्वारा तन्त्रभेदसाधकत्वेनाभिमतस्य वर्णोच्चयसंयोगाभावस्यैकतन्त्र्यसाधकत्वाभावात् किं तु बहिरिष्ट्या चैकतन्त्र्यसाधकत्वेनाभिमतो वर्णोच्चयसंयोगः । तस्यान्तरिष्टौ सत्त्वेन तस्यां साध्याभावरूपैकतन्त्र्यसिद्ध्यापत्तिरूपं विरुद्धत्वमुच्यते ते ऽग्नयो मनसैवाधीयन्त । यद्यपि मनश्चितादीनामग्न्याधानस्थण्डिलरूपेणोपास्यानामग्नीनामाधानं नास्ति किं तु तेषु निधेयस्याहवनीयस्य तथाप्यभेदोपचारादाहवनीयस्याधानं तेषामाधारत्वेनोपचरितम् ।

एष्वग्निषु ग्रहा अगृह्यन्तेति । एष्वग्निषु सत्स्वित्यर्थः । एवं ४६५ । ६
ग्रहग्रहणोक्ते यज्ञनिष्पत्त्यर्थे कृत्स्नस्य सन्निपत्योपकारकस्य मानसस्योक्तेश्च तन्निर्वर्त्यो मानसः क्रतुरपि विवक्षित इति द्रष्टव्यम् । न चैवं सति मनश्चितादीनां भाष्योक्तं स्वातन्त्र्यं विरुध्येतेति शङ्कनीयम् । क्रियानुप्रवेशाभावमात्रस्य स्वातन्त्र्योक्त्या विवक्षितत्वात् । अथाप्यग्निमाधिकरणसंग-

तिभाष्ये मनश्चितादीनां पुरुषार्थत्वमुक्तं कथमुपपादनीयमिति चेदित्थम् । इष्टकाचितोऽग्निरुत्तरवेदिवत्केवलक्रत्वर्थो न भवति किं तु पुरुषार्थोऽपि । पशुकामश्चिन्वीतेत्यपि श्रवणात् । अभागिप्रतिषेधवार्तिके तस्य वाक्यस्योदाहृतत्वात् । तथा च तेषामेकैक एव तावान् यावानसौ पूर्व इति विद्यामयाग्निषु क्रियामयाग्निकार्यातिदेशस्याग्निधारणरूपतत्कार्यविषयत्वस्यासंभवात् पशुरूपफलविषयतैव सिद्ध्यति क्रियामयाग्निर्यावत् पशुसाधकस्तावत्पशुसाधक एको ऽग्निरिति यावत्तावच्छब्दाञ्जस्याच्च । ग्रहणादिभिः सन्निपत्योपकारकैः स्तोत्रशस्त्रादिभिराराद् उपकारकैश्च निर्वर्त्यो मानसक्रमस्तु तदाश्रयत्वेनोपयुज्यते । क्रियामयाग्निवद्विद्यामयाग्नयो ऽपि क्रत्वाश्रिता एव । पशुफलसाधनानीत्येतन्मानसफलक्रत्वङ्गोपदेशसामर्थ्याज् ज्ञायते । न हि मानसानि ग्रहणादीनि विद्यामयाग्न्यङ्गानि तेषां तन्निर्वर्तकत्वाभावात् । नापि फलान्तरार्थानि । तेषां फलान्तरोपदेशाभावात् । न च सार्वत्रिकत्वे सर्वभूतकर्तृकत्वे विद्यामयाग्निचयनं विदुषः स्वापकाले ऽप्यनुवर्तमानं कथं तदीयविद्यामयक्रत्वाश्रितं स्याद् बहिःप्रयोगवर्तित्वादिति शङ्कनीयम् । सर्वाधिकसर्वभूतकर्तृक*मपि विद्यामयाग्निचयनमिदानीं मदनुष्ठीयमानक्रत्वाश्रितमिति भावनया तद्वाश्रितत्वोपपत्तेः । न हि भावनामात्रसाध्यं किन्नाम साधयितुमशक्यं तस्मात्पशुफलार्थतया पुरुषार्थत्वोक्तिरप्युपपद्यत इति न किं चिदवद्यम्† ॥

६६५ । १२ **एक आत्मनः शरीरे भावात् ॥ ५३ ॥**

यज्ञायुधीति । पैतृमेधिके कर्मणि यजमानशरीरे यज्ञपात्राणामासादनं विधाय पठ्यते स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं यातीति स्फ्यादीनि यज्ञसाधनानि यज्ञायुधानि स्फ्यश्च कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं चेत्याद्यनुक्रम्य एतानि वै दश यज्ञायुधानीति श्रवणात्तत्सादनेन तद्वान् यजमानः स एष इति निर्दिष्टः प्रत्यक्षदृश्यो देह एव तस्य तदानीमेव दहनेन भस्मीभवतः स्वर्गगमनं प्रत्यक्षविरुद्धम् । न च देहातिरिक्त आत्मा देहाभेदोपचारात् स एष इति निर्दिष्ट इति वक्तुं शक्यम् । देहातिरिक्तात्मनि प्रमाणाभावात् । अतस्तद्वाक्यं न प्रमाणमिति

* कर्तृकत्वमिति २ पु. पा. । † अत्र कुनचिद्ग्रंथे लिङ्गभूयस्त्वाधिकरणं पूर्णम् ।

प्राप्तौ तत्परिहारायात्रत्य एवार्थो भाष्यकृता तत्रापकृष्य वर्णित इत्यर्थः ।
अयमर्थो भट्टपादैरप्युक्तः ।

इत्याह नास्तिक्यनिराकरिष्णु-
रात्मास्तितां भाष्यकृदत्र युक्त्या ।
दृढत्वमेतद्विषयस्तु बोधः
प्रयाति वेदान्तनिषेवणेन ॥ इति ।

यद्यपीत्यादिग्रन्थस्य घटादिदृष्टान्तेन देहाचैतन्यानुमानप्रदर्शने तथापीत्यादिग्रन्थस्य तत्र बाधोन्नीतपक्षेतरोपाध्युद्भावने च तात्पर्यं दर्शयति **देहो न चेतन इति । तथाविधेति ।** घटदृष्टान्तोऽस्तीत्येतावता देहो न ४६५ । २३
चेतन इत्यनुमानं प्रवर्तेत तदा जलादिदृष्टान्तेन मदिराया मदकरत्वाभावानुमानमपि स्यादित्येवमाभाससमानयोगक्षेमत्वरूपं प्रतिकूलतर्कमध्याहेत्यर्थः । **तस्माद्देहधर्मैरिति ।** अहंप्रत्ययविषयस्यात्मनो देहधर्मैस्तादात्म्यानुभवादिति योजना । **यदा नित्यस्यात्मनश्चैतन्यमनित्यगुणविशेष इति ।** यद्यात्मा क्षणिकत्वादिरूपेणाऽनित्यः स्याद् यदि वा चैतन्यं शब्दवत्कादाचित्काभिव्यक्तिमत्त्वेन नित्यं स्यात्तदा नानैकान्त्यमित्याशङ्क्यात्मनि नित्यत्वं विशेषगुणे चानित्यत्वं विशेषणमुक्तम् । **ज्ञानं न देहविशेषगुण इति ।** न च सामान्यगुणत्वसिद्ध्याऽर्थान्तरम् । अष्टद्रव्यव्यावर्तकस्य तस्य विशेषगुणत्वनियमेन सामान्यगुणत्वाऽसम्भवस्योक्तत्वादिति भावः । **किं तु निमित्तत्वेनेति ।** तथा च जीवमृतावस्थयोर्यदसद्भावसद्भावाभ्यां प्राणचेष्टादितदभावौ स देहाधिष्ठाताऽऽत्मैव सिद्ध्येदिति भावः । नन्वदृष्टसद्भावासद्भावाभ्यां जीवमृतावस्थयोः प्राणचेष्टाभावौ स्याताम् अतो निमित्तत्वेनात्मा न कल्पनीय इत्याशङ्कानिराकरणार्थं तस्यापीति टीकाग्रन्थमुपादाय व्याचष्टे **अदृष्टमपि विशेषगुण इति । गुणत्वे सतीति ।** गुणत्वविशिष्टं यद्देवदत्तेतरप्रत्यक्षविषयत्वं तद्रहितत्वादित्यर्थः । **देहगतगुरुत्वादाविति ।** तत्र विशेष्याभावेन विशिष्टाभावरूपहेतुसत्त्वादनैकान्त्यपरिहाराय तत्रापि साध्यं सम्पादयितुं विशेषग्रहणमित्यर्थः । **इच्छाव्यतिरिक्तेति ।** देवदत्तस्य स्वकीयेच्छादिषु न परप्रत्यक्षं परकीयेच्छादिषु न स्वप्रत्यक्षमित्येवमिच्छादिमात्र एव चार्वाकाणां स्वपरप्रत्यक्षाभावप्रसिद्धिः नान्यत्रान्यस्य स्वमात्रप्रत्यक्षस्य

परमाणुप्रत्यक्षस्य चाभावाद् उभयोरप्यप्रत्यक्षस्यातीन्द्रियस्य तन्मते अभा-
। १७ वाच्चेति भावः । **दृष्टान्ताभावादिति** । नन्वस्ति व्यतिरेकदृष्टान्तः ये
देहधर्मास्ते स्वरूपप्रत्यक्षा इति हि देहरूपादिषु दृश्यते टीकायामपि व्यति-
रेकदृष्टान्तो दर्शितः हेतौ परग्रहणेनान्वयदृष्टान्तसद्भावो ऽपि सूचितः । तेन
हीच्छादिमात्रं न पक्षः किं तु कस्य चिदेवेच्छादय इति दर्शितम् । अन्यथा
सर्वस्यापीच्छाश्रयस्य सत्त्वेन परशब्दार्थत्वाभावात् । एवं च देवदत्तस्येच्छा-
दयो न देवदत्तदेहविशेषगुणाः देवदत्ततदितरप्रत्यक्षत्वाभावाद् इतरेच्छादि-
वदिति टीकोक्तहेतुके अनुमाने न का चिदनुपपत्तिरिति चेत्सत्यम् । एवमपि
साध्यं विशेषणीयमासीदिति यथाश्रुतग्रन्थो न घटत इत्याचार्योक्तिर्युक्तैव ।
इयांस्तु विशेषः । आचार्योपन्यस्ते हेतौ टीकोक्तस्वविशेषणमपहाय गुणत्ववि-
शेषणं कृतम् । उभयमपि तत्तदभिमतान्वयदृष्टान्ते साधनवैकल्यपरिहारार्थमि-
त्यत्र न विशेषः । **अयावद्भूतेति** । यावन्ति भूतानि तावत्स्वसदपीत्यर्थः
न तु यावत्स्वाश्रयभूतकालवर्त्यपीत्यर्थः । अनुक्तानुभाषणापातात् । यद्यपि
समस्तव्यस्तेष्वित्यादिपूर्वपक्षटीकाग्रन्थे भूतव्यक्त्यन्तरेषु चैतन्याऽसत्त्वस्यैवो-
क्तत्वाद् इहापि देहाकारपरिणतेषु स्यादित्याचार्योक्त्या मदशक्तेर्मदिरावयवे-
ष्वसत्त्वमङ्गीकृत्य मदशक्तिदृष्टान्तवैषम्यप्रदर्शकेन अपि च मदशक्तिरित्याद्य-
ग्रिमटीकाग्रन्थेन च भूतव्यक्त्यन्तरेष्वसदपीत्यर्थस्य स्फुटीकरणाच्च । **यावद्दे-
हभावित्वानुमानवदिति** । यथा विशेषगुणत्वेन हेतुना चैतन्यस्य याव-
द्देहकालभावित्वानुमानं तथा यावद्भूतवर्तित्वानुमानस्यापि प्रवृत्तेरित्यर्थः ।
ननु पूर्वं तथानुमानं नोपन्यस्तम् इहापि यावद्भूतव्यक्तिभावित्वानुमानं यद्य-
पीत्यादिटीकाग्रन्थेन नोपन्यस्यते अनुमानयोर्बाधितविषयत्वात् किं तु पूर्वं
चैतन्यं यदि देहविशेषगुणः स्याद् यावद्देहकालवर्ती स्यादिति तर्क उप-
न्यस्तः । इहापि यदि देहविशेषगुणः स्याद् यावद्भूतव्यक्त्यनुवर्तेतेति तर्क
उपन्यस्यते । यावद्भूतमनुवर्तेतेति हि टीकाग्रन्थः । तदनुसारेण यद्यपीत्यस्य
यदीत्यर्थग्रहणमुचितम् । एवं च निराकृतं विशेषगुणत्वमभ्युपेत्य यद्यपीत्या-
दिटीकाग्रन्थप्रवृत्तिरिति तत्तात्पर्यकथनमप्ययुक्तम् । हेतुत्वे खलु सिद्ध्यपेक्षा
न तु यदि वह्निर्न स्यादितिवदापादकत्वे । सत्यम् । यद्यपीत्यस्य स्वारस्य-
मनुरुध्याचार्यैः प्रोक्ता व्याख्यानान्तरमङ्गीकृतमित्यदोषः । **मात्रयापि**

मदजनकत्वाऽदर्शनादिति । यद्यपि चूर्णे ऽपि योग्यतारूपं मदजनकत्व-
मस्त्येव केवलं तु चूर्णं सहकारिवैकल्यान्मदं न जनयतीति वक्तुं शक्यं
तथापि चूर्णं मदं न जनयति किं तु चर्वणादिसाध्यस्ताम्बूलाख्यः पूगादि-
षयपरिणामविशेषः । न चैतावता स्वतो मदहानिकरे चूर्णे ऽपि मदजनकत्वं
कल्पनीयमिति तात्पर्यम् । **वित्तेः क्रमवद्व्यापारा*ऽयोगादिति ।** अधि- ४१० । १०
करणप्रतियोगिग्रहणपूर्वकं खलु भेदग्रहणम् । अतः प्रथमं तदुभयग्रहणं पश्चाद्
भेदग्रहणमिति प्रत्यक्षस्य विरम्य व्यापारो न सम्भवतीत्यर्थः । **प्रतियोगि-
भेदसिद्ध्यसिद्ध्योरिति ।** भेदग्रहणं प्रतियोगिग्रहणापेक्षं प्रतियोगित्वेन
प्रतियोगिग्रहणं च भेदग्रहणापेक्षमिति परस्पराश्रयमित्यर्थः । एतेन प्रतियो-
गिविशिष्टभेदप्रत्यक्षे विरम्यव्यापारदोषो न प्रसज्यते युगपदेव प्रतियोग्यधि-
करणविशिष्टभेदविषयत्वस्वीकारात् । प्रतियोगिविषयस्याधिकरणविषयस्य
च विशेषणज्ञानतया कारणस्य ज्ञानान्तरत्वस्वीकारादित्यपि शङ्का निरस्ता ।
तस्य ज्ञानस्य भेदनिरूप्यप्रतियोगित्वविषयताया अपि वक्तव्यत्वेन परस्प-
राश्रयाऽनुद्धारात्† ॥

अङ्गावबन्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५ ॥ ,, । २५

स्वरादीत्यादिशब्देन वर्णभेदश्चित्याग्न्यादिप्रकारभेदश्च गृह्यते ।
यद्यप्योङ्कारावयव उद्गीथ उपास्यः तत्र स्वरवर्णभेदो नास्ति तथापि स्वर-
भेदः सम्भावितः उद्गीथस्यावयव उपास्य इति विधौ कस्योद्गीथस्यावयव
इति विशेषाकाङ्क्षायामुद्गीथे सामेत्यादिविषयोपासनायां च स्वरवर्णभयभेदः
सम्भवति । पूर्वाधिकरणस्य प्रासङ्गिकत्वाद्व्यवहिताधिकरणेन सङ्गतिर्वक्तव्ये-
त्यभिप्रेत्य तामपि दर्शयति **अथ वेति ।** का **श्रुतिरस्माभिः पीड्यतइति ।**
सङ्कोचलक्षणं तु पीडनं सन्निधिवशात्सह्यमित्यत्रापि शुक्लं पटमानयेत्ययमेव
दृष्टान्तः । दृष्टान्तवैषम्यं विवृण्वन् सिद्धान्तग्रन्थमवतारयति **दृष्टान्तइति ।**
मा बाधीत्यत्र लुङन्तमाख्यातं माङ्योगादडागमाभावः । **एकत्र होतव्या
इति ।** पञ्च प्रयाजान् प्राचो यजतीति देशभेदविधानेन विकल्पितमिदं
देशैक्ये विधानं छागस्य वपाया इत्याद्यध्वर्युप्रैषस्यार्थमाह **छागादेरिति ।**

* क्रमव्यापारेति १ पु॰ पा॰ ।
† अत्र त्रिंशम् ऐकात्म्याधिकरणं पूर्णम् ।

आदिशब्दो वैकृतपश्वन्तरप्रैषगतपशुजात्यन्तरसंग्रहार्थः । **स जनास इन्द्र इति शेष इति** । अनेन सजनपदवत्सूक्तं हि सजनीयम् । यो जात इति सूक्तं कथं सजनीयमित्याकाङ्क्षायां मन्त्रान्तररूपशेषदर्शनेनेदं सूक्तं सजनीयं भवतीत्युपपादितम् । अस्मिन् सूक्ते अन्त्यामृचं विना प्रत्यृचं सजनास इन्द्र इति मन्त्रान्ते इदं सजनीयं भवतीति भावः* ॥

४७२ । २१ **भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयति ॥ ५७ ॥**

वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिन् तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यद् द्वादशकपालो जगत्यैव तस्मिन् पशून् दधाति यस्मिन् जातएतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवतीति समाम्नायः । तमर्थतः सङ्क्षिप्य दर्शयति **वैश्वानरमिति** । अत्र कपालानां प्राप्ता अष्टसंख्यादिरूपा गुणा विधीयन्ते उत प्राप्ताभिस्ताभिरेकदेशद्वारा विधेया द्वादशसंख्या स्तूयतइति संशये महासंख्यायामवान्तरसंख्यान्तर्भावस्य शतेन पञ्चाशदनुमानादिना सुप्रसिद्धत्वेन द्वादशसंख्याविधानतोऽष्टत्वादीनां प्राप्तेः स्तुत्यर्थतैव युक्तेति कथं पूर्वपक्ष इत्याशङ्क्य परिहरति **यद्यपीति** ।

४७३ । ८ **तथापि न परिच्छेदकत्वमिति** । वस्तुतः सन्त्यप्यष्टादिसंख्या द्वादशसंख्यासंख्येयानां कपालानां न परिच्छेदिका न विशेषणानि सम्भवद्विरोधिव्यावर्तकं च नीलमुत्पलमित्यादौ विशेषणं भवति न च द्वादशस्वष्टत्वादयः पर्य्याप्तवृत्तयः संभवन्ति न वा विरोधिसंख्याव्यावर्तिका अतः परिच्छेदकत्वेन तासां न प्राप्तिरित्यर्थः । ननु मा भूत्परिच्छेदकत्वेन प्राप्तिः । अन्तर्भावमात्रेण प्राप्तिरस्ति द्वादशसु निष्कृष्टानां केषां चित्परिच्छेदकत्वेनापि प्राप्तिरस्ति यथा शतं ब्राह्मणाः सोमान् भक्षयन्तीत्यत्र शतमध्ये निष्कृष्टानां केषां चित्परिच्छेदकत्वेन दशसंख्यायाः प्राप्तिः अत एव दश दशैकैकं चमसमनुसर्पन्तीति तदनुवाद इति चेदुच्यते । यथा कथं चित्प्राप्तिमात्रमिह न पर्याप्तं किं तु कपालसाध्यपुरोडाशद्रव्यसंस्कारार्थतया तत्परिच्छेदकत्वेन प्राप्तिः । तद्धितार्थोत्तरपदसमाहारे चेति सूत्रेण

* अत्रैकत्रिंशम् अङ्गावबद्धाधिकरणं पूर्णम् ।

तद्धितार्थे संस्कृते विषयभूते अष्टादिशब्दानां कपालशब्दस्य च समासे पश्चादष्टकपालप्रातिपदिकादष्टसु कपालेषु संस्कृतमित्यर्थे ऽण्प्रत्यये तस्य द्विगोर्लुगनपत्ये इति लुकि सत्यष्टाकपालादिशब्दनिष्पत्तेः । न च द्वादशसंख्यावदष्टत्वादिसंख्यानां पुरोडाशसंस्काराङ्गतया प्राप्तिर्यदष्टाकपालो भवतीत्यादिवाक्यप्रवृत्तेः प्रागस्ति । तस्मात्तेष्वष्टत्वादिसंख्यानां संस्काराङ्गतया विधिरिति गुणविधिपक्ष एवाश्रयणीयः । न चोत्पत्तिशिष्टद्वादशसंख्याविरोधात् तद्विरुद्धाष्टत्वादिसंख्याविधिर्न घटतइति शङ्कनीयम् । एकं हीदं वाक्यं वैश्वानरं द्वादशकपालमित्यादि पशुमान् भवतीत्यन्तम् । न चैकस्मिन्वाक्ये विधेयेषु संख्याविशेषेषूत्पत्त्युत्पन्नशिष्टविवेको ऽस्ति । तस्मादेकेन वाक्येन विहितानां विरुद्धसंख्याविशेषाणां वैकल्पिकाङ्गत्वेन विधिषु न का चिदनुपपत्तिरिति भावः ।

उत्पत्तिशिष्टेति । उपक्रमोपसंहारैकरूप्येणैकवाक्यत्वे ऽपि वैश्वान- ४७३ । १०
रमष्टाकपालं नवकपालं दशकपालमेकादशकपालं द्वादशकपालं निर्वपेदित्याम्नानाभावाद् द्वादशकपालं निर्वपेदित्येतावता विधिवाक्यसमाप्तेः द्वादशसंख्यैवोत्पत्तिशिष्टा न तु प्रथमान्ताष्टाकपालादिशब्दोक्ता अष्टत्वादिसंख्या इति तेषां विध्यन्तरसमर्पितानामन्वयो वाच्यः । न तु अयं संभवति । उत्पत्तिशिष्टगुणाविरोधादित्यर्थः । विध्यन्तरसमाश्रयणे विध्यर्थवादभावेनान्वय इवोपक्रमोपसंहारैकरूप्यावगतम् एकवाक्यत्वं न संरचितं स्यादित्याह **अपि चेति । वस्तुतः प्राप्तानीति ।** संज्ञामात्रेण प्राप्तानीत्यर्थः । एवं चाष्टाकपालादिशब्दानाम् अष्टत्वादिसंख्यापरिच्छिन्नकपालसंस्कृतवाचिना द्वादशकपालसंस्कृतपुरोडाशावयवेष्वष्टकपालादिस्थितेषु लक्षणाया वृत्तिरेष्टव्येति भावः । **स्तुत्यर्थमिति ।** गजाश्वादिस्तुतिद्वारा सेनाया इव नेत्रादिस्तुतिद्वारा शरीरस्येव चाष्टत्वादिसंख्यास्तुत्या तत्संख्येयकपालनिष्ठपुरोडाशावयवस्तुत्या च द्वादशसंख्यायास्तत्संख्येयकपालनिष्ठपुरोडाशावयविनश्च स्तुत्यर्थमित्यर्थः । किं च यद्यष्टाकपालादिषु विधयः श्रूयेरन् तदोपक्रमोपसंहारावगतमेकवाक्यत्वमङ्गप्रधानविधिरूपानेकावान्तरवाक्यघटितमहावाक्यैकरूपतया कथं चित्समर्थ्येत न तु तदस्तीत्याह **वर्तमानापदेशानामिति । उपक्रमोपसंहारयोरेकविद्याविषयत्वेनेति ।** ननु भूमविद्याप्रकरणोपक्रमोपसंहारयोरात्मवि-

द्याविषयत्वे ऽपि मध्ये नामाद्युपासनतत्फलश्रवणात् तद्विषयो ऽप्यङ्गीकृता:* तथेह किं न स्याद् वैषम्यात् । इह हि व्यस्तोपासनासु निन्दा श्रूयते न चात्र्यसमस्तोपासना: पुरुषविषयास्तन्निन्दा: । अविज्ञातसमस्तोपासनानामपि प्राचीनशालादीनां व्यस्तोपासनाभिर्निन्दितत्वात् । किं च । मूर्द्धा त्वेष चात्मेति होवाचेत्यादिवाक्येषु द्युप्रभृतीनां स्वतन्त्रोपास्यत्वव्यवच्छेद: कृत: । एते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वांसोऽन्नमत्स्येतीवकारेण व्यस्तोपासनानां भ्रममूलत्वमुद्‌घाटितम् । एवं वैषम्यान्नात्र भूमविद्यान्यायशङ्कावकाश:† ॥

४७४ । ८ नानाशब्दादिभेदात् ॥ ५८ ॥

अपूर्वसाधनमिति । अपूर्वसाधनभूता या पुरुषप्रवृत्ति: सा भावनेत्यर्थ:‡ । तच हेतुर्**गुणानां गुणिनश्च ब्रह्मण: सिद्धत्वादिति**§ । उपासनानां स्वतो यागदानहोमवद् भेदाभावाद् वेद्यस्य ब्रह्मण एकत्वेन विषयीकृतस्यापि भेदस्याभावाद् ब्रह्मगुणानां सिद्धतया सिद्धब्रह्मविशेषणतया च स्वत: परतो वा कार्यत्वाभानेन कार्यविशेषणवाजिनादिगुणवद्भेदकत्वाभावाच्च न विद्याभेद इत्यर्थ: । एवं च यथा सत्यविद्यायां सत्यस्य ब्रह्मणो वेद्यस्यैकस्याक्ष्यादित्यस्थानयोरहरहर्नामभेदेन पृथगनुचिन्तने ऽप्येकविद्यात्वं यथा वा संवर्गविद्यायां वायुत्वस्य वेद्यस्यैकस्य बाह्याध्यात्मिकभेदेन वागाद्यग्न्यादिसंहर्तृत्वगुणभेदेन च पृथगनुचिन्तने ऽप्येकविद्यात्वं तथोपकोसलविद्यान्तरादित्यविद्यादहरविद्यादीनां स्थानभेदेन शाण्डिल्यविद्यावैश्वानरविद्यादीनामणुत्वमहत्त्वादिगुणभेदेनान्यासामपि विद्यानां तत्तत्प्रकरणाम्नातगुणविशेषैश्च पृथगनुचिन्तने ऽप्येकविद्यात्वमिति पूर्वपक्षाशय: । किमुपासनावाक्येषूपासनाभावनारूपकार्यप्रतिपादनं नास्तीति गुणभेदेन तद्भेदो‖ नास्तीत्युच्यते अथ वा गुणानां कार्यविशेषणत्वाऽभावेनाकार्यतया तद्भेदाद्भेदो नास्तीति उत तेषां कार्यान्वये ऽपि गुणिन एकत्वेन गुणभेदान्न भेद इति ।

---

* तद्विषययोरप्यङ्गीकृता इति ५ पु· पा· ।

† अत्र द्वात्रिंशं भूमज्यायस्त्वाधिकरणं पूर्णम् ।

‡ सा भावनेत्यादिवाक्येषु द्युप्रभतीत्यर्थ: । इति पाठ: २ पु· ।

§ सिद्धत्वमितीति २ पु· पा· । ‖ गुणभेदात्तद्भेदइति २ पु· पा· ।

भाद्य इत्याह यदि वस्तुनिष्ठानीति। उपासनावाक्यानां भावनारूपकार्यपरत्वाभावे प्रवर्तकविध्यभावादेकविद्यात्वपक्षे ऽपि तदनुष्ठानं न स्यादिति भावः । द्वितीयपक्षमाशङ्क्य परिहरतीत्यवतारयति उपासनाप्रवृत्तेरिति । ब्रह्मविशेषणानामपि गुणानामरुणैकहायनीन्यायादुपासनाभावनारूपकार्यान्वयो ऽस्तीति भावः । तृतीयमाशङ्क्य निराकरोतीत्यवतारयति ननु सत्यकामत्वादिगुणानामिति । दशद्रव्याणामिति । दशसंख्यायुक्तद्रव्याणामिति मध्यमपदलोपी समासः । दशद्रव्याणि पयोदध्याज्यतण्डुलौदनयवागूमांससोमजलतैलानि* ॥

विकल्पो विशिष्टफलत्वात् ॥ ५९ ॥ ४१५ । ९

अहंग्रहोपास्यदेवो भूत्वेति । त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसीत्यभेदध्यानदार्ढ्येन तज्जन्यसाक्षात्कारो ऽप्युपास्यदेवोहमस्मीति जायते तं लब्ध्वैवोपास्यदेवतासायुज्यं प्राप्नोतीत्यर्थः† ॥

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ६० ॥ ‡

अङ्गेषु यथाश्रयभावः ॥ ६१ ॥ ,, । १९

अविधेयत्वात्कामनाया इति । अनेन ग्रन्थेन प्रयोगविध्यचोद्यतया कामनानियमस्यासंभव उक्तः न तु सर्वथा तदसंभवः । तद्यथा ऽऽम्रे फलार्थे निमित्तेच्छया गन्ध इत्यनूत्पद्यते एवं धर्मे चर्यमाणम् अर्था अनूत्पद्यन्ते इत्यापस्तम्बोक्तन्यायात् स्वर्गाद्यर्थमनुष्ठीयमानेषु क्रतुषु तत्प्रयोगमध्ये समुच्चित्यानुष्ठेयैः कैश्चन पदार्थैरयत्नेन नान्तरीयकतया सिद्धत्सु फलेषु कामबहुलानां कर्मणां स्वत एव कामनाऽसंभवात् । अन्यथा प्रस्तरप्रहरणप्रभृत्यङ्गफलेषु का गतिः । अपापश्लोकश्रवणाद्यार्थवादिकमेवाङ्गफलं न विवक्षितम् । आयुराशास्तइत्यादिमन्त्रकरणे प्रकाश्यमायुरादिरूपं प्रस्तरप्रहरणप्रभृत्यङ्गफलं तु विवक्षितमेव । करणमन्त्रस्य पदैः सर्वैरप्यनुष्ठेयस्यैव

---

* अत्र त्रयस्त्रिंशं शब्दादिभेदाधिकरणं पूर्णम् ।

† अत्र चतुस्त्रिंशं विकल्पाधिकरणं पूर्णम् ।

‡ पञ्चत्रिंशं काम्याधिकरणमेतद्विशेषव्याख्यानानपेक्षणाद् न व्याख्यातम् ।

§ इदं सूत्रं परिमलपुस्तकेषु न प्रतीकतो गृहीतं दृश्यते पूर्वसूत्रं काम्यास्तु इत्येतावत्प्रतीकरूपेण गृहीतं दृश्यते तथापि कल्पतरुपुस्तकेषु एतत्सूत्रस्य प्रतीकतो ग्रहणादस्य चाधिकरणत्वेन ग्रन्थकारशैल्यनुसारेणात्र प्रदर्शनं कृतम् ।

साक्षात्सम्बन्धिद्रव्यप्रकाश्यत्वनियमेन प्रस्तरयागकरणमन्त्रप्रकाश्यानामायुरादीनां तत्फलतयैव तत्सम्बन्धस्य निर्वहणीयत्वात् । एवमेव नवमाध्याये स्थापितत्वात् ।

ननु सिद्धान्तभाष्यव्याख्यानानन्तरं समाहारादिति पूर्वपक्षसूत्रभाष्यं
४११ । ८ व्याख्यायते । इदं व्यत्यस्तमित्याशङ्क्याह **एवमधिकरणस्यार्थ*मुक्त्वेति ।** बुद्धिसौकर्यार्थमधिकरणशरीरं सङ्कल्पितम् इदानीं पूर्वपक्षभाष्यव्याख्येयांशमुपादाय व्याख्यायतइत्यर्थः । तत्र यद्याश्रयतन्त्रत्वादुपासनानां पुरुषार्थानामपि समुच्चयः तदा गोदोहनादीनामपि स्याद् अविशेषादित्याशङ्क्य ततो विशेषप्रदर्शनार्थं सूत्रं शिष्टेश्चेति । गोदोहनादयः चमसादिस्थानापन्नतयोपदिश्यन्ते तेषां समुच्चये चमसादीनां निवृत्त्या चमसेनापः प्रणयेदित्यादिशास्त्राणामप्रामाण्यं स्यादिति गोदोहनादीनां न समुच्चयः । नैवमुपासनानां किंचित्स्थानापत्त्योपदेशो ऽस्ति किं तु तत्स्थानापत्तिराहित्येनोद्गीथाद्युपदेशाविशिष्ट एव तेषामुपदेश इति । एवमस्य सूत्रस्यार्थो भाष्यएव स्पष्ट इत्यर्थः । **समुच्चयलिङ्गदर्शनत्वघटकं भाष्यमिति ।** छान्दोग्ये य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इत्युद्गातुः प्रणवोद्गीथैक्योपासनाविधेरर्थवादो होतृषदनादित्यादिः । उद्गातृवेदविहितप्रणवोद्गीथैकत्वविज्ञानस्य ऋग्वेदोदितप्रणवसंबन्धनियमो दृष्टः । अयं वेदान्तरोदितोपासनासंबन्धनियमोपि तस्यास्तीत्यत्र लिङ्गम् । वेदान्तरोदितप्रणवरूपपदार्थसंबन्धेन सह वेदान्तरोदिततया सादृश्यात् सादृश्यमवलम्ब्याप्यस्ति लिङ्गोपन्यासः । यथा विधिश्चानर्थकः क्व चित्तस्मात्स्तुतिः प्रतीयेत तत्सामान्यादितरेषु तथात्व†मिति जैमिनिसूत्रे । तत्र द्यौदुम्बरो यूपो भवतीत्यृग्वा उदुम्बर ऊर्क् पशव ऊर्जैवास्मादूर्जं पशूनाप्नोत्यूर्जोवरुद्ध्या इत्यत्रोर्गवरोधशब्दोक्तान्नप्राप्तिरूपफलाय यूपाश्रय उदुम्बरतागुणो विधीयतइति प्राप्तस्य वैकृतसोमापौष्णपशुप्रकरणे चोदकप्राप्यस्य यूपस्याप्रकृतत्वेन प्रकरणादाश्रयसंबन्धाऽलाभाद् वाक्येनैवाश्रयसंबन्धस्य फलसंबन्धस्य च बोधने वाक्यभेदप्रसङ्गाच्च गुणफलविधिर्न संभवतीत्येवंजातीयका अर्थवादा इति सिद्धान्तं कृत्वा क्व चिदप्सुयोनिर्वा अश्व इत्यादावप्सुयोनिरश्वः कर्तव्य इत्येवमादिविधिरशक्यत्वान्न संभवति ।

---

* अधिकरणसारार्थमिति ५ पु. पा. । † जै. सू. अ. १ पा. २ सू. २३ ।

वायुर्वै क्षेपिष्ठा देवतेत्यादौ वायुः क्षेपिष्ठः कार्य इत्यादिविधिः सिद्धत्वान्न
संभवतीति तत्र स्तुत्यर्थत्वमेव वाच्यं तत्सामान्याद्विध्यसंभवरूपतत्सादृ-
श्यादितरेष्वौदुम्बरादिष्वपि तथात्वमिति सादृश्यमवलम्ब्य स्तुत्यर्थत्वमुपपा-
दितम् । एवमिहापि योजनीयम् । एवं समाहारादिति सूत्रे समाहारशब्दोक्त-
दोषसमाधानं हेतुत्वेन न विवक्षितं किं त्वानन्दमयो ऽभ्यासादित्यत्रान-
न्दमयशब्दइव समाहारशब्दः स्थलप्रदर्शनार्थ इति द्रष्टव्यम् ।

आश्रयसाधारण्यइति । अत्रेदं वक्तव्यम् । यदोङ्कारस्याश्रयस्य ४११ । १८
वेदत्रये साधारण्येन तदाश्रितोपासनायास्तथात्वमुपासनानां समुच्चये लिङ्गमुक्तं
भाष्ये तदयुक्तम् । ओमित्येतदक्षरमुद्गीथमुपासीतेत्यत्र स वेदव्यापिन ओङ्कार-
मात्रस्योपासनाश्रयत्वं मा भूदित्येतदर्थमुद्गीथावयवत्वेन विशेषणमिति व्या-
प्तेश्च समञ्जसमित्यधिकरणे निरूपितत्वेनोपासनाश्रयत्वेन प्रकृतस्योङ्कारस्य*
सर्ववेदसाधारण्याभावात् तेनेयं त्रयी विद्येति प्रकृतपरामर्शितच्छब्देनोपासना-
श्रयत्वेन प्रकृतस्योङ्कारस्य परामर्श इति तस्य वेदत्रयसाधारण्यसिद्धौ तद्द्वारा
तदनुत्ताक्षरं यद्धि किं चिदनुजानात्योमित्येव तदाहेति प्राचीनवाक्यगतत-
च्छब्दस्याप्युपासनाश्रयोङ्कारपरामर्शित्वेनोपासनानां लोकसाधारण्यस्यापि सि-
द्धिप्रसङ्गात् कथं विद्याश्रयसाधारण्येनोपासनानां वेदत्रयसाधारण्यसिद्धावपि
तेन सर्वेषु क्रतुप्रयोगेषु नियमेनानुष्ठेयत्वलक्षणस्य समुच्चयस्यासिद्धेश्च । यच्चा-
न्वयस्य व्यतिरेकेण दृढीकरणमाचार्यैरुक्तं तदप्ययुक्तम् । वेदत्रयसाधारण्य-
रूपस्यान्वयस्य तद्भिलक्षणेन आश्रयस्य सर्वप्रयोगसाधारण्याभावे तदाश्रित-
स्योपासनस्य सर्वप्रयोगसाधारण्याभाव इति व्यतिरेकेण वह्न्यभावे धूमाभाव
इति व्यतिरेकेणेव दृढीकरणा ऽसिद्धेः । आश्रयतन्त्रत्वे सत्यप्याश्रयस्य सर्व-
प्रयोगसाधारण्याभावात् तदाश्रितोपासनानामयोगाच्च । तस्माद् गुणसाधार-
ण्यसूत्रस्य वृत्तिकारकृतव्याख्यानमुपहासार्थमनूद्य भाष्यकारैरथ वेत्यादिना
स्वयं व्याख्यानान्तरं कृतमिति तात्पर्यकथनं युक्तम् ।

चमसं चोन्नीयेति । यद्यपि ग्रहणस्तोत्रशस्त्राणामिव सहभावग्रह- ,, । २०
णस्याभावः समुच्चयाभावे न हेतुः तदभावे ऽपि प्रयाजादीनां तद्धर्माणां च

---

* उपासनाश्रयोङ्कारस्येति २ पु॰ पा॰ ।

समुच्चयदर्शनात्तथापि तद्वदिह पुरुषार्थानां प्रयोगवचनपरिहारासंभवात् सह-भावश्रुतिरस्तीति चेत् तद्वशात्समुच्चयसिद्धिरन्वेषणीया सा ऽपि नास्तीति न समुच्चय इति भावः । छान्दोग्ये यदि ऋक्तो रिष्येद्* भूः स्वाहेति गार्हपत्ये जुहुयाद् यदि यजुष्टो रिष्येद् भुवः स्वाहेति दक्षिणाग्नौ जुहुयाद् यदि सामतो रिष्येत् स्वः स्वाहेत्याहवनीये जुहुयादित्युपदिश्याम्नायते एवं विद्व स इत्यादि । तत्र यज्ञस्य रक्षाङ्गवैकल्यप्रयुक्तदोषपरिहारः यजमानस्य रक्षाफलवत्कर्मणा कर्मफलाऽप्रतिबन्धः ऋत्विजां रक्षामन्त्रोच्चारणेषु स्वरादिभ्रंशप्रयुक्तदोषपरिहारः ।

अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनस्तु ऋत्विजः ।
आत्मानं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः ॥

इति मन्त्रहीने† ऋत्विजां दोषस्मरणात् । एवं च यद्युद्गीथाद्युपासना नित्याः स्युः तदा तत्फलतया कर्मफलाप्रतिबन्धसिद्धेः प्रणवोद्गीथैकत्वोपासनाफलतयोद्गातुः स्वरभ्रंशादिदोषपरिहारादिसिद्धेश्च यजमानस्य सर्वेषामृत्विजां च ब्रह्मणा परिपाल्यत्वं नोच्येत तदुच्यमानमुपासनानामनित्यत्वं ज्ञापयतीति लिङ्गदर्शनमुक्तम् । तत्रोदाहृतश्रुतावेवंविच्छब्दः प्रकृतप्रायश्चित्ताभिज्ञपर इत्यर्थः‡ ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ वेदान्तकल्पतरुपरिमले तृतीयाध्यायस्य तृतीयः पादः ॥

---

* यद्वृक्तो रिष्येदिति५ पु. पा. । † मन्त्रज्ञानाविति २ पु. पा. ।
‡ अत्र षट्त्रिंशं यथाश्रयभावाधिकरणं पूर्णम् ।

अथ तृतीयाध्यायस्य चतुर्थः पादः ।

पुरुषार्थो ऽतःशब्दादिति बादरायणः ॥ १ ॥ ४७८ । १

पूर्वपादेनात्रसरसंगतिं दर्शयन् पादार्थमाह **अपूर्वमिति ।** ब्रह्मवि-
द्यानां स्वातन्त्र्येण फलसाधनत्वनिरूपणं तदितिकर्त्तव्यतानिरूपणं च
न पादार्थः अर्थभेदेन पादभेदप्रसङ्गात् किं तु तदितिकर्त्तव्यतानिरूपणमेव
फलकरणस्य सत इतिकर्त्तव्यताकाङ्क्षेति तदाकाङ्क्षासिद्ध्यर्थमुपोद्घातत्वेन
प्रथमाधिकरणे तासां स्वातन्त्र्येण फलकरणत्वस्य निरूपणमिति द्रष्टव्यम् ।
कर्म्मानपेक्षाणामिति । स्वयं कर्म्माङ्गभावेन कर्मापेक्षारहितानां स्वयमेव
फलकरणानामित्यर्थः । **का नामेतिकर्त्तव्यतेति ।** उपकोसलविद्यादिषु
कासु चित्सगुणविद्याग्निविद्यादावाराद्उपकारकाङ्गोपदेशे सत्यपि निर्गुणवि-
द्याया अविद्यानिवृत्तिरूपदृष्टफलोत्पादने आरादुपकारकाऽनपेक्षायामपि
सर्वासां विद्यानां चित्तशुद्धिचित्तैकाग्र्यद्वारा सन्निपत्योपकारकेषु ज्ञेयोपास्यब्र-
ह्मस्वरूपज्ञानार्थं प्रमाणाभावेन च सन्निपातिष्वाकाङ्क्षा ऽस्तीति तात्पर्यार्थः* ।
ननु फलभेदाभेदावन्तरेणेति । यद्यपि फलाऽभेदे ऽपि गुणभेदेन ब्रह्मलो-
कप्राप्तिफलकविद्यानां भेदो भवति विद्याभेदे ऽपि हृदयायतनत्वादिना सगुण-
निर्गुणविद्ययोः सत्यकामत्वादिगुणोपसंहारो भवति विद्यैक्ये ऽपि सत्यविद्या-
यामक्ष्यादित्यस्थानभेदेनाहमहर्नामकत्वलक्षणगुणानुपसंहारो भवति तथापि
प्रायोऽभिप्रायेणैतदुक्तम् । **न प्रकरणादिति ।** प्रकरणादात्मज्ञानं कर्माङ्गं न
भवति प्रकरणस्याभावादित्यर्थः । **न वाक्यादिति ।** अनारभ्यवादः शब्दस- ४७९ । २१
मर्पितक्रत्वङ्गतां लिङ्गोपस्थापितक्रत्वङ्गतां वा वाक्यप्रमाणेन विधत्ते । तद्यथा ।
अथातो ऽग्निमग्निष्टोमेनानुयजन्तीत्यनारभ्यवादो ऽग्निष्टोमशब्दसमर्पितक्र-
त्वङ्गतां चित्याग्नेरग्निष्टोमादिपदसमभिव्याहाररूपेण वाक्यप्रमाणेन विधत्ते
यस्य पर्णमयी जुहूर्भवतीत्यनारभ्यवादो जुहूलिङ्गोपस्थापितजुहूपदलक्षित-
क्रत्वङ्गता पर्णतायाः पर्णमयीजुहूपदादिसमभिव्याहाररूपेण वाक्यप्रमाणेन

---

* तात्पर्यमिति २ पु॰ पा॰ ।

विधत्ते न वा ऽऽत्मज्ञानवाक्येषु क्रतुसमर्पकः शब्दो ऽस्ति न च तदुपस्थापकं लिङ्गमस्ति आत्मनो ऽव्यभिचारित्वेनातल्लिङ्गत्वादित्यर्थमनुस्मारयन् वर्तेत इत्यर्थ इति टीकायामनुस्मारयन्नित्येतदनन्तरं जुह्वादिवद्वाक्येनैव तज्ज्ञानं पर्णतावत्क्रत्वर्थतामापाद्यतइति पाठं दृष्ट्वा अनुस्मारयन्नित्यस्यापाद्यतइत्यनेनान्वयाद्वर्ततइत्यध्याहारः कृतः । क्रत्वर्थतामापादयतीति पाठे तु नाध्याहारापेक्षा । ननु देहातिरिक्तात्मनि सत्यप्यव्यभिचरितक्रतुसंबन्धे नास्ति तद्ज्ञाने सति क्रतुस्मृतिनियमः कारणे सति कार्यनियमाभावात् । नहि धूमस्य दर्शने सति वह्निस्मृतिर्नियता तथा च यस्यात्मा द्रष्टव्य इत्यादिवाक्यश्रवणकाले क्रतुस्मृतिः तस्य लक्षणया वाक्येनात्मदर्शनस्य क्रत्वर्थताप्रतिपत्तिः यस्य न तत्स्मृतिः तस्य नेत्यव्यवस्थिता वाक्यार्थधीः स्यादित्याशङ्क्य परिहरति **यद्यपीति । कापि प्रवृत्तिर्भवतीति ।** सर्वानुभवसिद्धमेतदिति भावः । **व्याप्यव्यतिरेकविज्ञान*मिति ।** देहातिरिक्तात्मज्ञानं पारलौकिकफलसाधनविषयेच्छादिजनकक्रतुस्मृतिनियतमित्यर्थः । एवमपीह क्रतुस्मृतिनियमोपपादनं संभवतीत्येतदुक्तं न सार्वत्रिकं पर्णतादिविध्यव्यापनात्तत्फलकल्पनार्थवादिकफलविपरिणामादिदोषपरिहाराय स्वत एव पर्णतादीनां फलवदन्वयाकाङ्क्षया वाक्यात्प्रकरणाद्वा तदलाभाद् लिङ्गात् फलवत्क्रतुस्मृतिनियम इति सार्वत्रिकं तदुपपादनम् ।

४७९ । १२ **आचाराद्यन्यार्थदर्शनमिति ।** नन्वेतदुपोद्बलनार्थमिति टीकाग्रन्थः स्वयमस्वतन्त्रस्याचारादेः पर्णमयीन्यायप्रापकमपेक्ष्योन्मेषपरत्वेन व्याख्यातुं न युक्तः किं तु देहातिरिक्तस्य वेदान्तप्रतिपाद्यस्यात्मनः परार्थत्वाभावादव्यभिचारक्रतुसंबन्धाच्च इह पर्णमयीन्यायस्यानुन्मेषप्राप्तावाचारादिकमपेक्ष्य तदुन्मेषपरत्वेन व्याख्यातुं युक्तः असकृदावेदितं ह्यधस्ताद् वेदान्तानामकर्त्रन्यार्थात्मपरत्वम् । न च तस्येहोपमर्दो ऽस्ति पूर्वपक्षे न वा सिद्धान्ते तस्यात्मनः परार्थत्वाभावे न्यायान्तरोपन्यासो ऽस्ति प्राक्सिद्धन्यायजातमेव हि इहापि सिद्धान्ते स्मारितं देहातिरिक्तस्य च कर्तुर्नाव्यभिचरितक्रतुसंबन्धो ऽस्ति दानादिभिरपि तस्य सम्बन्धात् । न वा ऽत्र क्रतुशब्दो विहितकर्ममात्रोपलक्षक इति वाच्यम् । निषिद्धकर्मभिरपि संबन्धात् तान्यपि

* ज्ञानमिति २ पु० पा० ।

हि स्वफलभोगार्थे देहातिरिक्तात्मसापेक्षाणि । यदि त्वत्र क्रतुशब्दः पारलौकिकफलसाधनविहितनिषिद्धसाधारणकर्ममात्रोपलक्षकः स्यात् तदा यथात्मदर्शनसंस्कृतेनैव कर्त्रा ऽनुष्ठितं विहितं कर्म स्वर्गादिसाधनं यथा तेनैवानुष्ठितं निषिद्धं कर्म नरकसाधनमिति पामरानुष्ठितनिषिद्धकर्मणां नरकजनकत्वं न स्यात् । तद्यथा पुष्करपलाशे आपो न श्लिष्यन्तइति येषामात्मदर्शनवतां पापाश्लेषः अतः तेषामेव तन्नरकजनकं स्यात् । ननु निषेधवाक्येषु प्रत्यवायफलकं निषिद्धानुष्ठानं न शास्त्रार्थः किं तु प्रत्यवायपरिहारफलकं निषिद्धाननुष्ठानं प्रत्यवायपरिहाराय भवतीति शास्त्रार्थाङ्गीकारे नोक्तदोषः । निषिद्धानुष्ठानेन प्रत्यवायजनने देहातिरिक्तात्मज्ञानानपेक्षणादिति चेन्मैवम् । एवं सति वेदान्तजन्यात्मज्ञानरहितानां निषिद्धाननुष्ठाने ऽपि प्रत्यवायाऽपरिहारादवश्यंभावी प्रत्यवायो निषिद्धानुष्ठानेनैवास्त्विति प्रतिसंधानेन तेषां तदनुष्ठानप्रसङ्गो दुर्वारः । किं चात्र क्रत्वव्यभिचारस्तेनाग्निसाध्यकर्माव्यभिचार एव पूर्वपक्षिणा विवक्षित इति वक्तव्यम् । अन्यथोर्ध्वरेतस्सु च शब्दे हीति सूत्रोक्तस्य विद्यास्वातन्त्र्यहेतोरनन्वयापत्तेः । पारलौकिकफलकर्माव्यभिचारविवक्षायां नैष्ठिकादीनामपि स्वाश्रयधर्मरूपकर्मसत्त्वाद् विद्यायास्तदङ्गत्वोपपत्त्या स्वातन्त्र्यं न सिध्येत् । तस्माद्वेदान्तप्रतिपाद्यस्यात्मनः पारार्थ्यक्रत्वव्यभिचारयोरभावादिह पर्णमयीन्यायाऽनुन्मेषेण तदुज्जीवनार्थमयिमश्रुतिलिङ्गादिदर्शनमित्येव व्याख्यातुं युक्तम् । न चान्यार्थदर्शनं स्वयंप्रापकसापेक्षम् इह तद्रहितं कथमन्योपोद्बलकं स्यादिति शङ्कनीयम् । आचारदर्शनमेव हि वैश्वानरविद्यादिप्रशंसार्थत्वाद् अन्यार्थदर्शनम् । यदेवेति श्रुतिरेव तत्र यदेव करोतीति सर्वनामावधारणाभ्यां व्याप्तिगमकाभ्यां सर्वं कर्मानूद्य तत्साधनत्वेन विद्या तृतीयाश्रुत्या विधीयतइति स्पष्टमेव प्रतीयते । न च तेनोभौ कुरुत इति विद्याविहीनस्यापि कर्मोक्त्या कश्चिद्दोषः तावता हि षोडशिग्रहणवद् वैकल्पिकाङ्गत्वं सिध्यति न त्वनङ्गत्वम् । अत एव तदेव वीर्यवत्तरं भवतीति विद्यापक्षे ऽङ्गभूयस्त्वप्रयुक्तं फलभूयस्त्वमनूद्यते समन्वारम्भणं तु सिद्धान्ते ऽप्यङ्गीक्रियते तद्वतो विधानमप्यविचलो हेतुरधीत्येति ह्यध्ययनकरणकार्थज्ञानफलपर्यन्ता भावनोच्यते फलापवर्गित्वाद् भावनायाः । अत एव वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेते-

त्यश्च वाजपेये प्रधानयागानुष्ठानानन्तरमेव बृहस्पतिसवयागप्राप्तौ फलापवर्गिणी भावना फलाऽपूर्वपर्यन्तेति तन्निष्पत्यर्थादीच्याङ्गसहितवाजपेयप्रयोगसमाप्त्यनन्तरमेव बृहस्पतिसव इति मीमांसकैरङ्गीक्रियते अध्ययनं च स्वस्ववेदस्य कात्स्न्र्येन विहितम् । तथा च अधीतस्य कृत्स्नस्य वेदस्यार्थावबोधफलपर्यन्तस्याधीत्येति गृहस्थाश्रमकर्मसु विनियोगात् कर्मभागज्ञानस्येव कथमौपनिषदात्मज्ञानस्यापि कर्मानुष्ठानोपयोगितया तत्र विनियोगो न सिध्येत् । एवं नियमो ऽप्यविकल: पूर्वपक्षहेतु: । ईशावास्यमिदं सर्वमित्यात्मोपदेशपूर्वकं हि कुर्वन्नेवेति श्रवणमात्मविदो जीवनस्य कर्मसु विनियोगं बोधयदात्मविद्याया एव विधिविभक्त्या कर्माङ्गत्वं बोधयेत् । एवं च आचारदर्शनमन्यार्थदर्शनमपि* विद्याकर्मणो: समप्राधान्येन कर्मणो विद्याङ्गत्वेनोपपद्यमानमपि यदेव विद्ययेत्याद्यनुगृहीतं विद्याया: कर्माङ्गत्वे पर्यवस्यल्लिङ्गं भवेदेव । तस्मात्पर्णमयीन्यायोऽज्जीवनार्थे श्रुतिलिङ्गोपन्यास इत्येव युक्तम् । एवं हि सति देहातिरिक्तस्य कर्तु: क्रत्वव्यभिचारो ऽस्तु वा मा वा आत्मा द्रष्टव्य इत्यादिना विधीयमानात्मविद्यायास्तव्यप्रत्ययेन तावदात्मसंस्कारार्थत्वमवगतं यदेव विद्ययेति श्रुत्या तस्याक्रत्वर्थत्वमप्यवगतं य आचार्यकुलाद्वेदमधीत्येत्यध्ययनफलोपनिषदात्मावबोधस्य कर्मार्थत्वोक्त्या ऽपि विद्याया: कर्मार्थत्व†मवगतं विद्याया: स्वातन्त्र्ये विद्यानुष्ठानोपयोगिनस्तस्य कर्मार्थत्वायोगात् । औपनिषदात्मसंस्काररूपविद्याया: क्रत्वर्थत्वमौपनिषदात्मन: क्रत्वर्थत्वे सत्येवोपपद्यते यजमानस्य क्रत्वर्थत्वे सत्येव हि यजमानसंस्कारस्याञ्जनादे: क्रत्वर्थत्वमिति पर्णमयीन्यायो ऽत्र लब्धप्रसरो भवतीति चेदुच्यते । विद्याया: क्रत्वर्थत्वसाधनांशेन पर्णमयीन्यायानुग्राहकमपि पदं यदेव विद्ययेत्यादिकं केवलक्रत्वर्थत्वसाधनाय पर्णमयीन्यायसापेक्षम् । अन्यथा दध्यादिवद्विद्याया: पुरुषार्थत्वमप्यस्तु फलस्यापि श्रवणादिति शङ्काया निवारणं न भवेत् तस्मात्पर्णमयीन्यायानुग्राहकत्वं यदेव विद्ययेत्यादेरेतद्दूषणोद्धूलनार्थमिति येन टीकाग्रन्थेनोक्तं तेनैव तस्य केवलपुरुषार्थत्वसाधनांशे न स्वातन्त्र्यमिति तदंशे पर्णमयीन्यायसापेक्षत्वमपि दर्शि-

---

* दर्शमपीति २ पु. पा. ।

† क्रत्वर्थत्वमिति २ पु. पा. ।

तमित्यभिप्रायेण तथा ऽवतारितम् । तथा च वनसिंहन्यायेन प्रमाणतर्कन्यायेन चोभयोरप्यंशभेदेन परस्परापेक्षायामपि न परस्पराश्रयदोषः ।

तच्छ्रुतेरित्यादिसूत्राणीति । यद्यपि तच्छ्रुतेरिति सूत्रं यदेव विद्ययेति श्रुतिप्रदर्शकं तथापि तृतीयाश्रुत्यवगतक्रत्वङ्गत्वलिङ्गेन आर्थवादिकफलविवक्षया केवलक्रत्वङ्गत्वमवगन्तव्यमिति तदंशाभिप्रायात्तच्छ्रुतेरिति सूत्रस्य लिङ्गपरत्वोक्तिः । **एतल्लिङ्गदर्शनमिति** । क्वाचित्कीयमन्यथासिद्धयुक्तिर्न सार्वत्रिकी निर्गुणविद्याप्रकरणे ऽपि तत्र तत्र गृहस्थकर्मानुबन्ध्युपाख्यानदर्शनादित्याशयेनैतदित्युक्तम् ।

सर्वविषयत्वशङ्कामिति । यश्चैवं वेदेति पूर्ववाक्यगतैवंश- ४८० । ६
ब्दसामर्थ्याद्विद्याशब्दस्य प्रकृतं विद्यामात्रविषयत्वमवश्यंभावीति भावः । विभागः शतवत्*दिति सूत्रं विद्वदविद्वत्पुरुषभेदेन विद्याकर्मणोरनुव्रजनव्यवस्थापकमयुक्तम् । निर्गुणविद्यावत उत्क्रमणगमनयोरभावेन विद्यायास्तदनुव्रजनाभावात् । सगुणविद्यायाः फलभूयस्त्वार्थं कर्मसापेक्षत्वेन विद्याकर्मणोरेकस्मिन् पुरुषे साहित्योपपत्त्या विभागाऽनपेक्षणात् । तस्माच्छतन्यायेन विभागो न सूत्रणीय इति न वेदसमन्वारम्भणमित्यादिभाष्येण दर्शितमित्येतदविभागे ऽपि न दोष इत्यादिटीकाग्रन्थेनोक्तम् । अयं स्पष्टत्वान्न व्याख्यात इत्यस्तु अध्ययनमात्रवत इति सूत्रस्य तु भाष्यटीकाग्रन्थौ विचारणीयौ । भाष्ये तावत्स्वातन्त्र्येण प्रयोजनवद्यदात्मदर्शनं तन्मात्रग्रहणेन व्यावर्त्यते न त्वध्ययनफलमर्थावबोधनं न चैतावतोपनिषदर्थावबोधनस्यापि† कर्म्माङ्गत्वप्रसङ्गः । क्रत्वन्तरज्ञानस्य क्रत्वन्तरइव तस्य कर्ममात्रे अनङ्गत्वोपपत्तेरित्युक्तम् । अनेन भाष्येणार्थावबोधफलकाध्ययनेतिकर्तव्यतारूपेण स्नानात् प्राचीनेन विचारेण कृत्स्नवेदार्थावबोधमङ्गीकृत्य तत्रोपनिषदंशार्थावबोधस्य कर्मसूपयोगमात्रं व्यावर्त्तितमिति प्रतिभाति । तदयुक्तम्‡ । उपनिषद्विचारस्य साधनचतुष्टयसंपन्नाधिकारिकत्वेनाधीतवेदमात्राधिकारिकत्वाभावात् । टीकायां तु मात्रग्रहणेनोपनिषदंशस्याध्ययनमेव व्यावर्त्यत इत्युक्तम् । इदमप्ययुक्तम् । अध्ययनविधेः कृत्स्नस्वशाखाविषयत्वात् । तस्मा-

---

* व्या· सू· अ· ३ पा· ४ सू· ११ ।

† अवबोधस्यापीति २ पु· पा· ।

‡ एतदयुक्तमिति २ पु· पा· ।

टिदं भाष्यटीकायन्थद्वयं स्फुटविरोधं विचारणीयं कथमाचार्यैस्त्यक्तमिति चेदुच्यते । भाष्यकारैरात्मज्ञानस्य कर्मानङ्गत्वोक्त्या दारपरिग्रहप्रभृत्यवश्यानुष्ठेयानिरन्तरसंतन्यमानं कर्मानुष्ठानो*पयोगितया कर्मभागविचार एव स्नानात्पूर्वं न तूपनिषद्विचारो ऽपीत्येतत्सूचितमिति स्पष्टमेव । आचार्यकुलाद्वेदमधीत्येत्यत्र त्वधीत्येत्यध्ययननिवृत्तिमात्रमुक्तं न तु फलभावनापर्यन्ता ऽध्ययननिवृत्तिः । वाजपेयेनेष्ट्वेत्यत्र तृतीयाश्रुत्यवगतफलभावनाकरणत्वनिर्वाहाय तत्पर्यन्तयागनिवृत्त्यर्थत्वाभ्युपगमे ऽप्यत्र तादवस्थ्यस्यानङ्गीकर्त्तव्यत्वात् । अधीत्य वेदं न विजानाति यो ऽर्थमिति श्रुत्यन्तरे अधीत्येत्यस्याध्ययननिवृत्तिमात्रार्थत्वदर्शनाच्च । न चैवं सत्यधीत्याभिसमावृत्त्येति श्रुतावध्ययनानन्तरमेव† समावर्त्तनप्रसङ्गः । अग्निहोत्राद्यनुष्ठानोपयोगितया समावर्त्तनात्पूर्वं कर्मविचारप्राप्तेः । अग्निहोत्रादिकर्मसंबन्धे सति कर्मविचारतदर्थगुरुकुलवासयोरवकाशाभावात् । तस्माद् भाष्ये न का चिदनुपपत्तिः । टीकायां मात्रग्रहणस्योपनिषदध्ययनव्यावर्त्तकत्वोक्तिर्विचारसाध्यत्वावबोधपर्यन्ताध्ययनव्यावर्त्तकत्वाभिप्राया । सा च विशेष्यव्यावर्त्तनाऽसंभवाद् विशेषणमात्रव्यावर्त्तनार्था पर्यवस्यति । सर्वमिदं प्रथमसूत्रप्रतिपादितार्थपर्यालोचनया ऽवगन्तुं शक्यमित्याचार्य्यैस्त्यक्तम् ।

:८० । ८ **बहुदक्षिणेन विश्वजिदादिनेति** । विश्वजिति द्वादशशताधिकं यस्य यावद् भूमिपुरुषाश्वरजतवर्ज्जं स्वमस्ति तत्सर्वं दीयतइति तस्य बहुदक्षिणात्वमुक्तम् । आदिशब्देन बहुदक्षिणात्वेन प्रसिद्धस्याश्वमेधस्य सप्तदशो ऽग्निष्टोमस्तस्य दीक्षणीयायामिष्टौ द्वादशमानं हिरण्यं ददाति चतुर्विंशतिमानं प्रायणीयायां द्वे चतुर्विंशतिमाने आतिथ्यायामित्यादि अष्टाविंशतिशतमष्टाविंशतिशतमानानि वशाया वपाया‡मित्यन्तेन बहुदक्षिणतयोक्तस्य च ग्रहणम् । तत्र हि दीक्षणीयाप्रायणीयातिथ्याषडुपसदग्नीषोमीयपशुसवनीयपशुसवनत्रयोदयनीयानुबन्ध्यपशुषु द्वादशमानमारभ्योत्तरोत्तरद्विगुणा दक्षिणोक्ता । **कुर्वन्नेव कर्माणि वर्त्तेतेति** । कर्मसंक्रान्तिविधिकल्पनं कर्म्माशुभमित्यशुभत्वाध्याहारः । यावज्जीवं संतन्यमानसत्कर्ममहिम्ना ऽन्तरान्तरा

---

* कर्मान्तरानुष्ठानेति २ पु. । † श्रुतो ऽध्ययनानन्तरमेवेति २ पु. पा. ॥
‡ आनानिवाशायोवपायामिति १ पु. पा. ।

णात् पापं कर्म नश्यतीत्यर्थः । इदं व्याख्यानं नाविशेषादिति सूत्रानुसारेण विद्वद्विषयत्वमाश्रित्य । स्तुतये ऽनुमतिर्वेति सूत्रानुसारेण विद्वद्विषयत्वे तु भाष्यकारैः श्रुत्यभिप्रायो दर्शित इति न व्याख्यातम् । तस्मिन् पक्षे आमन्त्रणशब्दोक्ते कामचारणे* लिङ् यथाकामं कर्म करोतु नामेत्यर्थः । नान्यथेतो ऽस्तीत्यस्य इतो विद्यासामर्थ्याद् अन्यथा संसारनिवृत्तिर्नास्तीत्यर्थः ।

अयं लोकः प्रत्यक्षं फलमिति । अनेन यथा यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते इत्यादिकर्मविशेषार्थवादनिर्दिष्टफलस्योभयत्रापि वर्तमाननिर्देशेन प्रतीयमानं तात्कालिकत्वं प्रत्यक्षविरुद्धमिति तत्परिहाराय व्यवधारणकल्पनापेक्षणात् ततः क्रतु†फलेन फलवत्त्वकल्पना बलीयसीति तत्सिद्धये क्रत्वन्वयाकाङ्क्षा नैवमिह तदाकाङ्क्षा ऽस्ति ब्रह्म वेद ब्रह्मैव भवतीति विद्यार्थवाद‡निर्दिष्टफलस्य विद्यासमानकालतायाः प्रत्यक्षविरुद्धत्वाभावात् । लोके ऽपि भ्रान्तिनिवर्तके तत्त्वसाक्षात्कारप्रयुक्ताधिष्ठानस्वरूपाविर्भावस्य तात्कालिकत्वदर्शनाच्चेति प्रकृते परामर्शन्यायवैषम्यं सूचितम् । इदं भाष्यालोचनया स्पष्टमिति नोक्तम् § ॥

परामर्शं जैमिनिरचोदना चापवदति हि ॥ १८ ॥ ४८० । १९

आक्षेपलक्षणमिति । ननु आक्षेपस्य समाधानं कथमनेनाधिकरणेन लभ्यते तत्र हि त्रयो धर्मस्कन्धा इति विषयवाक्याद् धर्मशब्देन ब्रह्मचारिवानप्रस्थयोर्दर्शितमभ्युदयसाधनकर्मास्तित्वं तथैवाङ्गीकृतं संन्यासिनो ऽप्यधिकशौचाद्युपासनियमशमदमादिरूपं कर्माङ्गीकृतं तस्य तपःशब्दवाच्यत्वमात्रं परं प्रतिक्षिप्तम् । उच्यते । संन्यासिनो विद्यां प्रति प्राधान्ययोग्यं किमपि कर्मानङ्गीकृतम् । समधिकशौचादेरानर्थक्यमिति चेन्न तदपेक्षत्वादिति ॥ सूत्रोक्तन्यायेन (सर्वकर्मापेक्षितत्वादाचारान्तर्गतस्य तस्य विद्यार्थत्वश्रवणाच्च शुद्धित्वसंपादकतया शमदमादेः शमदमाद्युपेतः स्यादिति सूत्रोक्तन्यायेन चित्तैकाग्र्यसंपादकतया च विद्योपयोगित्वात् स्वातन्त्र्येणाभ्युदयसाधनस्य)¶

---

* कामकारकरणे इति ३ पु॰ पा॰ । कामकरणे इति २ पु॰ पा॰ ।

† तत्कल्पितेति १ पु॰ पा॰ । ‡ विध्यर्थवादेति २ पु॰ पा॰ ।

§ अत्र प्रथमं पुरुषार्थाधिकरणं पूर्णम् । ॥ इति चेन्न । सर्वापेक्षा चेति १ पु॰ पा॰ ।

¶ एतदन्तर्गतो ग्रन्थो नास्ति २-५ पु॰ पा॰ ।

सर्वस्य कर्मणः संन्यासिना त्यक्तत्वात् । अतस्तथाभूतसंन्यासाश्रमास्तित्व-
प्रसाधनेन कृताक्षेपं समाधानं लभ्यते । **प्रणवाख्यब्रह्मणः प्रस्तुतत्वा-
दिति ।** ननु छान्दोग्ये त्रयो धर्मस्कन्धा इत्युपक्रान्तस्य खण्डस्योङ्कार एवेदं
सर्वमिति समापनात् तस्मिन् प्रणवः प्रस्तुत इत्युपपद्यतां (मधुविद्यायां
गुह्या एवादेशा मधुकृतो ब्रह्मैव पुष्पमिति प्रणवे ब्रह्मशब्ददर्शनात् प्रणवाख्यं
ब्रह्मेत्युपपद्यते *) । ब्रह्मसंस्थ इत्यत्र ब्रह्मशब्दस्य प्रणवपरत्वं तु नोपप-
द्यते तदुपासनेनामृतत्वानुपपत्तेः । नान्यः पन्था इति श्रुतिविरोधात् । न
चेहामृतत्वमापेक्षिकं वक्तुं शक्यम् । तथा सति पुण्यलोकभाजामाश्रमान्तरा-
णामपि तत्सत्त्वेन तदपेक्षया ब्रह्मसंस्थस्योत्कर्षालाभापत्तेरिति चेत् ।
उच्यते । प्रश्नोपनिषदि त्रिमात्रप्रणवप्रतीका या ब्रह्मोपासनोक्ता सैवात्रापि
विवक्षिता तस्याश्च ब्रह्मलोके तत्त्वसाक्षात्कारोत्पादनद्वारा ऽऽत्यन्तिकाऽमृ-
तत्वफलत्वमुक्तमित्यत्रापि तदुक्तिरुपपद्यते इति तात्पर्यम् । प्रणवप्रकरणान-
नुरोधे तु ब्रह्मसंस्थपदं स्वातन्त्र्येण परब्रह्मनिष्ठापरं न तु प्रणवप्रतीक-
४८१ । ९ ब्रह्मोपासनापरमिति द्रष्टव्यम् । **अप्राप्तार्थद्वयप्रतिभानादिति ।** गृहस्था-
श्रमस्य प्रत्यक्षश्रुतिप्राप्तत्वात् त्रिषु धर्मस्कन्धेषु नैष्ठिकवानप्रस्थरूपमेवाप्राप्त-
मिति भावः । **महापितृयज्ञइति ।** शाखान्तरं दृष्ट्वोक्तं प्रेताग्निहोत्रएवाध-
स्तात् समिधमिति विधिप्रसिद्धो ऽनुवाद इत्यत्र हेतुः । वर्त्तमानापदेशाद्
विधिशब्दाश्रवणात् हिशब्दश्रुतेश्चेति । अप्राप्तस्यानुवादो न संभवतीति
बाधकवारणार्थमुपरि समिधः प्राप्तेरित्युक्तम् । प्राप्त्युपपादकं हविषो ऽभ्य-
र्हितद्रव्यत्वादित्यादि । **वाक्यान्तरप्राप्ता समिन्नियम्यतइति ।** तेनैव
वाक्यान्तरेणेति शेषः । **हविषः प्राग्देश इति ।** स्रुग्दण्ड एव हविराधार-
बिलस्थानापरभागरूपः प्राग्देशशब्देन विवक्षितः यद्यपि परामर्श एवाय-
मिति भाष्येण स्तुतिसामर्थ्यात् ब्रह्मसंस्थत्वे विधिरभ्युपेय इति प्रसाधितं
तत्प्रसाधनीय† प्रकृतसंन्यासाश्रमसिद्धौ नोपयोगि गृहस्थादीनामेवामृतत्व-
फलकब्रह्मसंस्थाविधिसंभवादित्याशङ्क्य एतच्छङ्कानिराकरणफलं विचारान्तरं
भाष्यकारैरारभ्यतइत्यवतारयतीत्याह **ब्रह्मसंस्थताविधावपीति ।** यद्यपि

* ( ) एतदन्तर्गतो ग्रन्थो नास्ति २–५ पु॰ पा॰ ।
† प्राप्तं तत्प्रसाध्येति २ पु॰ पा. ।

नोपन्यस्तशङ्कानिराकरणार्थं विचारान्तरमारभ्यते किं तु तपःशब्देन संन्यासाश्रमस्यापि ग्रहणं चतुर्णामप्याश्रमाणां ब्रह्मसंस्थता ऽमृतत्वफलोच्यते इति वृत्तिकारमतनिराकरणार्थं तथापि तन्निराकरणार्थेनैव गृहस्थाद्याश्रमेषु ब्रह्मसंस्थपदस्यावयवार्थासंभवप्रदर्शकेन वक्ष्यमाणन्यायेनोपन्यस्तशङ्कानिराकरणमप्यनुषङ्गतो लभ्यतइति तात्पर्यम् । किं च गृहस्थादिष्वमृतत्वफलकब्रह्मसंस्थाविध्यभ्युपगमे ऽपि विद्यायाः स्वातन्त्र्यं सिध्यत्येव कर्म्माङ्गत्वे फलार्थत्वासंभवादित्यपि द्रष्टव्यम् । **प्रथममाग्नेयादयो मन्त्रा इति** । प्रथमशब्दादये पुनराग्नेय्याग्नीध्रमिति पुनःशब्दाच्च एकस्मिन्नेव वेदे मन्त्राम्नानस्तोत्रविनियोगोपस्थानविनियोगाः क्रमिका इति प्रतीयते । अन्ये तु मन्त्राम्नानस्तोत्रविनियोगौ सामवेदे उपस्थानविनियोगस्तु यजुर्वेदइत्याहुः ।

अप्रकृताग्नेयीग्रहणइति । अयमर्थः । आग्नीध्रोपस्थानस्य द्वे ४८२ । १६
रूपे आग्नीध्रोपस्थानत्वं ज्योतिष्टोमाऽपूर्वसिद्ध्यौपयिकव्यापारत्वं चोभयमपि विधातव्यं केवलाग्नीध्रोपस्थानत्वविधाने हि नैष्फल्यं स्यात् (फलं वा कल्प्येत यद्यद्यप्रकृताग्नेयी गृह्येत तदा रूपद्वयमप्यनेनैव वाक्येन विधातव्यमिति गौरवं भवेत् । प्रकृताग्नेयीग्रहणे तु तस्याः)* करणाम्नानाज् ज्योतिष्टोमगतो व्यापारः कर्तव्यत्वेनावधारितस्य व्यापारस्याग्नीध्रोपस्थानात्मकविशेषरूपत्वमविधेयं य आग्नेय्या ज्योतिष्टोमे व्यापारः कर्त्तव्यः स आग्नीध्रोपस्थानात्मक इति विधेयलाघवं लभ्यते । अतो लाघवार्थं प्रकृतैव ग्राह्येति । **न तस्याः पारार्थ्यमिति** । यदि पारार्थ्यमपि विनियोगान्तरे ऽनुप्रविशेत् तदा विनियुक्तविनियोगविरोधदोषः स्याद् यथा पुरोडाशकपालेन तुषानुपवपतीत्यत्राधिष्ठानलक्षणानङ्गीकारे तदा हि† कपाले पुरोडाशशेषत्वविशेषणम् अन्यशेषत्वव्यवच्छेदकं स्याद् विशेषणानां स्वविरोधिव्यावर्त्तकस्वभावत्वात् तथा चानुवाद्यपुरोडाशशेषत्वविधेयतुषोपवापशेषत्वयोः परस्परविरोधाद् वाक्यार्थप्रतीतिर्न निष्पद्येतेति तत्र विनियुक्तविनियोगविरोधो दोषः । तत्परिहाराय च पुरोडाशशेषत्वरूपविशेषणांशमपहाय वस्तुतस्तदधिष्ठानकपालस्वरूपमात्रे पुरोडाशकपालशब्दस्य लक्षणा ऽङ्गीकृता । न चेहाग्नेय्याः स्तोत्रशेषत्वरूपविशेषणश्रवणमस्ति येन विनियुक्तविनियोगविरोधशङ्का स्यादित्यर्थः ।

---

* ( ) एतदन्तर्गतो ग्रन्थो बहिर्लिखितः २ पु॰ । † तथा हीति १ पु॰ पा॰ ।

ननु यथा व्रीहीन्प्रोक्षतीत्यत्र व्रीहिषु क्रतुशेषत्वविशेषणाश्रवणे ऽपि प्राक्-
क्रतुशेषत्वेन विनियुक्तत्वात् क्रतुशेषाणामेव तेषां ग्रहणम् एवमिहाप्याग्नेय्याः
प्राक् स्तोत्रसाधनत्वेन विनियुक्तत्वात् तथाभूताया एव तस्या ग्रहणं भवेत्
स्तोत्रशेषत्वेनोपात्ताया उपस्थानशेषत्वबोधने विनियुक्तविनियोगदोषः स्यादि-
त्याशङ्क्याह **यदि पुनरिति** । व्रीहयः क्व चित्कार्ये न विधीयन्ते किं तु
व्रीहीनुद्दिश्य प्रोक्षणसंस्कारो विधीयते तथाप्रतीतमेवोद्देश्यं क्व चिदुपयुक्तमेव
च संस्कार्यमिति क्रत्वपूर्वार्थत्वेनैव व्रीहीणां ग्रहणमिति युज्यते न तथेहा-
ग्नेयीमुद्दिश्य तत्संस्कारत्वेनोपस्थानं विधीयते किं त्वाग्नेय्यत्र तृतीयाश्रुत्यो-
पस्थाने साधनत्वेन विधीयते । न च यत्र वाक्ये यद्विधीयते तस्य तत्रो-
द्देशो ऽप्यस्ति तथा सति हि तदुद्देशेनान्यदपि विधेयमिति वाक्यभेदः
स्याद् अतो ऽत्र नाग्नेय्युद्देश्येति न व्रीहिन्यायेन तस्यां पारार्थ्यविवक्षा प्रस-
ज्यतइत्यर्थः । ननु संनिहितव्यक्तिपरत्वमेवेत्ययुक्तं सन्निधिना स्थानप्रमयोना-
८२ । २६ विशेषप्रवृत्तश्रुतिसंकोचायोगादित्याशङ्क्याह **अग्निदेवतेति** । **न सामान्य-
मात्रेति** । यद्यप्याकृत्यधिकरणन्यायेन जातिरर्थः प्राप्नोति तथाप्यग्निदेव-
ताप्रकाशकत्वरूपावयवार्थस्य जातावनन्वयाद् आग्नेयीशब्दस्य व्यक्तिरेवार्थः ।
अतो न जातिद्वारेणासन्निहितव्यक्त्यनुप्रवेशो भवतीत्यर्थः । नन्वग्निदैवत्याना-
मृचां नानाच्छन्दस्त्वाद् नानारूपत्वाच्च न तास्ववयवार्थातिरिक्तमनुगतं
जातिरूपं सामान्यमस्ति अतः सामान्ये योगो न घटतइत्युक्तिर्न युक्तेति
चेत् । सत्यम् । अतिरिक्तसामान्याभ्युपगमे ऽपि इह व्यक्तिवाचित्वमेव वक्त-
व्यमित्यभ्युपगमवादोयम् । अस्तु व्यक्तिवाचित्वं तथाप्यविशेषप्रवृत्तश्रुत्यनु-
ग्रहायासन्निहितव्यक्तिपरत्वमप्यस्तीत्याशङ्क्याह **तद्धितान्तर्वर्तीति** । अग्नि-
र्देवता ऽस्या इति विग्रहवाक्यगतसर्वनामार्थान्तर्भावात् सर्वनाम्नः सन्नि-
हितपरामर्शित्वस्वाभाव्यात् सर्वनामश्रुत्यपेक्षाकृतः सन्निधिना संकोचो
न दोषायेति भावः । **ननु व्यक्त्यपेक्षत्वे ऽपीति** । यद्यप्ययं व्यक्तिशब्दः
तथापि सन्निहितव्यक्तिपरत्वमयुक्तम् । तस्याः स्तोत्रविनियुक्तत्वेन गतर-
सत्वात् किं त्वसन्निहितव्यक्तिपरत्वमेव हि युक्तमित्यर्थः । **व्यतिरेकमुखेन
विवृणोतीति** । न त्वसाधारणाभ्यामुपक्रमसमाप्ती श्लिष्येते इत्येतद्व्यतिरेक-
मुखेन विवरणम् । **अधिकमप्याहेति** । समधिकशौचं तव इति पूर्वं

शङ्कितम् इदानीं शमादिकमपि तप इति शङ्कनीयान्तरमपि निरसितुमाहे-
त्यर्थः । यद्वा ग्रासशौचनियमयोस्तपस्त्वाभावे गृहस्थसाधारण्यादिति हेतु-
रुक्तः स तु शमादेरपि तपस्त्वाभावे साधारणो हेतुः । आत्मनि सर्वेन्द्रि-
याणि संप्रतिष्ठाप्येति गृहस्थस्यापि तदुचितबाह्यान्तरेन्द्रियनिग्रहविधानात् ।
इदानीं शौचनियमस्य शमादेश्च तपस्त्वाभावे हेत्वन्तरमाहेत्यर्थः । शौच-
संतोषेति पातञ्जलसूत्रे शौचं तावत्पृथग् गृहीतमिति स्पष्टं संतोषशब्देन
शमदमादिकमपि तपसः पृथग् गृहीतं तद्रहितस्येन्द्रियवश्यस्य सर्वदैवा-
संतोषादिदं पृथग्ग्रहणं हेत्वन्तरम् । **एवं च भाष्यमपीति** । ब्रह्मसंस्थ
इति श्रुतेर्गृहस्थादिविषये यदा तदेत्यध्याहारेण भिक्षुविषये ऽनध्याहारेण
च योजने उक्तदोषं* वाक्यवैरूप्यलक्षणं हृदि कृत्वा स्पष्टत्वान्मनस्येव
निधाय यथाश्रुतार्थोपादाने यदातदेत्यध्याहाराऽनध्याहारौ विहाय यथाश्रु-
तार्थग्रहणे फलभेदव्यपदेशं पूर्वपक्षनिरासहेतुं व्यपदेशभेदो ऽच भवतीति
भाष्यं वदतीत्येवं तद्भाष्यं टीकाकारैर्व्याख्यातं भवतीत्यर्थः । तपःशब्देन
भिक्षोरग्रहणमङ्गीकृत्याविरोधोपपादने प्रागुक्तदोषं स्मारयति **यदा तदेति** ४८४ । १४
वैरूप्यादेवेति । तेन तद्ग्रहणमङ्गीकृत्याऽविरोधोपपादने दोषमाह **न च**
संन्यासस्येति । आग्नेयीन्यायेन दृढीकृतः पूर्वपक्षः कथमाभास इत्याशङ्क्य
रूढिः सिद्धान्तिन इष्टेत्यारोपाभिप्रायेयमाभासत्वोक्तिरित्याह **सिद्धान्तिन**
इति । **कथं त्रयाणां ब्रह्मसंस्थत्वासंभव इति** । आग्नेयीन्यायेन प्रकृ-
तेषु त्रिषु वर्तमानः श्रौतब्रह्मसंस्थशब्द एव कर्मच्छिद्रेषु ब्रह्मनिष्ठा ब्रह्मसं-
स्थेति तेषां ब्रह्मसंस्थासंभवमुपपादयतीति भावः । ब्रह्मसंस्थशब्दस्य गृह-
स्थादिसाधारण्ये वैरूप्यापत्तेः तत्साधारण्यासंभवाच्च प्रकृतविषयत्वानुपपत्तेर-
प्रकृतविषयत्वं युज्यते प्रकृतार्थलाभे ह्यप्रकृतपरामर्शित्वं परिहरणीयं न तद-
लाभे ऽपि । अत एवाग्नेयसूक्तेन संवत्सरमुपदधानमासीत सूक्तेनाविच्छेदा-
येति यावन्ति दाशतयीष्वाग्नेयानि सूक्तानि तावतामिष्टकोपधाने विनियोगे
तेषां सूक्तानां तत्राप्रकृतत्वे† ऽप्याग्नेयशब्देन परामर्श इष्यते । यदि तु
ब्रह्मणि संस्था ऽस्येति सप्तमीसमासं विहाय स्थः क चेति सूत्रेण स्थाधातोः
कर्तरि विहितं कप्रत्ययमाश्रित्य ब्रह्मणि संस्थ इति सप्तमीतत्पुरुष आद्रियते

* उक्तमित्येव पाठः १ पु० । † अप्राकृतत्वे ऽपीति २ पु० पा० ।

तदा सर्वनामान्तर्भावा*दाग्नेयीन्यायेन प्रकृतपरामर्शित्वशङ्काया एव नावकाश इत्यपि द्रष्टव्यम् । **ब्रह्मसाक्षात्कारकामस्य तदधिकारिणः सत्त्वादिति** । ब्रह्मसाक्षात्कारश्च चित्रायागादिफलवदामुष्मिकसाधारणं फलमिति जन्मान्तरसंपन्नसंन्यासाऽपूर्वस्य गार्हस्थ्यदशायां कृतश्रवणादिकस्यापि भवति अत एव वामदेवस्य गर्भस्थस्य प्रागकृतसंन्यासस्यैव साक्षात्कारोदयः श्रूयते । देवादीनामप्यकृतसंन्यासानामेव साक्षात्कारस्तेन मुक्तिश्च श्रूयते तद्यो देवानां प्रत्यबुध्यत स एव तदभवदित्यादौ । **घटिकास्थानानि** पुण्यक्षेत्रविशेषा गोदावरीतटादिषु प्रसिद्धाः । **आथर्वणीं श्रुतिम्** अथास्य पुरुषस्य चत्वारि स्थानानि भवन्तीत्युपक्रम्य ब्रह्मोपनिषदिति प्रसिद्धाम् ।

४८५ । ११ **न चात्र सशिखमिति** । सोत्तरीयमन्नं भुञ्जीतेतिवत्कर्तृविशेषणसाहित्ये सशिखमिति शब्दः न तु सघृतमन्नं भुञ्जीतेतिवत्कर्मसाहित्यइति भावः । एतदुपलक्षणम् । बहिःसूत्रमित्येतदप्यपपरिबहिरञ्चवः पञ्चम्या इति पञ्चम्यन्तेन कृताऽव्ययीभावसमासं सूत्राद्बहिर्भूतस्यापि सर्वस्यापि त्यागप्रतिपादनार्थं न तु यज्ञोपवीतस्येति यत्तेषां मतं तदप्यत्र विवक्षितं निरासकहेतुसाम्यात् । **बाह्यशिखां व्यावर्त्त्यैति** । एतद्बाह्ययज्ञोपवीतव्यावर्त्तनस्याप्युपलक्षणम् । ज्ञानयज्ञोपवीतिन इत्यपि वाक्यशेषाम्नानविशेषणोदाहरणाद् लोकाक्षगृह्यवचनं चाऽथातः परमहंसपारिव्राज्यविधिं व्याख्यास्याम इत्युपक्रम्य प्रवृत्तं स शिखान् केशान्निकृत्य विसृज्य यज्ञोपवीतमित्यादिकमत्रोपबृंहणं द्रष्टव्यम् । एतेन कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इति ज्ञानस्तुत्यर्थकर्मानुमतिरिति स्तुतयेनुमतिर्वा†ति सूत्रोक्तिन्यायेन ज्ञानस्तुत्यर्थमेव शिखायज्ञोपवीतत्यागानुमतिरित्यपि तेषां मतं निरस्तम् । शिखावपनादिविधायकोपबृंहणाऽनुगृहीतशिखावपनयज्ञोपवीतत्यागविधिस्तावकत्वस्यैव वाक्यशेषस्य वक्तव्यत्वेन ज्ञानस्तावकत्वोत्प्रययोगात् । न हि परिधीन् परिदधाति रक्षसामपहत्यै न पुरस्तात्परिदधातीति प्राग्देशपरिधानपर्युदासशेषस्यादित्यो ह्येवोद्यन् पुरस्ताद् रक्षांस्यपहन्तीत्यर्थवादस्य तत्स्तावकत्वमपहायादित्यस्तावकत्वकल्पना युक्ता । ननु

---

* अन्तर्भावादिति २ पु॰ पा॰ । † व्या॰ सू॰ अ॰ ३ पा॰ ४ सू॰ १४ ।

ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते ।
काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः ।
स याति नरकान् घोरान्महारौरवसंज्ञकान् ॥

इति परमहंसोपनिषदि यतीनां ज्ञानमेव दण्डो न काष्ठमिति श्रवणस्य ज्ञानस्तुत्यर्थत्वमेव वक्तव्यं न काष्ठदण्डव्यावर्त्तकत्वं दण्डधारणस्य सिद्धान्ते ऽप्यभ्युपगतत्वात् । दण्डधारणे रौरवादिप्राप्तेः केनाप्यनभ्युपगतत्वाच्च । तद्वदिहापि किं न स्यादिति चेदुच्यते । तत्र सर्वान् कामान् परित्यज्याद्वैते परमे स्थितिरिति ब्रह्मनिष्ठायाः प्रकृतत्वेन स्तुत्यर्थत्व*मुपपद्यते यः संन्यस्यापि ब्रह्मनिष्ठां विहाय केवलमन्नलाभाय यतिलिङ्गङ्काष्ठं धृत्वा ऽभिशस्तपतितपर्यन्तानां सर्वेषामन्नमश्नन् पर्य्यटति तस्य रौरवादिप्राप्तिरित्यप्युपपद्यते । इह तु शिखायज्ञोपवीतत्यागविधिशेषस्य तत्स्तावकत्वमेव वक्तव्यं न तु ज्ञानस्तावकत्वमिति वैषम्यम् । एतेन यज्ञोपवीतत्यागविधिः पुराणयज्ञोपवीतविषयः गृहस्थधार्यद्वितीययज्ञोपवीतविषयो वेति यत्केषांचिन्मतं तत् शिखावपनविधावपि पुराणशिखाविषयत्वेन सञ्चारयितुं शक्यं तदपि प्रत्युक्तम् । ज्ञानशिखिनो ज्ञानयज्ञोपवीतिन इति अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखेति च वाक्यविशेषे सर्वथैव बाह्यशिखोपवीतव्यावर्त्तनात् परमहंसोपनिषद्यद्वयानन्दविज्ञानघन एवास्मि तदेव मम परमं धाम तदेव शिखा तदेवोपवीतं चेत्येवमेव बाह्यशिखोपवीतव्यावर्त्तनात् । आरुण्युपनिषदि† दण्डमाच्छादनं कौपीनं परिग्रहेत् शेषं विसृजेदिति सर्वं त्यक्त्वा दण्डकौपीनाच्छादनमात्रस्यैव परिग्राह्यतोक्तेश्च । प्रत्यक्षश्रुतिविरोधेन नूतनोपवीतादिग्रहणार्थकश्रुतिस्मृतिकल्पनानुपपत्तेश्च । तादृग्वचनसद्भावे कुटीचकादिविषयत्वोपपत्तेश्च ।

शिखायज्ञोपवीतत्यागविधेरुत्तानबुद्धिभिरुन्नीतां विषयान्तरकल्पनां
निरस्यति न चैतद् द्वित्रिदिनेति । सिद्धं प्रति तद्वैयर्थ्यादिति । उत्पन्नब्र- ४८५ । २२
ह्मसाक्षात्कारं प्रति ध्यानविधिवैयर्थ्यादित्यर्थः । एतदुपलक्षणम् उत्तीर्णसर्वविधिजातं प्रति वचनादि‡विधिवैयर्थ्याच्चेत्यपि द्रष्टव्यम् । सर्वत्यागादस्ति

---

* प्रकृतेन तत्स्तुत्यर्थत्वमिति १ पु॰ पा॰ ।
† आरुण्योपनिषदीति ३ पु॰ पा॰ ।
‡ वचनानीत्यसंगतः पाठः २ पु॰ ।

संभव इति । सर्वं त्यक्तवत एवावासस्त्वं संभवति त्रिदण्डं कमण्डलुं शिक्यं पात्रं जलपवित्रं मेखलां यज्ञोपवीतमित्येतद् भूः स्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेद् यथाजातरूपधर इति जाबालोपनिषदि सर्वं त्यक्तवत एव यथाजातरूपधर इत्यवासस्त्वोक्तेः । परमहंसोपनिषदि सामान्यतः परमहंसस्य दण्डकौपीनाच्छादनमात्रग्रहणमुक्त्वा तत्र न मुख्योऽस्ति कोऽयं मुख्य इति तदयं मुख्यो न दण्डं न शिखां न यज्ञोपवीतं नाच्छादनं चरति परमहंस इति मुख्यपरमहंसस्यावासस्त्वोक्तेश्च । वैश्वानरसूत्रे परमहंसानां वृक्षमूले शून्यागारे श्मशाने वासिनः साम्बरा दिगम्बरा वा न तेषां धर्माधर्मावित्यादिनोदाहृतोपनिषदुपबृंहणाच्च । तस्मादाश्रमस्मृतावत्रावासस्त्वोक्तिस्तत्सहनियततया श्रुतिसिद्धं शिखायज्ञोपवीतत्यागमपि स्मर्तुराशयस्थम् आविष्क-
४८६ । २ रोतीति भावः । **हृदि प्राणाः प्रतिष्ठिता इति प्राणप्रक्रमा*दिति ।** हृदि प्राणश्च ज्योतिश्चेति प्राणोपक्रमादित्युदाहरणीयम् । बहुवचनान्तप्राणशब्दस्य चक्षुरादिपरत्वेन हिरण्यगर्भपरत्वाऽभावात् । **सादृश्यरूपेति ।** यद्यपि सशिखं वपनं कृत्वा बहिःसूत्रं त्यजेद्बुध इत्येतस्योत्तरार्द्धे यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेदित्यस्मिन् पठितस्य ब्रह्मपरस्य सूत्रशब्दस्य सूत्रसादृश्यमूला गौणी वृत्तिर्वाच्या ।

येन सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।
तत्सूत्रं धारयेद्योगी योगवित्तत्त्वदर्शिवान् ॥

इत्यनन्तरमन्त्रानुरोधात् । तथापि बहिःसूत्रमित्यत्र सा न वाच्या विकारविकारिभावरूपसाक्षात्संबन्धमूलकसन्निकृष्टार्थलक्षणोपपत्तेः । ज्ञानशिखिनो ज्ञानयज्ञोपवीतिनः शिखा ज्ञानमयी यस्य उपवीतं च तन्मयमिति वाक्यशेषेण त्याज्यसूत्रस्योपवीतत्वावधारणाच्चेति तात्पर्य्यम् । **हृच्छन्दोक्तमिति ।**

हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः ।
हृदि प्राणश्च ज्योतिश्च त्रिवृत्सूत्रं च तद्विदुः ॥

इति श्लोके हृच्छब्दोक्तं ब्रह्म तच्छब्देन परामृश्य तस्य त्रिवृच्छब्देन त्रिवृत्कृतप्रपञ्चात्मत्वपरेण त्रिसूत्रत्वसंपादनादित्यर्थः । **यज्ञोपवीतसाध्ये-**

* प्राणोपक्रमादिति १–५ पु॰ पा॰ ।

ति* । मूत्रपुरीषकर्मभोजनादिप्रयुक्तं प्रायत्यमुच्छिष्टत्वं स्वापादिनिमित्तं तदशुचित्वम् उभयमपि यज्ञोपवीतं विना कृते ऽप्याचमने नापैति । विना यज्ञोपवीतेन आचान्तो ऽप्यशुचिर्भवेदित्यादिस्मरणात् । अत उच्छिष्टाऽशुचित्वनिवृत्तिर्यज्ञोपवीतसाध्येत्यर्थः । **एतेनेति** । यज्ञोपवीतकार्याऽशुचित्वनि- ४८६ । ११
वृत्तिकरत्वेनेत्यर्थः । **एकार्थत्वादिति** । तथा च बहिःसूत्रं त्यजेदित्यतोऽपि संन्यासस्य प्रकृतत्वं वक्तुं शक्यमित्यर्थः । **अपरमहंस इति** । औपनिषदस्य परमहंसविषययज्ञोपवीतादित्यागवचनस्य पर्युदासवृत्त्या नित्योदकी नित्ययज्ञोपवीतीत्यादिकर्मकाण्डगतयज्ञोपवीतादिविध्यन्वयेन तदेकवाक्यतेति भावः । **नित्यविधिभिरिति** । पुरुषार्थतया सर्वकर्मार्थतया च सदोपवीतादिधारणविधयो नित्यविधयः ते तद्धारणनिवृत्तितः† प्रत्यवायं कल्पयित्वा पुरुषं सदा तद्धारणे प्रवर्त्तयन्ति तेषु सत्सु निषेधः कथं प्रत्यवायापादिकां निवृत्तिं कारयेद् अतो निषेधो ऽभ्यवगन्तुं‡ न युक्त इत्यर्थः । ननु निषेधः प्रवृत्तौ प्रत्यवायं कल्पयित्वा निवर्त्तयतु न च प्रवर्त्तकशास्त्रेण विरोधस्तस्य सामान्यशास्त्रस्य निषेधशास्त्रविषयपरमहंसातिरिक्तविषयत्वेन व्यवस्थोपपत्तेरित्याशङ्क्याह **न च प्रवृत्ताविति** । परमहंसविषये ऽप्युपवीतादिधारणविधयः प्रवर्तन्ते न वा§ । प्रवर्त्तन्ते‖ चेत्कथमुपवीतादि निषेद्धुं शक्यम् । न हि शास्त्रप्राप्तस्य रागप्राप्तवत् सर्वथा निषेधोऽस्ति प्रापकशास्त्रस्याप्रामाण्यप्रसङ्गात् । विकल्पाऽभ्युपगतावष्टदोषदुष्टः¶ स एव दोषः । न प्रवर्त्तन्ते चेत्तत्राह **तथा सतीति** । निषेध्यप्राप्त्यभावे निषेधः सर्वथैव नात्मानमासादयेदित्यर्थः । प्रवर्तन्तइति पक्षे निषेधस्य विकल्पेन वोन्मेषो ऽस्ति सोऽपि नास्त्यस्मिन् पक्षइत्याशयेन सर्वनाशप्रसङ्गादित्युक्तम् । **तस्मात्पर्युदास इति** । न च पर्युदासपक्षे प्रकरणान्तरगतवा- ,, । २४
क्यशेषत्वमङ्गीकर्त्तव्यं ततो वरं विकल्प एवास्त्विति वाच्यम् । अयमेको दोषः पर्युदासे विकल्पे ऽष्टौ दोषा इति तस्यैव परिहरणीयत्वात् । दीक्षितो न जुहोति न तौ पशौ करोतीत्यनयोर्विकल्पपरिहारार्थं पर्युदासवृत्त्या

* साम्येतीति पा॰ २ पु॰ ।
† निवृत्ताविति १ पु॰ पा॰ ।
‡ अभ्युपगन्तुमित्युचितम् ।
§ विषयः प्रवर्तते न वेति २ पु॰ पा॰ ।
‖ प्रवर्तते इति २ पु॰ पा॰ । एवमग्रेपि ।
¶ दोषदुष्ट इति १ पु॰ पा॰ ।

ऽग्निहोत्रादिवाक्यपांशुकप्रकृतिवत् शब्दशेषत्वयोर्भट्टाचार्यैर्गुरुभिरपि अङ्गीकृतत्वाच्च । व्यवह्रियमाणेति । पराशरस्मृतिर्हि श्लोकरूपा द्वादशाध्यायी सर्वेषु देशेषु व्यवह्रियते तत्रैतद्वाक्यं दृश्यतइत्यर्थः ।

४८६ । २७ कल्पने चेति । यदि सामान्यतः संन्यासिविषये कल्प्यते तदा कुटीचकादिषु चारितार्थ्यं स्पष्टं विशेषतः परमहंसविषये तु कल्पनैव नोन्मज्जति प्रत्यक्षश्रुतिविरोधात् । सशिखमिति ब्रह्मोपनिषद्वचनं हि परमहंसविषयं योगमुत्तममास्थित इति श्रवणात् । सम्यग्ज्ञानसाधनानां संन्यासानां मध्ये पारमहंस्यमेव ह्युत्तमं साधनं सर्वकर्मत्यागेनानन्यव्यापारतया दृढचित्तैकाग्र्यसंभवात् । दण्डमाच्छादनं कौपीनं परिग्रहेत् शेषं विसृजेदित्यारुण्युपनिषद्वचनमपि परमहंसविषयम् । आरुणिः प्रजापतेर्लोकं जगाम तं गत्वोवाच केन भगवन् कर्माण्यशेषतो विसृजानीति* सर्वकर्मत्यागोपक्रमात् कुटीचकादिषु तदभावात् । अपि च तस्यामुपनिषदि अथातः परमहंसपरिव्राजकानामिति परमहंसमुपक्रम्य त्यजेत् पितरं पुत्रम् अग्न्युपवीतं कर्म कलत्रं यच्चान्यदपीहेत्याम्नानात् त्रिदण्डं कमण्डलुमित्यादिजाबालोपनिषद्वचनमपि परमहंसविषयम् । तत्र परमहंसा नाम संवर्तकारुणिश्वेतकेत्वित्याद्युपक्रमात् संन्यासेन देहत्यागं करोतीत्यन्तेन संन्यासवृत्तिकथनानन्तरं स परमहंसो नामेत्युपसंहाराच्च न दण्डं न शिखामित्यादिपरमहंसोपनिषद्वचनमप्ययोगिनां परमहंसानां को ऽयं मार्ग इति परमोपक्रमादेव परमहंसविषयमिति स्पष्टम् । अथ परिव्राडेकशाटीपरिहितो मुण्डोदरपात्र्यरण्यनित्यो भिक्षार्थं ग्रामं प्रविशेदासायं प्रदक्षिणेनाऽविचिकित्सन् सार्ववर्णिकं भैक्षचर्यम् अभिशस्तपतितवर्ज्जमयज्ञोपवीती शौचनिष्ठः काममेकं वैणवदण्डमाददीतेति मैत्रायणोपनिषद्वचनमपि परमहंसविषयमेव । मुण्डैकदण्डत्वलिङ्गात् । एवंभूताभिः प्रत्यक्षश्रुतिभिर्विरुद्धाः श्रूयमाणाः स्मृतयः सन्ति वेदप्रमाणा ह्येव यथा संन्यासविधायकप्रत्यक्षश्रुतिविरुद्धास्तन्निराकरणस्मृतयः । आपस्तम्बसूत्रे ह्यूर्ध्वरेतसामाश्रमाणां देवयानपथश्रवणादनुग्रहमात्रेण वृष्ट्यानयनापत्यदानादिशक्तिसद्भावाच्च प्राशस्त्यमस्तीति पूर्वपक्षं कृत्वा त्रयीविद्यवृद्धानां तु वेदाः प्रमाणमिति निष्ठा तत्र यानि श्रूयन्ते व्रीहियवपश्वाज्यपयःकपालपत्नीसंयुक्तान्युच्चैर्नीचैः कार्य-

* विसृजानीति २ पु॰ पा॰ ।

मिति यथोविरुद्ध आचारो ऽप्रमाणमिति मन्यतइति तेषामप्रामाणिकत्वेन निराकरणं कृतम् । गृहस्थधर्मेषु वर्तमानानामेव ब्रह्मलोक आश्रमान्तरं प्रशंसन्नपि प्रत्यवेतीत्यस्मिन्नर्थे ब्रह्मवचनमप्युदाहृतम् । यथोविद्यां ब्रह्मचर्य्यं प्रजातिं श्रद्धान्तपो यज्ञमनुप्रदानं यएतानि कुर्वते तैरिहत्सह स्म सोरजो भूत्वा ध्वंसते ऽन्यत्प्रशंसन्निति । तथा महाभारते कर्णादिवधनिर्विण्णं प्रव्रजनोद्युक्तं युधिष्ठिरं प्रति भ्रातॄणां द्रौपद्याः ऋषीणां भगवतश्च वचनानि संन्यासनिन्दापराणि बहूनि श्रूयन्ते ।

काषायधारणं मौण्ड्यं त्रिविष्टब्धं कमण्डलुम् ।
लिङ्गान्यन्नार्थमेतानि न मोक्षायेति मे मतिः ॥

इत्यादीनि । यदि प्रत्यक्षश्रुतिविरुद्धान्यपि स्मृतिवचनान्यपेक्ष्येरन् तदा संन्यास एव प्रत्याख्यायेत क्व तत्रोपवीतादिसदसद्भावचिन्ता । यद्युच्येत कर्मठानापातविरक्त्या प्रव्रजनोद्युक्तांस्ततो निवर्त्य कर्मस्वेव नितरां कर्त्तुमापस्तम्बसूत्रे संन्यासनिराकरणं युधिष्ठिरं राज्यपरिपालने प्रवर्त्तयितुं तन्निराकरणमित्येवं प्रत्यक्षसंन्यासविध्यविरोधेन तादृग्वचनजातं नीयतइति तदा पारमहंस्योपयुक्ततीव्रवैराग्यराहित्ये ऽपि तत्स्वीकरणप्रवृत्तान् कुटीचकादीन् यथापूर्वं स्वस्ववृत्ताववस्थापयितुं परमहंसानामपि शिखायज्ञोपवीतादिकमस्ति न कश्चिद्विशेष इति तत्तद्वृत्तिप्रशंसार्थत्वेन तान्यपि वचनानि नीयन्तां प्रत्यक्षश्रुतिविरोधस्य परिहरणीयत्वाऽविशेषात् ।

कर्मण्यधिकृता ये तु वैदिके ब्राह्मणादयः ।
एभिर्द्धार्य्यमिदं सूत्रं क्रियाङ्गं तद्धि तैः स्मृतम् ॥

इति ब्रह्मोपनिषद्वचनोपबृंहणार्थं व्यासस्मरणं यज्ञोपवीतं कर्माङ्गमित्यादि । यद्यपि परमहंसस्यापि श्रवणमननध्यानप्रणवजपभोजनाचमनादि कर्मास्तीति सर्वकर्मार्थतया विहितमुपवीतं तस्मात्प्राप्नोति तथापि तस्यात्मज्ञानोपवीतसत्त्वात् तेनैव तन्निर्वाहः । तथैव कौषीतकिब्राह्मणे प्रश्नोत्तराभ्यामुपपादितम् । तत्र हि किमस्य यज्ञोपवीतं का वा ऽस्य शिखा कथं वोपस्पर्शनमिति प्रश्नः । इदमेवास्य तद्यज्ञोपवीतं यदात्मज्ञानं विद्या शिखेत्याद्युत्तरम् । अत्रोपस्पर्शनग्रहणं श्रवणादीनामप्युपलक्षणं ज्ञानशिखिनो ज्ञानयज्ञोपवीतिन इत्यादिप्रागुदाहृतवचनतो ऽपि संन्यासिकर्मबाह्यशिखायज्ञोपवीता-

नपेक्षमित्यवधृतम् । अतस्तदितराश्रमकर्माङ्गत्वमेव बाह्ययज्ञोपवीतस्य परिशिष्यते तदभावात् परमहंसस्य न तदपेक्षेति भावः ।

के चन प्राक्तनमुपवीतं त्यक्त्वा नूतनं ग्राह्यं नखानि निकृत्य पुराणवस्त्रं यज्ञोपवीतं कमण्डलुं त्यक्त्वा नवानि गृहीत्वा ग्रामं प्रविशेदिति स्मरणादिति मन्यन्ते तन्मतनिरासार्थं वैयासिकं तत्त्यदृष्टान्तवचनमप्युदाहरति अग्निहोत्रेति । अग्निहोत्रविनाशो यजमानघातित्यादिना ऽग्निविनाशः । इष्ट्यन्तः परमेष्ठ्यन्तः । एवं च नूतनग्रहणस्मृतिर्बहूदकादिविषयेति भावः ।

४८१ । २० एकदण्डी त्रिदण्डीति* । (अत्र शिखी त्रिदण्डीति)† बहूदकादिविषयं मुण्डित एकदण्डीति परमहंसविषयं काषायमात्रधारिण इति यो मुख्यपरमहंसो दण्डमप्यनिच्छन् पामरजनसंकोचपरिहाराय कौपीनाच्छादनमात्रं धारयति तद्विषयम् । न च परमहंसस्यापि त्रिदण्डित्वं शङ्कनीयम् । जाबालोपनिषदि पारमहंस्यप्रवेशे त्रिदण्डं कमण्डलुमित्यादिना त्रिदण्डपरित्यागस्योक्तत्वात् । आरुण्युपनिषदि कुटीचको ब्रह्मचारी कुटुम्बं विसृजेत् (पात्रं विसृजेद् दण्डान् विसृजेदिति)‡ कुटीचकस्य पारमहंस्यप्रवेशे दण्डानिति बहुवचनेन त्रिदण्डपरित्यागमुक्त्वा अनन्तरं सखा मा गोपायेत्यादिकमेतं सो ऽश्मानमृच्छत्वित्यन्तं मन्त्रमुपादायान्तेन मन्त्रेण कृत्वोर्ध्वं वैणवं दण्डं कौपीनं परिग्रहेदिति तेन मन्त्रेण एकदण्डपरिग्रहस्योक्तत्वाच्च । स्कन्दपुराणे च

कौपीनाच्छादनं वस्त्रं कन्थां शीतनिवारिणीम् ।
अक्षमालां च गृह्णीयाद्वैणवं दण्डमव्रणम् ॥
परमहंस§स्त्रिदण्डं च रज्जुं गोवाल||निर्म्मिताम् ।
शिखां यज्ञोपवीतं च नित्यकर्म च संत्यजेत्¶ ॥

इति परमहंसस्य त्रिदण्डत्यागैकदण्डग्रहणयोरुक्तत्वाच्च । अथ परमपरिव्राजकलिङ्गं सर्वतः परिमोक्षमेके सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत् शिखायज्ञोपवीतत्रिदण्डकमण्डलुकपालानां त्यागीति विश्वामित्रेण तदूर्ध्वं यज्ञोपवीतं मन्त्रमाच्छादनं यष्टिं शिक्यं जल-

---

* त्रिदण्डी वेति १ पु. पा. ।
† ( ) एतन्मध्यगो ग्रन्थो नास्ति १ पु. ।
‡ ( ) एतदन्तर्गतग्रन्थस्थाने-दण्डान् विसृजेदिति पाठः १ पु. ।
§ परहंस इति २ पु. पा. ।
|| गोपालेति २ पु. पा. ।
¶ न त्यजेदिति २ पु. पा. ।

पवित्रं कमण्डलुं पात्रमित्येतानि वर्ज्जयित्वा ऽथैकदण्डकमण्डलुकपालाना-दत्ते* सखा मा गोपायेति बोधायनेन च परमहंसस्य त्रिदण्डत्यागैकद-ण्डग्रहणयोरुक्तत्वात् । एतेन परमहंसस्य त्रिदण्डालाभे एकदण्डग्रहणं कार्य्यमिति तयोर्मुख्याऽमुख्यतया विकल्पं कल्पयन्तो

नष्टे जलपवित्रे च त्रिदण्डे वा प्रमादतः ।
एकं तु वैणवं दण्डं पालाशं बैल्वमेव वा ।
गृहीत्वा विचरेत्तावद्यावल्लभ्यं त्रिदण्डकम् ॥

इति स्मृतिवचनमुदाहरन्तो निरस्ताः । जाबालोपनिषदि पारमहंस्य-प्रवेशे त्रिदण्डत्यागस्योक्तत्वात् । अनन्तरं यथाजातरूपधरो निष्परिग्रह इत्युक्तत्वेन पुनस्त्रिदण्डान्तरपरिग्रहानुमतेरनाशङ्कनीयत्वाच्च । आरुण्युपनि-षदि त्रिदण्डत्यागपूर्वकमेकदण्डग्रहणस्योक्तत्वाच्च ।

त्रिदण्डस्य परित्याग एकदण्डस्य धारणम् ।
एकस्मिन् दृश्यते वाक्ये तस्मादस्य प्रधानता ॥

इति व्यासस्मृतावारुण्युपनिषद्वचनावलम्बनेनैव परमहंसानामेकद-ण्डस्यामुख्यत्वशङ्काया निराकृतत्वाच्च । तस्मादमुख्यत्वस्मरणं कुटीचकादिवि-षयं योज्यम् । तथा सति पालाशं बैल्वमौदुम्बरं दण्डमजिनं मेखलां यज्ञो-पवीतं च त्यक्त्वेत्यारुण्युपनिषदुपसंहारवचनमपि धृतामुख्यैकदण्डकुटीचका-दिपारमहंस्यप्रवेशविषयतयोपपद्यते । नन्वस्तु शिखायज्ञोपवीतरहितैकदण्डा-दिकं परमहंसस्य मुख्यं तत्सन्निहितं† त्रिदण्डादिकमपि तस्य विकल्पेन मुख्यं भवन्न निवारयितुं शक्यम् । अन्यथा परमहंसविषयत्रिदण्डादिवचनानां निरा-लम्बनत्वापत्तेः । इन्द्रस्य वज्रोऽसीति वैणवान् दण्डान् दक्षिणे पाणौ धारयेद् एकं वा यद्येकं तदा सशिखं वपनं कृत्वा यज्ञोपवीतं त्यजेदिति मैत्रायणीयश्रुता-वेकदण्डी त्रिदण्डी वा मुण्डः शिखी वेत्यादिस्मृतिषु च विकल्पस्मरणात् । काम-मेकं त्ववैणवं दण्डमाददीतेति मैत्रायणीयश्रुतावेकदण्डविधौ कामशब्दोक्त्या यथाजातरूपधरः प्राचीमुदीचीं वा दिशं प्रव्रजेत्तिष्ठ भगवन् दण्डं गृहाणे-त्यध्वर्युणा दत्तं मस्तकप्रमाणं सन्नतमृजुं सौम्यमेकं वैणवं दण्डमिन्द्रस्य वज्रो ऽसि सखा मा गोपायेति यदीच्छेद् दधीतेति लोकाक्षिगृह्ये यदीच्छे-

* एकदण्डमादत्ते इति १ पु॰ पा॰ । † तत्सन्निहितमिति १ पु॰ पा॰ ।

दिति शब्देन वेणवदण्डस्य पाक्षिकतास्फुटीकरणाच्च । त्रिदण्डपरित्यागादिवचनानामेकदण्डादिपक्षविषयतयोपपत्तेश्च । तस्मात्पारमहंस्ये पाक्षिकतया ऽपि प्रविशत् त्रिदण्डादिकं न प्रत्याख्यातुं शक्यमितीदं पारमहंस्ये यथा कथं चित्त्रिदण्डादिसद्भावं व्यवस्थापयितुं धृतव्यसनानां ब्रह्मास्त्रमिति चेदुच्यते । विकल्प एवाष्टदोषदुष्टः सति गत्यन्तरे न युक्तः । नतरां त्रिदण्डैकदण्डादिकयोर्गुरुलघुनोः समविकल्पः । नतमामेकदण्डाद्यसंभवे त्रिदण्डादिकमपि मुख्यामुख्यविकल्पः । तस्मात्केनापि प्रकारेण व्यवस्थितविकल्पासंभवाद् वाशब्दयुक्तान्युदाहृतश्रुतिस्मृतिवचनानि प्रागुदाहृतबहुश्रुतिस्मृत्यनुसारेण कुटीचकादिविषये परमहंसविषये च व्यवस्थितविकल्पानि योज्यानि । मैत्रायणीयश्रुतौ कामशब्दस्य लोकावगृह्ये यदीच्छेदिति शब्दस्य चाग्रहणेन विकल्पार्थतैव स्वरसतः प्रतीयते तत्र चाग्रहणपक्षे मुख्यविद्वत्परमहंसविषयं पक्षान्तरं मुख्यविविदुषुपरमहंसविषयमिति वचनानुसारेण व्यवतिष्ठते । परमहंसविषये त्रिदण्डवचनं यदि क्व चित्क्व चित्स्यात् तत्सर्वं वाग्दण्डादिविषयम् । तथाह मनुः ॥

वाग्दण्डो ऽथ मनोदण्डः कर्मदण्डश्च ते त्रयः ।
यस्यैते नियता बुद्धौ त्रिदण्डीति स उच्यते ॥ इति ।

दक्षश्चेमं श्लोकं पठित्वा वाग्दण्डादिलक्षणमाह

वाग्दण्डो मौनमातिष्ठेत्कर्मदण्डस्त्वनीहता ।
मानसस्य तु दण्डस्य प्राणायामो विधीयते ॥ इति ।

एवं च चतुर्धा भिक्षवो विप्राः सर्वे चैव त्रिदण्डिन इति त्रिदण्डस्य सर्वसंन्याससाधारण्यवचनान्यपि वाग्दण्डादिविषयत्वेन व्याख्यातानि । युधिष्ठिरधनञ्जययोः परिव्राजकवेषग्रहणे यज्ञोपवीतादिसद्भावो राजगृहेषु चिरनिवासार्थितया कुटीचकाद्यनुकरणाद् यज्ञोपवीताद्यत्यागेन कुटीचकाद्यनुकरणे सम्भवति स्वाश्रमविरुद्धेन तत्त्यागेन परमहंसानुकरणाऽनौचित्यात् । एवं दशाननस्यापि कुटीचकाद्यनुकरणादेव यज्ञोपवीतादिसद्भावो राजधर्मप्रशंसार्थमिति राजधर्मप्रशंसया युधिष्ठिरं राज्ये प्रवर्त्तयितुं संन्यासाश्रमनिन्दायां मुण्डा निस्तन्तव इति शिखायज्ञोपवीतराहित्येन संन्यासाश्रमपरामर्शः कृतः । तेन तादृग्रूप्यं तस्याश्रमस्यावसीयते । यथा ।

अग्निहोत्रं त्रयो वेदास्त्रिपुण्ड्रं भस्मकुण्डनम्* ।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः ॥

इति बृहस्पतिमतं प्रशंसितुं वैदिकनिन्दायामग्निहोत्रादिपरामर्शेन वैदिकमार्गस्य तादुर्म्यमिति भावः ।

सतामप्यविरोधि यादिति । सन्तः ब्रह्मसाक्षात्कारवन्तः । अस्ति ४८८ । ३
ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति श्रुतेस्तेषामद्वितीयब्रह्मसाक्षात्कारनिरस्तसमस्तकर्तृकर्मक्रियादिभेदप्रपञ्चानामप्यविरोधि नैष्कर्म्यादिति भावः । असतामप्यविरोधीति क्व चित्पाठः । तत्रासन्तः पापिनः ये‡ तेषामप्यविरोधि सकलपापक्षयहेतुत्वादिति भावः । **यजुःशाखायाम्§** । यजुः शाखाख्यवेदशाखाविशेषे । परब्रह्मोदितं न्यास इति ब्रह्मेत्यादिश्रुतौ । **तत्तदागमेति ।** आगमयन्त्यर्थानित्यागमाः प्रमाणानि ते तु श्रुतिवाक्यादय आगमास्तेषां कर्माणि तानि तत्तदागमानि तान्याचरन्तीति तत्तदागमाचाराः कर्मण्यणिति कर्मण्युपपदे धातोरण्प्रत्ययः । यज्ञदानतपःप्रभृतिबहुविधकर्मानुष्ठानशुद्धान्तःकरणास्तैश्चेष्टितमनुष्ठितमित्यर्थः । चेष्टितमित्यनेन बहवोऽत्र प्रवृत्ता इति सूच्यते । **ब्रह्माराधनमुख्यानां** परब्रह्मोपासनाप्रभृतीनां तीव्रतेजसां महाफलानां व्रतानां परमं तेभ्यः श्रेष्ठमित्यन्वयः । दण्डहस्तास्तु संज्ञाता हस्तगतदण्डेनैव लिङ्गेन परमहंसा इति ज्ञायमानाः पुरा देहान्तरे मया चीर्णं न तु तस्मिन् देहे गृहीतं पारमहंस्यत्यागेन पुनराश्रमान्तरपरिग्रहासंभवात् शिखायज्ञोपवीते न त्यक्ते तत्कथमसौ द्विज इति मूर्खैर्देवलोकेषु देवदानवैः पूजितोऽपि स निन्द्यतइत्यन्वयः । मूर्खैरित्यध्याहर्त्तव्यम् । ननु जाबालोपनिषदि परमहंसानां संवर्त्तारुणिश्वेतकेतुदुर्वाससृभुनिदाघजडभरतदत्तात्रेयरैवतकप्रभृतय इति दुर्वाससः परमहंसेषु परिगणनं कृतं तस्य च हंसडिम्भकोपाख्याने ताभ्यां छिन्नाः शिक्यादयो वर्णिताः । अतः शिक्यतत्सहचरितचिदण्डपवित्रादिकं परमहंसस्याप्यस्तीत्यवसीयते इत्याशङ्क्याह **पराक्रान्तं चेति ।** अयमाशयः । तस्मिन्नुपाख्याने हंसाः ४८९ । २

---

* त्रिदण्डं भस्मगुण्ठनमिति पाठान्तरम् ।
† मूले ऽविरोधर्यादिति प्रमादान्मुद्रितं तदेवं शोध्यम् ।
‡ ये इति नास्ति १ पु० । § यज्ञशाखायामिति २ पु० पा० ।

परमहंसाश्चेति दुर्वाससमनुवर्तमाना हंसादयो ऽपि यतयो वर्णिताः तदीयशिक्यादिविषयं भविष्यति शिक्यच्छेदादिवचनम् । किंच श्वेतकेतुप्रभृतयो ऽपि तत्र परमहंसेषु परिगणिताः । न च तेषामाश्रमेण पारमहंस्यमस्ति ब्रह्मचर्यादिश्रवणात् । अतस्तत्त्वसाक्षात्कारवत्त्वेन वृत्त्या पारमहंस्यमुपपादनीयम् । एवमेव दुर्वाससो ऽपि भविष्यति । अत एव तस्य तत्र तत्र राजगृहादिषु चिरनिवासो ऽपि पुराणेषु प्रतिपाद्यते इत्यादिपरिहार ऊह्य इति* ॥

४८९ । ३ **स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥**

ननु ब्रह्मविद्यासाधनविचारे उद्गीथविद्याविषयविचारस्य न पादसङ्गतिर्नापि शास्त्राध्यायसङ्गतिस्तदभावे पूर्वाधिकरणसंगतिमात्रमप्रयोजकमित्याशङ्क्य कैमुतिकन्यायेन पुरुषार्थाधिकरणार्थदृढीकरणोपयोगमाह **यदा रसतमत्वादीनामिति** । विद्याङ्गकर्मवीर्यवत्तरत्वोपयुक्तत्वाद्विद्यापेक्षितचित्तैकाग्र्यशिखरारोहणसोपानत्वाद् उपनिषदाम्नातत्वेन प्रत्यासन्नत्वात् शास्त्रान्तरेष्वविचारितत्वाच्चात्र विचार इति प्राणविद्यादिसाधारणायां संगतौ स्थितायामियमस्याधिकरणस्य वैशेषिकी सङ्गतिरुक्ता ।

चित्पतिस्त्वेति । ज्योतिष्टोमे चित्पतिस्त्वेत्यादयस्त्रयो मन्त्रा यजमानपावनार्था आम्नाताः । तत्राच्छिद्रेणेत्यादिः शेषः किमव्यवहितेनैव तृतीयमन्त्रेण संबध्यते उत सर्वैरिति संदेहे मन्त्राणां स्वतो निराकाङ्क्षत्वादच्छिद्रेणेत्यादेः क्रियारहितस्य साकाङ्क्षत्वे ऽप्यव्यवहितान्वयेन निर्वृतेस्तेनैव संबध्यत इति प्रापय्य राद्धान्तितं भेदलक्षणे । ज्योतिष्टोमप्रकरणाम्नानात्तदपूर्वसाधनपवनक्रियान्वयद्वारा तदपूर्वान्वयो वाच्यः । पवनक्रियान्वयश्च तस्याच्छिद्रेणेत्यादितृतीयान्तपदोपात्ततत्करणप्रकाशनद्वारा निर्वाह्यः । पवनक्रियायाश्चैकैव त्रिभिः पवयतीति श्रुतिबलात् परं विकल्पाहाणामपि तत्प्रकाशकमन्त्राणां समुच्चयस्तथा च मन्त्रभेदे ऽपि शेषिण्याः पवनक्रियाया एकत्वात् करणद्वारा तत्प्रकाशनार्थः शेषः सर्वत्रानुषज्यते । प्रधानानुसारित्वाद् गुणस्येति । **अच्छिद्रेणेत्येषो ऽर्थवाद इति** । मन्त्रैकदेशत्वे ऽप्यश्विनोर्बाहुभ्यामितिवदसमवेतार्थवादतोक्ता । **वैश्वदेव इति** । वैश्वदेववरुणप्रघाससाकमेधसुनासीरीयाख्ये पर्वचतुष्टययुक्ते चातुर्मास्ये वैश्वदेविकानामाग्नेयादीनां

" । १९ (margin reference beside the line beginning "स्येति")

* अत्र द्वितीयं परामर्शाधिकरणं पूर्णम् ।

पश्चूनां हविषां यद् ब्राह्मणं तस्य वारुणप्रघासिकेष्वाग्नेयादिपञ्चसु अतिदेशार्थं
प्रवृत्तमेतद् ब्राह्मणान्येवेति वचनं वार्षघ्राणि वा एतानि हवींषीत्यादि तदर्थवा-
दानां नव प्रयाजा इत्यादितदङ्गविधीनां चातिदेशिकमिति सप्तमे निर्णीतम् ।
सन्निहितविध्यभावाङ्गीकारेणेति । एतेन रमतमत्वाद्युक्तिः सन्निहितो-
पासनविधिस्तुत्यर्थेति पूर्वपक्षे कर्तुं शक्ये किमिति व्यवहितोद्गीथादिस्तुत्य-
र्थेति सूत्रभाष्ययोः पूर्वपक्षः कृत इत्याशङ्कायाः सन्निहितविध्यभावेऽपि
स्तुत्यर्थतयोपपादयितुं शक्यतइति न्यायव्युत्पादनार्थं कृत्वाचिन्तया तथा
पूर्वपक्षः कृत इति परिहारो यद्यत्र सन्निहितोपासनाविधिर्नास्तीति टीकाग्र-
न्थेन कृत्वाचिन्तात्वप्रदर्शकेन सूचितः स्फुटीकृतः । भावशब्दाच्चेति सूत्रं च
कृत्वाचिन्तोद्घाटनार्थमिति द्रष्टव्यम् । अस्ति तु तदित्यतिरेके परिहार इति
गुरुग्रन्थस्यार्थं तद्व्याख्येयभाष्यतात्पर्यकथनपूर्वकं विशदयति **विधिनैवेति ।**

यथा लोकइति । ननु लोके पटो भवतीति पदद्वयानवगतो ४९० ।
रक्तिमगुणरूपः कश्चन विशेषो रक्तपदेन बोध्यते तद्बोधश्च रक्तपटदिदृक्षो-
पादित्सावतां प्रवृत्तौ तज्जिहासावतां निवृत्तौ चोपयुज्यतइति युक्ता तत्रा-
काङ्क्षा इह तु स्तुतिनिन्दापदैर्बोध्यं कंचिद्विशेषं न पश्यामः । प्राशस्त्या-
प्राशस्त्यमिति चेत् तदेव किमिति विशिष्य न जानीमः । न च तद्बोधः
प्रवृत्तिनिवृत्त्युपयोगी । विधिनिषेधलभ्येष्टानिष्टसाधनताबोधादेव तदुभयोप-
पत्तेः । न च तदुभयानुपयोगि शास्त्रं भवतीति चेत् । अत्राहुः । बलवदनि-
ष्टाननुबन्धित्वं प्राशस्त्यं तदपि प्रवृत्त्युपयोगि । सत्यपीष्टसाधनताज्ञाने बलव-
दनिष्टानुबन्धित्वेनावगते सविषान्नभोजनादावप्रवृत्तेः बलवदनिष्टाननुबन्धि-
त्वप्राशस्त्यं तदपि प्रवृत्त्युपयोगि सत्यप्यनिष्टसाधनताज्ञाने बलवदनिष्टाननु-
बन्धित्वेनावगते यागादौ प्रवृत्तेः । तदुभयं यद्यपि विधिनिषेधाभ्यामाक्षेप्तुं
शक्यम् अन्यथा तयोः प्रवर्तकत्वनिवर्तकत्वानुपपत्तेः तथापि विधिनिषेधौ
सत्सु स्तुतिनिन्दापदेषु तत एव तल्लाभो भविष्यतीत्याक्षेपगौरवमस-
हमानौ तत्सन्निधानोत्थापिताकाङ्क्षया तदेकवाक्यतामनुभवतः । यत्र वस-
न्तादिवाक्ये तेषामभावः तत्र स्वयमेव तदाक्षिपत इति । अन्ये तु
विधिनिषेधवाक्यैः कर्मणामिष्टानिष्टसाधनत्वबोधनं तद्योग्यताज्ञानमपे-
क्षते तदर्थवादाश्च विधेयनिषेध्यकर्मसंबन्धिगुणदोषान् कीर्तयन्तस्तेषां

कर्मणामिष्टानिष्टसाधनत्वयोग्यताबोधं जनयन्ति । इष्टसाधनत्वयोग्यत्वमेव प्राशस्त्यम् अनिष्टसाधनत्वयोग्यत्वमेव च निन्दा । यद्यपि योग्यताज्ञानं ज्ञानकारणं यद्यपि च वेदप्रामाण्यदृढावधारणाद् न्यायलभ्ये स्वस्वार्थे सर्वाणि वैदिकवाक्यानि योग्यान्येवेति सामान्यतो योग्यतानिश्चयः सम्भवति तथापि सत्स्वर्थवादेषु तज्जन्यो योग्यतानिश्चयो विधिनिषेधवाक्यार्थबोधकारणमिति कल्पतरुरिति वदन्ति । **अर्थवादस्य साकाङ्क्षत्वादिति ।** गुणस्य प्रधानानुवर्तनाकाङ्क्षासत्त्वादिति भावः ।

४९० । ९ **न त्विह रसतमत्वादेरिति ।** ननु रसतमत्वादेरुद्गीथविध्यनपेक्षायामप्युद्गीथादिविधेः स्तुतिप्रकर्षलाभाय रसतमत्वाद्यपेक्षया तदन्वयः स्याद् अत एव सुकृतदुष्कृतयोर्हानोपायने यत्र श्रुते केवलोपायनं वा यत्र श्रुतं तत्रोपायनस्य तद्विद्यान्वयेन निरपेक्षत्वे ऽपि यत्र निर्गुणविद्यायां केवलहानं श्रुतम् अश्व इव रोमाणि विधूय पापमिति तत्रापि स्तुतिप्रकर्षलाभाय विद्यापेक्षयोपायनशब्दस्यान्वयो भाष्यकारैरुक्तः सत्यकामत्वादीनां च दहरोपासनायामुपास्यगुणतया ऽन्वयेन निराकाङ्क्षाणां निर्गुणविद्यायामपि स्तुतिप्रकर्षलाभायान्वयो ऽङ्गीकृत इति चेत् । उच्यते । हानोपायनाधिकरणे* स्तुतिप्रकर्षो भाष्यकारैरानुषङ्गिकप्रयोजनतयोक्तः । न तूपायनशब्दान्वये प्रमाणतया प्रमाणं तत्रावश्यकं कुतश्चिद्धीनं किं चिदुपैतीति हानस्योपायनापेक्षा कुतश्चिद्धीनमपि सुकृतदुष्कृतं फलजननाय कञ्चिदाश्रयमपेक्षत इति तदपेक्षा चेत्युभयमेव कामाद्यधिकरणे† हृदयायतनत्वादिसाम्येन विद्याद्वयाम्नानगुणसामर्थ्येन चोपस्थापितैर्विद्यान्तरगुणैः स्वत एव भवतः स्तुतिप्रकर्षस्य त्यागो न कार्य इति सो ऽङ्गीकृतः तथेहापि कर्मकाण्डगतोद्गीथादिविधिषु स्वत एव रसतमत्वाद्युपस्थितिर्वा रसतमत्वादिश्रवणेषूद्गीथादिविध्युपस्थितिर्वा भवति चेदस्तु रसतमत्वादिनोद्गीथादिस्तुतिरपि । न चैवं सिद्धान्तस्य पूर्वपक्षाभेदः । रसतमत्वादीनां केवलस्तुत्यर्थत्वेन पूर्वपक्षः उपास्यत्वसद्भावेन सिद्धान्त इति भेदात् । अत एव सूत्रे पूर्वे-

---

* व्या· सू· अ· ३ पा· ३ सू· २६ । † व्या· सू· अ· ३ पा· ३ सू· ३९ ।

पक्षप्रदर्शने स्तुतिमात्रमिति मात्रशब्देन केवलस्तुत्यर्थतया पूर्वपक्ष इति दर्शितम् । पूर्वपक्षनिराकरणार्थेन च नञा न स्तुतिमात्रमित्येतदर्थकेनापूर्वत्वादुपास्यस्य सतः स्तुत्यर्थत्वमपि भवति चेद् भवत्वित्यङ्गीकृतम् । अत एव च सन्निहितोपासनाविधिसद्भावे ऽपि व्यवहितोद्गीथादिविधिस्तुत्यर्थतया पूर्वपक्षः सूत्रभाष्ययोर्दर्शितः । तथा पूर्वपक्षः कामाद्यधिकरणन्यायेनोद्गीथादिविधिस्तावकत्वसिद्धौ सन्निहितोपासनाविध्यन्वयस्यापि क्लृप्तेन स्तावकत्वेनैवोपपत्तेः सत्यकामादिष्वेतांश्च सत्यान् कामानितिवदुपास्यगुणतया ऽप्यन्वये विशेषवचनाभावात् केवलस्तुत्यर्थत्वमेवेति पूर्वपक्षः सुदृढो भवति । सन्निहितोपासनाविधिस्तुत्यर्थतयैव पूर्वपक्षकरणे तु न तथा पूर्वपक्षः सुदृढः स्यात् । अन्यत्र स्तुत्यर्थत्वेन क्लृप्त्यभावे उपासनाविधिसन्निधानादुपास्यगुणतयैवान्वयौचित्यात् । वेदान्तेषु हि निर्गुणप्रकरणाभावे गुणाम्नानस्योपासनार्थत्वमेवौत्सर्गिकम् । अत एवानारभ्याधीतानां सम्भूत्यादिगुणानामुपासनाविधिसन्निधिरहितानामप्युपासनार्थत्वं सिद्धवत्कृत्य किं तेषां क्लृप्तशाण्डिल्यविद्याद्यन्वयः उत तत्रैव कल्प्येन विद्यान्तरेणान्वय इति विशेषचिन्ता सम्भूत्यधिकरणे कृता । इह क्लृप्तोपासनाविधिश्रवणे तदुपास्यगुणतया ऽन्वयः कथं प्रत्याख्यायेत यद्येषामेव रसतमत्वादीनामन्यत्र स्तावकतया ऽन्वयक्लृप्तिरुत्सर्गबाधकतया नापेक्ष्येत । यद्येवं पूर्वपक्षः कथं तर्हि सिद्धान्तः । सतोरपि ह्यपूर्वत्वं भावशब्दयोः सत्यकामादिगुणानामन्यत्र स्तुत्यर्थादीनां सन्निहितविधावुपास्यगुणतयान्वये प्रतिप्रसवापेक्षा दृष्टा नैवमिह प्रतिप्रसवोक्तिः । तदभावे कथमेकस्य सन्निहितविधावुपास्त्यर्थत्वमन्यत्र स्तुत्यर्थत्वं च स्यात् । नैष दोषः । स एव प्रतिप्रसव एकस्य तथोभयार्थत्वसम्भवे लिङ्गदर्शनतया प्रकृतसिद्धान्तोपयोगी भविष्यति । अस्मिन् पक्षे न कृत्वाचिन्तेति न तदुद्घाटनार्थं सूत्रं किं तु यद्यत्र सन्निहितोपासनाविधिर्न श्रूयते तदा ऽन्यत्र केवलस्तुत्यर्थत्वं शङ्कितमपि न तदश्रवणमस्तीति प्रदर्शनार्थमिति द्रष्टव्यम् ।

न हि धात्वर्थभेदइति । कृभ्वस्तिरूपधात्वर्थभेदे कुर्यात् क्रियेतेति लकारार्थकर्तृकर्मरूपकारकभेदे वा विधिलक्षणं न भिद्यते विधिनिमन्त्रणादिसूत्रेषु लिङाद्यर्थतयोक्तस्य विधेस्तद्भेदे ऽपि सर्वत्रैकरूप्यस्य वक्तव्यत्वादित्यर्थः । न्यायविस्मरणमयुक्तमितीदमुपलक्षणं भाष्यकारैरुपासीतेत्यादयो

४६० । १५

विधिशब्दा इत्युक्ता तत्र संमतित्वेन कुर्यात् क्रियेतेत्यादिविधित्वप्रतिपा-
४९० । १६ दकवचनोदाहरणमप्ययुक्तमिति शङ्कान्तरमपि द्रष्टव्यम् । **विधिलक्षणं तावदाहेति ।** इष्टसाधनत्वं विधिः । तच्च लिङाद्याकारेणाख्यातवा-च्यमाख्यातसामान्याकारेण तद्वाच्यायां पुरुषप्रयत्नरूपायां भावनायामन्वेतीति । यथा पशुना यजेतेत्यत्र सुब्विभक्तिरूपेण तृतीयावाच्ये करणकारके एकवचनरूपेण तद्वाच्यमेकत्वमिति भावः । **इष्टसाधनत्वं विधिरिति** स्वमतमुक्तम् । केचित्तु प्रवर्तकः खलु विधिः स तु वैदिको लिङादिशब्द इति स एव विधिरित्याहुः । अन्ये तु लिङादिशब्दमात्रस्य प्रवर्तकत्वे अनवगतार्थस्यापि प्रवर्तकत्वप्रसङ्गात् तदर्थो नियोगः प्रवर्तकः स विधिरिति वदन्ति । अपरे तु कल्प्यापूर्वरूपस्य नियोगस्य लिङादिवाच्यत्वाभावात्तद्वाच्या शब्दभावना प्रवर्तिका सा विधिरिति भणन्ति । शब्दभावना हि शब्दव्यापाररूपा ऽभिमता सा न तावदभिधाव्यापाररूपा घटादिशब्दाभिधावदर्थबोधानुकूलशब्दव्यापाररूपायाः स्वयं तदर्थत्वाभावात् । नापि शब्दभावनापरपर्यायं लिङादिवाच्यं शब्दस्यैव व्यापारान्तरं कल्पनीयं तत्कल्पनायां प्रमाणाभावात् । प्रवर्तकतया लोकानुभवसिद्धस्येष्टसाधनत्वस्यैव लिङाद्यर्थत्वोपपत्तेरित्यमुमर्थं शङ्कोद्घाटनपूर्वकं सूचयति **ननु शब्द एवेति ।** कृञ् चेत्यनुक्रियमाणरूपापरिज्ञानपरिहारार्थं ञकारान्तादेव विभक्तिः कृता । **उदाहृतवानिति ।** कुर्यात् क्रियेतेति श्लोककृदिति शेषः । ननु सन्तु कृभ्वस्तयो भावनासामान्यवचनाः तथापि भावनागतेष्टसाधनत्वरूपपरिज्ञानार्थं सर्वधात्वर्थानुगतभावनायामुदाहर्तव्यायां किमिति कृभ्वस्तीनामेवोदाहरणमित्याशङ्कानिराकरणाय प्रवृत्तं सामान्योक्ताविति ग्रन्थं व्याचष्टे **यद्यपि धातव इति । सर्वत्र व्याप्यार्थमिति ।** पचत्याद्यनन्ताख्यातपदोदाहरणासम्भवात् सामान्योदाहरणे तत एव सर्वविशेषानुगतिरवगन्तुं शक्यत इति लाघवार्थं सामान्योदाहरणमित्यर्थः । अतो ऽस्मच्छ्लोकस्योदाहरणं भाष्यकारीयमपि न प्रकृते ऽसङ्गतमिति भावः । ननु कृभ्वस्तयो यदि भावनावाचिनः तदा कुर्यादित्याख्यातैः किमभिधी-
९१ । २५ यत इत्याकाङ्क्षायामाह **एतद्धातुगतेति ।** तत्र लिङाद्यर्थाकारवाच्यमिष्टसाधनत्वमेव भावनान्वितमाख्याताभिधेयमित्यर्थः । आख्याताकारेण तु प्रकृत्यर्थभूतैव भावना प्रत्ययेनाप्यनूद्यते द्वावित्यत्र द्वित्वसंख्येव । **न तु प्रतिधा-**

त्विति । कृभ्वस्तिषु धातुभेदेन वा कर्तृकर्मलकारकृद्रूपप्रत्ययभेदेन वा
भावनाभेदो नास्तीत्यर्थः ।

कृदन्तत्वेन द्रव्याभिधायित्वादिति । आख्यातानि न द्रव्य- ४९० । २७
पर्यन्तानि किं तु भावनामात्रनिष्ठानि तत्र कुर्यादित्यादौ कर्तरि प्रयोगे भाव-
नाक्षिप्तस्य कर्तुरन्वयः स्वर्गकामः कुर्यादिति । क्रियेतेत्यादौ कर्मणि प्रयोगे
तदाक्षिप्तस्य कर्मणो ऽन्वयः पाकः क्रियेतेति । ननु कर्तृकर्मणी लकारवाच्ये
तयोस्तिङा ऽनभिहितत्वे ऽपि तत्संख्यायास्तिङा ऽभिहितत्वाद् यदनभिहि-
ताधिकारविहिते द्वितीयातृतीये न भवत इति स्वर्गवास इति पाक इति
च प्रातिपदिकार्थमात्रविहिता प्रथमा कृत्प्रत्ययास्तु कर्तृकर्मादिषु विहिताः न
केवलं भावनावाचिनः किं तु भावनोपसर्ज्जनकर्तृकर्मादिका एकपर्यन्ताः ।
न चाख्यातानामपि तत्पर्य्यन्तत्वं स्यात् पक्ता चैत्रः पक्तव्य ओदन इतिवत्
पचति चैत्रः पच्यते ओदन इति कर्तृकर्मकारकाधिष्ठानवाचिनां सामानाधि-
करण्याविशेषादिति शङ्कनीयम् । भावप्रधानमाख्यातमिति स्मृत्यनुसारेण
आख्यातानां भावनाप्राधान्याङ्गीकारात्तथात्वे ऽप्याख्यातार्थभावनायाः कर्तृ-
कर्माक्षेपकतया तदाक्षिप्तकर्त्रादि(सामानाधिकरण्येन पचति चैत्र इत्यादिप्र-
योगः । वार्त्तिककारास्तु यथाख्यातेषु भावनया कर्तृकर्माक्षेपः एवं कृदन्तेषु
कर्त्रादि)* कारकैर्भावनाक्षेप इति मन्यन्ते । यथाहुः । यथैव भावनाप्रधान-
त्वादाख्यातेषु तत्सम्बन्धादेव गुणभूतकारकप्रतीतिसिद्धेर्न कर्तृकर्मणोरभिधानं
भविष्यति एवं कर्त्राद्यभिधानादेव तदन्यथानुपपत्त्या भावनासिद्धेरनभिधानं
गम्यमानापेक्षयैव च सामानाधिकरण्यमिति ।

ननु भवनभावने प्रयोज्यप्रयोजकव्यापारौ घटो भवति तं कुलालो
भावयतीति विवरणाद् अतः कृभ्वस्तयो भावनावाचिन इत्ययुक्तमित्याशङ्क्य
निराकरोति **यद्यपीति** । अस्ति तावदस्तिभवत्योरपि भावना सा क्व चिद्भवि-
तृनिष्ठा क्व चिदन्यनिष्ठा दण्डी भवेदित्यत्र भवितृनिष्ठा तस्मात्प्रायणीयस्याह्ना ,, । २८
ऋत्विजा भवितव्यमित्यत्र कर्मसंबन्धनिमित्तऋत्विग्भावनारूपवरणक्रियाकर्तृ-
यजमाननिष्ठा । तथा च अस्तिभवत्योरपि भावनासद्भावमाक्षेण करोतिवद्भावना-

---

* ( ) एतन्मध्यस्थो ग्रन्थस्त्रुटितः १ पु॰ ।

षाचित्वमुक्तम् । **तदाहेति ।** कर्तृकर्मकारकभेदे ऽपि भावनैक्यमाहेत्यर्थः ।
४९१ । ४ **भ्वादेशादिरिति ।** आर्धधातुकविषये अस्तेर्भूरित्ययमादेशो विहितः । अतो भवितव्यं भूयेतेत्युदाहरणद्वयमस्तिधातुसाधारणमित्यर्थः । सार्वधातुकविषये स्यादित्युदाहरणं श्लोके ऽस्तीति तन्नोदाहृतमिति भावः । **आत्ति-शकर्म्मिका भावनेति ।** यद्यपि भवतेरस्तेश्चाकर्मकत्वाद् भवितव्यमिति भावे तव्यप्रत्ययः भूयेतेति च भावे लकारः तथापि यदर्थे भवनक्रियाश्रिता भावना सकर्म्मिका तस्याश्च दण्डिनेति तृतीयोपात्तो भवनक्रियाकर्त्तैव कर्म्म तस्य स्वरूपेण सिद्धत्वे ऽपि दण्डित्वाकारेण साध्यत्वात् । **भवतिरस्तिश्चेति ।** तथा च पर्यायत्वाद् भवत्युदाहरणेनैव चारितार्थ्यमित्यस्त्युदाहरणं न कार्यमिति शङ्कार्थः । भूतानां पृथिव्याश्रितानां पृथिवी रसः उत्कृष्टा पृथिव्या अप्स्वोतप्रोतताया आपो रसः अपां तत्कार्यभूता ओषधय ओषधीनां तत्परिणामः पुरुषः पुरुषस्य वाक्प्रधानस्य वाग्रसः वाच ऋग् रसः वाङ्मध्ये सारभूतत्वादृचः साम रसः तत्परिष्कारकत्वात् साम्न उद्गीथ उद्गीथावयव ओँकार आदिभूतो रस इत्येवं पृथिव्याद्युत्कर्षतारतम्यपर्यवसानभूमित्वं रसतमत्वम् । **परमात्मप्रतीकत्वादिति ।** प्रणवे प्रतीके परमात्मदृष्ट्योपासनं शैब्यप्रश्नप्रसिद्धम् । **अर्द्धं स्थानमिति ।** अथ ह गौतमो राज्ञोऽर्धमेयायेत्यादिश्रुतिषु अर्धशब्दः स्थाने प्रसिद्धः । तदर्हतीति यत्प्रत्यये ब्रह्मस्थानार्ह इत्यस्य ब्रह्मतुल्य इत्यर्थपर्यवसाने सति केनाकारेण तौल्यमित्याकाङ्क्षाया-
,, । १६ माह **ब्रह्मवदुपास्य इति ।** ब्रह्मनामत्वाच्च ब्रह्मवदुपास्यता । ननु परमः परार्ध्य इत्येतत् तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्या इत्येतच्च स्तुत्यर्थमिति संप्रतिपन्नं तथा रसतमत्वमपि किं न स्यात् । न ह्याप्तिसमृद्धिगुणयोर्वेदने यथा आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते इति फलवचनं नैवं रसतमत्वस्य वेदने किं चित्फलवचनमस्तीति चेदुच्यते । परमत्वं परार्द्ध्यत्वं त्रयीविद्यासाध्यसोमयागाङ्गस्तोत्रशस्त्राश्रवणप्रवर्तकत्वं चोङ्कारसामान्यस्य गुणः तत्त्विहोपास्यस्योद्गीथावयवोङ्कारस्यैव गुणः आश्रवणप्रवर्तकत्वादेस्तत्राभावात्तस्मादतद्गुणत्वादुपास्यगुणतया ऽन्वयो न संभवति । स्तुतिद्वारतया त्वन्वयः संभवति । अन्यदीयगुणकीर्तनस्यापि परंपरासंबन्धेन स्तावकत्वोपपत्तेः ।

दृष्टं हि वेतसशाखया चावकाभिश्च विकर्षत्यापो वै शान्ताः शान्ताभिरेवास्य शुचं शमयतीत्यत्र अपां शान्तत्वगुणकीर्तनस्य तत्प्रभववेतसशाखास्तुतौ पर्यवसानम् । रसतमत्वं चातिसमृद्धिवदुद्गीथावयवोङ्कारगुणत्वेन कीर्तितमिति तत्कीर्तनस्योपास्यसमर्पकत्वे संभवति न स्तुतिमात्रार्थकत्वं कल्पनीयमिति विशेषः † ॥

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥ ४९१ । १८

स्तुत्यर्थत्वात्सकाशादिति । स्तुत्यर्थत्वापेक्षयेत्यर्थः । **आश्विनग्रहशंसिन इति ।** आश्विनस्तोत्रशंसिन इत्यर्थः । ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति ग्रहग्रहणस्तोत्रोपाकरणयोः पौर्वापर्यसम्बन्धश्रवणाद् ग्रहशब्देन स्तोत्रं लक्षितम् । ननु यस्य मन्त्रस्य श्रौतो विनियोगस्तद्विनियोगं सर्वश्रुतिः सहतां यस्य लिङ्गादिभिर्विनियोगस्तं नियोगं कथं सहेतेत्याशङ्क्याह **क्वचित्सामान्यं चेति ।** क्वचिद्विनियोगे समानस्य † तद्विनियोजकप्रमाणेन तुल्यबलस्यात एव विनियोगान्तरं सोढवतः सर्वशब्दस्य लिङ्गादिभिर्दुर्बलैरन्यत्रापि यो विनियोगस्तद्विघातकत्वं नास्ति तत्र हेतुः **सकृत्प्रवृत्तस्यावकुण्ठनाभावादिति ।** एकत्र त्यक्तनियमस्य सर्वशब्दस्यान्यत्रापि नियमत्यागविरोधिनियन्त्रणासम्भवादित्यर्थः । नन्वेवं सति ज्योतिष्टोमे स्तोत्रविनियुक्तानामृचां मध्ये कस्याश्चिदाग्नेय्या आग्नीध्रोपस्थाने श्रौतविनियोगेन स्तोत्रविनियोगनियमभङ्गो जात इति स्तोत्रविनियुक्तानां सर्वासामपि ऋचां लिङ्गात् तत्र तत्र विनियोगः प्रसज्येत श्रौतविनियोगेन नैराकाङ्क्ष्यान्न तासां लैङ्गिको विनियोगः । आकाङ्क्षामूलत्वाल्लिङ्गेन विनियोगकल्पनाया इति चेत्तर्हि दाशतयीनामपि श्रौतविनियोगनिराकाङ्क्षाणां नास्ति लैङ्गिको विनियोग इति लिङ्गादिभिर्मन्त्रविनियोगोक्तिरियं निरालम्बनेति चेत् । उच्यते । यासां श्रौतविनियोगेन निराकाङ्क्षाणामपि दाशतयीनामवश्यंभावी लैङ्गिको विनियोगस्तद्विषयमिदमाचार्यवचनं यथा यच्चैकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्येत्यादौ सामिधेनीविवृद्धिः श्रुता तत्र प्रवोवाजीयाद्यभ्यासेन संख्यापूरणं न भवति किं तु ऋगन्तरागमेनेत्यभ्यासेन

---

* अत्र तृतीयं स्तुतिमात्राधिकरणं पूर्णम् ।

† सामान्यस्येतीति १ पु० पा० ।

संख्यापूरणं सामिधेनीष्वभ्यासप्रकृतित्वा*दिति दाशमिकाधिकरणे स्थितम् । तत्र गम्यमानानामृचाम् अग्निप्रकाशनलिङ्गादेवागमात्तदागमाभावे सामिधेनीपरिच्छेदकैकविंशतिसंख्यानुपपत्तेः आगमे चाग्निप्रकाशनलिङ्गस्यैव शरणीकरणीयत्वात् । न च जपपारायणादिविनियुक्तानामपि विधिवाक्यानां यथा विधायकत्वं तथा पारिप्लवविनियुक्तानामप्युपाख्यानानां स्तावकत्वं स्यादिति वाच्यम् । अग्निहोत्रादिविधौ प्रवृत्तिविशेषो ऽस्तीति जपपारायणादिविधिवद्विधायकत्वाभ्युपगमे ऽपि स्तुतौ प्रवृत्तिविशेषालाभेन शंसनविनियोगनिराकाङ्क्षायां सन्निधिमात्रेण स्तुत्यर्थत्वकल्पनायोगादिति भावः ।

४९२ । ६ उपलक्षणार्थत्वेन व्याख्यायतामिति । विशेषप्रवृत्तोपक्रमानुसारेणोपसंहारिकविशेषश्रवणस्य यथा कथं चिद् व्याख्यान†मेकस्तोमे वा क्रतुसंयोगा‡दिति पाञ्चमिकाधिकरणे स्थितम् । तत्र ह्येष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वा ऽथान्येन यजते गर्तपात्यमेव तत् कुरुते इत्यत्रान्यशब्दस्य यो हि त्रिवृदन्यं यत्र क्रतुमापाद्यते स तं दीपयति यः पञ्चदशः स तं यः सप्तदशः स तं य एकविंशः स तमिति वाक्यशेषगतत्रिवृदादिस्तोमकक्रतुसंकीर्तनानुसारेण तावन्मात्रे§ संकुचितवृत्तित्वं पूर्वपक्षीकृत्य राद्धान्तितम् । अविशेषप्रवृत्तोपक्रमगतचोदनानुसारेण वाक्यशेषे विशेषाम्नानत्रिवृदादिस्तोमप्रशंसार्थत्वेन कथं चिन्नेतव्यमिति । तथेहापि स्यादिति शङ्कार्थः । अवच्छेदकविधिपुनःश्रुत्यवैयर्थ्यायोपक्रमगतस्यापि सर्वशब्दस्यात्र सङ्कोच इति परिहारो मूल एव स्पष्टः । किं च । अनन्तशाखाम्नातासंकुचितसर्वाख्यानशंसनासम्भवात् सर्वशब्दस्य स्वत एव किञ्चिदवच्छेदेन सङ्कोचाकाङ्क्षायां तत्सङ्कोचकवाक्यशेषानुसरणमुपपद्यत इत्यपि द्रष्टव्यम् । कथापरो ग्रन्थः पञ्चतन्त्रादिः|| ॥

,, । १६ **अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥**

भाष्यटीकयोरस्फुटमधिकरणशरीरं दर्शयति ब्रह्मविद्येति । ब्रह्मविद्या मोक्षे जननीये कर्मणीतिकर्तव्यतारूपेणापेक्ष्यते न वेति संशयः ।

---

* जै. सू. अ. १० पा. ५ सू. २७ ।
† अव्याख्यानमिति १ पु. पा. ।
‡ जै. सू. अ. ५ पा. ३ सू. ४३ ।
§ मात्रेणेति १ पु. पा. ।
|| अत्र चतुर्थं पारिप्लवाधिकरणं पूर्णम् ।

तदर्थे यज्ञादीनां किं विद्याफले मोक्षेऽन्वय उत विविदिषायामिति संशयः । पूर्वव्याख्यातानां विद्यासन्निधिना विद्याशेषत्वमुक्तम् एवमेव प्रकरणेन यज्ञादीनां मोक्षफलकब्रह्मविद्याशेषत्वमिति संगतिः । तत्र पूर्वपक्षे हेतुमाह **यज्ञेनेति ।** यज्ञेन विविदिषन्तीत्याद्यन्वयाद् यज्ञादीनां तृतीयाश्रुत्या विविदिषायां साधनत्वेनान्वयः प्रतीयते स च न संभवति विषयसौन्दर्यलभ्यायास्तस्या यज्ञादिभिरसाधनीयत्वात् । अतो विविदिषाप्रकृत्यर्थभूतायां विद्यायां तदन्वयः । तस्यामपि प्रमाणाधीनजननायां* तेषां स्वरूपनिर्वर्त्तकत्वाऽसंभवात्फलोपकार्यङ्गत्वेनान्वय इति फलतो मोक्षान्वय इत्यर्थः । तत्र सिद्धान्तमाह **अस्मिन् पक्षे इति ।** तृतीयाश्रुत्या विविदिषायां यज्ञादीनां करणत्वं प्रतीयते । न च तदसंभवः । अविशुद्धान्तः†करणानां ब्रह्मविद्यायां विषयसौन्दर्यप्रतिसंधानमूलेच्छा न संभवतीति तद्विशुद्धिसंपादनद्वारा तस्यां करणत्वोपपत्तेः । अतो विविदिषायामेव यज्ञाद्यन्वय इति न मोक्षे कर्मापेक्षाऽस्ति । अविद्यास्तमयरूपे मोक्षे विद्यातिरिक्तसाधनाऽनुपयोगादित्यर्थः‡ ॥

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥ ४९३ । १

तर्हि सा स्वोत्पत्तावपीति । पूर्वाधिकरणे यज्ञादीनां यद्विविदिषासाधनत्वमुक्तं तद्विद्यासाधनत्वपर्यवसायि विविदिषायाः स्वतः पुरुषार्थत्वाभावेनानन्दसाक्षात्काररूपब्रह्मविद्योपयोगेनैव पुरुषार्थता वक्तव्येति तदभावात्पूर्वाधिकरणेनाक्षेपिकी संगतिरुक्ता । **अपि चानेन वाक्येनेति ।** ननु विविदिषोद्देशेन यज्ञादिविधानं प्रागुक्तम् । अतो विविदिषाविधानादिविकल्पोऽस्थानविजृम्भित इति चेत् । उच्यते । विविदिषोद्देशेन विधानमेव न संभवति तस्याः फलत्वायोगात् । फलत्वं हि विद्यारूपफलजनकत्वोपाधिकं वाच्यं तस्याः स्वतः फलत्वाभावात् । तथा च विविदिषाफले विद्यायां प्रागेवेच्छासत्त्वे सैव विविदिषेति तस्याः सिद्धत्वात् तदसत्त्वे तस्यां फलजनकत्वोपाधिकपुरुषार्थत्वाऽप्रतीतेः । एवं विविदिषायाः फलत्वेनान्वयाऽसंभवपूर्वपक्षो यथा सुन्दरेऽपि गुडादावित्यादितत्परिहारार्थसिद्धान्तग्रन्थेन

---

* अन्यायामिति १ पु॰ पा॰ । † विशुद्धेति १ पु॰ पा॰ ।
‡ अत्र पञ्चमम् अग्नीन्धनाद्यधिकरणं पूर्णम् ।

सूचितः । एवमुक्ते यदीच्छादिविधानं यज्ञादिवाक्यार्थे के चन केनापि मन्दमतयः शङ्केरन् तन्निराकरणार्था इमे विकल्पा इति न दोषः । एवं च प्रकारेण यज्ञादिवाक्यस्य विधायकत्वाऽयोगाद् विद्यास्तुत्यर्थमेव तद्वाक्यमिति पूर्वपक्षः स्थितः । यथा सुन्दरे ऽपि गुडादावित्यादिसिद्धान्तग्रन्थस्यार्थः प्रथमसूत्रे ऽस्माभिः स्फुटीकृतः तत्रैव द्रष्टव्यः । **प्रत्यक्प्रवणं कर्मफलं दृष्ट्वेति** । तदुक्तं सुरेश्वराचार्यैः* ।

प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः ।
कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव ॥ इति ।

भास्करोक्तमिति । विद्याविविदिषयोरिव मोक्षस्यापि प्रतिबन्धकानि कर्माणि सन्ति तन्निरासार्थं शमादिवत्कर्मणामनुवृत्तिरिति शङ्का । भिद्यते हृदयग्रन्थिरित्यादिशास्त्राद् विद्ययैवाशेषसकलकर्मनिवृत्तिर्भवतीति परिहाराभिप्रायः । **शास्त्रकृतत्वादश्रद्धाया इति** । लौकिकप्रमाणमूलमिथ्यात्वबुद्धिप्रभवश्रद्धया स्वप्रारब्धसोमयागादिकस्य मध्ये प्रबुद्धस्य पुरुषस्य कर्मशेषत्यागे ऽपि† किल न प्रत्यवायः शास्त्रमूलमिथ्यात्वबुद्धिप्रभवाऽश्रद्धया स्वत एव कर्मणामस्तमये नास्ति प्रत्यवाय इति किमु वक्तव्यमिति भावः‡ ॥

४६४ । १० **सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २७ ॥**

यस्मिन्नुत्क्रान्त इदं शरीरं पतिष्ठतरमिव दृश्यते स च श्रेष्ठ इति श्रुतौ प्रजापतिवाक्यं तदर्थो ऽत्र भङ्ग्यन्तरेण दर्शितः । प्राणोत्क्रान्तौ त्वपतदिति प्राण उच्चिक्रमिषन् स यथा सुहयः षड्वीशशङ्कून् समखिददेवमितरान् प्राणान् समखिदत् तं हाभिसमेत्योचुः भगवन्नेधि त्वं नः श्रेष्ठोसि मोत्क्रमीरिति श्रुतिवाक्यं तदर्थ इहापि भङ्ग्यन्तरेण दर्शितः । **प्रवृत्तिविशेषलाभे प्रयोजनइति** । अनेन लाभइति निमित्तसप्तमी चर्मणि द्वीपिनं हन्तीतिवत्प्रयोजनस्य निमित्तत्वपक्षे विवक्षितेति व्याख्यातं भवति । ग्राम्यव्यापारगतचेष्टादिषु हिङ्कारादिदृष्टिर्विहितेति हिङ्कारादिषु ग्राम्यव्यापारगतचेष्टादृष्टिर्विहितेत्येवं सप्तम्यर्थस्य हिङ्का-

---

* नैष्कर्म्यसिद्धिग्रन्थे ।

† त्यागेऽपीति १ पु० पा० ‡ अत्र षष्ठं सर्वापेक्षाधिकरणं पूर्णम् ।

दिषु योजनेन* व्यवधारणकल्पना कार्या । एवमेव हि लोकेषु पञ्चविधं सामो-
पासीतेत्यादिश्रुतिवाक्येषु सप्तमीद्वितीययोर्व्यत्यस्य योजनया व्यवधारणक-
ल्पना स्यास्यति तां श्रुतिशैलीमनुसृत्याचार्यैरुक्तम् । अशक्तेरिति श्लोक-
प्रतीकमादाय श्लोकं व्याचष्टे **सर्वान्नस्येति । करभ उष्ट्र इति ।** उष्ट्रशि-
शुरित्यर्थः । **अडादेरश्रवणादिति ।** लेटो ऽडाटाविति अडागम आडाग- ५९४ । १
मश्च लेटो विहितः तदश्रवणादित्यर्थः । अपूर्वत्वादिभावादित्येतद्
विधियोग्यार्थरहितत्वादित्येतदर्थकम् अभिप्रेत्य तदर्थस्य विधियोग्यतां
चेत्था विभज्य दर्शयति **सर्वमन्नं भवतीत्यस्येति ।** नन्वनुवादत्वमसिद्धं
स्वरूपतो भक्षणस्य प्राप्तत्वे ऽपि प्राणविद्याङ्गत्वेन तत्प्राप्त्यभावाद् अनदनी-
यत्वं न दोषः । कृष्यालवददनीयस्यापि किं चिद्भक्षणोपपत्तेः । कलञ्जादौ
निषिद्धत्वमपि न दोषः । विधिनिषेधयोः क्रत्वर्थपुरुषार्थतया व्यवस्थोपपत्ते-
रित्याशङ्कानिराकरणार्थं न च सत्यां गतावित्यादिग्रन्थमवतार्य व्याचष्टे
शास्त्रान्तरेति । क्लृप्तत्वादिति । अनेन क्लृप्तशास्त्रविरोधिशास्त्रान्तरक-
ल्पनैव न प्रवर्तते येनाप्राप्त्याद्युपपादनेनानुवादत्वासिद्ध्यादिकमुच्येतेति भावः ।
सुरावर्ज्जमिति । पैष्टीवर्ज्जमित्यर्थः । गौडीमाध्व्योर्मरणान्तप्रायश्चित्ताभा-
वात् सुरापस्य ब्राह्मणस्योष्णामासिञ्चेयुः सुरामास्ये मृतः शुद्ध्येदिति गौतम-
स्मृतिः मरणप्रसङ्गे ऽपि सा न पेयेति । के चित्त्वनन्यसाध्यव्याध्युपशमार्थं
पेयैव तत्र मरणान्तिकप्रायश्चित्ताभावाद् एतान्येवातुरस्य भिषक्क्रियायां प्रति-
षिद्धानि भवन्ति यानि चान्यान्येवंप्रकाराणि तेष्वप्यदोष इति सुमन्तोस्त्व-
दोषत्वस्मरणस्य प्रायश्चित्तलाघवसूचनार्थत्वात् ।

गौडीं माध्वीं सुरां पैष्टीं पीत्वा विप्रः समाचरेत् ।
तप्तकृच्छ्रं पराकं च चान्द्रायणमनुक्रमात् ॥

इति बार्हस्पत्यलघुप्रायश्चित्तविधानस्य तादृग्विषयताया वक्तव्य-
त्वाच्चेत्याहुः । **वर्ज्जयेदिति शेष इति ।** मद्यं नित्यं ब्राह्मण इति ४९६ । २
भाष्योदाहृता गौतमस्मृतिः । तत्र वर्ज्जयेद् मधुमांसगन्धमाल्येत्यादि-
पूर्ववाक्याद् वर्ज्जयेदित्यनुवर्तते स शेष इत्युक्तः† ॥

---

* प्रयोजनेनेति १ पु· पा· । † अत्र सप्तमं सर्वान्नानुमत्यधिकरणं पूर्णम् ।

४९६ । ४ **विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥**

विविदिषन्तीत्यस्येति । यज्ञादिवाक्ये वर्तमानापदेशात् कर्मकाण्डइवेतिकर्तव्यताम्नानाभावाच्च तस्यैव स्तुत्यर्थत्वमध्यवसीयतइति भावः । **वास्तवविरोधेनेति ।** षोडशिग्रहणाऽग्रहणन्यायसञ्चारणे तथैव विरोधपरिहाराय विकल्पो ऽभ्युपगन्तव्य इति काम्यप्रयोगे नित्याननुष्ठानात् प्रत्यवायः स्यान्नित्याऽनित्यसंयोगे वास्तवविरोधानङ्गीकारे च पूर्वतन्त्रे नित्याऽनित्यसंयोगविरोधस्य दोषत्वकथैवास्तमियादिति भावः । **आवश्यकत्वाऽनावश्यकत्वप्रतीतेरिति ।** जीवननिमित्तकतया ऽऽवश्यकत्वं विद्यार्थितया ऽनावश्यकत्वमिति विषयभेदादिह न नित्याऽनित्यसंयोगविरोधः । यत्र तु नित्यस्यानित्यमेव द्वारं तत्र परं नित्याऽनित्यसंयोगो विरुध्यतइति स दोषः । यथा भिन्ने जुहोतीति । अत्र हि होमो भिन्नाधिकरणकः तत्संस्कार इति पूर्वपक्षे भिन्ने इत्यस्य संस्कार्य्यपरतया निमित्तपरत्वाभावेन होमो नित्यः स्याद् द्वारं तु भिन्नमनित्यं दर्शपूर्णमासमध्ये पात्रादिभेदस्य कादाचित्कत्वात् । अतो होमो न नित्यं दर्शपूर्णमासयोरुपकुर्यात् । अनित्य*भिन्नद्वारेति वाक्यार्थबोधो न निष्पद्यते अनित्यद्वारकत्वमस्याप्यनित्यत्वप्रसङ्गादिति विरोधपरिहाराय भिन्ने इत्यस्य निमित्तपरत्वं सिद्धान्ते ऽङ्गीकृतम् । अतस्तादृग्विषयो नित्यानित्यसंयोगविरोधो दोष इति प्रथेति भावः । **न चेन्नित्यप्रयोगस्यैवेति ।** साध्यविषये प्रयोगैक्ये विरोधपरिहारो न संभवति विकल्पेन विरोधपरिहारे च कदा चिन्नित्याननुष्ठानेन प्रत्यवायः स्यात् । अतो नित्यप्रयोगो ऽपि पृथक्कर्तव्य इति भावः । विकृत्येत्यस्य सोपपत्तिकं व्याख्यानं प्रयोगस्येत्यादि । बाधित्वेत्यन्तेनापि तत्सिद्धेरिति ग्रन्थं

११ । २५ व्याचष्टे **काम्यनैमित्तिकाभ्यां नित्यकार्यसिद्धेरिति ।** उक्तमर्थमुपपादयति **यादृशो हीति । कर्तव्यस्येत्यर्थ इति ।** सिद्धरूपस्यैवैकस्य साध्यस्य नित्याऽनित्यात्मविरोधो नास्तीत्यर्थः । **कर्मसु सत्स्वति ।** ननु कर्मणां विद्यार्थत्वपक्षे विद्योत्पत्तिपर्यन्तं कर्मणां फलापवर्गाणा†मनुवृत्तिरित्यस्तु विविदिषार्थानि कर्माणीत्याचार्यपक्षे न तेषां विद्योत्पत्तिपर्यन्तमनुवृत्तिरस्ति ।

---

* नित्येति १ पु० पा० ।

† फलापवर्गिणामिति २ पु० पा० ।

सत्यम् । विद्यार्थत्वपक्षमाश्रित्य सत्स्विति वर्तमानतोक्ता । विविदिषार्थत्वपक्षे तु कालविशेषाऽनादरेण सद्भावमात्रं विवक्षितमित्यदोषः ।

एका हि प्रतिपत्तिरिति । अङ्गाध्ययनवतो वेदान्तवाक्यश्रवण- ५६७ । ११
मात्रजन्याऽद्वैतविषयापातदर्शनरूपा प्रतिपत्तिरेका श्रवणाख्या शास्त्रनिरूपितन्यायचिन्तानुगृहीतवेदान्तवाक्यजन्यतद्विषयनिर्णयरूपा मननाख्येत्यर्थः । उक्तं हि सर्वापेक्षाधिकरणटीकायां प्रथमा तावदुपनिषद्वाक्यश्रवणमात्राद् भवति यां किलाचक्षते श्रवणमिति द्वितीया चिन्तासहितात् तस्मादेवोपनिषद्वाक्याद्यामाचक्षते मननमितीति । सर्वथा ऽपि तदेवोभयलिङ्गादिति सूत्रमधिकरणान्तरपरत्वेन योजयितुं शक्यं प्रकरणान्तराधिकरणन्यायेन पूर्वपक्षान्तरोत्थानात् तस्य च टीकायां प्रदर्शनात् । ननु यावज्जीवमग्निहोत्रं जुहुयादित्याद्याचार्यग्रन्थस्यार्थे दृष्टान्तवैषम्येण पूर्वाधिकरणस्थितनित्यविद्यार्थयज्ञादिप्रयोगैक्याक्षेपरूपत्वेन तस्यैवाक्षेपस्य पूर्वाधिकरणसङ्गत्यर्थत्वोपपत्तेश्च तथापि खादिरादिषु नित्याऽनित्यविरोधपरिहारस्य पूर्वतन्त्रे क्षुण्णतया फल्गुस्तदवलम्बनः पूर्वपक्षः । अतः पूर्वसूत्रद्वयं प्रकरणान्तरन्यायालम्बनपूर्वपक्षोत्थापकतया तच्छेषत्वेन प्रवृत्तमित्यभिप्रेत्य न्यायनिर्णये विवरणाचार्यैः कृतमैकाधिकरण्यमाचार्यैरनुसृतम् । नन्वत्र सिद्धान्ते प्रकरणान्तराधिकरणन्यायवैषम्यं किमुक्तं किं मासाग्निहोत्रस्यैवात्र यज्ञादेर्विधानमेव नास्तीति किं वा धातुनोपादाय विधानं नास्तीति । नाद्यः । विविदिषोद्देशेन यज्ञादिविधानाङ्गीकारात् । यद्युच्येत प्रसिद्धस्य यज्ञादेः प्राप्तत्वेन तस्याप्राप्तं विद्याफलसंबन्धमात्रं विधीयतइति इदं तत्रापि वक्तुं शक्यं प्रसिद्धस्यैवाग्निहोत्रस्य मासगुणसंबन्धमात्रं विधेयमिति । यदि तत्र काले कर्म्म विधीयतइति विहितस्य विधानाऽयोगात् कर्मान्तरं तर्हीहापि काले कर्मविधानमिति तत एव न्यायात्कर्म्मान्तरत्वं वर्ज्जनीयम् । नापि द्वितीयः । इह यज्ञादेर्विधाने विहितस्य पुनर्विधानं न सम्भवतीति न्यायतौल्ये च जाग्रति धातुनोपादाय विधानं नास्तीति वैषम्यस्याप्रयोजकत्वात् । धातुनोपादाने साध्यतया प्रतीतेः कर्मान्तरता भवति न तु नाम्नोपादाने ततः सिद्धतया प्रतीतेरिति चेत् । यदि सिद्धतया प्रतीतिः कथं तर्हि विधेयत्वं यदि नाम्नोपात्तस्याविधेयत्वं कथं न कर्मान्तरत्वं

विहितस्य विधानायोगात् । तस्मादिह प्रकरणान्तरन्यायवैषम्यं न स्फुटमिति चेदुच्यते । इह यज्ञादिशब्दोपात्तं कर्म यज्ञादेरन्यच्चेत्तत्किंरूपं कर्मेत्यवगन्तुं न शक्यते इष्टिपशुसोमादिरूपाणां यज्ञादीनां मध्ये कैर्यज्ञादिभिः सादृश्यमवलम्ब्य प्रवृत्तया गौण्या वृत्त्या यज्ञादिशब्दप्रवृत्तिरित्यप्यवगन्तुं न शक्यते यज्ञादिनाम्ना द्रव्ये देवताद्यतिदेशे सति देवतोद्देश्यद्रव्यत्यागत्वादिरूपयज्ञादिशब्दप्रवृत्तिनिमित्तप्राप्तेरनिवार्यत्वेन यज्ञादिभिन्नत्वमपि विधेयस्य कर्मणः समर्थयितुं न शक्यते । तस्मादिह यज्ञादिसाधारणशब्दानां यज्ञोऽध्ययनं दानमिति प्रथम इत्यादिश्रुतिष्विव प्रसिद्धयज्ञादिपरत्वमेव युक्तं न मासाग्निहोत्रनामवदप्रसिद्धपरत्वमिति प्रकरणान्तरन्यायवैषम्यमिह विवक्षितम् । तदिदं यज्ञादयस्त्वन्यत्रैवोत्पन्ना आख्यातपरतन्त्रैर्यज्ञादिशब्दैरनूद्यन्तइति ग्रन्थेन सूचितम् ।

तत्राप्यमावास्यादिकालइति । एवं च यदाग्नेयवाक्यममावास्यायामेकस्याग्नेययागस्य पौर्णमास्यामन्यस्य च विधायकतया वाक्यद्वयतामापद्यतइति भावः । **सायं जुहोतीत्यादाविति** । यद्यप्यग्निहोत्रं जुहुयात्स्वर्गकाम इत्यत्र प्राप्तस्यैव होमस्य फले विधिरितिवदिह काले विधिरिति वक्तुं शक्यं तथाप्यभ्युपेत्य परिहारं दर्शयितुमियं शङ्का* ॥

४९८ । ८ **अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥**

यदि नित्यानामेव यज्ञादीनां विनियोगभेदेन विद्यार्थत्वं तर्हि तद्रहितानां विधुरादीनां न विद्याधिकार इति संगतिः । ते विद्यायामधिक्रियन्ते न वेति तेषां जपयज्ञदानादिकर्मसद्भावादैनाश्रमित्वनिन्दनाच्च संशयः । तेषामाश्रमकर्माभावादनाश्रमिकर्मभ्योऽपि ब्रह्मविद्यासंभवे बह्वायाससाध्यानामाश्रमकर्मणां ब्रह्मविद्यार्थत्वेन विधानस्य वैयर्थ्यप्रसङ्गाच्च ते नाधिक्रियन्तइति पूर्वः पक्षः । **तदभावादनुष्ठितसाधनस्येति** । यदि जन्मान्तरानुष्ठितसाधनः प्रारब्धवशादात्यन्तिकहीनजातौ जातस्तस्यापि प्रतिबन्धाभावे विद्योत्पद्यतइत्यर्थः† ॥

---

* अत्राष्टमम् आश्रमकर्माधिकरणं पूर्णम् ।

† अत्र नवमं विधुराधिकरणं पूर्णम् ।

तद्भूतस्य तु नातद्भावो जैमिनेरपि ४९८ । १६
नियमात्तद्रूपभावेभ्यः ॥ ४० ॥

किमु वक्तव्यमिति । अनाश्रमवर्तित्वादाश्रमवर्तित्वं ज्याय इति पूर्वसूत्रेण कथितत्वादिति भावः । अरण्यमियादिति पदमिति श्रुतिं व्यवहितान्वयेन पदशब्दार्थकथनेन व्याचष्टे **अरण्यमिति यत्पदमिति** ॥ *

न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ ४१ ॥ ४९९ । १

अवकीर्णिपश्वधिकरणसूत्रे तद्वदित्यतिदेशं विवरीतुमुपनयन होमाधिकरणं दर्शयति **उपनयनहोमा इति । आहवनीये कार्या इति ।** न च क्षौमे वसानावग्निमादधीयातामित्याधाने पत्नीसत्त्वश्रवणादुपनयनात्प्राग् दारपरिग्रहाभावाद् आधानाऽसंभवेन आहवनीयो न संभवतीति शङ्कनीयम् । तादर्थ्येनोपनयनात्प्रागेव दारपरिग्रहसंभवात् । स्नात्वा भार्यामधिगच्छेदिति वचनस्यापत्यार्थदारपरिग्रहविषयत्वोपपत्तेरिति भावः । **जातपुत्र आदधीतेति वचनादिति ।** जायामवाप्य दशमे ऽहन्यग्नीनादधीतेत्याधानस्य कालान्तरविधानसत्त्वे ऽपि सो ऽपि कालः कृतदारस्यैव संभवति न चोपनयनात्प्राग् दारपरिग्रहः संभवति स्नात्वा भार्यामधिगच्छेदिति समावर्तनोत्तरकालतावचनस्य रत्यपत्यधर्मरूपसर्वप्रयोजनार्थदारपरिग्रहविषयत्वाद्
धर्मे चार्थे च नातिचरितव्येति वचनादिति भावः । **एवमवकीर्णिपशुर-** ,, । ९
पीति । अवकीर्णी स्नात्वा भार्यामधिगम्याग्नीनाधायाहवनीये अवकीर्णिप्रायश्चित्तपशुं करोत्वित्यधिकाशङ्का । कृतप्रायश्चित्तेनैव दारपरिग्रहः कार्यः अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेदिति वचनात् । अतो ऽवकीर्णिपशुरप्युपनयनहोमवल्लौकिकाग्नाविति सिद्धान्तः । केचित्तु सौत्रस्यातद्वदित्यस्य यथा स्थपतीष्टिर्लौकिकाग्नौ तथेत्यव्यवहितपूर्वाधिकरणन्यायातिदेशमर्थमिच्छन्ति ।

आचार्याणां तु व्यवहितोपनयनहोमाधिकरणन्यायातिदेशं तदर्थं वर्णितवतामयमभिप्रायः । आधानस्याप्राप्तकालत्वादिति न्यायसाम्यमुपनयनहोमाधिकरणेनैव न तु स्थपतीष्ट्यधिकरणेन । तत्र ह्यत्रैवर्णिकेन निषादेन

---

* अत्र दशमं तद्भूताधिकरणं पूर्णम् ।

कृतमप्याधानमाहवनीयसंस्काराधायकं न भवति तस्याधाने विशेषवचनाभावादिति न्यायः । तस्मादव्यवहितन्यायातिदेशाऽसंभवात् पानव्यापन्न तद्वदिति* सूत्रगतस्यैवास्य तद्वच्छब्दस्य व्यवहितन्यायातिदेशकत्वं युक्तमिति† ॥

५०० । १ **बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४३ ॥**

बहुलमुपलम्भादिति । तथा च पापे निवृत्ते ऽपि मतो जाताया अशुद्धेरनुवृत्तिरुपपद्यतइति भावः । तथैव चापस्तम्बस्मृतिः । नास्यास्मिँल्लोके प्रत्यापत्तिर्विद्यते कल्मषं तु निर्हन्यतइति । **संपिबेदिति ।** संवसेदिति पाठान्तरम् । **व्याख्यायोदाहरतीति ।** व्याख्यानेनैवार्थत उदाहरति न तु श्लोकरूपेणेत्यर्थः । **कामतः कृतमपीति ।** अनेन श्लोकेन कामत इति पदं कृतमित्यनेनानुषक्तेनान्वितं सदपैतीति क्रियया संबध्यतइति दर्शितम् । अव्यवहार्य्य इत्यादिश्लोकशेषो बालहन्त्रादिविषयतया टीकायां योजितः । श्लोकस्य ब्रह्महत्यादिपातकविषयत्वात् तच्छेषस्य कथं बालहन्त्रादिविषयत्वं स्यादित्याशङ्क्याह **बालवधाद्युपलक्षणार्थं मत्वेति ।** मत्वेत्यनेन श्लोकशेषस्य ब्रह्मवधादिविषयत्वमपि वक्तुं शक्यं पातककृतामपि प्रायश्चित्तेनैहिकशुद्ध्यभावात् । बालहन्त्रादीनामैहिकशुद्ध्यभावे

शरणागतबालस्त्रीघातकान् संवसेन्न तु ।
चीर्णव्रतानपि सतः कृतघ्नसहितानिमान् ॥

इति याज्ञवल्कीयवचनान्तरसत्त्वादिति सूचितम् । केचित्तु याज्ञवल्क्यश्लोके व्यवहार्य इति पदच्छेदं कृत्वा कामकृते महापातके विहितं यदकामानां कामात्तद् द्विगुणं भवेदिति वचनबलादिह व्यवहार्यो जायते अन्यथा द्विगुणप्रायश्चित्तवैयर्थ्यापत्तेः । परत्र नरकजननशक्त्या सह दुरितमनुवर्तत एव । नास्यास्मिँल्लोके इत्यादिवचनं तु स्वाश्रमप्रच्युतोर्ध्वरेतोविषयम् ।

नैष्ठिकानां वनस्थानां यतीनां चावकीर्णिनाम् ।
शुद्धानामपि लोके ऽस्मिन् प्रत्यापत्तिर्न विद्यते ॥

इति कौशिकवचनैकार्थ्यादित्याहुः‡ ॥

---

* जै. सू. अ. ३ पा. ४ सू. ३८ ।

† अत्र एकादशम् आधिकारिकाधिकरणं पूर्णम् ।

‡ अत्र द्वादशं बहिरधिकरणं पूर्णम्

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥ ५०० । २४

आश्रितोपास्तिकर्तृत्वमिति । अत्रोपास्तिपदं प्रकृताभिप्रायं विवक्षितं न तूत्सर्गशरीरप्रविष्टम् । एतदधिकरणसिद्धान्तस्थितेः प्राक् तथोत्सर्गसंप्रतिपत्त्यभावात् । यदि किं विज्ञायमानाङ्गाश्रितमुपासनं यजमानेन कर्त्तव्यमिति संप्रतिपत्तिः स्यात्तदा तत्र सिद्धमुत्सर्गमवलम्ब्योद्गातृकर्तृकाङ्गाश्रितोपासनस्योद्गातृकर्तृकत्वे प्राप्ते तस्यापवादः क्रियेत तथा नास्ति संप्रतिपत्तिः । तथाभूतोपासनसद्भावे तस्य ऋत्विजापि कर्तुं शक्यतया तस्मै हि परिक्रीयतइति सिद्धान्तहेतुबलेन तस्य ऋत्विक्कर्तृकत्वस्यैव प्राप्तेः । तस्मादङ्गाश्रितमङ्गकर्चा कर्तव्यमित्येवोत्सर्गशरीरं विवक्षितम् । दृष्टं हि ममाग्ने वर्च इति मन्त्रस्य प्रत्यगाशीष्ट्वेन याजमानतौचित्ये ऽपि सूक्तवाकमन्त्रप्रतिपाद्यायुरादिफलन्यायेन विवक्षितस्य तत्प्रतिपाद्यफलस्य यजमानगामित्वे ऽप्यन्वाधानकर्त्रा अध्वर्युणैवान्वाधानकरणमन्त्रतया तदङ्गस्यापि वक्तव्यम् । तस्मादिहोपास्तिग्रहणमविवक्षितम् । यदि तद्विवक्षितं समर्थनीयं तदा लिङ्गभूयस्त्वाधिकरणविचारिते विद्यामये ऽग्नावयं वाव लोक एषो ऽग्निश्चित इति भूलोकदृष्टिर्मनुष्या यजुष्मत्य इष्टका इत्यादिनेष्टकादिषु मनुष्यादिदृष्टिश्च विधीयतइति तत्रोत्सर्गसंप्रतिपत्तिर्द्रष्टव्या । तत्र ह्येवंविदे सर्वाणि भूतानि चिन्वन्तीति वचनात् सर्वभूतान्तर्गतस्य विदुषो ऽपि स्ववृत्तिरूपेष्टकाचयनकर्तृत्वमस्ति । अग्नितदङ्गेष्टकाश्रितभूलोकतन्मध्यगतमनुष्यदृष्ट्याद्युपासनाकर्तृत्वमप्यस्ति बको दाल्भ्य इत्यादिलिङ्गवत्सूपासनेषूत्सर्गसिद्धिरास्थेया । अस्मिन् पूर्वपक्षे तं ह बको दाल्भ्य इत्यादिलिङ्गस्य पूर्वपक्षन्यायेन प्रत्याख्यानं* तदवलम्बनप्रवृत्तमुत्सर्गमभ्युपगम्य तदपवादोक्तेः यासूपास्तिषु तदपवादो ऽस्ति तावन्मात्रविषय एव च याजमानत्वविचारोपास्तिविषयः । आद्यपक्षे तु सर्वोपास्तिविषयः । तं ह बक इत्यादिलिङ्गस्य च पूर्वपक्षन्यायेन प्रत्याख्यानं न तु द्वितीयपक्षइव न्यायाऽनादरः । अग्रे तमुद्गीथं बको नामेत्यादिशङ्कापरिहारग्रन्थे न्यायेन लिङ्गप्रत्याख्यानमप्याद्यपक्षाभिप्रायम् ।

वर्षति† हास्मै य उपास्तइत्यादिवचनादिति । न केवलमिदं ५०१ । १
वचनं फलोपासनासामानाधिकरण्यप्रतिपादनादुत्सर्गस्यापवादकं किं तु उपा-

---

* न्यायेन न प्रत्याख्यानमिति २ पु॰ पा॰ । † विवर्षतीति २ पु॰ पा॰ ।

स्त इत्येकवचनबलादपि । अत्र ह्युपास्त इत्यनेन वृष्टौ पञ्चविधं सामोपासीतेति उपक्रान्तं हिङ्कारप्रस्तावोद्गीथप्रतीहारनिधनेषु पुरोवातमेघप्रादुर्भाववृष्टिविद्युद्गर्जितयुगलदृष्टिसमाप्तिदृष्ट्योपासनमुच्यते । न च हिङ्कारादीनां पञ्चानामुद्गातृचयकर्तृकाणामेककर्तृकत्वमस्ति येनाङ्गानुष्ठातैक एव तदाश्रितोपास्तिकर्ता भवेद् अत एककर्तृकतायामुद्गातृषु विनिगमनाविरहादप्युत्सर्गबाधेन फलभाजो यजमानस्यैवोपास्तिकर्तृत्वम् आस्थेयमिति भावः* । वचनादित्येतदुपलक्षणं फलभाज एव प्रधानकर्तृत्वमिति वक्ष्यमाणन्यायादप्युत्सर्गबाधो द्रष्टव्यः । **पतितैरिति** । पतितैः संव्यवहारे हि कदा चित्ते ऋत्विजो भवेयुः कुतः उपास्तीनामृत्विक्कर्मत्वाद् यथा विद्यार्थी सोममनुतिष्ठन् तस्य वीर्यवत्तरत्वार्थमुपासनां कारयितुमिच्छति यजमानः पतितव्यतिरेकेण चोपासनविदो ऽन्ये न लब्धाः तदा पतितेनाहं सोमपानमौद्गात्रं करिष्यामीति मैत्रीव्यवहार†बलादुक्तस्तद्वाचिव्ययात् तं न प्रत्याचक्षीत अतस्तत्परिहाराय पतितैः संव्यवहारं त्यजे-

५०१ । ५ दित्यर्थः । **प्रकृतोपयोगिन इति‡** । न केवलं वचनात् पतितसंव्यवहारस्त्यक्तव्यः किं तु स्वकर्तव्यकर्मनाशप्रसङ्गादपीति पूर्वाधिकरणार्थे हेत्वन्तरलाभहेतुतया प्रकृतोपयोग इत्यर्थः । इह संभवात् प्रयोजनान्तरमुक्तं विद्यार्थकर्मवीर्यवत्तरत्वसंपादकोपासनविषयस्यास्य विचारस्य तद्विषयप्राच्योदीच्यविचारान्तरवदुपयोगान्तरं संनिपन्नमस्त्येव । **यदि कामयेतेति वाक्येनेति** । मिनुयादित्युक्तसदोमानं तावदध्वर्युकर्तृकं यजुर्वेदस्याध्वर्यवसमाख्यया सन्निधापितस्याध्वर्योस्तत्र कर्तृत्वेनान्वयात् । अतो मिनुयात्कामयेतेति क्रियाद्वयसमभिव्याहाररूपेण वाक्येन सदोमानस्याकर्तुरध्वर्योरेव फलसंबन्धबोधनादित्यर्थः । **तपसः प्रधानफलसिद्ध्यर्थत्वादिति** । ननु प्रधानफलसिद्ध्यर्थमपीतरदङ्गजातं समाख्याबलादध्वर्युप्रभृतिभिरनुष्ठीयते । सत्यम् । इह प्रधानफलसिद्ध्यर्थत्वादित्यनेन प्रधानफलोत्पत्तिप्रतिबन्धकयजमानगताऽधर्मनिवृत्तिद्वारा प्रधानफलसिद्ध्यर्थत्व विवक्षितं तन्निवृत्तिश्च यजमानगतेनैवानशनरूपदुःखानुभवेन भवति । एवं तपसः प्रतिबन्धकनिवृत्तिरूपदृष्टफलार्थत्वे संभवति नाऽपूर्वरू-

* फलभाजोऽपि कर्तृत्वमस्ति । कर्तृत्वमास्थेयमिति भाव इति २ पु. पा. ।

† व्यवहारेति नास्ति १ पु. ।

‡ प्रकृतोपयोग इतीति प्रतीकाकारः १ पु. ।

पादृष्टसंस्कारार्थत्वं कल्पनीयमिति । ननु उक्तहेतुना तयोर्याजमानमस्तु कर्मा-
ङ्गाश्रितनीचैस्त्वादिफलमपि याजमानमित्यत्र को हेतुरित्याकाङ्क्षायामर्थसंयो-
गादिति सूत्रोक्तं हेतुं विवृणोति **यजेतेत्यादिना । साङ्गप्रधानफलस्येति ।**
ननु गुणफलमङ्गस्य प्रधानस्य वा न फलं किं त्वङ्गाश्रितस्य गुणस्यैवेति चेन्न ।
गुणस्याङ्गाश्रयणं विना स्वतः फलजननाऽसमर्थतयाऽङ्गस्यापि फलजननकोट्य-
नुप्रवेशात्तथा च प्रधानवाक्यगतात्मनेपदश्रुतिविरोधादङ्गवाक्यगतक्रियाद्वयैक-
कर्तृकत्वसमर्पकाख्यातद्वयसमभिव्याहारात्मकवाक्यप्रमाणं बाधित्वा यदि
कामयेत यजमान इत्यध्याहार्य्यमिति भावः । तथा मिनुयादिति परस्मैपदश्रु-
तिबलादपि वाक्यप्रमाणभङ्गो द्रष्टव्यः । डुमिञ् प्रक्षेपणे इति धातोर्ञित्वादकर्त्र-
भिप्राये क्रियाफले विहिता हि परस्मैपदश्रुतिः नीचैः सदोमानस्य तत्कर्त्रतिरि-
क्तसुत फलार्थतां बोधयति । ननु काण्डाधिकरणे अङ्गाश्रितगुणफलानां यज-
मानगामित्वमुक्तं न तूपासनानामृत्विक्कर्तृकत्वं कथं तेन पौनरुक्त्यशङ्केत्याश-
ङ्क्याह **अत्राङ्गफलस्येति ।** अङ्गाश्रितगुणफलमात्रस्य विशिष्य याजमानत्वो- ५०१ । १
क्त्याङ्गतदाश्रितगुणानामार्त्विज्यत्वमर्थादुक्तं भवतीत्येवं पौनरुक्त्यशङ्केत्यर्थः ।
कथं तर्हि तन्निरासस्तत्राह **सा न कार्येति ।** ऋत्विक्कर्तृकत्वं न्यायान्तर-
साध्यं सिद्धवत्कृत्य तत्र फलमात्रस्य याजमानत्वमुक्तं न तु तदपि तत्र सिषा-
धयिषितं तत्साधकन्यायाऽनुपन्यासादिति भावः । नन्विह त्वेवंजातीयकानी-
त्यादिटीकावाक्ये चकारयुक्तं पाठं गृहीत्वा तत्रोपासनानीत्यनेनान्वयमुक्त्वा
सदोमानादिकत्वङ्गजातीयकान्युपासनानि च याजमानान्यार्त्विज्यानि वेति
विचार्य्यत इत्येवं तद्वाक्यं व्याख्यातम् । तदिदं व्याख्यानमयुक्तम् । सदोमाना-
दीनामङ्गानामृत्विक्कर्तृकत्वस्यात्र विचाराभावात्सर्वेषामङ्गानामृत्विक्कर्तृकत्वस्य
शास्त्रफलं प्रयोक्तरीत्यधिकरणसिद्धतायाः स्वयमेवाचार्य्यैरनुपदं वक्ष्यमाण-
त्वाच्च । न च सदःकरणादिकत्वङ्गजातीयकानीत्याचार्यवाक्यस्य सदः-
करणादिकत्वङ्गाश्रितनीचैस्त्वादिफलार्थगुणजातीयानीत्यर्थो वाच्यः । सदो-
नीचैस्त्वस्य सदोमानकर्त्रध्वर्युव्यतिरिक्तनिर्वर्त्यत्वासंभवेन तत्रापि गोदोह-
नादिन्यायेन याजमानत्वविचाराऽयोगादिति चेदुच्यते । इह सदःकरणा-
दीनामृत्विक्कर्तृकत्वस्याविचार्यस्यापि टीकायां विचार्य्यतोक्तिस्तथाकाम इत्य-
धिकरणे तस्य विचारितत्वद्योतनार्थेत्याचार्याणामभिप्रायः । सोऽयमभिप्रायस्त-

थाकाम इत्यधिकरणे हीत्याद्यनन्तरवाक्येनैव स्फुटीकृत: । यद्वा सद:कर-
णादिकर्त्वङ्गजातीयानीत्यस्य क्रत्वङ्गाश्रितस्य नीचैस्त्वस्य निष्फलार्थगुण-
त्वेन सजातीयानीत्युपास्तिवत्क्रियारूपाणि यजमानानेन पृथगनुष्ठातुं श-
क्यानि कर्मकाण्डाम्नातानि तानीत्यर्थ: । एवं चाङ्गानामपि ऋत्विक्कर्तृकत्वं
न चिन्तितमित्युपरितनवाक्ये अङ्गानामित्यस्याङ्गाश्रितकर्मकाण्डाम्नातक्रि-
यारूपगुणानामित्यर्थ: । ननु टीकायां चकारसद्भावे ऽप्येवंजातीयकानि
नीचैस्त्ववत् फलार्थान्यङ्गावबद्धानि चेति उपासनागतविशेषणद्वयसमुच्चयार्थ-
त्वेन चकारेण योज्यताम् इति चेदस्तु तदपि व्याख्यानं तत्स्पष्टमित्याचा-
१०१ । २० र्यैर्न स्पृष्टम् । **उपास्तीनामनङ्गत्वादिति ।** अङ्गानि हि ऋत्विक्कर्तृकाणि
प्रधानस्य तु यागस्य यजमानकर्तृकत्वं संप्रतिपन्नम् । उपास्तयो ऽपि फल-
श्रुते: प्रधानभूता: । अतो याजमानत्वशङ्का । एवं च यद्यपि परिक्रयाम्ना-
नात् क्रतौ यद्यत्कर्तव्यं तत्सर्वमृत्विग्भिरेव कर्तव्यमित्युत्सर्ग: तथापि
प्रधानयागइव फलश्रुत्यविशेषाद् (*यजमानकर्तृकत्वम्) । ननु यदि फला-
र्थगुणप्रधानत्वात् फलभाजा कर्तव्य: तर्हि गोदोहनादिरपि याजमान:
स्यादित्याशङ्क्याऽस्योत्सर्गस्य गोदोहनादिषु याग: न तु शक्ये क्व चिद-
पीति । परिहरति **न चैवमित्यादिना ।** फलार्थगुणे तदपवाद इति
भाव: । वर्षति हास्मइत्यादिवचने यजमानपदाभावे ऽपि फलस्वामिन
उपासनाकार्यत्वाऽवगमाद् यजमानस्य फलस्वामित्वात् । अत एवोपासनाकर्ता
वाक्यप्रमाणेनावसीयतइति कृतशङ्कापरिहारार्थं टीकायास्तात्पर्यमाह **कर्म्म-
णीश्वरो ऽधिकारीत्यादिना । औत्सर्गिकस्येति**† । ननु सर्वं कर्म
ऋत्विजामितिवत्सर्वं फलं यजमानस्येत्ययमप्युत्सर्गश्चेत्कथं फलोत्सर्गन्या-
यमवलम्ब्य वर्षति हास्मइत्यादियजमानस्योपासनाकर्तृत्वे‡ प्रमाणमाश-
ङ्कते कर्त्रुत्सर्गन्यायेनोद्गातु: फलभाक्त्वात्तत्प्रमाणं किं न स्यादिति चेन्नैवम् ।
प्रधानवाक्यगतात्मनेपदश्रुतिमूलात्फलोत्सर्गात्परिक्रयरूपाङ्गवाक्यमूलस्य कर्त्तु-
रुत्सर्गस्य दुर्बलत्वात् । यजमानस्येत्यादिटीकावाक्यं योजयति **यजमानस्यो-
पासनमिति ।** तस्येत्यस्यार्थमाह **उपासकस्य सत इति ।** तत्र दृष्टान्त

---

* ( ) एतन्मध्यगो ग्रन्थो नास्ति ५ पु॰ ।

† औत्सर्गिकन्यायस्येतीति १ पु॰ पा॰ ।

‡ कर्तृत्वेनेति १ पु॰ पा॰ ।

इति । यजमानस्योपासनमित्यत्र फलं दृष्टान्तीकृतमित्यर्थः । उपासनं प्रधा-
नत्वाद्यजमानेन कर्तव्यमिति पूर्वपक्षोपपादकन्यायस्यार्थवादिकलिङ्गदर्शनेन
बाधमाशङ्कते **न चेति । न्यायं न बाधतइति** । किं तु न्यायेन लिङ्गद-
र्शनमेव बाध्यतइति भावः । यस्त्वत्र *न्यायबाध उक्त इत्यग्रे न्यायेन लिङ्ग-
दर्शनस्य बाध उक्त इत्यनूद्यते टीकायां तस्मै हि परिक्रीयतइति साक्षहेतुम-
पहाय लिङ्गदर्शनं किमित्युपन्यस्यतइत्याकाङ्क्षायां तस्य† साक्षात्सिद्धान्तहेतु-
त्वानुपपत्तेरिति दर्शयितुं तामनुपपत्तिमुद्घाटयति **ननु तस्मै हीति** । तस्मै
हि परिक्रीयतइत्यत्र तस्माइत्यस्य किमङ्गा‡श्रितोपास्तिकरणायेत्यर्थ उताङ्ग-
करणायेति । आद्ये असिद्धिमुक्त्वा तामुपपादयति **अङ्गाश्रितेति** । नन्वस्तु
द्वितीयः । न चाङ्गकरणाय परिक्रयस्य तदाश्रितोपास्तिपर्यन्तत्वं न सिध्येदिति
शङ्कनीयम् । आ सन्निधानात्तत्पर्यन्तत्वासिद्धेरित्याशङ्क्य सन्निधानमतिप्रसञ्ज-
कतया दूषयति **यत्र हीति** । ननु प्रथममृत्विजां कर्तृत्वं प्रमाय पश्चात्तादर्थ्येन ५०२ । १४
ते न परिक्रीयन्ते स्वर्गकामो यजेतेति सामानाधिकरण्यात्मनेपदाभ्यां फल-
भाजो यजमानस्यैव करणेतिकर्तव्यता§सहितभावनाकर्तृत्वे प्राप्ते दक्षिणया
ऋत्विजां परिक्रयणाम्नानात् तददृष्टार्थत्वाय सामानाधिकरण्यात्मनेपदाभ्यां
प्रमितं यजमानस्य कर्तृत्वं ऋत्विग्द्वारकं प्रयोजकं प्रयोजकत्वे ऽपि प्रमित-
कर्तृत्वानपायादिति परिक्रयाम्नानबलादेव पश्चाद् ऋत्विजां कर्तृत्वं प्रमीयते ।
पूर्वतन्त्रे ऽपि शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात् तस्मात्स्वयं प्रयोगे स्यात्॥
अन्यो वा स्यात्परिक्रयाम्नानाद्विप्रतिषेधात्प्रत्यगात्मनीति¶ पूर्वपक्षसिद्धान्तसू-
त्राभ्यां तथैव व्यवस्थापितम् । तस्माद्यत्र हि तेषां कर्तृत्वं प्रमितं तदर्थं ते
परिक्रेतव्या इत्युक्तिरयुक्तेति चेद् नायुक्तेति ब्रूमः । न हि प्रथमप्रमि-
तकर्तृत्वनिर्वाहाय ऋत्विजां परिक्रयो विधीयते इत्यनेन वाक्येनोच्यते
किं तु यत्र तेषां परिक्रयाम्नानात् कर्तृत्वं प्रमाणवत्तावदर्थमेव ते परिक्रे-
तव्या नाधिकरणार्थमपि । यथा स्फ्यादीनामुद्धननादि यावत्कार्यं वचना-
न्तरैः प्रमितं तावदर्थमेव तानि संपादनीयानि न तु यद्यत्कर्तुं

* बाध्यतइति भावः । अत एव यस्त्वत्रेति १ पु॰ पा॰ ।
† तस्यां तस्येति २ पु॰ पा॰ ।
‡ किं चिदङ्गेति २ पु॰ पा॰ ।
§ यजमानस्यैव कर्तव्यतेति २ पु॰ पा॰ ।
|| जै॰ सू॰ अ॰ ३ पा॰ ७ सू॰ २० ।
¶ जै॰ सू॰ अ॰ ७ पा॰ ४ सू॰ २ ।

शक्यते स्फ्यादिभिः तदर्थमपि तद् द्रव्यं चोत्पत्तिसंयोगात् तदर्थमेव चोद्यतइत्यधिकरणोक्तन्यायमवलम्ब्योच्यते न तत्र का चिदनुपपत्तिः । **संपादयितुं युज्यतइति ।** फलाय घटतइत्यस्य फलाय चेष्टते फलसिद्ध्युपयोगिकार्येषु व्याप्रियतइत्यर्थः संभवति । स तु घट चेष्टायामिति धात्वर्थानुगमेन स्पष्ट इति नोक्तः । अनेन यजमानगामिफलार्थं यद्यावद्द्रव्यं तस्य सर्वस्यार्थे परिक्रयः न तु प्रकरणाद्यधिकारवाक्यनिर्दिष्टफलं यावता सिध्यति तावत एवार्थं तावदर्थत्वे ऽपि न दोषः । अङ्गावबद्धोपास्तीनां तस्मिन्नपि फले प्रतिबन्धनिवृत्तिद्वारोपयोगात् । अतो न स्फ्याधिकरणविरोध इति दर्शितं भवति । **कांस्यभोजिन्यायेनेति ।** नन्वविरोधे कांस्यभोजिन्यायः इह प्रधानम् फलभाजा साक्षादेव कर्तव्यमिति प्रागेव दर्शनाद्विरोधो ऽस्तीति चेन्न । यागस्य स्वामिकर्तृकत्वं न प्राधान्यप्रयुक्तं किं तु स्वामिद्रव्ये स्वत्वत्यागो ऽन्येन कर्तुमशक्य इति ऋत्विगशक्तिप्रयुक्तम् । अत एवाङ्गस्यापि यजमानद्रव्येण परिक्रयस्यान्येन कर्तुमशक्यत्वाद्याजमानत्वं प्रधाने ऽप्यग्निहोत्रहोमे स्वत्वत्यागांशं विना प्रक्षेपांशस्यान्येन कर्तुं शक्यत्वाद् आध्वर्य्यवत्वम् । तस्माद्युक्तो ऽत्र कांस्यभोजिन्यायः । **तदर्थमपीति ।** लिङ्गवशादुपासनस्य ऋत्विक्कर्तृकत्वे सिद्धे ऋत्विक्परिक्रयस्य तादर्थ्यमपि सिध्यतीति भाष्यकारैस्तत्साधारण्येन तस्मै हि परिक्रीयतइति सूत्रावयवो व्याख्यात इत्यर्थः ।

५०२ । २५ **एतच्च सर्वमिति ।** ननु भाष्ये सूत्रावयवोक्तं हेतुं प्राधान्येनोपन्यस्य तथा चेत्यादिग्रन्थेन तदुपोद्बलकं लिङ्गमुपन्यस्तमिति प्रतिभाति न तु लिङ्गं प्रधानहेतुतयोपन्यस्तमिति । नैष दोषः । अर्थवशेन तस्य प्राधान्यात् । भाष्यकाराणामपि तथैवाशय इति तात्पर्य्यम् । भाष्यस्वारस्यानुरोधात्* सौत्रं हेतुं प्राधान्येनोपन्यस्य तदनुग्राहकतया लिङ्गमुपन्यस्तमिति भाष्याशयवर्णने ऽपि न दोषः । लिङ्गमनपेक्ष्यैव परिक्रयस्योपास्तिसाधारणतायाः स्फ्याधिकरणविरोधपरिहारेणास्माभिः समर्थितत्वात् । तत्साधारण्यसिद्धेर्लिङ्गमुखनिरीक्षकत्वे लिङ्गं यदुपास्तिविषयं परिक्रयस्य तावन्मात्रविषयताया एव सिद्धिप्रसङ्गाच्च । तं ह बको दाल्भ्य इति लिङ्गं हि प्राणदृष्ट्याङ्गिरो-

* भाष्यकारस्यानुरोधादिति १ पु· ।

पासनमात्रविषयं तस्य न्यायसिद्धार्थानुवादकत्वेनोपासनविशेषप्रस्तावमनपेक्ष्य सर्वविषयता सिध्यति । अत एव सौर्याद्यप्रभृतीनामनुपदिष्टधर्माणामन्यत इतिकर्त्तव्यताकाङ्क्षायां लौकिकस्थालीपाकादीतिकर्त्तव्यता न भवति किं तु दर्शपूर्णमासादितो वैदिकीति निर्णयार्थं प्रवृत्ते स लौकिकः स्याद्दृष्टप्रवृत्तित्वा*दिति साप्तमिकाधिकरणे विध्यन्तो वा प्रकृतिवच्चोदनायां प्रवर्तेत तथा हि लिङ्गदर्शन†मिति सिद्धान्तसूत्रेण सौर्यादिचोदनायां प्रकृतिषु दर्शपूर्णमासादिष्विव तदीय एव वैदिको विध्यन्तः प्रवर्त्तते । तथा हि लिङ्गं दृश्यते । यथा हि सौर्यचरौ दार्शपूर्णमासिकप्रयाजप्राप्तिं सिद्धवत्कृत्य प्रयाजे प्रयाजे कृष्णलं जुहोतीति कृष्णलविधानार्थस्तदनुवाद इति सिद्धान्तोपपादनानन्तरं लिङ्गहेतुत्वादलिङ्गं लौकिकं स्या‡दिति सूत्रेण यदि लिङ्गेन वैदिको विध्यन्तो नियम्यते तर्हि यत्रैन्द्राग्नमेकादशकपालं निर्वपेदित्यादौ तन्नास्ति तत्र लौकिकीतिकर्त्तव्यता स्यादिति शङ्कामुत्थाप्य लिङ्गस्य पूर्ववत्त्वाच्चोदनाशब्दसामान्यादेकेनापि निरुध्येत यथा स्थाली पुलाकेने§ति सूत्रेण यदि लिङ्गं वैदिकविध्यन्तरप्रापकत्वेनोपन्यस्तं स्यात्तदाऽयं दोषो भवेद् न तथोपन्यस्तं किं तु त्रेताग्निसाध्यत्वादिसाम्यादनुपदिष्टधर्मकेषु सौर्यादिषु सर्वेष्वपि वैदिक्येवेतिकर्त्तव्यतेति न्यायप्राप्तानुवादकतयोपन्यस्तं तत्तुल्यन्यायपूर्वकं लिङ्गमेकत्र दृश्यमानं तुल्यन्यायानां सर्वेषां धर्मवत्तां ज्ञापयति यथा स्थाल्यां तुल्यपाकानां पुलाकानामेकमुद्धृत्य शृतं दृश्यमानमन्येषामपि शृतत्वं ज्ञापयतीत्युक्तम् । तस्मादिह लिङ्गस्य न्यायप्राप्तानुवादतयैव सर्वोपासनाविषयत्वमुपपादनीयम् । स न्यासः सूत्रे हेतुतया निर्दिष्ट इति तस्यैव सिद्धान्तहेतुत्वं भाष्यस्वारस्यानुरोधेन वर्णनीयम् । आचार्यैस्तु टीकायां तं हेतुं विहाय प्रथमं लिङ्गोपन्यासस्य तात्पर्यमेव भविष्यतीति तदुपपादनमात्रं कृतम् । आचार्याणां तु लिङ्गं न्यायप्राप्तानुवादकमित्येव स्वाभिप्रायः । तदवष्टम्भेन हि पूर्वपक्षग्रन्थे तैरुक्तम् । तच्च लिङ्गं सर्वत्रार्त्विज्यमुपास्तीनां गमयतीति । ननु यत्तूक्तमित्यादिभाष्येण वर्षति हास्माइति श्रुतौ फलोपासनयोः सामानाधिकरण्यश्रवणात् फलभाजो यजमानस्यैवोपासनाकर्तृत्वं वाच्यमिति पूर्वपक्षे कृता शङ्काऽनूदिता तत्र ऋत्विजां फलभाक्त्व-

---

* जै॰ सू॰ अ॰ ७ पा॰ ४ सू॰ १० ।

† जै॰ सू॰ अ॰ ७ पा॰ सू॰ ११ ।

‡ जै॰ सू॰ अ॰ ७ पा॰ ४ सू॰ १२ ।

§ जै॰ सू॰ अ॰ ३ पा॰ ७ सू॰ ८ ।

निषेधे कः पारार्थ्यादित्यादिपरिहारग्रन्थो न युक्तस्तेषां फलभाक्त्वस्यानाश-
५०२ । ५ ङ्कितत्वादित्याशङ्क्य परिहारग्रन्थस्य तात्पर्यमाह **परार्थत्वादिति भाष्ये-**
णेति । अनेन परार्थत्वादित्यादिफलसंबन्धाऽनुपपत्तेरित्यन्तं पारार्थ्येन हेतुं
ऋत्विजां फलसंबन्धनिषेधार्थमेकं वाक्यं न भवति किं तु परार्थत्वादृत्विज
इत्येतावदेकं वाक्यमनूदितशङ्कापरिहारार्थं तेन ऋत्विग्भिर्यत्क्रियते न तत्र
तद्द्वारकं यजमानस्यैव कर्तृत्वं तेषां पारार्थ्यादतः फलोपासनासामानाधि-
करण्यश्रुतेः* स्वर्गकामो यजेतेति फलतदर्थसाङ्गप्रधानानुष्ठानसामानाधिकर-
ण्यश्रुतेरिव नानुपपत्तिरिति परिहारो दर्शितः । यदि परार्थत्वादृत्विजां तत्क-
र्मणि यजमानस्यैव कर्तृत्वं तदा किमपि फलमृत्विजो न स्यादित्यात्मने वा
यजमानाय वेति श्रुतिविरोधः । तस्मादृत्विक्कर्मणि क्व चित्क्व चिद् ऋत्वि-
जामपि स्वातन्त्र्यं वक्तव्यं तद्वदुपासने ऽपि तेषां स्वातन्त्र्यं स्यात् ते यद्यु-
पासनाकर्तारः स्युः । न हि तेषामुपासनाकर्तृत्वे यजमानकर्तृकं तदङ्गं तत्प्र-
धानं वा फलजननाय तदपेक्षितं किं चिदस्तीत्युपासनांशे पारार्थ्यहेतो-
रसिद्धिमाशङ्क्य तत्परिहारार्थमन्यच्चेत्यादि वाक्यान्तरमिति वाक्यभेदेन
भाष्यं व्याख्यातम् । ननु केवलं वचनादेव ऋत्विजां फलसंबन्धो न भवति
किं तु न्यायतोऽपि ममाग्ने वर्चो विहवेष्वस्त्वित्यन्वाधानकरणमन्त्रस्याध्व-
र्युणा वक्तव्यतया तेन प्रकाश्यं वर्चःप्रभृतिफलमध्वर्योरेव हि वक्तव्यं ममा-
स्त्विति प्रत्यगाशीर्लिङ्गात् । एवमुपासनस्योद्गातृकर्तृकत्वे फलार्थस्य कृत्स्नस्य
तन्मात्रकर्तृकत्वलिङ्गाद् दहराद्युपासनाफलवद् उद्गीथाद्युपासनाफलमपि सा-
क्षात्कर्तृगामि स्यादित्याशङ्कापरिहारार्थं श्रुतेश्चेत्यादिभाष्यं ममाग्ने वर्च इत्या-
दिमन्त्रप्रकाश्यफलमपि याजमानमेवेति निर्णयार्थं प्रवृत्तस्य करणेष्वर्थवत्त्वा†-
दिति पूर्वतन्त्राधिकरणस्य स्मारणार्थम् । तत्र हि वर्चःप्रभृति फलमपि यज-
मानगाम्येव प्रधानवाक्यगतात्मनेपदश्रुत्या साङ्गप्रधानभावनाविषययाङ्गभाव-
नानामपि यजमानगामिफलत्वस्योक्तत्वेन तद्विरुद्धस्य मन्त्रगतप्रत्यगाशीर्लि-
ङ्गस्य बाध्यतया मन्त्रे ममपदस्य यजमानएव स्वकीयतयौपचारिकत्व-
कल्पनादिति सिद्धान्तव्यवस्थापनानन्तरं लिङ्गदर्शनाच्चेति‡ गुणसूत्रस्योदाहर-

---

* श्रुतेः स्वरूपमिति २ पु॰ पा॰ । † जै॰ सू॰ अ॰ ३ पा॰ ८ सू॰ २५ ।
‡ जै॰ सू॰ अ॰ ३ पा॰ ८ सू॰ २७ ।

गात्वेन यां वै कां चनेति श्रुतिर्लिखिता। इह तदुदाहरणेन वचनं विना लिङ्गमात्रेण क्व चिदपि ऋत्विग्गतं फलं न भवति ऋत्विक्कर्मफलस्य यजमानगामितायाश्चौत्सर्गिकत्वे प्रबलश्रुतिन्यायसत्त्वादिति कृतशङ्कापरिहारः सूचितः। एवं सामान्यत आर्त्विज्यफलमात्रस्य यजमानगामित्वे श्रुतिं समुदाहृत्य विशिष्य ऋत्विक्कर्तृकोपासनफलस्य तद्गामित्वे श्रुतिरुदाहृता।

भाष्ये तस्मादु हैवंविदिति तत्र तस्मादित्यस्यार्थमाह यस्मादिति। तस्मादिति शब्दो हि प्रागुक्तं हेतुं करोति तच्च सो ऽमुनैव स एष ये चामुष्मात् पराञ्चो लोका एताँश्चाप्नोति देवकामाँश्च अथानेनैव ये चैतस्मादर्वाञ्चो लोकास्ताँश्चाप्नोति मनुष्यकामाँश्चेति पूर्ववाक्यं तत्र सो ऽमुनैव सोऽनेनैवेत्यनयोः फलितार्थस्तत्क्रतुन्यायलभ्यस्तदुभयात्मको भूत्वेत्यनेन दर्शितः। एकस्य युगपदुभयात्मकत्वं स एकधा* भवतीत्यादिश्रुतावुपासनासामर्थ्येन युगपदनेकशरीरपरिग्रहस्योक्तत्वादुपपन्नम्। ये चामुष्मात्पराञ्चो लोका ये चैतस्मादर्वाञ्चो लोका इति वाक्यद्वयोक्तफलसमुच्चयेन फलितोऽर्थः सर्वांल्लोकानाप्नोतीत्यनेन दर्शितः। ननु यजमानगामि खलूपासनाफलं† कथमिहोद्गातुः फलमुक्तं नैष दोषः। वचनादृत्विजो ऽपि फलमस्तीत्यनुपदमेवोक्तम् इह च य एवं विद्वान् साम गायत्युभौ स गायतीति प्रकृत उद्गाता सो ऽमुनैवेत्यनयोर्वाक्ययोस्तच्छब्दाभ्यां परामृश्यते। अतो ऽत्रापि वचनबलादृत्विजो ऽपि फलभाक्त्वमविरुद्धमित्याचार्याणामभिप्रायः। एवमपि व्याख्यातुं शक्यम्। य एवं विद्वान् साम गायतीत्यत्र सामगाने प्रयोजककर्ता यजमानो गायतीत्यनेनोच्यते उद्गातुरेकस्य पञ्चभक्तिककृत्स्नसामगातृत्वाभावेन प्रयोजककर्तृपरतयैव कृत्स्नसामगाने एककर्तृकत्वस्य निर्वाह्यत्वादुद्गातृविषयत्वे सामशब्दस्योद्गातृगेयसामभागे लाक्षणिकत्वापत्तेः। अतः प्राग्यजमान एव प्रकृतः तस्यैव च सो ऽमुनैव सोऽनेनैवेति तच्छब्दाभ्यां परामृष्टस्य फलभाक्त्वमुच्यते। यस्मादेवमुद्गातृकर्तृकस्याप्युपासनस्य यजमान एव फलभागी तस्मादेवंविद् उक्तोपासनाप्रकारपरिज्ञातोद्गाता अक्ष्यादित्यपुरुषोपासनेन यजमानं संतोष्याधिकद्रव्यलिप्सुश्चेद् यजमानं पृच्छेदिति। एवं व्याख्याने तु नास्त्यत्रोद्गातुः फलभाक्त्वे वचनमिति विशेषः। ५०३। २

* एकधेति २ पु०। † यजमानोपासन.फलमिति २ पु०।

किं कामं* **फलमागायानीति ।** अत्र किं फलमित्यस्य यो वा ऽमुष्मादितिवाक्योक्तं वा ये चैतस्मादिति वाक्योक्तं फलं वेति न प्रश्नार्थः । य एवं विद्वान् साम गायत्युभौ स गायतीति वचनानुसारेणाक्ष्यादित्यपुरुषोपासनयोरेकविद्यात्वेन द्विविधलोकावाप्त्योः समुच्चितयोर्विद्याफलत्वात्किं तु किमिदं तव विद्यानुष्ठानं कर्मार्थमिति कृतवीर्यवत्तरत्वमेव फलमागायानि उत फलार्थमिति सर्वलोकावाप्त्यादिकमपीति प्रश्नार्थः । आगायानीत्येतदनन्तरमेष ह्येव कामागानस्येष्टइति वाक्यं तत्र किमर्थं फलप्रश्नः । उपासनां करवाणि न वेत्येव प्रष्टव्यम् । कृतायामुपासनायां यजमानेन यत्फलं सङ्कल्पितं तत्स्वयमेव भविष्यतीत्याशङ्कापरिहारार्थं कामं ध्यायन्नप्रमत्तः स्तुवीतेत्यचोद्गातुरपि याजमानफलकामनाश्रवणाद् यजमानस्येष्टमिदं फलं भवत्विति स्वयमपि ध्यायन्नेव तत्फलं संपादयितुमीष्टइति परिहाराभिप्रायः । तस्य वाक्यस्यार्थमाह **समथा हीति*** ॥

५०३ । ६ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४७ ॥

बाल्येनेति । नायमात्मा बलहीनेन लभ्य इति श्रवणात् साङ्गाध्ययनजन्यापातब्रह्मज्ञानरूपस्य श्रवणस्य बलं तत्प्रतिष्ठापकं युक्तिभिरनुचिन्तनरूपं मननमेव बलं† तेन यो ऽयमसंभावनानिरासः स बलस्य भावइति बाल्यत्वेनोपचरितः स एव मननेनेति मननकार्यत्वाद् मननत्वेनाप्युचरितः । इदं व्याख्यानं बृहदारण्यकभाष्यानुसारेणा ऽनाविष्कुर्वन्नन्वयादित्यधिकरणे वक्ष्यमाणेन प्रकारेण बालस्य कर्म बाल्यमिति व्युत्पत्तिमवलम्ब्य व्याख्यानान्तरं शुद्धहृदयत्वेन वेति ब्रह्माहमित्यवगच्छती‡ति ब्राह्मण इति शेषइति सूत्रस्याधिकारार्थत्ववल्लक्षणार्थत्वमप्यङ्गीकृत्य तेन चक्षुषा गृह्यतइति चाक्षुषमित्यादिरूपसिद्धेः शब्दविद्भिरुक्तत्वात् तेनैव सूत्रेणोक्तार्थे शैषिको ऽणप्रत्ययो द्रष्टव्यः । ब्रह्म नित्यमित्यवगच्छतीति ब्राह्मण इति पाठे तु कर्मण्यणित्यण्प्रत्ययः । धातूनामनेकार्थत्वाच्च शब्दकर्मकस्याणतेरिहावगत्यर्थता । साक्षात्कारवत इति भाष्ये हि विद्यावतः संन्यासिन

---

* काममिति नास्ति २ पु० ।

† अत्र त्रयोदशं स्वाम्यधिकरणं पूर्णम् ।

‡ मननं बलमिति १ पु० पा० ।

§ ब्रह्मास्तीत्यवगच्छतीति २ पु० पा० ।

इति व्याख्यानं तद्व्याख्यानं तं वैतमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति विद्वत्संन्यासः प्राक् प्रकृतः विदित्वेति विशेषणादित्येतदभिप्रायं वाच्यं तत्र च विद्वत्संन्यासे साक्षात्कारवति विद्यातिशयः सिद्ध इति भावः । विद्याशब्देनेति भाष्ये प्रकृतो विद्वत्संन्यासो न विवक्षितः किं त्वेतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीति वाक्यान्तरसिद्धो विविदिषुसंन्यासः संन्याससामान्यग्रहणे प्रकरणमपेक्षते न तु तद्विशेषग्रहणे ऽपि विद्यातिशयविधेरनुरोध्यत्वादिति भावः । भेददर्शनवशात् पाक्षिकाप्राप्तौ विधिरिति भाष्यटीकोक्तमन्वयव्यतिरेकावगतफलसाधनभावे फलार्थिनां व्यासङ्गमात्रेण कदा चिदत्र प्रवृत्ति*निरासाय विध्यनपेक्षणादित्याशङ्क्य तत्तात्पर्यमाह **शाब्दज्ञानात्कृत-** ५०४ । १०
कृत्यतां† मन्वान इति । यथा दारान्तरपुत्रैः कृतकृत्यतां मन्वानस्य दारान्तररागेण रोषेण वा अनुगमनाप्राप्तौ ऋतौ‡ उपेयादेवेति नियमविधिः तथेहापीति भावः । एवं चाऽविधेयत्वमुक्तमित्यस्यापूर्वविध्यविषयत्वमुक्तम् इह तु नियमविधिविषयत्वमुच्यत इति पूर्वापरविरोधपरिहारो द्रष्टव्यः । एवमपि विधिच्छायानीति समन्वयसूत्रभाष्यस्य तत्रत्यटीकाग्रन्थस्य च नाञ्जस्यमित्यपरितुष्यन्नाह **अथ वेति ।** दारान्तरपुत्रैरिव अत्र शाब्दज्ञानेन कृतकृत्यतां मन्वानस्य§ मूलं नास्ति दारान्तरपुत्रैरेवानृण्यवत् शाब्दज्ञानमात्रेण ध्यानं विना साक्षात्कारस्य सिद्ध्यसंभवात् अत्र|| न नियमविध्यपेक्षा । अतः पक्षेणेति सौत्रपदतद्भाष्ययोर्भेददर्शनव्यासङ्गात् ध्याने ऽनुत्सहमानस्योत्साहजननार्थं विधिसरूपो ऽयमर्थवाद इत्यत्रैव तात्पर्यमिति भावः । विध्यभावपक्षमेव सिद्धान्तमवलम्ब्य तमुपपादयति **अपि चेति ।** श्रवणमननध्यानानां क्रमेण भवतां ब्रह्मसाक्षात्कारपर्यवसानेन फलवत्त्वमिष्यते¶ तत्र श्रवणमध्ययनविध्यायत्तसाङ्गाध्ययनजन्यापातज्ञानरूपं न किमपि विधिमपेक्षत इतीष्टमेव** । तदेव फलवदर्थनिर्णयार्थविचारात्मके मनने प्रवर्तयेदिति तत्रापि न विधिरपेक्ष्यते । न चानपेक्ष††स्वतन्त्रविचारस्य

---

* अप्रवृत्तीति २ पु० पा० ।
† कृतकृत्यमिति २ पु० पा० ।
‡ स ऋतावीति २ पु० पा० ।
§ कृतकृत्यताभिमानस्येति १ पु० पा० ।
|| अत्रेति नास्ति १ पु० ।
¶ फलमिष्यतइति २ पु० पा० ।
** इति स्पष्टमेवेति १ पु० पा० ।
†† गुर्वनपेक्षेति १ पु० पा० ।

द्वैतशास्त्रविचारस्य वा पक्षे प्राप्तौ नियमविधेरवकाशो ऽस्तीति शङ्कनीयम् । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदिति नियमविधानादाद्यनियमसिद्धेः शास्त्रान्तरविचारस्याद्वितीयब्रह्मसाक्षात्कारानुपायत्वादेव तदप्राप्तेः । न च द्वैतशास्त्रविचारस्य मोक्षार्थब्रह्मज्ञानोपायत्वभ्रान्त्या तत्प्राप्तिः संभवतीति वाच्यम् । भ्रान्तिप्रयुक्तप्राप्तेः नियमविधिनापि वारयितुमशक्यत्वात् तस्यापि नियमविधेर्द्वैतिकृतयोजनया द्वैतशास्त्रविचारनियमविषयताभ्रान्तिसंभवात् । न च वेदान्तार्थग्रथनपरपुराणभाषाप्रबन्धादिविचारस्यापि पक्षे प्राप्तौ वेदान्ता एव विचारणीया इति नियमविध्यपेक्षा ऽस्तीति वाच्यम् । वेदेनैव वेदार्थो ज्ञातव्य इत्यध्ययनविधित एव तस्य नियमस्य लाभात् । इतिहासपुराणाभ्यां वेदं समुपबृंहयेदिति वेदोपबृंहणत्वेनैव पुराणादिविनियोगात् । न म्लेच्छभाषां शिक्षेतेत्यादिभिर्निषिद्धस्य भाषाप्रबन्धस्याप्राप्तेश्च । न च न्यायविचारं विना ऽस्य वाक्यस्यायमर्थ इति न्यायसिद्धार्थविषयगुरूपदेशस्यापि पक्षे प्राप्तिरस्तीति शङ्कनीयम् । लक्षणमुखेन हि ब्रह्म निर्द्धार्य ध्यानेन तत्साक्षात्कारः संपादनीयः । ब्रह्मसद्भावमात्रं संप्रतिपद्य तत्किं ब्रह्मेतीदंतया निर्द्धारणार्थमुपसन्नाय भृगवे यतो वेत्यादिलक्षणमुखेन तदुपदिश्य तद्विजिज्ञासस्वेत्युक्तिसामर्थ्यात् । लक्षणेनैव ब्रह्म निर्द्धार्य ध्यातव्यमिति नियमोन्नयनात् । न हि शृङ्गग्राहिकयोपदेशस्यापि ध्यानसाक्षात्कारोपयोगिब्रह्मनिर्द्धारणोपायत्वे गुरूपाये लक्षणमुखेन ब्रह्मनिर्द्धारणे गुरुः शिष्यं प्रवर्तयेत् । तन्मुखेन ब्रह्मनिर्द्धारणं च प्रधानाद्यतिव्याप्तिनिरासेनासंभवनिरासेन च लक्षणदृढीकरणार्थं सर्ववेदान्तनिर्णायकन्यायविचारमपेक्षते सगुणनिर्गुणवाक्यविवेचनेन निर्गुणवाक्यप्रतिपन्नानन्दादिगुणास्थूलत्वादिनिषेधोपसंहारेणाखण्डवाक्यार्थनिर्धारणमपि तमपेक्षते न्यायानुसंधानाय नेदं वाक्यं सगुणविषयमिदं निर्गुणविषयमिति न्यायानुसंधानरहितस्यासंकरेण धारणासंभवात् तदसंभवे ऽप्येतद्वाक्यं सगुणविषयमेतन्निर्गुणविषयमिति न्यायानुसंधानरहितस्यासंकरेण धारणासंभवात् तदसंभवे च स्वयमनुपपत्तिप्रतिसंधानेनान्याक्षेपकृतानुपपत्तिप्रतिसंधानेन वा क्षोभितहृदयस्य प्राचीननिर्धारणान्यथाभावापत्तेः । यस्य प्राग्भवकृतन्यायविचारवासनातिशयवशादुपदेशमात्रतो ऽपि निश्चलं बृहस्पतिनाप्यक्षोभ्यं निर्द्धारणं संभवति तस्य मननापेक्षायामपि दोषाभावात् ।

अत एव तत्कारणं सांख्ययोगाभिपन्नमिति श्रुत्या सांख्ययोगशब्दितं विचारोपदेशमात्रपूर्वकब्रह्मप्रतिपत्त्युपायद्वयमुक्तम् । न च सोपाधिकात्मसाक्षात्कारक्लृप्तकरणभावमनोव्यापारस्य पक्षे प्राप्तिरस्तीति शङ्कनीयम् । ज्ञानमात्रे क्लृप्तकारणभावस्य समाहितो भूत्वेति विशिष्यात्मदर्शने नितरामपेक्षितत्वेन श्रुतस्य च तस्य नियतप्राप्ततया व्यावर्तनाऽयोगात् । तथापि मनसः करणतया प्राप्तिः पाक्षिकीति चेद् न । मनसैवानुद्रष्टव्यमिति श्रुतेः श्रवणादिसंस्कृतं मन आत्मदर्शने करणमिति गीताभाष्यदर्शनाच्च मनस एव करणतयाऽपि नियमेन प्राप्तिः । एवं पाक्षिकस्याप्युपायान्तरस्य प्राप्त्यसंभवे समुच्चयेनोपायान्तरस्य व्यावर्तनयोग्यस्य प्राप्तिर्दूरापास्तेति नोपायपरिसंख्यापि शङ्क्याहा ।

अवघातो हीति । दर्शपूर्णमासयोरुत्पत्तिशिष्टपुरोडाशावरुद्धेष्वाग्नेयादियागेषु साक्षात्साधनत्वेन निवेशमलभमाना व्रीहिभिर्यजेतेति यागसाधनभावेन श्रुतव्रीहयः पुरोडाशद्वारा तदन्वयं लभन्ते तेषां पुरोडाशसाधनत्वात्तन्दुलादिद्वारेति तन्दुलभावनापेक्षितोऽवघातः प्रत्यक्षविधिमनपेक्ष्य सामर्थ्यादेव प्राप्नोति किं तु नखविदलनादिकमपि तद्वदेव पक्षे प्राप्नुयादिति सामर्थ्यादवघातस्य प्राप्तिः सार्वत्रिकी न भवेत् । अतस्तत्सार्वत्रिकत्वसिद्धये नियमविधिराश्रीयतइत्यर्थः । **इमामगृभ्णन्निति ।** अग्निचयने अश्वरशनाग्रहणं गर्दभरशनाग्रहणं चानुष्ठेयम् । अतस्तत्प्रकरणाम्नातस्य इमामगृभ्णन्निति मन्त्रस्य रशनाग्रहणप्रकाशनसामर्थ्यरूपाल्लिङ्गाद् उभयत्रापि विनियोगप्राप्ताविमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्तइति परिसंख्याविधिर्गर्दभरशनाग्रहणाद् मन्त्रव्यावर्तनफलं स्वीक्रियतइत्यर्थः । यद्यपि नियमविधावपि नखविदलनादिनिवृत्तिरस्ति तथाप्यवघाताप्राप्तांशपरिपूरणे कृते तन्निवृत्तिर्भवतीति प्राथमिकत्वाद् विधेयगतत्वेन प्रत्यासन्नत्वात्प्राप्तांशपरिपूरणं तत्र फलम् । इतरनिवृत्तिरानुषङ्गिकी परिसंख्यायां तु द्वयोरपि नित्यप्राप्तेरप्राप्तांशपरिपूरणासंभवादितरनिवृत्तिरेव फलमन्ययोगान्ययोगव्यवच्छेदरूपफलाभ्यां नियमपरिसंख्ययोर्भेदः । ५०४ । ८

न त्विति । ननु यथा प्रसिद्धयोर्नियमपरिसङ्ख्योदाहरणयोर्विकल्पसमुच्चयाभ्यां प्राप्नुवदुपायान्तरमस्ति नैवमत्रोपायान्तरं संभवतीत्यनेन ग्रन्थेनोच्यते । नैतद्युक्तम् । नियमविधौ यथावघातप्रतिद्वन्द्वि नखविदलनमुपायान्त- " । १२

रमस्ति नैवमिमामगृभ्णन्निति मन्त्रस्य प्रतिद्वन्द्विरशनाप्रकाशनोपायान्तरमस्ति किं तु मन्त्रप्रकाश्याश्वरशनाग्रहणप्रतिद्वन्द्वि गर्दभरशनाग्रहणमुपायान्तरमेवास्ति । अतः प्रकृते उपायान्तरसंभवे उदाहृतपरिसंख्याविधेर्व्यतिरेकदृष्टान्तता न घटतइति चेत् । सत्यम् । उपायोपेयसाधारण्येन निवर्तनीयप्रतिद्वन्द्विसंभवमात्रे व्यतिरेकदृष्टान्तता विवक्षितेति न दोषः । उपायान्तरपरिसंख्यायां तु गृहमेधीयाज्यभागविधानमुदाहरणम् । तद्धि गृहमेधीयापेक्षिताखण्डोपकारोपायत्वेनाज्यभागद्वयतदितराङ्गकलापयोः प्राप्तावितराङ्गकलापव्यावर्तनं फलम् । ननु च ब्रह्मसाक्षात्कारव्यक्तावुपायान्तरासंभवादित्यादिशङ्कापरिहारग्रन्थयोर्नियमविध्युपपादनार्थता प्रतीयते तच्चोपायान्तरप्राप्तौ हि नियमविधिः । न च ब्रह्मसाक्षात्कारे वेदान्तश्रवणादिव्यतिरेकेणोपायान्तरमस्ति । अतस्तत्र विधिमभ्युपगच्छता ऽपूर्वविधिरास्थेय इति शङ्का विशिष्य गृहीतकार्यकारणभावस्योपायान्तरस्याभावे ऽपि साक्षात्कारयोग्यसूक्ष्मार्थविषयकशास्त्रश्रवणादिकं तत्साक्षात्कारकारणमिति तत्र शास्त्रश्रवणादिषु सामान्यतः कार्यकारणभावग्रहेण क्रोडीकृतं पुराणश्रवणादिकमप्युपायान्तरमस्तीति नियमविधिर्युक्तः सामान्यकार्यकारणभावग्रहमूलप्राप्तिमात्रमेव नियमविधावुपयुज्यते यथा ऽवघातादाविति परिहारश्च वर्णित इति प्रतीयते । नैतद्युक्तम् । न ह्यत्र नियमविध्युपपादनं प्रस्तुतं पूर्वोत्तरग्रन्थयोस्तन्निराकरणार्थत्वात् । न चाचार्यैः प्रदर्शितो नियमविधिपक्षो ऽपि पाक्षिकोपायान्तरप्राप्तियुक्तः किं तु ऋतुगमनादिनियमविधिवत्पाक्षिकाप्राप्तियुक्तः । न चेमौ शङ्कापरिहारग्रन्थौ नियमविध्युपपादनमनपेक्ष्य केवलमपूर्वविध्यभावोपपादनपरतया योजयितुं शक्यौ । कथम् । शङ्का तावदपूर्वविध्युपपादनविषयतया योजयितुं न शक्या । न ह्युपायान्तरासंभवः साक्षादपूर्वविधित्वे हेतुः । पश्वादिषूपायान्तरसंभवे ऽपि चित्रया यजेत पशुकाम इत्यादीनामपूर्वविधित्वदर्शनात् । प्रयाजादिजन्योपकारेषूपायान्तरासंभवे ऽपि प्रयाजे कृष्णलं जुहोतीत्यादीनां प्रयाजाद्यंशे अनुवादत्वदर्शनाच्च । तथा परिहारो ऽप्यपूर्वविध्यभावोपपादनविषयतया योजयितुं न शक्यः । न हि परिहारग्रन्थेन वेदान्तश्रवणादेरपूर्वविधिविरोधी मानान्तरसिद्धः कार्यकारणभावो ऽभिधीयते किं तु तत्प्रतिद्वन्द्विन उपायान्तरस्य इतरथेत्यादिग्रन्थे उपायान्तराऽपरिज्ञा-

नादतो हेतुना तथा तदाशयस्फुटीकरणादिति । तस्मादिमौ शङ्कापरिहारग्रन्थावनुचितार्थाविति चेत् । उच्यते । ब्रह्मसाक्षात्कारे वेदान्तश्रवणादिकं कारणमिति विशिष्य तयोः कार्यकारणभावग्राहकमुपायान्तरं मानान्तरं नास्ति । अतो मानान्तराप्राप्तकार्यकारणभावविषयत्वादपूर्वविधिः श्रवणादिष्वङ्गीकर्तव्य इति शङ्कार्थः । विशिष्यकार्यकारणभावग्राहकाभावे ऽपि सामान्यतः साक्षात्कारयोग्यस्य बहुशः श्रवणमननादिभिर्निर्द्धारितस्वरूपस्य चिरन्तनाभ्यस्तं ध्यानं मानसे तत्साक्षात्कारे कारणमिति कामिनीभावनानत्साक्षात्कारयोर्गृहीतः कार्यकारणभावो ऽस्ति । अतो नापूर्वविधेरवकाशः । सामान्यतः कार्यकारणभावग्रहो ऽप्यपूर्वविधिविरोधीत्यन्यथानियम्यावघातव्यक्तिसाध्यापूर्वीयतण्डुलव्यक्तौ य उपायनियम्यो ऽवघातः तस्यान्तरमवकाशः कारणत्वेन प्रवेशः तस्यापरिज्ञानान्मानान्तरेण ज्ञानाभावादपूर्वविधिः स्यादिति परिहारार्थः ।

सर्वमानेति । द्रष्टव्य इति हि दर्शनरूपं फलमिहाश्रितम् । तच्च ५०५ ।
सर्वेषां प्रमाणानां साधारणं फलम् । अतः सर्वेषु प्रमाणेष्वात्मदर्शनफलार्थमनियमेन प्रसक्तेषु वेदान्त एव तत्र प्रमाणमिति नियमनाय श्रोतव्य इत्यनेन वेदान्तश्रवणमाहेत्यर्थः । **सन्निधानादेवेति** । योग्यतावशादित्यर्थः । वेदान्तैकवेद्ये ब्रह्मात्मैकत्वे तदतिरिक्तप्रमाणानां योग्यतया निवृत्तौ वेदान्तश्रवणनियमः स्वयमेव लभ्यते तदर्थे श्रोतव्य इत्यनेनानुवदन्तीति वार्तिकार्थ इति तात्पर्यम् । **तच्चानुपपन्नमिति** । यदि बाल्यप्रधानमाश्रमान्तरमपि भवेत् तदा तदनुपपन्नं स्याद् अतस्तथाभूतमाश्रमान्तरं नास्तीत्यर्थः । **वैखानसा इति** । उक्तं महाभारते ।

> ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः ।
> चत्वार आश्रमाः प्रोक्ता एकैकस्तु चतुर्विधः ॥ इति ।

तत्र गायत्र्यादयो ब्रह्मचारिभेदाः । वार्तावृत्तयः शालीनवृत्तयो यायावरा घोरसंन्यासिकाश्चेति गृहस्थभेदाः । वैखानसाद्या वनस्थभेदाः । कुटीचकबहूदकहंसपरमहंसा यतिभेदाः* ॥

---

* अत्र चतुर्दशं सहकार्यान्तरविध्यधिकरणं पूर्णम् ।

५०५ । १२ **अनाविष्कुर्वन्नन्वयात् ॥ ५० ॥**

शेषिविध्यनुग्रहणमिति । बाल्यं तावद्विद्याशेषत्वेन विधीयते विद्या च कामचारादिभ्यो निवृत्तेनैव लभ्यते नाविरतो दुश्चरितादित्यादिश्रुतेः । अनन्यव्यापारत्वस्य विद्याभ्यासेनापेक्षितत्वाच्च । शेषिविरोधेन च शेषो ग्राह्यः । अत एव यदा यूपार्थे तनुरेव खदिरो लब्धः तत्र तक्षणादौ कृते अतिकनीयस्त्वप्राप्त्या पश्वनपक्रमणप्रयोजनकं पशुनियोजनार्थं यूपद्रव्यं न संभवति चेत् तक्षणादित्यागो द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वा*दिति पूर्वतन्त्राधिकरणे निर्णीतः । यदैवं शेषिविरोधे क्लृप्तस्यापि शेषस्य त्यागः तदा किमु वक्तव्यम् इह तद्विरोधी बाल्यशब्दस्य संभावितार्थान्तरस्यार्थत्वेन न ग्राह्य इत्यवेति भावः । ननु शास्त्रान्तरबाधनमपरं कारणमित्येतदयुक्तं क्रत्वर्थपुरुषार्थतया विषयभेदापत्तेः । न च विषयभेदेनाविरोधे ऽपि बाल्यवामदेव्योपासकादिषु क्लृप्तसंकोचस्य नियमविधायिनः सामान्यशास्त्रस्यैव संकोचानौचित्यात् । विशेषशास्त्राऽसंकोचाय सामान्यशास्त्रस्यैव संकोचनस्यान्यत्र क्लृप्तत्वाच्च । तथा हि द्वादशाहे संस्थिते षडहे मध्वाशयेद् घृतं वेति ऋत्विजां वैकल्पिकं मध्वशनं विहितं द्वादशाहः सत्राहीनोभयात्मकः सत्रे यजमाना एव ऋत्विजः यजमानानां ब्रह्मचर्यविधानाद् ब्रह्मचर्य्यशब्दार्थस्य वेदाध्ययनस्याधीतवेदेषु दीक्षितेषु विधानाऽयोगेन ब्रह्मचर्य्यशब्दस्य तद्धर्मलक्षकतया तद्धर्मान्तर्गतो मध्वशननिषेधो ऽपि तेषां सामान्यतः प्राप्तः । तत्र यद्यपि सामान्यशास्त्राबाधाय मध्वशनस्याहीनद्वादशाहविषयतया संकोचः कल्पयितुं शक्यते तथापि शेषशास्त्रस्य लक्षणप्रतिपदोक्तन्यायेन बलवत्त्वादेतदनुसारेण सामान्यशास्त्रस्यैव ज्योतिष्टोमादतिदेशप्राप्तस्य विशेषशास्त्रानुसारेण मध्वशनव्यतिरिक्तेषु संकोचन्यायेन बलवत्त्वाद् यो मधु न दीक्षिता ब्रह्मचारित्वा†दिति पूर्वतन्त्राधिकरणे निर्णीतः । तस्मात् सामान्यशास्त्राबाधनमपरं कारणं भवितुं नार्हतीति चेत् सत्यम् । शेष्यनुग्रहेण कारणेन सिद्धस्यार्थस्यानुषङ्गिकं प्रयोजनं कारणान्तरत्वेन व्यपदिष्टमिति न दोषः । तदेतच्छास्त्रान्तरबाधनमेवं सति न भविष्यतीत्युक्तिभङ्ग्या सूचितम्‡ ॥

* जै॰ सू॰ अ॰ ६ पा॰ ३ सू॰ ३८ । † जै॰ सू॰ अ॰ १० पा॰ ६ सू॰ ३२ ।

‡ अत्र पञ्चदशं अनाविष्काराधिकरणं पूर्णम् ।

ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५१ ॥ ५०६ । १

श्रवणादिघटकत्वादिति। विविदिषोत्पादनद्वारेति शेषः। **विद्यया ऽवश्यं भाव्यमिति।** यदि विद्या यज्ञादिफलं स्यात्तदा चित्रादिफलवत्कदाचिदामुष्मिक्यपि भवेद् न त्वेतदस्ति। यज्ञादीनां विविदिषामात्रेण चारितार्थ्यात्। अतः श्रवणादिषु सत्सु विद्यया ऽवश्यं भाव्यं चक्षुरादिव्यापारेषु सत्सु घटादिप्रमित्येवेति भावः। **न चैवमिति।** प्रतिबन्धकनिरासार्थं खलु यज्ञादिकमनुष्ठीयते। यदि तस्यापि प्रतिबन्धनिवृत्तिरूपस्वफलजनने प्रतिबन्धान्तरं स्यात्तदा तन्निवृत्त्यर्थमपि कर्मान्तरमनुष्ठेयं भवेत्। एवं तत्तत्प्रतिबन्धकनिवृत्त्यर्थमपीत्यनवस्थेत्यर्थः। इदमुपलक्षणं सत्यामपि विविदिषायां विद्योत्पत्तिप्रतिबन्धककर्मनिरासार्थं कर्मानुष्ठेयं स्यादिति ब्रह्मसंस्थायाः कदापि नावकाशः स्यादित्यपि दोषो द्रष्टव्यः। **यज्ञादिप्रतिबन्धकस्येति।** यज्ञादीनां विविदिषाश्रवणमनननिदिध्यासनसाक्षात्काराणां च प्रतिबन्धकानि दुरितानि संभाव्यन्ते तत्र यज्ञादिप्रतिबन्धकानि भोगैकनाश्यानीति भोगेन तत्क्षये सत्येव यज्ञाद्यनुष्ठानं विविदिषादिप्रतिबन्धकानि तु प्रारब्धान्यप्रारब्धानि च द्विविधानि यस्य सर्वाण्यपि प्रारब्धानि तस्य सत्यपि यज्ञाद्यनुष्ठाने भोगेन प्रारब्धक्षये सति जन्मान्तरएव विविदिषादिप्रवृत्तिः। यस्य सर्वाण्यप्यप्रारब्धानि तस्य तेषां यज्ञादिभिः क्षयाद् यज्ञाद्यनुष्ठानजन्मन्येव यस्य तु श्रवणादिषु पूर्वस्याप्रारब्धानि प्रतिबन्धकान्युत्तरस्य प्रारब्धानि तस्य प्रतिबन्धकरहितं पूर्वंपूर्वंविविदिषाजन्यमुत्पद्यते प्रारब्धप्रतिबन्धमुत्तरोत्तरं जन्मान्तरइति विवेकः। एवं च विविदिषन्तिवाक्यानुसारेण कर्मणां विविदिषासाधनत्ववत्कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते इत्यादिवचनानुसारेणाऽविद्यादिप्रतिबन्धककर्मक्षयसाधनत्वमप्याचार्याणामभिमतमिति द्रष्टव्यम्। **प्राग्भवीयेति।** अत एव हि केषांचिदेवेह जन्मनि गान्धर्वशास्त्रविचारे पूर्वजन्मवासनावशाज् झटिति षड्जादिसाक्षात्कारो जायते नान्येषामिति भावः।

देवताप्रणिधानाद्यपेक्षायाश्चेति। ,, । १८

वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः।
तालज्ञश्चाप्रयासेन मोक्षमार्गं निगच्छति ॥

गीतिज्ञो यदि योगेन नाप्नोति परमां गतिम् ।

रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥

इति याज्ञवल्क्यस्मृतौ संगीतज्ञानस्य महाफलत्वस्मरणाद् देवताप्रसादापेक्षितेति भावः* ॥

५०६ । २४ **एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ ५२ ॥**

तथा च सातिशयत्वादिति । निकृष्टाऽपकृष्टसाधनसाध्यत्वेन सातिशयत्वसिद्धौ ततः कर्मसाध्यत्वमपि विद्याया अनुमीयतइत्यर्थः । **तत्र तत्र साधकेष्विति ।** श्रुत्युपपत्तिरूपेषु बहुषु साधकेषु सत्स्वित्यर्थः । **तर्हि स एवास्त्विति ।** निवर्त्यविशेषोपाधिक एव विशेषो ऽस्त्वित्यर्थः । यद्द्वारेत्यादिपाठे निवर्त्यविशेषद्वारेत्यर्थः । तर्हि सावशेष एवास्त्वित्यपि पाठान्तरम् । पाठद्वये ऽपि फलत एको ऽर्थः । अविद्याकामकर्मादिक्षये सावशेषे अवशिष्टावरणतारतम्येन सूक्ष्मसूक्ष्मतरसूक्ष्मतमवस्त्रावृतरविमण्डलप्रकाशवद् ब्रह्मानन्दप्रकाशो मोक्षे तारतम्येन भवेदिति सातिशयो मोक्ष इति पाठद्वयेपि तात्पर्यम् । टीकायामप्ययमर्थो येन तद्विशेषान्मोक्षो विशेषवान् भवतीति वाक्येन स्फुटीकृतः । **अविशेषसंभवादिति ।** तथा चाप्रयोजकमनुमानमित्यर्थः । ननु स्नेहवर्त्युत्कर्षापकर्षाभ्यां दीपज्वालाया इव श्रवणाद्युत्कर्षापकर्षाभ्यां विद्यायाः स्वरूपतो ऽपि विशेषः स्यात् सो ऽत्र हेतुरित्याशङ्क्याह **स्वाभाविकस्त्विति । भेदाभेदविकल्पासहत्वमिति ।** अद्वैतश्रुतिविरोधाद् न भिन्ना विशेषाः । अभेदे च ते न परस्परविलक्षणाः । भेदाभेदपक्षश्च दूषित इति भावः† ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ वेदान्तकल्पतरुपरिमले तृतीयस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चायं साधनाख्यस्तृतीयो ऽध्यायः ।

---

* अत्र षोडशं ऐहिकाधिकरणं पूर्णम् ।

† अत्र सप्तदशं मुक्तिफलाधिकरणं पूर्णम् ।

वेदान्तकल्पतरुपरिमले

चतुर्थो ऽध्यायः ।

आवृत्तिरसकृदुपदेशात् ॥ १ ॥ ५०८ । १

अध्यायविषययोरिति । मुख्यक्रमेण वाङ्गानां तदर्थत्वादिति न्यायात्* प्रधानक्रमेणाङ्गक्रमौचित्यादिति भावः । **अदृष्टार्थत्वं विधेयत्वं च मन्यतइति ।** तथाऽभिमानस्य मूलमचाहेत्यादिशङ्काभाष्यतद्व्याख्यानाभ्यां स्पष्टंभविष्यतीत्यच न विवृतम् । **अहंग्रहोपास्तिष्वप्याहेति ।** तास्वप्युपासिधात्वर्थान्तं नीतावृत्तिमात्रं कर्त्तव्यं न तु यावत्फलोदयमावृत्तिः दृष्टफलत्वाभावादिति भावः । विद्योत्पादविरोधिपरतयेत्यनेनानिर्वाच्यत्वं विवक्षितमिति भावः । इवकार उपरि नेतव्य इत्युक्तम् । उपरिनीतस्य तस्यार्थो विवरणवाक्ये तद्वदित्यनेन दर्शितः । लोकसिद्धत्वादित्यन्तः सोपपादनोपमानवाक्यार्थप्रदर्शनाय तदनन्तरमुपमानोपमेयभावद्योतनं तद्वत्तथेत्यादिशब्दवदिवशब्देन व्युत्पत्तिसिद्धं न भवतीति तद्वदित्यनेनेवशब्दो विवृतः । **शब्दार्थसाक्षात्कारत्वादिति ।** यस्य स्याद्धेति वचनोक्तैहिकसगुणेश्वरसाक्षात्कारवत् पर्य्यङ्कविद्यादिप्रतिपन्नपारत्रिकतत्साक्षात्कारो ऽपि परम्परया श्रवणाद्यभ्याससाध्यः यागादिजन्यस्वर्गसुखादिविषयपारत्रिकसाक्षात्कारः स्वर्गकामादिवाक्यार्थविषयकापातन्यायविचारजन्यतन्निर्णययागादिसङ्कल्पकालकर्त्तव्यफलध्यानसाध्यः एवं तपःप्रभावसन्निधापितदेवतासाक्षात्कारो ऽपीति न क्वापि व्यभिचारः ।

श्रवणादीति । श्रवणादेरनेकस्योपायस्य दृष्टार्थत्वेनार्थप्राप्तस्योपदे- ५०९ । २
शो ऽनुवादः तस्माल्लिङ्गाद् दृष्टफलसिद्धये प्रत्येकमपि श्रवणादित्रयमभ्यसनीयं मनननिर्वर्त्तनीयबहुविधसंदेहकन्दलदलनपर्य्यन्तं साङ्गाध्ययनवत: पदार्थवाक्यार्थव्युत्पत्तिलभ्यापातज्ञानरूपश्रवणाभ्यासः । तदुपस्थितसकलसंदेहनिवृत्तये मननाभ्यासः । साक्षात्कारोदयाय निदिध्यासनाभ्यासः । प्रत्येकमाविद्य-

---

* जै० सू० अ० ५ पा० १ सू० १४ ।

मभ्यसनीयमिति पाठे आविद्यमित्येकैकाभ्यासस्य नावधिनिर्देशः किं तु स्वस्वावान्तरफलपर्यन्तानां श्रवणादीनामभ्यासपरम्परायाः । **अनुषङ्ग एव स्यादिति** । अनुषङ्गमात्रं भवति न त्वध्याहारगौरवमित्यर्थः । यद्यपि प्रत्ययस्यात्मभूतं परं ब्रह्म समर्पयतीति भाष्ये कस्यात्मभूतमित्याकाङ्क्षायामन्तरङ्गत्वात्स्वस्यात्मभूतमिति लभ्यते न तु जीवस्येति बहिरङ्गत्वाद् यथा ऽन्तर्द्धौ येनादर्शनमिच्छतीति सूत्रे कस्यादर्शनमित्याकाङ्क्षायामात्मन इति लभ्यते न त्वन्यस्येतीत्येव वक्तुं शक्यं तथापि शाब्द्याकाङ्क्षा शब्देनैव पूर्यतइति न्यायात् प्रत्ययस्येति शब्देनाकाङ्क्षापूरणं कार्यं स तु नाध्याहारः किं तु प्रत्ययस्य विभक्तिविपरिणामेनानुषङ्ग इति भावः । शाब्दिकवद् विभक्तिवचनविपरिणामेनानुषङ्गमनिच्छतां संयजचैरङ्गानीत्यत्र गच्छतामित्यध्याहारं वदतां मीमांसकानां त्वत्राप्यध्याहार एव तथापि बुद्धिसन्निहितप्रत्ययविषयशब्दाध्याहारादतथाभूतजीवविषयशब्दाध्याहारो गुरुरिति मीमांसकमते विशेषो द्रष्टव्यः ।

५१० । २६ **अपरोक्षप्रमोत्पत्त्यर्थ इति** । श्रवणादेरावर्त्यमानस्यापरोक्षप्रमोत्पादकत्वं न संभवति अतस्तस्या ऽदृष्टद्वारा मुक्त्यर्थत्वमेव वाच्यमिति यो ऽयं श्रवणादेरुपयोगमङ्गीकृत्य तस्य दृष्टार्थत्वाभवेनावृत्त्याक्षेपः कृतः स तस्यापरोक्षरूपदृष्टार्थत्वाभावस्तदपरोक्षकरणप्रमाणाभावात् प्रमेयस्यायोग्यत्वाद् वा भवतीति द्विविधो ऽपि दृष्टार्थत्वाभावहेतुः क्रमेण टीकायां निराक्रियतइति भावः । **पारमार्थिकप्रतियोगिकइति** । अत्र प्रतियोग्यभावयोः पारमार्थिकत्वं व्यावहारिकसमानसत्ताकत्वं प्रतियोगिप्रमाणमेवेति अत्र रूपग्राहकं चक्षुरेवाचाक्षुषे वायावपि रूपाभावग्राहकम् । अत एव तत्र रूपाभावग्रहणे चक्षुर्व्यापारापेक्षेत्यादि तत्रोदाहरणं केचन मन्यन्ते वैशेषिकादयः । स्वमते रूपाद्यभावो ऽनुपलब्धिप्रमाणगम्यः । नानुपलब्धिमात्रं प्रमाणं किं तु योग्यानुपलब्धिः योग्यता च प्रतियोगिसत्त्वविरोधिता । अतो योग्यताघटकत्वेन चक्षुर्व्यापारापेक्षा । तदभावे ह्यधिकरणे प्रतियोगिसत्त्वे ऽपि तद्विषयप्रमाणाभावेन संभवन्त्यनुपलब्धिः प्रतियोगिसत्त्वविरोधिनी न स्यात् । **उपाधीनां मिथ्यात्वादिति** । ननु मिथ्यात्वमिह व्यावहारिकत्वं न तु प्रातिभासिकत्वं ब्रह्मण्युपास्यगुणानां श्रुत्युपदिष्टानां व्यावहारिकत्वात् । उक्तं हि व्यतिहाराधिकरण*भा-

* ब्या॰ सू॰ अ॰ ३ पा॰ ३ सू॰ ३७ ।

ध्ये यथा ध्यानार्थे ऽपि सत्यकामादिगुणोपदेशे तद्गुण ईश्वरः प्रसिध्यतीति। तस्मात्कुम्भाभाववदुपाधीनामभावस्यापि व्यावहारिकत्वात् तद्वदेवाधिकरणात्ते भिद्यन्तइति युक्तमिति चेदुच्यते । यत्र यत्प्रतीतं व्यावहारिकं ततो ऽन्यत्र तदभावो भवतु व्यावहारिकः यत्र प्रतीतं तत्रैव तदभावो न व्यावहारिको भवितुमर्हति समानसत्ताकार्याभावयोर्विरोधात् । न च ब्रह्मण्यथात आदेशो नेति नेतीत्यादिश्रुतिभिरुपदिष्टा उपाधीनामभावाः प्रातिभासिका भवितु-मर्हन्ति अतः पारमार्थिकाः सन्तः ते न ब्रह्मणो भिन्ना अद्वैतश्रुतिविरो-धात् । न च भावाद्वैतेष्टिः । अद्वैतश्रुतिसङ्कोचकल्पनायोगात् । अन्यथा भेदवादिनां क्लिष्टाद्वैतश्रुतियोजनाया अपि प्रवेशापत्तेः । उक्तं हि वार्तिके ।

प्रसरं न लभन्ते हि यावत् क्व चन मर्कटाः ।
नाभिद्रवन्ति ते तावत्पिशाचा वा स्वगोचरे ॥ इति ।

तस्मादुपाधीनां मिथ्यात्वात् तदभावो ऽधिकरणातिरिक्तो नास्तीति युक्तमेव । **नास्ति वास्तव इति** वास्तवविशेषणम् अधिकरणातिरेकाभ्यु ५११ ।
पगमे वास्तवत्वमप्युपाध्यभावानामुक्तन्यायेनाभ्युपगन्तव्यं न च तदभ्यु-पगमो युक्तः अद्वैतश्रुतिविरोधादिति सूचनार्थम् । **न चैवमिति** । ब्रह्मव्य-तिरिक्ताभावनिषेधे ऽतिरिक्तः स्यात्तस्याप्यतिरेकनिषेधे तस्यापि तन्निषेधो वक्त-व्य इत्येवमित्यनवस्थेत्यर्थः । अद्वैतश्रुत्यविरोधायाधिकरणं ब्रह्मैव सर्वाभा-वव्यवहारालम्बनमित्यभ्युपगमान्नानवस्थेति परिहाराभिप्रायः । स्वप्रकाशानुभ-वस्य केनाभिभवो वेदान्तैर्व्युदसनीयः कथं च तेषां तद्व्युदसनसामर्थ्यमित्या-काङ्क्षायामाह **एतदुक्तं भवतीति । यथा देवदत्ते तदैक्ये चेति ।** एवमेव ब्रह्मणि तदभेदे च भासमाने ऽपि ब्रह्मान्यज् जीवो ऽन्य इत्यारोपस्तत्त्व-मसीति वेदान्तवाक्यश्रवणादिमूलकमभेदसाक्षात्कारं विना न निवर्ततइत्यर्थः । ननु दृष्टान्ते दार्ष्टान्तिके च पूर्वापरज्ञानयोर्विषयकृतविशेषाभावे केन विशेषे-णोत्तरज्ञानस्य भेदभ्रमनिवर्तकत्वं न पूर्वज्ञानस्येति चेत् सो ऽयमिति तत्त्व-मिति च पदयोर्वाच्यार्थरूपं यद्धर्मद्वयं तत्परामर्शरूपकारणविशेषाधीनेन ज्ञा-नस्य ज्ञेयेन सह स्वरूपसंबन्धविशेषेण एवं स्वरूपसंबन्धविशेषकृतमेवाभि-ज्ञाप्रत्यभिज्ञयोर्लोके वैलक्षण्यं न तु विषयविशेषकृतं यथा विशेषणविशेष्यत-त्संबन्धगोचरात्समूहालम्बनाद्विशिष्टज्ञानस्य विशेषणज्ञानादिकारणविशेषाधी-

नस्वरूपसंबन्धविशेषकृतमेव वैलक्षण्यं यथा वा परस्परविरुद्धस्थाणुत्वपुरु-
षत्वज्ञानयमित्याहार्यनिश्चयात्संशयस्य दोषरूपकारणविशेषाधीनस्वरूपसंब-
५११ । २८ न्धविशेषकृतमेव वैलक्षण्यम् । **तन्त्रीकण्ठोद्भवा इति** । वीणागाने तन्त्र्यु-
द्भवाः शारीरगाने कण्ठोद्भवाश्च तत्तत्स्थानविशेषप्रभवमन्द्रमध्यमतारध्वनी-
नामनुरणनरूपा नादाः स्वरास्तेषां षड्जादीनां स्वराणां षड्जादिप्रधानाः
षड्जग्रामो मध्यमग्रामो गान्धारग्राम इति त्रिविधा ग्रामास्तेषां ग्रामाणामारो-
हावरोहरूपाः प्रत्येकं सप्तविधा एकविंशतिमूर्च्छनाः । **स्वेनैवेति** । टीकाकृता
कृतैवेत्यर्थः । यद्यपि टीकायां वाक्यात् साक्षात्कारोत्पत्तिप्रकारस्योपपादि-
तत्वे ऽपि भाष्ये तदुपपादनमिदानीं क्रियतइति वक्तुं शक्यं तथाप्ययमभि-
सन्धिरित्यारभ्य पूर्वभाष्यतात्पर्यविषयत्वेनैव टीकायां तदुपपादनस्य कृत-
त्वाद् उत्तरभाष्यार्थत्वं तस्यायुक्तमिति टीकाकारहृदयमित्याशयः । **एता-
वानाक्षेप इति** । साक्षात्कारकरणस्यान्तःकरणस्य भावनाप्रचयसाहित्यार्थं
धात्वर्थोपसंगृहीतावृत्तिगर्भस्य निदिध्यासनस्येव बहुविधशङ्कानिराकरणार्थं
मननस्येव च साङ्गाध्ययनजन्यवाक्यार्थज्ञानरूपस्य श्रवणस्यावृत्तेर्नास्त्युप-
योगः । न च मनननिवर्तनीयबहुविधशङ्कोत्थानाय श्रवणावृत्त्यपेक्षा ऽस्तीति
वाच्यम् । सकृच्छ्रवणे ऽपि धीमतः सकलशङ्कोत्थितेः स्वतस्तदुत्थानाभावे
ऽपि न्यायविचारशास्त्रनिबन्धनतयैव विचारकाले तदुत्थितिसंभवात् । अन्य-
थोत्थापनीयशङ्केयत्तानवगमेन श्रवणापर्यवसानप्रसङ्गात् । कैमुतिकन्यायो न
हि दृष्टे ऽनुपपन्नं नामेति भाष्यान्न प्रतीयतइत्याशङ्क्य तद्भाष्यारूढं करोति
वाक्याभ्यासानभ्यासाभ्यामिति । यद्वाक्यं तत्त्वमसीतिवदभ्यस्तं यद्वा
नाभ्यस्तं तेन द्विविधेनापि वाक्येन यदेकजातीयं परोक्षज्ञानं जायते तस्मि-
न्नपीत्यर्थः । वाक्याभ्यासाभ्यासाभ्यामिति पाठे वाक्यमभ्यस्तमभ्यासो वाक्या-
भ्यासः ताभ्यामित्यर्थः ।

५१२ । १२ **परोक्षार्थस्येत्यर्थ इति** । न हि दृष्टइति भाष्ये दृष्टइत्यस्य विवर-
णार्थं दृश्यन्ते हीति भाष्यं कैमुतिकन्यायप्रदर्शनाय परोक्षार्थवाक्ये आवृत्त्यपे-
क्षासद्भावप्रदर्शनपरं न तु वाक्यमात्रे अपरोक्षार्थवाक्यआवृत्त्यपेक्षाया इदानीं
साध्यमानत्वात् । अतो दृश्यन्ते हीत्यादिभाष्यार्थानुवादके तदेवं वाक्यमा-
त्रस्येति टीकाग्रन्थे वाक्यपदं परोक्षार्थकवाक्यपरं व्याख्येयमिति भावः ।

अत्रेदं वक्तव्यम् । वाक्यादिहापरोक्षज्ञानोत्पत्तिर्न साक्षाद्विवक्षिता येन वाक्यात्सार्वत्रिकस्वारसिकशाब्दज्ञानोत्पत्तावप्यावृत्त्यपेक्षायां क्वाचित्कयत्नसाध्यापरोक्षज्ञानोत्पत्तौ तदपेक्षा ऽस्तीति किमु वक्तव्यमित्युच्येतापि किं तु वाक्ये शाब्दज्ञानमुत्पाद्योपरते निदिध्यासनरूपभावनाप्रकर्षादेव तदुत्पत्तिरभिमता तत्र वाक्यस्य परम्परयोपयोगमात्रम् । अतस्तत्र वाक्यश्रवणावृत्तेरपेक्षा कैमुतिकन्यायान्न सिध्यति आवृत्तादनावृत्ताद्वा शब्दादर्थबोधे दृढे जाते तत्प्रेक्षाप्रवृत्तभावनाप्रकर्षेणैव साक्षात्कारोत्पत्तिसंभवात् । अप्सरायमाणा काचिदमुष्य कन्यका ऽस्ति तवैवार्हेत्याप्तवाक्यात् सकृच्छ्रुतवतो ऽपि तां लिप्सोर्भावनाप्रकर्षात् तत्साक्षात्कारोदयात् । न च टीकायां वाक्यादपरोक्षज्ञानोत्पत्तौ कैमुतिकन्यायस्य प्रदर्शनमस्ति । शाब्दज्ञाने ऽपि वाक्यश्रवणावृत्त्या व्यक्तितारतम्यं दृश्यते निदिध्यासनरूपप्रत्ययप्रवाहे साक्षात्कारोत्पत्त्यर्थे तद्वैद्यपरमकाष्ठापेक्षितं व्यक्तितारतम्यं ध्यानावृत्त्या भवतीति किमु वक्तव्यमित्येव तत्र कैमुतिकन्यायोपन्यासात् । नन्वनूदितश्रवणावृत्तिवैयर्थ्यशङ्कापरिहारार्थं भाष्यतात्पर्यकथनार्थं प्रवृत्तस्य टीकाग्रन्थस्य ध्यानावृत्तिसमर्थनार्थत्वं न युक्तमिति स्वरसतः प्रतीयमानस्तदर्थ आचार्यैस्त्यक्त इति चेत्तर्हि न हि दृष्टइत्यादिभाष्यस्वारस्यमवलम्ब्य लोकदृष्ट्यनुसारेण तत्त्वमसीत्यादिवाक्यजन्यशाब्दज्ञानार्थमेवावृत्त्यपेक्षा समर्थ्यतां लोके ऽपि हि गहनवाक्येषु वाक्यार्थबोधार्थम् आवृत्त्यपेक्षा दृष्टा तथेहापि तदपेक्षेति । एवं च यस्य साङ्गाध्ययनवतो यावत्स्वव्युत्पत्तिबलमूलेन पुनः पुनरावृत्त्या वाक्यार्थावधारणे जाते प्राग्भवीयश्रवणमननवासनोद्बोधेनाशङ्कानुदयः तस्य न मननापेक्षा यस्य तदभावेन शङ्कोदयस्तस्य तन्निरासाय मनने प्रवृत्तिरिति दृढशाब्दज्ञानोत्पत्त्यर्थमेव श्रवणावृत्तिसमर्थनं भाष्यस्यार्थ इति ऋजुरेवायं पन्थाः । ननु पूर्वपक्षे आवृत्तावपि तदनुपपत्तेरिति भाष्येण वाक्यमावर्त्यमानमपि नापरोक्षज्ञानं जनयतीति या शङ्का कृता सैवेह सिद्धान्ते ननूक्तं सकृच्छ्रुतं चेदित्यादिभाष्येणानूदिता ऽतस्तत्परिहारग्रन्थस्यावृत्तेरपरोक्षज्ञानोपयोग एव तात्पर्यं वर्णनीयमिति चेद् न । पूर्वपक्षगतशङ्काग्रन्थस्याप्यावृत्तेः शाब्दज्ञानानुपयोगपरतायामेव स्वारस्यात् । अत्राहेति पूर्वपक्षारम्भग्रन्थे आत्मभूतमिति विशेषणं प्रत्ययस्यात्मभूतमित्यस्मिन्नर्थे स्वारसिकं प्रत्ययस्य सन्निहितत्वा-

ादिति तत्स्वारस्यमनुसृत्य खलु ततः प्रभृति टीकाकृता विवृतिः कृता। तत्त्वाहेति वाक्ये तथैव तदर्थो ऽस्तु तथा च विरुद्धांशप्रहाणया जीवैक्येन बोध्यम् ब्रह्म निर्विशेषमिति तद्विषयायां वृत्तिसाध्यविशेषविषयत्वासंभवाद् आवृत्तिर्व्यर्थेति प्रथममाक्षेपः। आवृत्त्यभावे तद्विषयवृत्तिरेव नोदीयादिति ततः सिद्धान्तिनः शङ्का। सकृच्छ्रुतान्नोदेतीति चेद् आवृत्तावपि नोदीयादिति पुनराक्षेपः। ततः शाब्दज्ञानार्थमावृत्त्यनपेक्षायामपि साक्षात्कारार्थं तदपेक्षा ऽस्तीति शङ्कातत्परिहारप्रपञ्चः। पूर्वपक्षावसाने ऽपि चानेकांशोपेतइत्यादिग्रन्थेनात्मभूतमिति विशेषणसामर्थ्यलभ्ययुक्तिविवरणमिति पूर्वपक्षग्रन्थसामञ्जस्यात्। शाब्दज्ञानार्थमेवावृत्त्यपेक्षेति सिद्धान्तग्रन्थसामञ्जस्याच्च। अपि च तत्त्वमसीत्येतद्वाक्यमित्यादिसमनन्तरभाष्यग्रन्थस्य शाब्दज्ञानार्थतयैवावृत्त्यपेक्षाप्रतिपादकत्वाच्च। एवमक्लिष्टे भाष्यार्थे व्यक्ते ऽप्यर्थान्तरवर्णनम् एवमपि योजयितुं शक्यमिति प्रौढोक्तिमात्रं द्रष्टव्यम्।

५१२ । १५ **संसृष्टत्वमिति**। संसृष्टशब्दो धर्मलक्षकः। ततः संसृष्टनानात्वशब्दयोर्द्वन्द्वसमासे सति न विद्येते संसृष्टनानात्वे ययोरिति द्वन्द्वगर्भो बहुव्रीहिः। पुनस्तथाभूतौ पदार्थौ यस्येति बहुव्रीहिरित्यर्थः। असंसृष्टनानापदार्थकमिति त्वप्रत्ययरहितपाठे त्वेक एव बहुव्रीहिः। तेन संसृष्टनानापदार्थरहितमित्यर्थलाभे सति विशेष्यनिषेधायोगाद् विशेषणयोः संसृष्टनानात्वयोर्निषेधः। स रैक्वो यद्वेदेति जानश्रुतौ राज्ञि रात्रौ शयाने तस्योपरि पतत्सु हंसेषु पुरोगामिनं हंसं प्रति पश्चाद्गामिना केन चिद्धंसेन जानश्रुतेर्ज्योतिः द्युव्यापि दीप्यते तन्मा प्रसाङ्क्षीदित्युक्ते पुरोगामिना च सयुग्वानं रैक्वमिव जानश्रुतिमात्थेति जानश्रुतौ तुच्छीकृते कथं सयुग्वा रैक्व इति पश्चाद्गामिना रैक्वस्य महिम्नि पृष्टे पुरोगामिनो वचनम्। यथा कृतायविजिताय अधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत्किं चित्प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति। अस्यार्थः। कृतनामा द्यूते चतुरङ्कः अयः। तस्मै विजिताय तस्मिन्विजयार्थे न्यस्ते अधरे न्यूना अयाः त्रिद्व्येकाङ्काः त्रेताद्वापरकलिनामानः संयन्ति अन्तर्भवन्ति चतुःसंख्यायां त्रित्वादिसंख्यान्तर्भावात्। एवमेनं प्रस्तुतं रैक्वं सर्वं तद्वक्ष्यमाणमभिसमेति यत्किं चित्प्रजाः साधु कर्म कुर्वन्ति सर्वप्रजासंपाद्यधर्मफलं सर्वं रैक्वधर्मफले ऽन्त

र्भवतीत्यर्थः । यः रैक्वादन्योऽपि तद्वस्तु वेद किं यत्स वेद स रैक्वो यद्वेद तमपि सर्वं तद्वक्ष्यमाणमभिसमेतीत्यनुषङ्गः । रैक्वादन्यस्यापि रैक्वोपास्यमुपासीनस्य धर्मफले सर्वप्राणिधर्मफलमन्तर्भवतीत्यर्थादयमर्थः प्रदर्श्यते स रैक्वो यद्वेदे-त्यादिना । यच्छब्दार्थमाह **तत्प्राणतत्त्वमिति** । प्राणो वाव संवर्ग इति ५१३ । १२
जानश्रुते रैक्वेणोपदेक्ष्यमाणं प्राणतत्त्वं यद्वेदेति यच्छब्देनोक्तमित्यर्थः । प्राण-तत्त्वमिति प्रथमान्तपदम् । **सर्वधर्मफलमभिसंगच्छतइति** । एतमिति श्रुत्युपात्तं रैक्वमिवेति शेषरैक्वमिवेति सयुग्वानमिव रैक्वमात्थेति प्राचीनश्रु-तिवाक्यार्थेन संबन्धप्रदर्शनं मानुशाधीति मे इति श्रुतौ षष्ठ्यन्तस्य मामिति द्वितीयार्थो दर्शितः । शिक्षय विद्यामुपादापय । शिक्ष विद्योपादाने इति धातुः । **हे पुत्रेति** । असौ वा आदित्य उद्गीथ इत्यादित्यदृष्ट्योद्गीथोपासनं प्रकृतं तन्निष्ठः कौषीतकिरादित्यरश्मिभेदमकृत्वा केवलमादित्यदृष्ट्या स्वकृतमुद्गी-थोपासनमेतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीत्येकपुत्रतां दोषेणा-पाद्य रश्मींस्त्वं पर्यावर्तयतादिति रश्मीनादित्यं च त्वं भेदेनोपास्वेति पुत्रं प्रत्युपदिदेश तत्रार्थसिद्धं संबोधनमध्याहृतं हे पुत्रेति । **तकार एको लुप्तो द्रष्टव्य इति** । लोपस्तआत्मनेपदेष्विति छन्दस्यात्मनेपदेषु विहितस्तकार-लोपो बहुलग्रहणात्परस्मैपदे ऽपि क्व चिद्भवतीति भावः । पर्यावर्तयतादिति हेस्तातङादेशे सति रूपम् । एवं रश्मिबहुत्वदृष्टेरावृत्तिमत्त्वोक्तिरन्येष्वपि वेदनेषु न्यायप्राप्तमावृत्तिमत्त्वं स्थालीपुलाकन्यायेन गमयतीति भावः* ॥

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥ ,, । २५

कस्य साक्षात्कारायेति । नित्यापरोक्षो जीवः नित्यपरोक्षस्ततो भिन्न ईश्वरः अतः कस्यापि साक्षात्कारः श्रवणाद्यावृत्तिसाध्यो नास्ती-त्यर्थः† ॥

न प्रतीके न हि सः ॥ ४ ॥ ५१४ । २१

प्रतीकेषु ब्रह्मात्मतामापादितेष्विति । द्वावेतौ पक्षौ नामादीनां ब्रह्मदृष्टिविषयत्वात् तेषु ब्रह्माभिन्नजीवदृष्टिः कार्येत्येकः पक्षः । नामादीनां

---

* अत्र प्रथमम् आवृत्त्यधिकरणं पूर्णम्

† अत्र द्वितीयम् आत्मत्वोपासनाधिकरणं पूर्णम् ।

ब्रह्मणश्च विकारविकारिभावेन वास्तवाभेदसत्त्वात् तेषु ब्रह्मदृष्टौ क्रियमा-
णायां ब्रह्माभिन्नजीवदृष्टिः कार्येति द्वितीयः पक्षः । प्रथमपक्षे दृष्ट्या ब्रह्माभेदा-
५१५ । १३ पादनं द्वितीयपक्षे विकारविकारिभावेन । **सत्यमत एवेति ।** यतः स्वरू-
पेण लये नास्त्यहंग्रहालम्बनम् अत एव मनआदीनां जीववदवच्छिन्नरूपे-
णैव लय इति पूर्वपक्ष्यभिप्रायं मत्वा समुद्राव्यं निराकरिष्यतीत्यर्थः । नन्व-
र्थाद्वेति द्वितीयविकल्पाशङ्कायाः प्रथमविकल्पशङ्काया इव कथं श्रवणेन निरा-
करणमित्याशङ्क्य तदभिप्रायमाह **यदि श्रुतेरिति ।** अर्थसिद्धमपि श्रुतेर्यद-
भिमतं क्व चित् तत्सा श्रावयतीति दृष्टं यथा स्वस्यागृहीतया रशनया नयना-
संभवाद् अर्थप्राप्तमपि रशनाग्रहणमिमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमाद-
त्त इति श्रावयति न चेह तथा नामादिषु जीवाभेददृष्टिं क्व चिदपि श्रावयती-
त्यर्थः । नन्वर्थप्राप्तस्य क्व चन श्रवणेन भाव्यमिति नास्ति नियमः । स्रुवा-
दीनां द्रवद्रव्यादानेषु व्यवस्थितेरर्थप्राप्तायाः क्व चिदपि श्रवणाभावात् ।
उक्तं हि वार्तिके ।

यथैव पाठः प्रतिपत्त्युपायस्तथैव सामर्थ्यमपि श्रुतीनाम् ।
तेनैव चेता न समामनन्ति सहस्रभागं तु समामनेयुः ॥ इति ।

अतः केवलमर्थात्प्राप्तिरपि वक्तुं शक्येति शङ्कां निराकरोतीत्यवतार-
यति **यत्त्वर्थादिति ।** ननु नायमतिप्रसङ्गः । आकाशादेः स्वरूपतो विक-
ल्पितत्वेन जीववद् ब्रह्माभेदाभावादिति शङ्कामनूद्य निराकरोति **जीवस्ये-
ति । ब्रह्मदृष्टिकरणादिति ।** भेदपक्षे हि ब्रह्मदृष्टिर्न स्याद् न त्वभेद-
पक्षे इति भावः । नन्वहं ब्रह्मास्मीत्यभिन्नेऽपि ब्रह्मणि विरुद्धांशप्रहाण्या
जीवाभेददृष्टिः क्रियते न तु ब्रह्मैव जीव इति केवलब्रह्मदृष्टिः तथेह किं न
स्यादित्याशङ्क्याह **आर्थिकी हीति ।** प्रतीतिरित्यकर्तरि च कारक इति
कर्मणि क्तिन्प्रत्ययः । अर्थात्प्रतीतमित्यर्थः । अर्थसिद्धमपि तदेव विधितो
ऽनुष्ठेयं यदनुष्ठानं विना श्रुतं न निर्वहति न चात्र श्रुतब्रह्माभेददृष्टेर्विना
जीवाभेददृष्टिनिर्वाहोऽस्ति प्रत्युत स्वाभेददृष्टिवदर्थप्राप्तजीवान्तराभेददृष्टिरपि
कर्तव्या स्यादित्यतिप्रसङ्ग इत्यर्थः । उक्तन्यायातिदेशेन द्वितीयपक्षं स्वयं
,, । १९ दूषयति **ब्रह्मविकारत्वेनेति ।** ननु ब्रह्माभेददृष्टिमूला ऽहंमतिक्षेपशङ्का न
च घटादिषु तद्दृष्टिविधानमस्तीति नातिप्रसङ्ग इत्याशङ्क्याह **तुल्यं चेति ।**

ब्रह्मदृष्टिविध्यनपेक्षितत्वाच्च शङ्कायास्तन्मूलत्वमसिद्धमिति भावः । सर्वस्य वाक्यजातस्य प्रपञ्चविलयः प्रयोजनं न भवतीत्युक्तिभङ्ग्या क्व चिद्भवतीत्यनुमतिः प्रतीयते तदनुमतिस्थलं दर्शयति **सर्वं खल्वित्यादौ हीति । अप्रधानस्य जीवस्येति ।** तत्त्वमस्यादिष्वभेद एव वाक्यार्थः प्रधानभूत इति भावः । तत्त्वमस्यादिवाक्यैरेकवाक्यतायां ब्रह्मदृष्ट्युपदेशेष्वात्मदृष्टिकल्पने यदपेक्षितं तदध्याहारेण पूरयति **कर्तृत्वादिबाधेनेति ।** यद्यपि मनो ब्रह्मेत्यादौ निर्विशेषब्रह्मप्रकरणाभावे ऽपि मनःप्रभृतिषु ब्रह्मदृष्ट्यध्यासाय ब्रह्मशब्दार्थो ज्ञातव्य इत्यसंकुचिते तदर्थे त्रिविधपरिच्छेदराहित्यान्तर्भावाद् वस्त्वपरिच्छेदोपयोगिजीवाभेदावगत्यैव कर्तृत्वादिबाध आवश्यकः तथापि प्रधानभूतोपासनाविध्यविरोध्येव ब्रह्मशब्दार्थस्तदुपयोगितया ग्राह्यः । अङ्गगुणविरोधाधिकरणन्यायेनाङ्गभूतब्रह्मशब्दार्थैकदेशं जीवाभेदं त्यक्त्वा प्रधानविध्यपेक्षितस्य कर्तृकर्मभेदस्य ग्रहणौचित्यात् । इह कर्तृत्वादिबाधे प्रधानस्योपासनस्यैव निवृत्तिप्रसङ्गाच्च* ॥

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥ ५१६ । २१

अतिप्रसङ्गसाम्यमवलम्ब्य पूर्वाधिकरणेन दृष्टान्तसंगतिमाह **पूर्वत्रेति । अङ्गानुष्ठानाराधित इति ।** व्रीहिप्रोक्षणाघारादितः परमेश्वर एव प्रसन्नः सन् व्रीह्यादिभिः पुरोडाशनिर्वर्तनद्वारा यागसिद्धिहेतुरित्यर्थः । **न चातिप्रसङ्ग इति ।** मैत्रोपासनया चैत्रात्फलसिद्धिप्रसङ्ग इत्यतिप्रसङ्गो न भवतीत्यर्थः ॥

अतिथ्याद्युपासनइवेति । अतिथिभोजनं तावदतिथिप्रधानमिति तत्प्रीणनं भोज्यादिप्रदानेन लोकसिद्धं देवता वा प्रयोजयेदतिथिवद् भोजनस्य तदर्थत्वा†दिति पूर्वतन्त्राधिकरणे चातिथिभोजनस्यातिथिप्राधान्यवद् देवतोद्देशेन द्रव्यत्यागरूपस्य यागस्य देवताप्राधान्यमिति पूर्वपक्षं कृत्वा ऽतिथिभोजनवैषम्यकथनेन यागप्राधान्यसिद्धान्तकरणादतिथिभोजनस्यातिथिप्राधान्यमभ्युपगतं तथातिथेः स्वर्गादिफलदातृत्वासंभवादीश्वर एव फलदातेति फलमत उपपत्ते‡रित्यधिकरणन्यायेन संप्रतिपत्तिः । नैतावता मैत्रोपास-

* अत्र तृतीयं प्रतीकाधिकरणं पूर्णम् ।

† जै॰ सू॰ अ॰ ६ पा॰ १ सू॰ ६ ।

‡ व्या॰ सू॰ अ॰ ३ पा॰ २ सू॰ ३८ ।

नया चैत्तस्य फलदातृत्वप्रसङ्ग इत्यतिप्रसङ्गोऽस्ति । एवमिहापि भविष्यतीति भाव: । आदिशब्देन पान्थशुश्रूषादिकं गृहीतम् । यद्यपि प्रतीतिविषयत्वापेक्षया हीति इतिशिरस्कस्य ब्रह्मपदस्य ब्रह्मशब्दपरत्वे ब्रह्मप्रतीतिपरत्वे च मुख्यसामानाधिकरण्यं न स्यादिति ब्रह्मप्रतीतिविषयत्वपरत्वमङ्गीकृतम् आदित्यं ब्रह्मप्रतीतिविषयं कृत्वोपासीतेति एवमपि मुख्यसामानाधिकरण्यं न लब्धं ब्रह्मशब्दस्य ब्रह्मप्रतीतिविषयत्वसादृश्येनाब्रह्मण्यादित्ये वृत्त्यङ्गीकाराद् गौणत्वमेव प्राप्तम् अत: को विशेष इति शङ्कार्थ: । **शब्दसामानाधिकरण्यादिति** केवलप्रतीतिसमानाधिकरण्यस्याप्युपलक्षणम्* ॥

५१८ । १ **आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥**

भाष्ये क्रियात्मकत्वादित्यसाधकमिति । कर्मात्मकत्वादुद्गीथादीनामिति भाष्ये कर्मात्मकत्वं क्रियारूपत्वं न तु कर्मकारकत्वं तस्यादित्यादिष्वप्यविशेषादिति दर्शयितुं तद्विवरणतया क्रियात्मकत्वादिति पदमुपात्तम् । अनेन भाष्येणादित्यादीनामस्वाभाविकं क्रियात्मकत्वमवलम्ब्य फलहेतुत्वमुपपादितमिदं तु साधकं स्वाभाविकेन क्रियात्मकत्वेनोद्गीथादीनां फलहेतुत्वोपपत्तेरिति शङ्कार्थ: । ऋक्सामशब्दाभ्यामिह पृथिव्यग्नी निर्दिश्येते प्रसिद्धऋक्सामयोराश्रयाश्रयिभावस्य तस्मादृच्यध्यूढं साम गीयतइति समनन्तरवाक्ये पृथगुपादानात् तदेतदेतस्यामृचीति वाक्ये ऋक्सामशब्दौ गौणौ वाच्याविति भाव: । द्रव्यसंस्कारमर्हतीति वार्तिकश्लोके द्रव्यशब्दस्थाने वस्तुशब्द: पठित: क्रियारूपस्याप्युद्गीथस्योपयोगवत्त्वन्यायसाम्येन संस्कार्यौपपादनोपयोगितया । ननु तन्निर्धारणानियम† इत्यधिकरणे आदित्यादिमतिभिरुद्गीथावयवस्योंकारस्योपासनं न तत्संस्कारकर्म किं तु उद्गीथसाधनं पृथक्फलं प्रधानकर्मेति प्रसाधितं तद्विरुद्धमिदमुद्गीथसंस्कारत्ववचनम् । उच्यते । क्रतुवीर्यवत्तरत्वफलस्योपासनस्य क्रत्वन्तर्भूतकर्मकत्वे संभवति न तद्बहिर्भूतकर्मकत्वमङ्गीकरणीयमित्येतावन्मात्रे तात्पर्यं न तु तत्संस्कारकर्मतया तदङ्गत्वइति न प्राक्प्रसाधितार्थविरोध: ।

अर्थवादत्वसंभवादिति प्रौढ्योक्तम् । लोकदृष्ट्याद्यानां फलत्वेऽप्यार्थवादिकत्वेन तदविशेषात् क्रतुवीर्यवत्तरत्वस्यापि फलत्वं नापैतीत्यपि

---

* अत्र चतुर्थं ब्रह्मदृष्ट्यधिकरणं पूर्णम् । † व्या. सू. अ. ३ पा. ३ सू. ४२ ।

द्रष्टव्यम् । **यत्र गुणात्फलं लोकादि भवतीति ।** लोकेषु पञ्चविधमित्यत्र कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृताश्चेति पाञ्चविध्यगुणस्य फलमुक्तं पृथिव्यन्तरिक्षं द्यौरित्यूर्ध्वलोकाः द्यौरन्तरिक्षं पृथिवीत्यावृत्ता लोकाः प्राणिनां गत्यागतिविशिष्टास्ते कल्पन्ते समर्था भवन्ति उपासकस्य गतागतयोर्भोगान् संपादयितुमित्यर्थः । आदिशब्देन वाचि सप्तविधमित्यादौ साप्तविध्यगुणफलं दुग्धे ऽस्मै वाग्दोहमित्यादि गृह्यते गुणस्य क्रियात्वेन लोकादिभिः समत्वादिति । ननु पाञ्चविध्यादिगुणस्याक्रियारूपत्वे ऽपि लोकादीनां नास्त्यक्रियारूपत्वनियमः वृष्टौ पञ्चविधं सामोपासीतेत्यादिषु वृष्ट्यादीनां क्रियारूपत्वाद्यदुपमन्त्रयते स हिंकार इत्यादिषु उपमन्त्रादिशब्दोक्तानां स्त्रिया सह संकेतकरणादीनां पुरुषानुष्ठेयक्रियात्वाच्चेति चेत् । सत्यम् । अक्रियात्वेनेत्यनेन क्रतुकालानुष्ठेयक्रियात्वाभावो विवक्षितः । अत एव क्रतुवीर्यवत्तरत्वफलत्वाभावोक्तिः ।

अतो लोकादिष्वपि सामाध्याससंभव इति । यतो ऽत्र क्रत्व- ५।१९ । ७
ङ्गभूतसामोपासनं न विधीयते किं तु तदाश्रितगुणमात्रं लोकादिफलाय विधीयते ऽतः क्रतुवीर्यवत्तरत्वफलत्वाभावादित्यर्थः । ननु यदि समस्तस्य खलु साम्न इति वाक्यविहितं सामप्रधानमुपासनमाश्रित्य लोकेषु पञ्चविधमित्यादिवाक्येन फलाय गुणमात्रं विधीयते तदा कथं लोकादिषु सामाध्याससंभवः तथा सति हि सामप्रधानोपासनारूपाश्रयाभावाद् गुणविधिरेवात्मानं न लभेतेति चेत् सत्यं लोकेषु पञ्चविधमित्यादिसप्तम्यनुसारेण सामोपासनाविधिः साम्न उपासनास्पर्शमात्रपरः न प्राधान्यपर इति शङ्कावाद्यभिप्रायः । **अस्ति गुणस्यापि कार्यत्वमिति ।** तथा च करोतिव्यपदेशार्हत्वाद् वीर्यवत्तरत्वफलकत्वमप्युपपद्येतेत्यर्थः । यथाभाष्यस्वारस्यं लोकादिमात्रफलकत्वमभ्युपगम्य टीकायामुद्गीथोपासनावैषम्येण या शङ्का यश्च प्रयुक्तिलाघवेन तत्परिहारः तदुभयं स्पष्टत्वान्न व्याख्यातम् । **सत्यां लक्षणायामिति ।** इयमेवर्गग्निः सामेति ऋक्सामपृथिव्यग्निसामानाधिकरण्यनिर्देशे ऋक्सामयोः सामाग्न्योश्चाश्रयाश्रयिभावसाम्यान्निमित्तमिति प्रतिपादनार्थं प्रवृत्ते तदेतदेतस्यामृचीति वाक्ये पृथिव्यग्निविषयऋक्सामशब्दप्रयोगो यदि गौणः स्यात् तदानीमारोप्यवाचकमेवाधिष्ठाने गौणवृत्तिः प्रयुज्यतइति नियमात् स प्रयोगः

पृथिव्यग्न्योरधिष्ठानत्वे ऋक्सामयोरारोप्यत्वे च लिङ्गं स्याद् न त्वेवं लक्षणाश्रयणादित्यर्थः ।

५१९ । १८ **ऋक्सामाध्यस्तत्वमपि संभवतीति ।** ननु ऋक्सामाध्यस्तत्वसंबन्ध इदानीं न सिद्धः । इयमेवर्गग्निः सामेति सामानाधिकरण्यनिर्देशे तदेतदेतस्यामिति वाक्यं हेतुसमर्पकमिति पूर्वमुक्तत्वाद् हेतुकथनात् प्राक् च सिद्ध्यसंभवादिति चेन्मैवम् । इयमेवेत्यादिसामानाधिकरण्यनिर्देशो यदि ऋक्सामयोः पृथिव्यग्न्यध्यासार्थः यदि वा विपरीताध्यासार्थः उभयथाऽप्याध्यासिकसंबन्धोऽस्तीति निश्चयसंभवात् । वस्तुतस्तु इयमेवेत्यपौरुषेयवाक्यं स्वार्थसिद्धौ हेतुं नापेक्षते किं तु सिद्धएव तदर्थे तदेतदेतस्यामित्यादिहेतुवन्निगदार्थवादमात्रं तस्मादृच्यध्यूढमिति तृतीयवाक्यवत् । न हि पृथिव्यग्न्योराश्रयाश्रयिभावः प्रसिद्धऋक्सामयोराश्रयाश्रयिभावे हेतुः येन तस्मादित्युच्येत तस्मादियमेवेति प्रथमवाक्ये वक्ष्यमाणन्यायेन ऋक्सामाध्यस्तत्वसंबन्धस्य सिद्धत्वात् तदवलम्बनायां लक्षणायां न का चिदनुपपत्तिः । इदं च लक्षणा फलवतीति वस्तुगतिमनुरुध्योक्तम् । गौणतायामपि न दोषः । ऋक्सामदृष्टिविषयत्वसाम्येन गौणताश्रयणे हि पूर्ववाक्ये पृथिव्यग्न्योः ऋक्सामदृष्टिविधिराश्रयणीयः । अन्यथा गौणवृत्तिनिमित्तगुणालाभादिति । पृथिव्यग्न्योर्ऋक्सामशब्दप्रयोगस्तथाविधाने लिङ्गं भवेद् न त्वेवमाश्रयणीयम् । पूर्ववाक्येन ऋक्सामयोः पृथिव्यग्निदृष्टिविषयत्वसाम्येन गौणतोपपत्तेः । लक्षणापक्षेऽपि हि ऋक्सामाध्यस्तत्वसंबन्धाश्रयणमेव सिद्धान्तानुगुण्यम् । ऋक्सामदृष्ट्यधिष्ठानत्वसंबन्धाश्रयणे तु लक्षणापि पूर्वपक्षलिङ्गं भवेदेव । किं च प्रथमवाक्ये ऋक्सामविषयपृथिव्यग्निशब्दप्रयोगवद् द्वितीयवाक्ये पृथिव्यग्निविषयऋक्सामशब्दप्रयोगस्याप्याश्रयाश्रयिभावसाम्येन गौणत्वमुपपद्यते । प्रयोगान्तरनिर्वाहकगुणप्रदर्शकवाक्यगतस्यापि प्रयोगस्य तेनैव गुणेन निर्वाहो नायुक्तः । सप्तम्यधिकरणे चेति लौकिकवैदिकप्रयोगगतसप्तम्यर्थप्रदर्शकसूत्रत एव तत्सूत्रगतसप्तम्यर्थस्यापि प्रदर्शनाङ्गीकारात् । भाष्यं तु गौणी लक्षणेति भेदमनादृत्य गुणान्तरनिमित्ता गौण्येव लक्षणेति व्यवहृतेति योजयितुं शक्यम् । **अक्षराञ्जस्यमपरमपीति ।** अङ्गेष्वनङ्गदृष्टिक्षेप इति सिद्धान्ते लोकेषु पञ्चविधमित्यादिषु सप्तम्यास्तृतीयार्थत्वमात्रं कल्प्यं

न तु पूर्वपक्षइव सप्तम्या द्वितीयार्थत्वं द्वितीयायास्तृतीयार्थत्वं चेत्यपरमपराज्जस्यम् । **ओंकारइति** । ऋतुकाले उद्गातृभिर्गेयाः सामभागा भक्तयः अचोद्गीथावयव ओंकार आदिशब्देन भक्तिविशेषणयोक्त इत्यर्थः । **इति तु पञ्चविधस्य साम्न इति** । इति तु पञ्चविधस्येत्येतावदेव पञ्चविधोपासनानामुपासनादेः श्रुतिवाक्यं साम्न उपासनं साध्विति पदत्रयं तु समस्तस्य खलु साम्न उपासनं साध्वित्युपक्रमगतवाक्यादनुषङ्गेण लब्धमाचार्य्यैः पठितम् । ननु प्रागाचार्यैः समस्तस्य खलु साम्न उपासनं साध्वित्युपक्रमगतवाक्येनैव पञ्चभक्तिकसप्तभक्तिकवक्ष्यमाणसकलसामोपासनविधानमुक्तम् । इह कथं समस्तस्येति वाक्येन सप्तविधसामोपासनविधानम् इति तु पञ्चविधस्येति वाक्येन पञ्चविधसामोपासनविधानमिति विभज्य व्याख्यायते । उच्यते । छान्दोग्यभाष्यानुसारेण पूर्वमुक्तं टीकानुसारेण इदानीं विभज्य व्याख्यायते । टीकाकृतामयमत्राशयः । सकलभक्तियुक्तं सप्तविधं साम समस्तं भवति न तूपद्रवभक्तिरहितं पञ्चविधं साम । अतः पञ्चविधसामोपासनविधानार्थमोपसंहारिकमेव वाक्यमुपासनीयमिति । **श्रुत्योक्तं साम्नः साधुत्वं व्याचष्टइति** । यद्यप्युपासनं साध्वित्युपासनस्य साधुत्वमुक्तमिति प्रतिभाति तथापि य एवं विद्वान् साधु सामेत्युपास्तइत्युपसंहारात् साधुदृष्ट्या सामोपास्यं साधुगुणत्वंहिंकारादिपञ्चभक्तियुक्ते साम्नि पृथिव्यादिलोकदृष्टा क्रियमाणायां पृथिव्यादिषु कारणत्वेनानुगतः सुकृताख्यो धर्म इति व्याचष्टे इत्यर्थः* ॥

आसीनः सम्भवात् ॥ ७ ॥ ५२१ ।

तत्पर्युदासं सिद्धमादायेति । अस्मिन्नधिकरणे व्यवस्थापयिष्यमाणस्यासननियमस्याङ्गावबद्धोपासनेष्वनियतशरीरस्थितिसाध्याङ्गपरतन्त्रेषु वर्ज्जनं सिद्धं कृत्वेत्यर्थः । अनेन प्रत्युदाहरणसङ्गतिर्दर्शिता । तेषु यथा नास्त्यासननियमः नैवमितरोपासनेष्विति । **तिष्ठतोऽप्यैकाग्र्यसंभवादिति** । अङ्गावबद्धोपासनास्विति भावः । **तिष्ठतो हीति** । अङ्गावबद्धास्वगत्या देहधारणापन्ने सत्यपि कथं चिच्चित्तैकाग्र्यं संपाद्यते न तथेहागतिरस्ति । आसननियमस्य चोदितत्वात् तस्य च चित्तैकाग्र्यरूपदृष्टार्थत्वोपपत्तेः । येषां रोगवार्द्धकादि-

* अत्र पञ्चमम् आदित्यादिमत्यधिकरणं पूर्णम् ।

भिरासितुं न शक्तिः तेषामपि भीत्याद्युपाश्रयणेनासननियमनिर्वाहोपपत्तेः । अत्यन्ताशक्तावारब्धकाम्यकर्मवद् आप्रायणमारब्धाया विद्यायाः यथा कथंचिन्निर्वाहणीयत्वेन तत्र तस्य त्यागे ऽप्यन्यत्र त्यागाऽयोगादिति भावः* ॥

५२१ । १६ **यत्रैकाग्रता तत्राऽविशेषात् ॥ ११ ॥**

अङ्गोपास्तिव्यतिरिक्तोपास्तिरिति । अङ्गोपास्तिष्वाश्रयाङ्गस्य यो दिगादिनियमस्तदपेक्षासत्त्वादङ्गतः सिद्धसाधनं मा भूदिति पक्षविशेषणम् । एवं चोपास्तित्वादङ्गोपास्तिवदित्यपि हेतुदृष्टान्तौ वक्तुं शक्यौ । **श्रुतदेशादिमत्त्वमिति ।** उपासनासु विशिष्य दिगादिनियमश्रवणं नास्ति वैदिककर्ममात्रे प्राङ्मुखत्वादिनियमस्मरणमनन्तरं साधनचित्तैकाग्र्यविरोधाद् वैदिककर्मान्तरविषयमित्युपाधेः पक्षाद्व्यावृत्तिः† ॥

५२२ । ३ **आ प्रायणात्तत्रापि हि दृष्टम् ॥ १२ ॥**

अहंग्रहोपास्तीनामदृष्टार्थत्वेनेति । ननु यस्य स्यादद्धेति श्रवणान्निदिध्यासनवतानां साक्षात्काररूपदृष्टफलार्थत्वमप्युक्तमावृत्त्यधिकरणे । सत्यम् । तावता यावत्साक्षात्कारोदयमावृत्तिः सिध्यति न त्वाप्रायणमिति भावः । **कृतशास्त्रार्थत्वात्पुंस इत्यर्थ इति ।** अत्र पुंस इत्यध्याहारेण कृतशास्त्रार्थशब्दे बहुव्रीहिर्व्युत्पादितः । न चाहरहर्वा एवं विद्वान् स्वर्गं लोकमेतीति दहरविद्यायां वीप्सया विद्याया यावज्जीविकत्वमवगम्यते स यो ह वैतद्भगवन्मनुष्येषु प्रायणान्तमिति सत्यकामप्रश्ने साक्षाच्च तदाम्नायते । सत्यम् । प्रकरणविशेषाम्नातं तदुभयं न्यायतः प्राप्तिं विना सर्वविद्यासाधारण्यं न भजेत् । **दृष्टद्वारेण चेति ।** कर्मणामन्त्यप्रत्ययजनने दृष्टसामर्थ्याभावाददृष्टमाश्रितं प्रत्ययानां तत्र दृष्टद्वारा संभवाद् नादृष्टं द्वारमाश्रयणीयमिति ।

अन्तकाले तदवश्यंभावादिति । ननु उपास्तीनामाप्रायणमनुवृत्तावपि सायंप्रातःकालयोरग्निहोत्रवच्च चित्तैकाग्र्यशालिषु समयेषु तासामनुष्ठानं भवति न तु सर्वकालं नैरन्तर्येण धारावाहिकतया तथा च कुतः प्रायणकाले ऽपि प्रत्ययानुवृत्त्या ततः साक्षात्कारोदयावश्यंभावः । तस्मात्तदवश्यं-

---

* अत्र षष्ठम् आसीनाधिकरणं पूर्णम् ।

† अत्र सप्तमम् एकाग्रताधिकरणं पूर्णम् ।

भावोक्तिरयुक्ता । प्रतिबन्धकान्तरानुद्भवोक्तिरप्ययुक्ता । प्रबलस्य कस्य चित्प्रतिबन्धककर्मणः तदानीमुद्भवसंभवेनोद्भूतस्य प्रारब्धस्य वा प्रतिबन्धकत्वसंभवेन तदा तीव्रमरणवेदनादिकमुद्भावयता तेन प्रत्ययानुवृत्तिसाक्षात्कारोदययोः प्रतिबन्धसंभवात् । यद्युपास्तिजन्यप्रबलादृष्टवशात्प्रत्ययानुवृत्तिकल्पनया साक्षात्कारोदयावश्यंभावः कल्प्यते तदा तद्वशात्साक्षात्कारोदयावश्यंभाव एव कल्प्यतां किमाप्रायणप्रत्ययावृत्तिकल्पनया । उच्यते । तीव्रमरणवेदनामूलस्य कर्मणो ऽपि भोक्तव्यफलविषयान्तिमप्रत्ययस्तावदवश्यंभावी सविज्ञानो भवतीत्यादिश्रुतेः । अत उपासनाफले भोक्तव्ये तत्प्रत्ययो ऽपि तदानीमवश्यं वाच्यः । स च साक्षात्काररूप एव प्रभवति प्रागुपास्ये साक्षात्कारस्य क्लृप्तत्वात् प्राचीनसाक्षात्कारित्वभावनैव कारणत्वेन क्लृप्तेति सा तदानीमप्यपेक्षणीया सा च दृढसंस्कारवत एव भवति न तु चिरात्प्रत्ययावृत्तिमुज्झितवतः प्रमुषितसंस्कारस्येति संस्कारदार्ढ्यार्थमाप्रायणं प्रत्ययावृत्तिरपेक्षणीया । अत एव प्रायणानुवर्तनीयप्रत्ययावृत्तिसहकारितया तत्फलेन ब्रह्मलोकप्राप्त्या फलवतां कर्मणामाप्रायणमनुवृत्तिं दर्शयति छान्दोग्यश्रुतिराचार्यकुलाद्वेदमधीत्येत्यादिका । इयं ह्युपासनासहकारिकर्मविषया आत्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्येति चित्तैकाग्र्योपायसाहित्यश्रवणाद् ब्रह्मलोकप्राप्तिफलश्रवणात् । अत एव भगवत्पादैरियं श्रुतिर्विद्यासहकारिकर्मविषया ऽवतारिता । यथेह षष्ठाद्यध्यायत्रयप्रकाशितात्मविद्या सफला ऽवगम्यते तथा कर्मणां न कश्चनार्थ इति प्राप्तं तदानर्थक्यपरिहाराय विद्वद्भिरनुष्ठीयमानस्य विशिष्टफलसंबन्धेनार्थवत्त्वमुच्यतइति । एवं च प्रतिबन्धकान्तरा ऽसंभवो ऽप्युपपद्यते । दृढसंस्काराधानेन प्रायणकालिकप्रत्ययानुवृत्तिसाक्षात्कारयोर्दृष्टकारणभूतायाः प्रत्ययावृत्तेस्तत्सहकार्य्यग्निहोत्रादिकर्म्मानुवृत्तेश्च प्रत्यग्रत्वेन प्रबलतया ताभ्यां प्रारब्धपर्यन्तस्य सर्वस्यापि प्रतिबन्धकस्यानुत्थितिकरणोपपत्तेः कर्मविपाकप्रायश्चित्तवत्प्रारब्धादप्यनयोः प्राबल्योपपत्तेश्च । एवं न्यायसिद्धामेवाप्रायणानुवृत्तिं स यो ह वैतद्भगवन्निति श्रुतिरहरहःश्रुतिश्चानुवदतीति तयोरपि सर्वविषयतोपपद्यते ।

ननु तेजसोदानेनेति व्याख्यानमयुक्तं छान्दोग्यश्रुतौ प्राणस्तेजसि तेजः परस्यां देवतायामिति मुमूर्षोः प्राणस्य तेजःशब्दोपलक्षितदेहबीजभूतप्राप्ति-

श्रवणात्तथैव तस्याः श्रुतेर्द्वितीयपादे व्याख्यास्यमानत्वादित्यत आह **उदानस्य तेजोदेवतात्मकत्वादिति ।** प्रश्नोपनिषदि यश्चितस्तेति वाक्यात् प्राचीनवाक्ये तेजो ह वाव उदान इति श्रूयते ततः प्राक् चोदानः पुण्येन कर्मणा पुण्यं लोकं नयति पापेन पापमुभाभ्यां मनुष्यलोकमिति श्रूयते । अतस्तेजस्त्वेन यथासंकल्पितलोकनिन्दात्वेन चात्र श्रुत उदान एवेति भावः । आत्मना सह आत्मना सहितः सन् तमेवात्मानं यथासंकल्पितं लोकं नयतीति श्रुतिशेषस्यार्थः । उत्तराधिकरणसंगतिमाह **अन्तकालइति ।** यथोपासकस्यान्तकाले प्राप्यपारलौकिकफलविषयान्तिमप्रत्ययरूपसाक्षात्कारोदयार्थं तदानीमपि प्रत्ययावृत्त्यनुवृत्त्यपेक्षा नैवं परब्रह्मविदस्तदपेक्षा ऽस्ति ततः सकलाघनाशेन कृतकृत्यताप्रेरित्युत्तराधिकरणेन प्रतिपादनादापवादिकी सङ्गतिः सगुणविद्यानपेक्षिततद्विरोधिकर्मणामनिवृत्तिस्तु न्यायसाम्यात् सिध्यन्त्यानुषङ्गिकं प्रयोजनमिति भावः* ॥

५२३ । १ **तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥**

अथैकेन शरीरेणेति । उष्ट्रमतङ्गजादिभोग्यकण्टककाष्ठादिभोगप्रापककर्मफलोपभोगा एकेन शरीरेण नोपपद्यन्तइत्यर्थः । **अर्थवादलिङ्गस्येति ।** उपासना यस्मिन् दिने प्रारब्धा ततः प्रभृत्युत्तराघाश्लेषः तस्मिन्नेव दिने प्राचीनसकलाघनाशश्च कथमित्यर्थवादमात्रे भारं संनिवेश्याभ्युपगन्तव्यम् इत्यप्यर्थवादग्रहणेन सूचितं किं तु सति विरोधे न चेहत्य इति निर्गुणइव सगुणेपि साक्षात्कारोदये सत्यश्लेषविनाशाविति नाप्रसङ्ग इति भावः । सगुणनिर्गुणविद्यासाधारण्येनाश्लेषविनाशौ विरोधाभावेन समर्थितौ अभ्युपगम्यापि प्रमाणान्तरविरोधं विरुद्धं प्रमाणान्तरमेवाश्लेषविनाशप्रमाणेन बाध्यमित्येतन्निर्गुणविद्यामात्रविषयं पापं ज्ञाननिवृत्त्यर्थमित्यादिना बलीयसीत्यन्तेन दर्शितम्† ॥

५२४ । ११ **इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥**

प्रथमं निरस्येति । न च शास्त्रीयत्वसाम्येनाविरोधोपपादने ऽपि ज्ञानाज्ञानरूपत्वकृतविरोधो न निरस्त इति वाच्यम् । तस्मिन् सत्यपि प्रार-

* अत्राष्टमम् आप्रायणाधिकरणं पूर्णम् ।

† अत्र नवमम् तदधिगमाधिकरणं पूर्णम् ।

ब्धवदनुवृत्तिसंभवादिति भावः । पाप्मनश्च विशेषतो ब्रह्मज्ञानेनोच्छेद्यत्व-श्रुतेरिति टीकायां विवक्षितां श्रुतिमुदाहरति **सर्वे पाप्मानोऽतो निवर्त्तन्तइति** । न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्त्तन्तइति छान्दोग्यश्रुतिरिह नोदाहर्तुं योग्या तत्र पाप्मशब्दः सुकृतस्यापि ग्राहक इति स्फुटत्वेन तस्याः सिद्धान्तानुगुणत्वात् । किं त्वन्येयं श्रुतिराचार्यैरुदाहृता । आत्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति नैनं पाप्म तरति सर्वं पाप्मानं तरति सर्वे पाप्मानः प्रहीयन्तइत्यादि चात्र पूर्वपक्षानुगुणं वाक्यं द्रष्टव्यम् । **पापविशेषे संकोच्यमिति** । पापरूपे कर्मविशेषे संकोच्यमित्यर्थः । **स्वभावविरोधपक्षमादायेति** । धर्मस्य ज्ञानमात्रान्निवृत्तिः स्वभावविरोधाद्वा शास्त्रान्निवर्त्यत्वावगमाद्वेति विकल्पितपक्षद्वयमध्ये प्रथमपक्षमादायेत्यर्थः । प्रारब्धवदनुवृत्तावारब्धफलत्वहेत्वभावाद् अवधिश्रवणाभावाच्च अनन्तशरीरभोग्यानामनियतकालविपाकानां पुण्यकर्मणां युगपत्क्रमेण वा भोगासंभवादनिर्मोक्षः स्यादिति भावः । क्रममुक्तिफलकासु सगुणविद्यास्वप्ययं न्यायस्तुल्यः । देवलोकादिप्रापकपुण्यविशेषानुवृत्तौ तत्फलभोगाय पुनर्निवृत्त्यापत्त्या क्रममुक्तिर्न सिध्येदिति तथाभूतार्थानि पाप्मश्रुत्या पुण्यस्यापि ग्रहणे न्यायसिद्धार्थानुसार्यर्थानि । यथाभूतार्थानीति पाठे उभे वैष एते तरति नैनं सुकृतदुष्कृते तरत इत्यादीनि यथाश्रुतार्थानि भवन्ति न तु क्लेशेन योज्यानीत्यर्थः* ॥

अनारब्धकार्येएव तु पूर्वे तदवधेः ॥ १५ ॥ ५२५ ।

यथा कुलालेति । कुलालकराभिघाते निवृत्ते तन्निमित्तकमाद्यं भ्रमणं निवर्तते ततस्तज्जन्यवेगाख्यसंस्काराद् भ्रमणपरम्परानुवृत्तिर्दृष्टा तथा कर्मजन्यसंस्कारात्कर्मान्तरानुवृत्तिरित्याद्यपक्षो न युक्त इत्यर्थः ।

न मायेति भ्रमनिषेध इति । तज्जन्यसंस्कारो न तद्गोचर इत्यभिमवाक्ययोस्तत्पदेन मायाशब्दोक्तं परामृश्य तज्जन्यसंस्कारतद्विषययोर्वस्तुसत्तानिषेधाद् मायाशब्दोऽत्र भ्रमपर इति भावः । तज्जन्यसंस्कार इत्यनेन मायासंस्कारजन्यमायान्तरात् कर्मान्तरोत्पत्तिरिति पक्षं प्रतिक्षिपतीति । यद्यपि न तज्जन्यसंस्कार इत्यनेन भ्रमजन्यसंस्कारनिषेधः प्रतीयते तथाप्यर्थाद्

* अत्र दशमम् इतराऽसंश्लेषाधिकरणं पूर्णम् ।

भ्रमोपादानमायानिषेधस्य पूर्ववाक्ये वर्णितत्वाद् मायापि निषेध्यतया बुद्धिस्थेति तज्जन्यसंस्कारनिषेधपरतया ऽपि योजयितुं शक्यत्वात्स्वविकल्पितद्वितीयपक्षनिरासार्थत्वेनेदं वाक्यं योजितम् । न तज्जन्यसंस्कार इत्यनेनेत्यादेः प्रतिक्षिपतीत्यन्तस्य ग्रन्थस्य स्थाने अनेन मायाजन्यमायान्तरात्कर्मान्तरोत्पत्तिरिति पक्षः परिस्फुरतीति क्वचित्पाठः । तत्रायमर्थः । यत्र तु न माया न तत्संस्कारो न तद्गोचर इति टीकाग्रन्थः प्रस्तुते भयकम्पादिवैषम्यप्रदर्शनपरो न भवति मायावादिनश्चेत्यादिपूर्वग्रन्थेनैव तद्वैषम्यसिद्धेः । अतो ऽनेन टीकाग्रन्थेन द्वितीयपक्षो निषेधार्थमनूदितः परिस्फुरतीति । ननु न तत्संस्कार इति तच्छब्दस्य मायापरत्वे तद्गोचर इत्यत्रापि तस्य तत्परत्वेन भाव्यं न तु तदुक्तं मायाविषयस्यात्मनस्तत्त्वज्ञानादूर्ध्वमपि सत्त्वेन तन्निषेधायोगादित्याशङ्क्य

५२५ । १६ व्याचष्टे **मायात्मभ्रमगोचर इति ।** भ्रममाययोः कार्यकारणयोरभेदोपचाराद् भ्रमविषयो मायाविषयत्वेनोपचरित इति भावः । **किमनुवर्त्ततेत्युक्त्वा न किमपीत्याहेति ।** किमनुवर्त्ततेत्युक्तमेवार्थं न संस्कारावशेष इत्यादिना विवृणोतीति न पौनरुक्त्यमित्यर्थः । **न ततो ऽधिकमित्यर्थ इति ।** इहापि तावदेव चिरमित्येवकारेण न ततो ऽधिकमित्यर्थ एव प्रतीयते न तु तावत्पर्यन्तमनुवर्त्ततएवेत्यर्थ इति भावः । **नास्ति ब्रह्म न प्रकाशते चेति भ्रमान्यथानुपपत्त्येति ।** इदमुपलक्षणं परप्रेमास्पदतया जीवस्वरूपानन्दे प्रकाशमाने ऽपि नास्ति न प्रकाशतइति व्यवहारात् तदावरकाविद्यासद्भावो ऽवगम्यतइत्येतदप्युदाहरणम् । **न चैकदेशेनेति ।** निवृत्ताया अविद्याया एकदेशेनानुवृत्त्यसंभवो नेति योजना । **शाब्दबोधेनेति ।** सकलेतरमधुरिमव्यावृत्तोत्कर्षशालिसुधायां मधुरिमा ऽस्तीत्याप्तवाक्येन तदर्थपरिच्छेदे सति तदज्ञाननिवृत्तावपि यावत्साक्षात्कारं कीदृक्षः स मधुरिमेत्यज्ञानं नापैतीत्यनुभवसिद्धम् । न च तत्र पुरुषाश्रिताज्ञाननिवृत्तावपि विषयाश्रिताज्ञानं नानुभूयतइति वाच्यम् । आश्रयभेदेनैकविषयाज्ञानभेदकल्पने प्रमाणाभावात् । तस्मादेकमेवाज्ञानमेकदेशे च निवृत्तम् एकदेशान्तरेणानुवर्ततइत्येव कल्पनीयमिति भावः । कल्पमहाकल्पमन्वन्तरादिजीविता चेति पाठमाश्रित्य कल्पशब्दार्थमाह **कल्पो ऽवान्तरकल्प इति ।** ब्रह्मणो दिनमवान्तरकल्पः । तस्यायुर्महाकल्पः । ननु भाष्यकारैर्न

तावदनाश्रित्य कर्माशयमित्यादिग्रन्थेन ज्ञानोत्पत्तेर्देहद्वारा तदारम्भककर्माश्रयत्वादारब्धकार्यस्य च कर्मणो मध्ये प्रतिबन्धाऽसम्भवात्तत्क्षपणार्थं देहपातप्रतीक्षणमिति युक्तिरुक्ता सा टीकाकारैस्तदेतदभिसंधायेत्यादिना स्वोक्तयुक्तिपर्य्यवसानं किमिति प्रापिता स्वतन्त्रयुक्त्यन्तरत्वसंभवादित्याशङ्क्याह **उपजीव्याया अविद्याया इति ।** अस्तु ज्ञानोत्पत्त्यर्थं देहतदारम्भककर्म्मापेक्षा तस्यां सत्यामेवोपादानाज्ञानबाधेन तयोर्निवृत्तिः स्यादेव निरुपादानकार्यस्थित्यसंभवादित्याशङ्कायाम् उत्पन्नज्ञानानामपि श्रुतिस्मृतिषु देहस्थित्युपलम्भाद्देहतदारम्भककर्मोपादानाऽज्ञानलेशानुवृत्तिः कल्पनीयेति टीकोक्तयुक्तिरपेक्षणीया तत इयं स्वतन्त्रयुक्तिर्न भवतीत्यर्थः । **अन्यत्र** आत्मातिरिक्तवस्तुनीत्यर्थः । **चन्द्रैकत्वसाक्षात्कारेण सहानुवृत्तिरिति ।** अनभ्यासदशायां जलज्ञानेन सह जलमिदं न वेति संशयस्यानुवृत्तिरप्यत्रोदाहरणम् । **नियोग इति ।** प्रागेव प्रमाणतः सिद्धं वस्तु तथास्त्विति पुनर्यत्नेन न विधेयं नापि कथमेतदिति चोदनार्हमित्यर्थः । **तकारलोपश्छान्दस इति ।** लोपस्त आत्मनेपदेष्विति छान्दसे तलोपे सत्यतो गुणे इति पररूपत्वम्* ॥

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥   ५२१ । १०

सुकृतशब्दस्य च काम्यकर्मविषयत्वादिति । ननु सुहृदः साधुकृत्यामित्यत्र सुकृतशब्दस्योपास्यसाक्षात्कारात् प्राचीनं काम्यकर्म न विषयः तस्य तत एव विनाशात् ततः पाश्चात्यस्य क्रममुक्तिफलाऽनपेक्षितस्य तद्विरोधिनश्च तस्य विदुषि बुद्धिपूर्वमनुष्ठानाऽप्रसक्तेः वासनावशात्प्रवृत्तस्याऽबुद्धिपूर्वस्यासङ्कल्पितफलतया क्व चिदपि फलसाधनत्वाभावात् । कथंचित्फलसाधनकाम्यकर्मानुष्ठानसंभवे ऽपि तस्याश्लेषवचनविषयताया वक्तव्यत्वात् । न चाश्लेषवचनं सुहृद्गामित्वाभिप्रायं स्यादिति वाच्यम् । साक्षात्कारोदयानन्तरमनुष्ठितस्य काम्यकर्मणो देहवियोगकाले सुहृदि संक्रमिष्यतस्तावत्पर्यन्तं निराधारस्थित्ययोगात् । एतेन द्विषन्तः पापकृत्यामित्यस्यापि विषयो निरस्तः । साक्षात्कारनिवर्त्त्यादश्लेषवचनविषयाच्चान्यस्य द्विषद्गामिनः पापस्य दर्शयितुमशक्यत्वात् । ननु ययोः पुण्यपापयोः साक्षात्कारोदये सत्यश्लेषविनाशाविष्येते तयोरेव देहवियोगकाले द्विषद्गामित्वमुच्यत इत्यस्तु पुण्यपा-

---

* अत्रैकादशम् अनारब्धकार्याधिकरणं पूर्णम् ।

पयोरश्लेषविनाशौ विद्वांसम्प्रति फलजननार्हतानुत्पत्तिनिवृत्तिरूपौ देहवियोगकाले सुहृद्द्विषद्गामित्वं तयोः फलजननार्हतोत्पत्तिरूपमिति वक्तुं शक्यत्वादिति चेद् न । तस्य पुत्रा दायमुपयन्तीति दृष्टान्तानुसारेण यावद्देहधारणमुपासकं प्रति फलजननयोग्यतया ऽवस्थितयोः देहवियोगकाले सुहृद्द्विषतः प्रति योग्यताविर्भावप्रतीतेरिति चेत् । उच्यते । उपासकस्याभ्युदयफलानिच्छायामपि तामजानद्भिः पुत्रादिभिस्तदभ्युदयेच्छया ऽनुष्ठितानि तडागप्रतिष्ठादीनि संभवन्ति । द्वादशवार्षिकसत्रवाक्यानामयनादिषु तत्तत्फलेच्छया प्रवृत्तस्य मध्ये वीतफलेच्छस्य क्रममुक्तिफलेच्छया ब्रह्मोपासनायां प्रवृत्तस्य तन्मध्यएव लब्धोपास्यसाक्षात्कारस्य प्रक्रमात्तु नियम्येतेति* न्यायेनावश्यसमापनीयत्वेन प्राप्तानि द्वादशवार्षिकसत्रादीनि काम्यकर्माणि जन्मान्तरेष्वन्येषामवश्यभोक्तव्यफलानि संभवन्ति । किं बहुना । उपासनासहकारित्वेन नित्यत्वेन चोपासनाकाले ऽप्यनुष्ठेयानां दर्शपूर्णमासादीनामङ्गान्यन्यन्वाधानप्रस्तरयागादीनि ममाग्ने वर्चो विहवेष्वस्तु आयुराशास्ते सुप्रजास्त्वमाशास्ते इत्यादिकरणमन्त्रप्रकाश्यवर्चःप्रभृतिफलवन्ति भवन्ति । तानि फलानि सङ्कल्पाभावे ऽपि तद्यथा ऽऽम्रे फलार्थे निमित्ते छाया गन्ध इत्यनूत्पद्येते एवं धर्मं चर्य्यमाणमर्था अनूत्पद्यन्तइत्यापस्तम्बवचनादवश्यं भवन्त्येव । अवश्यानुष्ठेयकर्मविध्यन्यथानुपपत्त्याक्षेप्यप्रार्थनानि वा भवन्ति । अन्यथा विहवेष्वस्तु आयुराशास्तइत्यादिमन्त्रप्रकाश्ययजमानगामिफलतत्प्रार्थनानामनुष्ठेयार्थसंबन्धित्वाभावेन तद्द्वारा एतेषां मन्त्रभागानामनुष्ठेयार्थप्रकाशकत्वाभावप्रसङ्गात् । तथास्य पापकर्माण्यपि परैराचरितान्युपासकसंक्रमणायोग्यानि संभवन्ति यदन्यकृतमारिमेत्यादिश्रौतलिङ्गाद् उपासकस्यैवाबुद्धिपूर्वाण्यपि तानि संभवन्ति एवंभूतपुण्यपापकर्मविषया तदश्लेषोक्तिः । यान्युपासनाकाले तदर्थदेहधारणापेक्षितवृष्ट्यारोग्यादिफलतया ऽवश्यकर्तव्यानि काम्यकर्माणि तेषु दत्तफलेभ्यो ऽवशिष्टान्यपि देहपातकाले ऽनुवर्तमानानि संभवन्ति । पापकर्माण्यपि प्रारब्धकर्मफलतया ऽवश्यप्राप्याण्युपासकेन देहपातासन्नसमये कृतत्वेनाकृतप्रायश्चित्तानि संभवन्ति । तद्विषयं सुहृद्द्विषद्गामित्ववचनं भविष्यतीति न काचिदनुपपत्तिः । यद्वा तस्य पुत्रा दायमुपयन्तीत्येतत्सु-

---

* जै. सू. अ. ६ पा. २ सू. १३ ।

हृद्द्विषत्सङ्क्रमणकालोपलक्षणमात्रं न तु दृष्टान्तपरं तत्परत्वे ऽपि वा सर्वात्मना साम्यं न विवक्षितं किं त्वन्यसङ्क्रमणमात्रेणेतीष्यते । यद्वा ययोः पुण्यपापयोः साक्षात्कारे सत्यश्लेषविनाशौ तयोरेव देहवियोगकाले सुहृद्द्विषत्सङ्क्रमणमित्यभ्युपगमे ऽपि न दोषः* ॥

यदेव विद्ययेति हि ॥ १८ ॥ ५२८ । १४

विद्यायुक्तकर्मप्रशंसयेति । इदमुपलक्षणं प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान् प्रस्तोष्यसि मूर्द्धा ते विपतिष्यतीति साक्षाद्विद्याविहीनकर्मनिन्दया ऽपि तन्निषेधकल्पना द्रष्टव्या । तथा च विद्याविहीनकर्मनिषेधेन विद्यायाः कर्माङ्गत्वसिद्धिरिति भावः । विद्ययेति तृतीयाश्रुत्या साक्षादपि तत्सिद्धिर्द्रष्टव्या । **अन्ये त्वाहुरिति ।** भास्करेणैतत्सूत्रमनर्थकमित्युपेक्षितं तदीयास्तदभिप्रायमाहुरित्यर्थः । विद्यार्थत्वं यदा यायुरित्येषा षट्पदी गाथा नाश्रमोक्तक्रियास्वस्तीति यज्ञाद्यनधिकारिणो जप्यादिना शूद्रस्य शुश्रूषामात्रेणैव सिद्धिरस्तीत्येतावता तदधिकारिणो ऽङ्गविकलं यज्ञादि न फलाय कल्पतइति भावः । ननु सर्वाङ्गानुष्ठानाशक्तस्याशक्याङ्गप्रहाणेनानुष्ठानमपि यथाशक्त्यधिकरणसिद्धम् अतो विद्याविहीनमपि यज्ञादिकं कार्यकरं स्यादित्याशङ्क्याह **विद्योपेतेष्विति ।** कर्मभागमात्रविदामौपनिषदविद्याविद्याविवेकरहितानां विद्याविहीनमपि यथाशक्ति नित्यकर्मानुष्ठानमस्तु नाम औपनिषदविद्याविवेकवतां दहराद्युपासकानाम् अद्वैतब्रह्मविविदिषोत्पत्त्यर्थं यज्ञाद्यनुतिष्ठतां च विद्यानुष्ठानशक्तिरस्तीति तेषां विद्याविहीनं कर्म न कार्यकरम् । अत एव विद्याविवेकराहित्याद् विद्याविहीनमेव स्तोष्यत्सूद्गातृषु समागतेनोषस्तिना मदुपदेशेन विद्यां लब्ध्वा विद्यासहितकर्मानुष्ठाने संभवति तद्रहितं कर्म नानुष्ठेयमिति तन्निन्दा कृता । न च विद्याधिगमोपायाभावाद् विद्यारहितमेव स्तोष्याम इति संकल्प्याऽऽस्तावोपविष्टेषूद्गातृषु पुनर्विद्या नापेक्षणीयेति कथं तत्र विद्याविहीनकर्मनिन्देति वाच्यम् । यथाशक्ति शास्त्रं संपादयाम इत्येव हि संकल्पः न तु विद्याविहीनमेव स्तोष्याम इत्यपि । अतो यदि तदैव विद्याधिगमोपायो लभ्यते तदा तद्विहीनं कर्म न कर्तव्यमिति तन्निन्दा युक्तैव । अत एव मुख्याधिगमे मुख्यमागमो हि तदभावा† दि-

---

* अत्र द्वादशम् अग्निहोत्राद्यधिकरणं पूर्णम् । † जै॰ सू॰ अ॰ ६ पा॰ ३ सू॰ ३५ ।

त्यधिकरणे यदा यूपार्थे मुख्यं खदिरमलभ्यं मत्वा तत्प्रतिनिधिं कदरमुपादातुं प्रस्थितो मध्ये मुख्यं लभते चेद् मुख्य एव ग्राह्यः । कदरं गृहीत्वा तक्षणादिषु केषु चित्संस्कारेषु कृतेषु प्राक् पशुनियोजनाद् मुख्यं लभते चेदपि मुख्य एव ग्राह्य इति व्यवस्थापितम् । तस्माद् विद्यासहितकर्मानुष्ठानशक्ता उपासका अपि तद्रहितं कर्म यद्यनुतिष्ठेयुस्तदा ते

प्रभुः प्रथमकल्पे ऽपि यो ऽनुकल्पं निषेवते ।
न सांपरायिकं तस्य दुर्मतेर्विद्यते फलम् ॥

इति मानवधर्मशास्त्रोक्तं दोषं नातिवर्तेरन्निति भावः ।

५२९ । ७ तरप्प्रयोगेणेति । न तावदल्पाच्तरमित्यादाविव स्वार्थिको ऽयं तरप्प्रत्ययः । अधिकार्थसंभवे स्वार्थिकत्वायोगात् । अतो वीर्यवत्तरमित्यस्य फलजननानुकूलसामर्थ्यातिशयवत्त्वमर्थः । स च सामर्थ्यातिशयो यथाशक्त्यधिकरणन्यायसिद्धानुवादः समस्ताङ्गसाधारणन्यायसिद्धानुवादे प्रयोजनाभावात् । अतो विद्यारहिताद्विद्यासहितस्य विलक्षण एव कश्चिदतिशयः सिद्धन्नौचित्यात् प्रबलैः कर्मभिरप्रतिबद्धरूप एव पर्य्यवस्यति । एवं च पृथक्फलत्वान्न विद्या कर्माङ्गम् । विद्ययेति तृतीयाश्रुतिस्तु उपकारकत्वमात्रपरा तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदेति विद्यारहितकर्माभ्यनुज्ञानोपक्रमानुरोधात् । न चायं यथाशक्त्यधिकरणन्यायसिद्धार्थानुवादः । अङ्गत्वाभावरूपाऽपूर्वार्थबोधकत्वसंभवात् । मूर्धा ते विपतिष्यतीति वचनं तु धनायया समागतस्योषस्तेः स्वागमनमनादृत्य स्तोतुमारभन्तइति क्रोधप्रयुक्तं शापवचनं न तु विद्याराहित्येनाङ्गवैकल्यप्रयुक्तम् । अत एव शापवचनमाकर्ण्य स्तोत्रारम्भादुपरतेषूद्गातृषु राज्ञा ऽनुनीतेन यावत्तेभ्यो धनं दद्याः तावन्मम दद्या इति राजानं पृष्ट्वा तथेति राजानुमतिं लब्धवतोषस्तिनोद्गातृभ्यः प्रस्तावादिदेवतोपदेशानन्तरं तां चेदविद्वान् प्रास्तोष्यो मूर्धा ते व्यपतिष्यत् तथोक्तस्य मयेत्यादिवाक्यचये ऽपि स्वशापवचनं क्रोधप्रयुक्तं न त्वङ्गवैकल्यप्रयुक्तमिति स्फुटीकृतमधिकरणप्रयोजनं विविदिषूपासककर्तृकेष्वग्निहोत्रादिषु विद्यानियमाभाव इति भाष्ये व्यक्तम् । शास्त्रदर्पणे त्वङ्गत्वे नित्यकर्मवद्विद्यार्थत्वमनङ्गत्वे काम्यकर्मवद्विद्याया निवृत्तिरिति प्रयोजनान्तरमुक्तम् । तच्चिन्त्यम् । अनङ्गत्वे ऽप्यप्रतिबन्धफलकत्वेन विद्याया अपेक्षिततया

नित्यकर्मतौल्यात् । न हि काम्यमपि देहधारणार्थवृष्ट्यारोग्यादिफलकं कर्म विद्यानिवर्त्यम्* ॥

भोगेन त्वितरे क्षपयित्वा संपद्यते ॥ १९ ॥ ५२९ । ११

प्रारब्धकर्मफलभोगानन्तरमिति । येषां विद्यायोनिशरीरावसानं प्रारब्धं तेषां विद्याफलमस्तु नाम येषां त्वनेकशरीरानुयायि तेषां तत्फलं न संभवति जन्मान्तरस्य पूर्वसंस्कारप्रमोषकतया शरीरान्तरे विद्याविहीनैः क्रियमाणानां कर्मणां बन्धहेतुत्वेन ततो जन्मपरम्पराया एव प्राप्तेः । न च तेषां जन्मान्तरं न संस्कारप्रमोषकमिति कल्प्यं दृष्टनियमसङ्कोचकाभावात् । न च यावन्न विमोक्ष्यइति प्रारब्धकर्मविमोक्षावधिश्रवणं सङ्कोचकं धूत्वा शरीरमिति श्रुत्यन्तरानुसारेण तस्य शरीरविशेषावधिपरतया येषां विद्यायोनिशरीरावसानं प्रारब्धं तद्विषयत्वोपपत्तेः । न च धूत्वा शरीरमित्यत्र शरीरग्रहणं प्रारब्धकार्ययावच्छरीरपरम् । एकवचनश्रवणात् । अस्माच्छरीरात्समुत्थायेति श्रुत्यन्तरे अस्मादिति विशेषणेन विद्यायोगिशरीरस्यैव विवक्षितत्वाच्च । एवं च प्रारब्धस्यानेकशरीरानुयायित्वशङ्कया विद्यानुष्ठाने प्रवृत्तिश्च न सम्भवेदिति पूर्वपक्षाभिप्रायः । देहान्तरे संस्कारप्रमोष आधिकारिकाणामपि कल्प्यते अस्मदादीनां वा आधिकारिकाणां तत्कल्पना न सम्भवति आगमविरोधादित्युक्तत्वात् । द्वितीयपक्षं निरस्यति **अस्मदादीनामिति ।** मुक्त्यर्थविद्यानुष्ठानप्रतिपादकबहुशास्त्रप्रामाण्यात् तस्य तावदेवेति विवक्षितावध्यवसाने मुक्त्यवश्यम्भावप्रतिपादकावधारणाप्रामाण्याच्च यावन्न विमोक्ष्यइत्यस्य प्रारब्धकर्मावधिपरत्वं धूत्वा शरीरमित्यत्र शरीरपदस्य प्रारब्धकार्ययावच्छरीरपरत्वमस्मादिति विशेषणस्यानुभवसिद्धहेयताप्रदर्शनार्थत्वं विदुषां जन्मान्तरस्य संस्कारे प्रमोषानापादकत्वं च कल्प्यम् । अतः प्रारब्धभोगानन्तरं मुक्तिर्नियतेति सिद्धान्त्यभिप्रायः† ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ वेदान्तकल्पतरुपरिमले चतुर्थस्याध्यायस्य प्रथमः पादः ॥

---

* अत्र त्रयोदशं विद्याज्ञानसाधनत्वाधिकरणं पूर्णम् ।

† अत्र चतुर्दशम् इतरक्षपणाधिकरणं पूर्णम् ।

अथ चतुर्थस्याध्यायस्य द्वितीयः पादः ।

५३० । १ **वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥**

सता सौम्य तदा सम्पन्नो भवतीत्युक्तायाः सम्पत्तेः स्वमपीतो भवतीति लयार्थेनापीतिना विवरणाद् वाङ्मनसीत्यत्रापि सम्पत्तिर्लयः स च यथाश्रुति वाच एव प्रकृतौ लय इति लौकिकन्यायस्य वचनेन बाधोपपत्तेः । अन्यथा वाक्प्रकृतिकाया वृत्तेरपि मनसि लयोपपादनाऽसम्भवादिति पूर्वपक्षे प्राप्ते टीकाशयस्थं सिद्धान्तमाविष्करोति **यथासिद्धेति ।** प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति वागादीनामुत्क्रमणश्रुतेर्मनसि स्वरूपलयो न सम्भवतीति तत्प्रतिपादकत्वासम्भवाद् लोकसिद्धार्थानुवादकमिदं वाक्यमिति वक्तव्यम् । लोके च मनसि व्यापारे स्थिते वाग्व्यापारोपरमो दृष्ट इति तस्यैवायमनुवाद इत्यर्थः । **वृत्ति*सत्त्वकथनमिति ।** यद्यपि तत्कथं न लोकसिद्धार्थानुवादोपयोगि वाग्वृत्तिलयहेतुत्वोपयोगकल्पने लोकसिद्धार्थानुवादोऽपि न सिद्ध्येद् मनसो वाग्वृत्तिलयहेतुताया लोकतः सिद्ध्यभावात् तथाप्युपपदविभक्तितः कारकविभक्तेर्बलीयस्त्वान्मनसीति सप्तम्या प्रतीयमानं वाग्वृत्तिलयं प्रत्यधिकरणकारकत्वं हातुं न युक्तम् । लोकसिद्धार्थानुवादेनाधिकरणविशेषविधानसम्भवाद् अग्निज्वाला जले शाम्यतीत्यत्राप्रकृतावपि लयव्यवहारदर्शनाच्चेति तात्पर्य्यम् । **येषां च सौत्रानुशब्दव्याख्येति ।** यद्यपि सौत्रस्यानुशब्दस्य भाष्ये सर्वाणीन्द्रियाणि मनोऽनुवर्त्तते इत्यर्थ उक्तः तथापि सर्वाणीन्द्रियाण्यनुगच्छन्तीत्येवमप्यर्थः सम्भवतीति तात्पर्य्यम् । **प्राणमायतीति शेष इति ।** यच्चित्तस्तेनैव प्राणमायातीत्यतः प्राचीनस्य सम्पद्यमानैरित्यस्य तेनान्वयो दर्शितः न त्वध्याहार उक्तः† ॥

११ । १८ **तन्मनः प्राण उत्तरात् ॥ ३ ॥**

एवं घटस्यापि शरावे लयापत्तिरिति । यदि शरावात्मकविकृत्यन्तरावष्टब्धा आपो घटरूपपृथिव्या न प्रकृतिरित्यतिप्रसङ्गः परिह्रियेत तदा प्राणरूपविकृत्यन्तरावष्टब्धा अप्यापो मनसो न प्रकृतिरिति तुल्यमिति भावः‡ ॥

---

* मनोवृत्तीति ५ पु॰ पा॰ । † अत्र प्रथमं वागधिकरणं पूर्णम् ।

‡ अत्र द्वितीयं मनोधिकरणं पूर्णम् ।

सो ऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥ ५३१ । ६

प्राणजीवे वृत्तिलय उपचर्यतइति । ननु प्राणस्तेजसीति श्रुत्यनुसारेणोपगमनादिश्रुतिषु किमित्युपचारः कल्प्यते उपगमनादिश्रुत्यनुसारेण प्राणस्तेजसीत्यत्रोपचारः कल्प्यतां प्राणवृत्तिलयाधारस्य जीवस्य तेजसि वृत्तिलयात् प्राणस्य तेजसि वृत्तिलय उपचर्य्यतइति प्राणवृत्तिलयाधारत्वं तेजसस्सप्तम्येव जीवस्य केन चित्स्फुटं न प्रतीयते तदुपजननादिमात्रं तु तेजोद्वारा ऽप्युपपन्नमिति चेत् । एवं सप्तम्यां निहितश्रद्धुस्तेजोनन्तरं जीवनिवेशे ऽप्यवकाशं न लभते । तेजः परस्यां देवतायामित्यत्रापि सप्तम्या तेजसः परमात्मनि लयप्रतीतेः । एवं यथोपचारकल्पनासंभवः सप्तम्यवरोधश्च पक्षद्वये ऽपि तुल्यः तथा लौकिकदृष्टान्तसद्भावो ऽपि तुल्यः । यथा पान्थः प्रथमं नाविकेन संगत्य ततस्तेन सह तदीयां नावं गत्वा पारं प्राप्नोति तथा प्राणः प्रथमं जीवेन संगत्य ततस्तेन सह तेजःशब्दोक्तं त्रिवृत्कृतभूतान्तरसंसृष्टं तदीयं सूक्ष्मशरीरं गत्वा तेन सह परां देवतां प्राप्नोतीति जीवस्य प्राणतेजोमध्ये निवेशे दृष्टान्तः । यथा सारथिः प्रथमं राजकीयं रथं स्वयमारूढो राजसमीपं गत्वा पश्चाद्रथारूढेन तेन सहितस्तदभिमतदेशं प्राप्नोति एवं जैवं सूक्ष्मशरीरं प्राणः प्रथमं प्राप्य ततस्तत्प्राप्तेन जीवेन सहितः परदेवतां प्राप्नोतीति जीवस्य तेजोनन्तरनिवेशे दृष्टान्तः । तस्मात्पूर्वपक्षकोटौ नास्ति किं चिद्विनिगमकमिति चेत् । उच्यते । विनिगमकान्तराणां कोटिद्वयतौल्ये ऽपि लोकसिद्धानुवादप्रायपाठः पूर्वपक्षे विनिगमकः । तथा हि । यथा वागादिबाह्येन्द्रियव्यापारोपरमानन्तरमपि मनोव्यापारदर्शनाद् वाङ्मनसि संपद्यते इन्द्रियैर्मनसि संपद्यमानैरिति श्रुतिः यथा च बाह्याभ्यन्तरज्ञानोपरमानन्तरमपि श्वासव्यापारदर्शनाद् मनः प्राणइति श्रुतिः तथा श्वासरूपप्राणव्यापारोपरमानन्तरमपि देहे क्व चिदौष्ण्यदर्शनात् प्राणस्तेजसीति श्रुतिरपि लोकसिद्धानुवादिनीति न प्राणतेजसोर्मध्ये जीवस्य निवेशः । तेजः परस्यां देवतायामित्यस्य लोकसिद्धानुवादकत्वासंभवादुपगमनादिश्रुत्यनुसारेणावश्यं क्व चिन्निवेशनीयस्य जीवस्य तेजःपरदेवतयोर्मध्ये निवेशः । ननु प्राणस्तेजसीति त्रिवृ*त्कृततेजोरूपदेहारम्भकभूतसूक्ष्मप्राप्त्यन्यथा तदुपहितजीवसंबन्धो ऽप्यवर्ज्जनीयतया सिद्ध्येद् उपाध्यु-

---

* त्रिवृदादीति पुस्तकत्रये पाठः । एवमग्रे ऽपि ।

पहितयोरेकतरसंबन्धस्य तदितरसंबन्धनियतत्वात् । अतो वाङ्मनसीत्यादिक्रमे पृथग्जीवः क्व चिदपि न निवेशनीय इति चेन्नायं नियमो ऽस्ति देहारम्भकभूतसूक्ष्माणि जीवस्येव प्राणानामपि स्थितिगत्योरुपाधिभूतानीति प्राणगतेश्चेति* सूत्रे प्रतिपादितम् । न च वाङ्मनःप्राणानां पूर्वपूर्वस्योत्तरोत्तरप्राप्त्या तदुपाधिभूतसूक्ष्मप्राप्तिर्नान्तरीयकतया सिद्धा तथात्वे प्राणस्तेजसीति पृथक् तत्प्राप्तेरवक्तव्यत्वापत्तेः । तत्र यथोपहितप्राप्त्यनन्तरम् उपाधिप्राप्तिः पृथगुच्यते एवमिहोपाधिप्राप्त्यनन्तरमुपहितप्राप्तिः पृथग्वक्तुमुचितेति पूर्वपक्ष्यभिप्रायः । एवमेवेममात्मानमिति भाष्योदाहृतश्रुतिवाक्यात् प्राचीनं दृष्टान्तवाक्यम् । तद्यथा । राजानं प्रयियासन्तम् उग्राः प्रत्येनसः सूतग्रामण्यो ऽभिसमायन्तीति । तत्रोग्राः वैश्याच्छूद्रायामुत्पन्नाः । प्रत्येनस्विनस्तस्करादीन् प्रति दण्डयितृत्वेन नियुक्ताः । सूताः क्षत्रियाद् ब्राह्मण्यामुत्पन्नाः प्रतिलोमविशेषाः । ग्रामण्यो राज्ञा ग्रामाधिकारे नियुक्ताः ।

५३१ । १२ इदं दृष्टान्तवाक्यमर्थतो गृह्णात्येवंशब्दविवरणाय **यथा यात्रायामुद्यतमिति । ऊर्ध्वोच्छ्वासित्वमिति ।** ऊर्ध्वोच्छ्वासी भवतीत्यनेन ऊर्ध्वोच्छ्वासित्वमेतच्छब्दार्थ इति प्रदर्शितमित्यर्थः । **इत्युपगमनश्रुतेरर्थ इति ।** यथा यात्रायामुद्यतमित्यादिप्रकारोयमुपगमनश्रुतेरर्थ इत्यर्थः । ननु उपगमनादिकं न प्राणस्य जीवे वृत्तिलयसाधकं यतः जीवोपगमनं जीवावस्थितिश्चेत्युभयमपि प्राणस्य न श्रुतं किं त्विन्द्रियाणाम् । यत्तु प्राणस्यापि श्रुतं जीवानुत्क्रमणं तद्विपरीतसाधकम् । तत्र विलीनतया तदाश्रयस्य हि सहोत्क्रमणं भवति न त्वनूत्क्रमणम् । उच्यते । वाङ्मनसि संपद्यते मनः प्राणइति वाक्याभ्यां साक्षान्मनोद्वारा च प्राणे विलीनतया सिद्धानां मनश्चक्षुरादीनां जीवाश्रयणाय जीवं प्रत्यागमनं जीवे ऽवस्थितिश्च प्राणस्य जीवाश्रयणां जीवं प्रत्यागमनं जीवे ऽवस्थितिं विना ऽनुपपन्नमित्येवमिन्द्रियोपगमनावस्थित्योः प्राणोपगमनावस्थित्याक्षेपकतयोक्तसाध्यसाधकता । अनूत्क्रमणं यद्यपि न वृत्तिविलयसाधकं तथापि तद्वचनं तत्र विलये सत्येव दृष्टं यथा प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति तत्सामान्यात् तमुत्क्रामन्तमिति वचनस्यापि तत्र विलयसाधकता ।

* व्या॰ सू॰ अ॰ ३ पा॰ १ सू॰ ३ ।

तत्सहितेन्द्रियसमुदायवचन इति । विज्ञानशब्दो भावकरण- ५३१ । १८
व्युत्पत्तिद्वयेन प्रारब्धकर्मफलप्रकाशस्येन्द्रियग्रामस्य च तन्त्रन्यायेन वाचक
इति तत्साहित्यं जीवस्य सविज्ञान इत्येवोच्यतइति भावः । **तेजोऽध्यक्ष-
जीवलक्षणासंभवादिति** । मार्गपर्वसु वायुवरुणादीनामिव जीवस्य पृथक्
क्व चिन्निवेशो न कल्प्यते किं तूपगमनादिश्रुतिबलादवश्योपसंहार्य्यस्य जीव-
स्योपसंहारार्थं तेजःशब्दस्य तदुपहिते जीवे वृत्तिः कल्प्यते । उपाधिवाच-
कस्य तद्विशिष्टोपहिते गुणवाचकस्य गुणविशिष्टाश्रयइव लक्षणोपपत्तेः ।
तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वतीत्यत्र श्रद्धाशब्दस्याप्सु लाक्षणिकस्य
त्रिवृत्करणेनान्वितेषु भूतान्तरेष्वप्युपलक्षणतामुक्त्वा तदुपहितजीवपर्य्यन्तं लक्ष-
णाङ्गीकृता इह तेजोवाचकस्यैव तत्पर्यन्तलक्षणाङ्गीकारे का ऽनुपपत्तिरिति
भावः । **ननु तस्य तेजोद्वारेणेति ।** तेजःशब्दस्य जीवलक्षणा न युक्ता ।
प्राणस्तेजसीत्यस्य लोकसिद्धानुवादकत्वाभावापत्तेः । अतः प्राणस्य जीववृ-
त्तिलय एवोपगमनादिश्रुतिसिद्धः प्राणवृत्तिलयाधारस्य तेजसो जीवे वृत्तिलयो
ऽस्तीत्येतदवलम्ब्यौपचारिको ऽस्त्विति भावः । यद्यपि प्राणस्य जीवे वृत्तिलयो
न श्रुतः किं त्विन्द्रियोपगमादिप्रणालिकया ऽऽक्षेप्यः तथापि स एव तेजोद्वारक-
त्वेनामुख्यो ऽस्त्विति तात्पर्य्यम् । **व्यवधानादेवेति ।** परमात्मनि खलु
तेजसो लयः प्रसिद्धः स जीवात्मन्युपचर्य्यते चेत् साक्षाल्लय उपचर्य्यते व्य-
वहितो वा । नाद्यः । परमात्मन्यपि तेजसः साक्षाल्लयाऽप्रसिद्धेः । न द्वि-
तीयः । घटादावपि परमात्मविकारे लयोपचारप्रसङ्गादित्यर्थः ।

ननु तेजसो जीवे स्वरूपलयो नेष्यते किं तु वृत्तिलयः स त्वनौ-
पचारिक एव संभवतीत्याशङ्क्याह **वृत्तिलयस्त्विति ।** वाङ्मनसीत्यादिक्रमे ५३२ । २
तेजो जीवइति पर्वान्तरं प्रमाणान्तरसिद्धमिति कल्प्यते उतोपगमनादिश्रुति-
प्रापितो जीवः क्व चिन्निवेशनीय इति कल्प्यते । नाद्यः । वाङ्मनसीत्यादा-
विव प्रमाणान्तराभावात् । न हि प्राणव्यापारे श्वासे देहोष्मणि च निवृत्ते
ऽपि जीवसत्तायां तच्चिह्नानुवृत्तिरस्ति । न द्वितीयः । श्रुतस्यैव तेजःश-
ब्दस्य तदुपहितजीवबोधकत्वोपपत्तौ क्रमिकपर्वान्तरतद्बोधकवाक्यान्तरकल्प-
नागौरवाऽयोगात् । प्राणस्तेजसीत्यस्य लोकसिद्धानुवादकत्वं तु विशेषणांश-
सत्ताविषयतया ऽप्युपपन्नम् । विशेष्यभूतजीवांशे तु सप्तम्यर्थप्राणवृत्तिलया-

धारत्वम् । इदं तु चिन्त्यते । वाङ्मनसीत्यादिश्रुतेरिन्द्रियैर्मनसि संपद्यमानैर्यच्चित्तस्तेनैव प्राणमायाति प्राणस्तेजसा युक्तः सहात्मनेति श्रुत्यन्तरानुसारेण व्याख्यानं सूत्रकारैः किमिति न कृतं तदनुसारेण हि वाङ्मनसीत्यनेन वागुपलक्षितानां बाह्येन्द्रियाणां (मनउपहिते जीवे लय उच्यतइति व्याख्येयम् । दृष्टो हि मनःशब्दस्य जीवे प्रयोगः प्राणबन्धनं हि सोम्य मन इति । मनः प्राणइत्यनेन विलीनसकलबाह्येन्द्रियाणां)* मनउपहितस्य जीवस्य प्राणप्राप्तिरुच्यतइति व्याख्येयम् । प्राणस्तेजसीत्यनेन तथाभूतस्य प्राणस्योदानयोग उच्यतइति व्याख्येयमिति । अत्रायमभिप्रायः । वाङ्मनसीत्यादिश्रुतिर्लोकसिद्धक्रमानुसारेण प्रयुक्ता तद्वैपरीत्येन प्रवृत्तिमत ऊष्मण उपशमः प्रथमं पठितः । अतः श्रुत्यन्तरमेवान्यथा व्याख्येयम् । (यच्चित्तस्तेनैव प्राणमायातीत्यनेन क्षीणसकलेन्द्रियवृत्तिर्भोक्तव्यफलस्फुरणमात्रयुक्तः प्राणव्यापारमात्राविशेषस्तिष्ठतीत्युच्यते न तु प्राणाधिकरणकवृत्तिलयं)† प्राप्नोतीत्युच्यतइति । श्रुत्यन्तरे तेजःशब्दस्तु पूर्वसंदर्भानुसारेणोदानपर इह तु लोकसिद्धक्रमानुवादेन त्रिवृत्कृततेजःपरतैव तस्योचितेति ।

ननु चेयं श्रुतिरित्यादिभाष्यस्य तेजःसहचरितानीत्यादिटीकाग्रन्थेन दर्शिते ऽर्थे तस्य भाष्यटीकासूचितां योजनां दर्शयति **प्राणेनाधारत्वेनेति ।** अत्र प्राणस्याधारेण जीवेन संपर्कस्तेजःशब्दोपलक्षितभूतसंबन्धात् प्राचीनो न निषेध्यत्वेनानूद्यते अधिकावापस्यानभिमतत्वात् किंतु भूतप्राप्तिसमयभावित्वेन सिद्धान्ताभिमतो ऽनूद्यते । श्रुतिर्दर्शयतीति भाष्यस्यानेनान्वये सति न दर्शयतीति लभ्यते तेजस इति भूतमात्रस्य प्राप्यत्वं निर्दिश्यतइति जीवपर्यन्तलक्षणामनपेक्ष्येदमुक्तम् । तदपेक्षायां तु जीवस्यापि प्राप्यत्वं निर्दिश्यतएव । **हेतुप्रतिज्ञयोरिति ।** सूक्ष्मविषये खलु तेजोमात्रं वा भूतपञ्चकं वेति विवादः । तत्र कार्यस्य स्थूलशरीरस्यानेकात्मकत्वोक्तिर्व्यधिकरणेति शङ्कार्थः‡ ॥

५३२ । २१ **समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥**

---

* ( ) एतदन्तर्गतो ग्रन्थो नास्ति ५ पु० ।

† ( ) एतन्मध्यगो ग्रन्थो न दृश्यते ५ पु० ।

‡ अत्र तृतीयम् अध्यक्षाधिकरणं पूर्णम् ।

अत्राधिकरणविषयभूतेति । इहाऽमृतत्वफलश्रवणेन सगुणविदामुत्क्रान्त्यभावः शङ्क्यते ऽमृतत्वफलं च सगुणविद्यासु दहरविद्यायां श्रूयते । अतो दहरविद्याधिकरणविषय इति भावः । यदि विद्यया ऽमृतमश्नुत इति श्रुतिः सकलसगुणविद्यासाधारणी तदा तत्र दहरविद्याग्रहणं सगुणविद्यान्तराणामप्युपलक्षणं द्रष्टव्यम् । ननु दहरविद्यायां तयोर्ध्वमायन् अमृतत्वमेतीत्यत्रामृतत्वफलं श्रूयते तत्रैवोत्क्रान्तावपि श्रूयमाणायां कथं तदभावेन पूर्वपक्ष इत्याशङ्क्य न वास्तवो ऽयं पूर्वपक्ष इति टीकायामेव द्योतितमित्याह **तयोर्ध्वमिति ।** ननु न तु विदुषः सकाशादित्यादिना व्याघातो भवेदित्यनेन टीकाग्रन्थेन विदुषः सकाशादविदुषां विशेषवत्त्वोत्क्रान्तिर्न विधीयते तथा सति विद्याप्रकरणव्याघातः स्यादित्युच्यते अयं प्रसक्तप्रतिषेधः विद्याप्रकरणाद् विदुषः खलूत्क्रान्तिशङ्का प्रवृत्ता अत आह **येन हेतुनेति ।** विद्याप्रकरणे स्वापादिवदुत्क्रान्तेरप्यनुवाद एव न विधानमित्युक्त्यनन्तरं विधानं किं न स्यादित्याशङ्कायां किमविदुषो विधानं विदुषो वेति विकल्पं मनसि निधायाद्यविकल्पः प्रकरणविरोधेन टीकायां निरस्तः । अमृतत्वफलविरोधेन द्वितीयविकल्पनिरासः स्पष्ट इति तत्र कण्ठतो न कृत इति भावः । यद्यपि वाङ्मनसि संपद्यत इत्यादिश्रुतिर्न सगुणविद्याप्रकरणाम्नाता तथापि सगुणनिर्गुणविद्याविशेषाविवेचनेन तामवलम्ब्य सगुणविदामुत्क्रान्तिप्रतिपादनमाशङ्कितं स्वापादिवत्साधारण्येन प्राप्ताया उत्क्रान्तेरनुकीर्त्तनमिति परिहारश्च कृतः । अस्य फलं प्रतिषेधादिति चे*दित्यधिकरणसिद्धान्ते द्रष्टव्यम् । **सगुणब्रह्मप्राप्तिमात्रस्येति ।** गतिश्रुतिबलाल् लोकविशेषे तत्प्राप्तिरेव फलपर्य्यन्तेति भाव†: ॥

तदापीतेः संसारव्यपदेशात् ॥ ८ ॥ ५३३ । २०

स एवाद्यापि न सिद्ध इति । ननु सुषुप्तस्य सत्सम्पत्तिः सावशेषेति स एव तु कर्मानुस्मृतिशब्दविधिभ्य‡ इत्यधिकरणे विद्याकर्मविध्यन्यथानुपपत्त्या समर्थितं स न्याय इहापि तुल्यः कथमद्यापि न सिद्ध इत्युक्तम् ।

* व्या· सू· अ· ४ पा· २ सू· १२ ।

† अत्र चतुर्थम् आसृत्युपक्रमाधिकरणं पूर्णम् ।

‡ व्या सू· अ· ३ पा· २ सू· ६ ।

उच्यते । सुप्त एव प्रबुध्यतइत्यत्र कर्मानुस्मृतिशब्दाः सन्त्यनन्यथासिद्धा हेतवः इह तु विधिमात्रं तत्र कर्मविधीनाम् अविद्वद्विषयत्वेन चारितार्थ्यं स्पष्टम् । विद्याविषयस्तु द्विविधा अर्चिरादिप्राप्यब्राह्मलौकिकफलभोगशक्तिमन्तस्तद्रहिताश्च तत्राद्येषु निरवशेषलयासम्भवे ऽपि द्वितीयेषु सम्भवतीति तद्विषयत्वेन निरवशेषलयप्रतिपादकत्वसमर्थनसम्भवे किमर्थं सावशेषलयप्रतिपादकत्वं कल्प्यम् । ननु परदेवतासम्पत्तिवचनस्य ब्रह्मविद्विषयत्वे प्रकरणान्निर्गुणब्रह्मविद्याविषयता स्यात् तद्देहारम्भकभूतानां निरवशेषसम्पत्तिरिष्टैव कलाप्रलयाधिकरणे तथा वक्ष्यमाणत्वात् । तथा च पूर्वपक्षः सिद्धान्त्यनिष्टार्थविषयो न स्यादिति चेन्न । निर्गुणब्रह्मविदो मिथ्याज्ञानोपनीतवाङ्मनःप्रभृतिलयस्य स्वप्नप्रपञ्चविलयवद्योगपद्येन वाङ्मनसीत्यादिकस्य निर्गुणप्रकरणपठितस्यापि लवणादिवत्सम्भवात् सगुणविद्यान्वयकल्पनात् । एवं चानियमः सर्वेषा*मित्यत्रार्चिरादिगतेः सकलगुणविद्यासाधारण्यं यदुक्तं तस्यायमाक्षेपः । ये चेमे ऽरण्ये इत्यादि वचनं श्रुतब्राह्मलौकिकफलोपभोगविद्यामात्रविषयमस्त्विति । यत्तु पूर्वाधिकरणे सकलगुणविद्यासाधारण्येनोत्क्रान्तिसमर्थनं तस्याप्याक्षेप इति पूर्वाधिकरणसङ्गतिः । **अनेन प्राचामप्यधिकरणानामिति** । तेष्वधिकरणेषु वागादीनां मनःप्रभृतिषु यः स्वरूपलयपूर्वपक्षस्तस्य चेदं प्रयोजनं यत्सगुणविद्यासु काश्चिद् मुक्तिफलाः काश्चिद् ब्रह्मलोकावाप्तिफला इति विभागः । न च सगुणविद्यायां मुक्त्यनुपपत्तिः । ब्रह्मलोकप्राप्तिपर्यन्तासु क्रममुक्तिफलासु ब्रह्मलोके हिरण्यगर्भादिव प्रकृताधिकरणविषयभूतासु सगुणविद्यासु देहवियोगकाले साक्षात्कृतात् सगुणब्रह्मणो निर्गुणविद्योपदेशलाभेन तदुपपत्तेः ।

५३४ । १ **सगुणविद्यायामनुचिन्तनार्थमिति†** । यद्यपि वागादिवृत्तिलये ऽप्येतत्प्रयोजनं वक्तुं शक्यं तथाप्येतदेव प्रयोजनं प्राणस्याध्यक्षे वृत्तिलयनिरूपणस्य तेषां त्वन्यदपि प्रयोजनमस्तीति भावः । अत्रायं सिद्धान्तः । सत्यमुपासतइति सामान्यश्रुत्या सकलसगुणविद्यानाम् अर्चिरादिगतिसिद्धौ तेजः परस्यामित्यस्य सगुणविद्याविशेषेषु निरवशेषलयपरत्वं कल्पयितुं न युक्तं तत्कल्पनाया विलम्बितत्वात् । तथापि सत्यमुपासतइति सामान्य-

* व्या· सू· अ· ३ पा· ३ सू· ३१ । † अनुचिन्तनार्थं इति ५ पु· पा· ।

श्रुति: सर्वान् सगुणविद्याविशेषान् शीघ्रमाक्रामति तेज: परस्यामित्यस्य निरवशेषलयपरत्वमेव तावच्छब्दसामर्थ्येन न प्राप्तं प्रत्युत वाङ्मनसीत्यादिप्रक्रमात् सावशेषलयपरत्वप्राप्तौ प्रकृतिलयत्वलिङ्गेन प्रायपाठमुपमृद्य कल्पनीयम् । ततश्च वाङ्मनसीत्यादेर्निर्गुणविद्यायामनन्वयान्निरवशेषभूतलयस्य मुमूर्षुसामान्याऽनन्वयाच्च सगुणविद्यासु काश्चित्परिहृत्य कासु चिदुत्कर्ष: कल्पनीय: । अत: शीघ्रप्रवृत्तिकोदाहृतसामान्यश्रुत्यसङ्कोचाय यथाक्रमं यथाश्रुतमित्यादिसामान्यश्रुतिसङ्कोचाय च सौषुप्तिकलयश्रुतेरिव प्रकृतिलयत्वलिङ्गं बाधित्वा सावशेषलयपरत्वं कल्पयितुं युक्तम् । तथा सति वाङ्मनसीत्यारभ्य प्रतीतं सकलोत्क्रममाणसाधारण्यमपि न त्यक्तं भवति । पूर्वाधिकरणोक्तप्रकारेण सुषुप्त्यादिकीर्तनवदुत्क्रान्तिक्रमकीर्तनस्यापि तत्त्वमसिप्रतिपादनशेषतया प्रकरणान्वयात् तत उत्कर्षो ऽपि न कल्पितो भवतीति । एकस्य सम्पद्यतइत्यस्य वाक्यस्य चतुष्टयान्वयिनो वाक्यत्रये वृत्तिलयपरत्वं चतुर्थवाक्ये स्वरूपलयपरत्वमिति वैरूप्यं च परिहृतं भवति ।

रूपवदिति हेतुगर्भविशेषणमिति । अनेन रूपवत्त्वं हेत्वो: ५३४ । १
प्रविष्टमिति दर्शितम् । उपलभ्येतेति प्रतिहन्येतेति चोक्त्या तर्करूपमिदमनुमानद्वयमिति सूचितम् । यदि महत्त्वे सति रूपवद्बहुद्रव्यारब्धत्वे सति रूपवच्च सूक्ष्मशरीरं यदि देहान्निर्गच्छेत्तदा चक्षु:स्पर्शनाभ्यामुपलभ्येत मूर्तान्तरैश्च प्रतिहन्येतेति तर्कशरीरम् । प्रभा तेजसो रूपं तदनुमेयं तदाश्रयद्रव्यमिति मतावलम्बनादाद्यतर्कस्य न प्रभायां व्यभिचार: । प्रभाद्रव्यं चाक्षुषमिति पक्षे तु चक्षुषोपलभ्येतेत्येवापाद्यं प्रतिहननयोग्यत्वं द्वितीयमापाद्यन्तेन गतिप्रतिपत्तिक्षणान्तरसंबन्धरहितोत्पन्नविनष्टे न व्यभिचार: । **महत्त्वबहुद्रव्यारब्धत्वाभ्यामिति** प्रथमसाध्याभिप्रायेण द्वितीयं तु तयोरस्त्येव कुड्याद्यावृते तयोरप्यप्रवेशात् तत्र मूर्तत्वमात्रमेव साधनं पर्याप्तम् । **एतत्सूत्राकाङ्क्षार्थमिति** । आपीतरवतिष्ठते चेति चकारस्य प्रथमसूत्रेणाप्यन्वये सति सूक्ष्मशरीरविषये अन्यदपि किं चिद्वक्तव्यमस्तीति तेन द्योतनात्किं वक्तव्यमित्याकाङ्क्षोदेतीति भाव: । अनेन पूर्वसूत्रस्य स्वरसत एतत्सूत्राकाङ्क्षा नास्ति सूक्ष्मशरीरस्य देहान्निर्गमने तत्पार्श्वस्थैरुपलभ्यतइति प्रतिहतं नेतच्चेति शङ्काया-

स्तुच्छत्वात् । अविदुषामिव विदुषामपि पार्श्वस्थैरनुपलभ्यमानस्यैव तस्य नयनमरीचिवन्निर्गमनोपपत्तेः स्पष्टत्वात् । नयनमरीचेः काचाभ्रपटलत्वादिभिः कैश्चिदिव सूक्ष्मशरीरस्य सर्वैरप्यप्रतिघातस्याविद्वद्विषये ऽवश्यवक्तव्यत्वाच्च । एवं च स्वारसिकाकाङ्क्षासंपादनार्थमेव स्वरूपतः प्रमाणतश्चेति स्वस्थानएव स्वरूपसमुच्चयार्थत्वेन प्रतिष्ठितस्य भिन्नक्रमतया ऽप्यन्वयो दर्शितः । ननु चक्षुष्यनैकान्तिकत्वमाहेत्युक्तं टीकायां कथं चाक्षुषशब्दः न तु चक्षुरेव चक्षुःसंबन्धीत्यतो व्याचष्टे **यथा चाक्षुषस्येति** । चक्षुरुपादानं तेजः चक्षुःसंबन्धाच्चाक्षुषमित्युक्तं पृथिवीद्व्यणुकसमवायिकारणं परमाणुः पार्थिवपरमाणुरिति । **लिङ्गशरीरस्येति शेष इति** । परिमाणतः सूक्ष्ममिति पाठे लिङ्गशरीरमिति शेषः ।

५३४ । १६ **अस्वच्छत्वमुपाधिमिति** । यावन्मूर्तप्रतिहननीयत्वं साध्यं तेन काचाभ्रपटलाद्यप्रतिहननीये नयननिराकरणादौ न साध्याव्याप्तिः । नोपमृद्यतइति शेष इति टीकावाक्यस्य भाष्यस्थशब्देन पूरणं कृतं सूत्रे उपपत्तिशब्दो न सूक्ष्मपरो व्याख्येयः । भाष्यकारैरूष्मिमप्रत्यक्षस्य सूक्ष्मशरीरे प्रमाणतयोपन्यस्तत्वात् । न च तस्य स्थूलदेहातिरिक्तविषयत्वे युक्तिरपि तैरुपन्यस्तेति वाच्यम् । प्रत्यक्षस्य विषयपरिशोधने खलु सा युक्तिः न तु प्रत्यक्षविषये ऽतो यथा व्यक्तीनां परस्परव्यावृत्तत्वेनानुगतप्रत्ययविषयत्वं नोपपद्यतइति युक्त्या परिशोधितविषयम् अनुगतप्रत्यक्षमेव* व्यावृत्तव्यक्त्यतिरिक्तानुवृत्तसामान्यसद्भावे प्रमाणम् एवमिहाप्यनुवृत्तदेहविषयत्वानुपपत्तियुक्त्या परिशोधितविषयं व्यावृत्तोष्मिमप्रत्यक्षमेव तदाश्रयद्रव्यस्यापि ग्राहकं स्थूलदेहातिरिक्तसूक्ष्मदेहे प्रमाणं न युक्तिरित्यभिसंधिमता टीकाकृता उपपत्तिः प्राप्तिरिति व्याख्यातं तच्चापि ग्रामप्राप्त्यादिवदिह कस्यचित्प्राप्तिर्न दृश्यतइत्यनुपपत्तिं दृष्ट्वा व्याचष्टे **प्राप्तिर्लाभ इति** । लाभोच सद्भावावगमः अनेनायमर्थो लभ्यतइत्यादौ तत्र प्रयोगात् । तथा च स्थूलदेहातिरिक्तसूक्ष्मदेहस्यैवायमूष्मा स्थूलदेहव्यावृत्तोष्मिमप्रत्यक्षेण तत्सद्भावावगमादिति सूत्रार्थ इति तात्पर्य्यम् । उपपत्तिशब्देन प्रत्यक्षविषयपरिशोधकयुक्तिग्रहणेपि न दोषः । तस्यापि सूक्ष्मशरीरसिद्धौ परंपरयोपयोगाद् भाष्यस्वारस्याच्च । श्रुतं

---

* अनुगतप्रत्यक्षमेव व्यावृत्तत्वेनानुगतप्रत्ययविषयत्वं नोपपद्यतइति युक्त्या परिशोधितविषयम् अनुगतप्रत्यक्षमेवेति १-५ पु. पा. । पौनरुक्त्यालोचनयोपरि स नादृतः ।

कर्णावपि धारय श्रवणमिति इदं भाष्यं स्पष्टमिति टीकोक्तमिति गृहीतम् । (इदं स्पार्शनप्रत्यक्षमिव* मृतशरीरे देहोष्मापगमानन्तरं कर्णपिधाने तदीयस्य परकीयस्य वा शब्दभावप्रत्यक्षस्याभावात् किं तु)† जीवदवस्थायां तदीयेन केवलभावप्रत्यक्षेण कर्णपिधानापेक्षासामर्थ्यलब्धान्तरविषयेण स्थूलशरीरातिरिक्तसूक्ष्मदेहसिद्धिर्विवक्षिता । ज्योतिरधिकरणे‡ पिहितकर्णपुटेन श्रूयमाण आन्तरः शब्दो जाठराग्निरित्युक्तम् इह तु जाठराग्निरपि सूक्ष्मदेहानुप्रविष्ट इत्येवमुक्तं तदनन्तरप्रतिपत्त्यधिकरण§दर्शितश्रुतिन्यायसिद्धेः सूक्ष्मशरीरे प्रसङ्गादिह प्रमाणान्तरमप्यस्तीति दर्शितम्|| ॥

प्रतिषेधादिति चेन्न शारीरात् ॥ १२ ॥ ५३४ । २२

प्राणोपलक्षितसूक्ष्मशरीरस्येति पदं बहुव्रीहिणा जीवात्मविशेषणमिति दर्शयति **सूक्ष्मं शरीरं यस्येति ।** प्राणोत्क्रान्त्यनुत्क्रान्तिविचारः प्राणोपलक्षितसूक्ष्मशरीरोपहितजीवविषयः पर्य्यवस्यतीति भावः । **सिद्धान्त इत्यर्थ इति ।** यत्रायं पुरुषो म्रियते उदस्मात्प्राणाः क्रामन्त्याहो नेति पृष्टयोः पक्षयोर्नेति होवाचेति यो वक्तव्यः सिद्धान्तस्तस्मिन्नित्यर्थः । संसारिण एवेत्ययुक्तं प्रश्नप्रतिवचनयोर्विद्वद्विषयत्वस्य सिद्धान्त्यभिमतत्वादित्याशङ्क्य विदुषो हिरण्यगर्भलोकप्राप्त्यनन्तरं मुक्तिरिति पूर्वपक्षनिराकरणार्थं विदुष एव संसारमण्डलवर्त्तित्वावस्थाप्रदर्शनार्थं तद्विशेषणमिति व्याचष्टे **यदुक्तमित्यादिना ।** नन्वेवमप्यस्त्वविदुष इति टीकाग्रन्थेनार्त्तभागप्रश्नोत्तरे वर्ण्यमानानुत्क्रान्तिरविद्वद्विषयेत्याशङ्क्यते इयमाशङ्का पूर्वपक्षिणो न युक्ता । स ह्यविदुष इव विदुषोऽप्युत्क्रान्तिरस्तीति मन्यते अतस्तटस्थशङ्केयमिति व्याचष्टे **मध्ये कश्चिदिति ।** ब्रह्मविदुत्क्रान्तिसिद्धेस्त्वत्पक्षासिद्धिरिति ब्रह्मविदोऽनुत्क्रान्तावार्त्तभागप्रश्नोत्तरं खलु प्रमाणमिति सिद्धान्तिनोपन्यस्तं तच्चेदन्यविषयं भवेत् तदा न सिद्धान्त्यभिमतसिद्धिरिति तावता सन्तुष्टस्य तटस्थस्येयमाशङ्केति भावः । यदि पूर्वपक्षिण एवेयमाशङ्का तदैवमभिप्रायो वर्णनीयः । यत्रायं पुरुषो म्रियते इत्याद्यार्त्तभागप्रश्नोऽयमविद्वद्विषय

---

* प्रत्यक्षमिव भावाभावयोर्नियमादित्यधिकं १ पु० ।
† ( ) एतन्मध्यस्थो ग्रन्थो नोपलभ्यते ५ पु० ।
‡ व्या० सू० अ २ पा० ४ सू० १४ । § व्या० सू० अ० ३ पा० १ सू० १ ।
|| अत्र पञ्चमं संसारव्यपदेशाधिकरणं पूर्णम् ।

एव उत्तरसन्दर्भे यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन् केशा: अप्सु लोहितं च रेतश्च धीयते क्वायं तदा पुरुषो भवतीत्यार्तभागप्रश्ने याज्ञवल्क्येनार्तभागेन च रहसि संमन्त्रणेन पुण्यपापरूपं कर्म तदाश्रयत्वेन निश्चितमिति प्रतिपादनात् । तत्र हि श्रूयते तौ होत्क्रम्य मन्त्रयां चक्राते तौ ह यदूचतुः कर्म हैव तदूचतुः । अथ यत्प्रशशंसतुः कर्म हैव तत्प्रशशंसतुः । पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति । तस्मादार्तभागप्रश्नेऽपि शरीरादुत्क्रान्तिर्न्न प्रतिषिध्यते । अविदुषस्तदवश्यंभावात् किं तु शरीरादेवेति* ।

५३५ । ९ **मृत्युमृत्योः परदेवतायाः प्रस्तुतत्वादिति ।** ननु तत्राग्निर्वै मृत्युः सोऽपामन्नमिति तदनन्तरवाक्ये सर्वदाहको ऽग्निर्मृत्युः तदुपशान्तिकारणान्यापो मृत्युमृत्युरिति श्रुत्यैव विवरणं कृतम् अत स्तत्र न परा देवता प्रकृतेति चेद् उच्यते । इन्द्रियतद्विषयेषु भूतग्रहवद् गृहीत्वा संसारिणां बन्धकत्वतदुत्कर्षाभ्यां ग्रहातिग्रहशब्दितेषु याज्ञवल्क्येन वर्णितेषु पुनरार्तभागस्य यः प्रश्नः यदिदं सर्वं मृत्योरन्नं का स्वित्सा देवता यस्या मृत्युरन्नमिति न तस्याग्निविनाशिका आपो विषयः पूर्वप्रश्नप्रस्तुतानुबन्धेनोत्तरोत्तरप्रश्नप्रवृत्तेः प्रकरणे दर्शनात् किं तु सर्वमिदं जीवजातं ग्रहातिग्रहलक्षणस्य मृत्योरन्नं भवति तस्य मृत्युभूता देवता कतमेति संसारबन्धोच्छेदिका देवता प्रश्नस्य विषयः सा मृत्युर्यस्योपसेचनमिति श्रुत्यन्तरप्रसिद्धा परदेवतेत्युत्तरमभिप्रेत्य मृत्योरपि मृत्युसद्भावसंभावनार्थम् अग्निर्वै मृत्युः सोऽपामन्नमिति दृष्टान्तः प्रदर्शितः । तस्माद्विद्वद्विषयमेव पूर्ववाक्यमिति तदनुसारेणोत्तरवाक्यमपि विदुष एवोत्क्रान्तिप्रतिषेधकम् । न च यत्रास्य पुरुषस्येति तदनन्तरवाक्यस्याविद्वद्विषयत्वाद् अस्यापि तद्विषयत्वं शङ्कनीयम् । अविद्वद्विषयस्य प्रसञ्जकान्तरेण प्राप्तेः । तथा हि । विदुषः प्राणानामनुत्क्रमणे तेषामत्रैव विलये च वर्णिते विदुषः प्राणा एव विलीयन्ते उत तत्प्रयोजककर्मापीति भावेन यत्रायं पुरुषो म्रियते किमेनं न जहातीति पृष्टे नामेत्याहेतीति नाममात्रमवशिष्यते तत्प्रयोजककर्मापि विली-

* शरीरादेवेतीत्येतदग्रे उदस्मात् प्राणा इत्यधिकं ५ पु० ।

यते अन्यथा मोक्षानुपपत्तेरित्युत्तरमुक्तमिति श्रुत्या प्रदर्शितं तत्प्रसङ्गात्तत्प्रयोजकमेव किं तत्र हि कालस्वभावनियतियदृच्छादिविषयो महान्विवादोऽस्तीत्यभिप्रायेण यत्रास्य पुरुषस्येत्यादिः क्वायं तदा पुरुषो भवतीत्यन्तः प्रश्नः बहुविवादविषयस्य महाजनसमक्षं निर्णयो मा भूदिति रहसि तदुत्तरकथनं च अतो नोत्तरप्रश्नस्याविद्वद्विषयतामात्रेणास्य प्रश्नस्योपक्रमावगतं विद्वद्विषयत्वमपैतीति विद्वद्विषयमेवोत्क्रान्तिप्रतिषेधवाक्यम् । नन्वस्त्वेवं तथापि न तस्मात्प्राणा उत्क्रामन्तीति वाक्यइवोदस्मात्प्राणाः क्रामन्तीति वाक्ये ऽपि विद्वज्जीवापादानकस्यैवोत्क्रमणस्य प्रतिषेधः न तच्छरीरापादानकस्य यत्रायं पुरुषो म्रियतइत्यत्रायं पुरुष इत्यस्य अपपुनर्मृत्युं जयतीति पूर्ववाक्यान्तप्रस्तुतविद्वज्जीवविषयत्वात् तदनुसारेणास्मात्प्राणा इति वाक्ये ऽपि अस्मादित्यस्य तद्विषयत्वात्तच्छरीरविषयतायान्तदभेदोपचारकल्पनापत्तेः । ननूत्क्रान्त्यभावे मृतो न स्यादिति शङ्कानिवारणार्थं मृतचिह्नप्रदर्शनेन मृतत्वोपपादनाय प्रवृत्ते स उच्छ्वयतीति समनन्तरवाक्ये दृतिवद्वायुना पूरणमुच्छ्वयनं च शरीरधर्मः कीर्त्यतइति चेद् भवतु तावता तत्र स इत्यस्य शरीरभेदोपचारः शरीरे न त्वग्रिमानुपपत्तिपरिहारार्थं प्रथममेव तथोपचारः कल्पनीयः । उच्यते । यद्युदस्मादित्यादिवाक्यस्य जीवान्नोत्क्रामन्ति प्राणा जीवं विहाय तेन सहैव गच्छन्तीत्यर्थः कल्प्यते तदा किमेनं (न जहतीत्यग्रिमप्रश्नोप्यनुपपन्नः स्यात् प्राणा विद्वांसं जहतीत्यर्थाङ्गीकारे किमन)* न जहतीति प्रश्न उपपद्यते अतो ऽग्रिमप्रश्नस्याप्युपपत्त्यर्थम् अस्मादित्यस्य शरीरसंबन्धेन शरीरे लक्षणा कल्पयितुमुचिता न तु समुच्छ्वयतीत्यत्र स इत्यस्य । एवं च तदानीमसता शरीरसंबन्धेन सन्निकृष्टां लक्षणां परिगृह्य तदानीमसता तेन विप्रकृष्टा लक्षणा च परित्यक्ता भवति । किं च यत्र शरीरे स्थितो ऽयं पुरुषो म्रियते अस्मादित्येवं यच्छब्दनिर्दिष्टशरीरप्रत्यवमर्शकत्वकल्पनायाम् अस्मादित्यस्य शरीरे मुख्यवृत्तिरपि लभ्यते तस्मादार्तभागप्रश्नो विदुषः प्राणोत्क्रान्तिप्रतिषेधार्थं इति तत्सास्याद् न तस्मादिति वाक्यान्तरस्यापि तादर्थ्यमङ्गीकर्तव्यमिति युक्तमेव । तदेतत्सर्वमभिप्रेत्योक्तम् उत्क्रान्त्यवधेरुच्छ्वयनादिनिर्देशस्यान्यथाने-

* ( ) एतन्मध्यगो ग्रन्थो नास्ति ५ पु० ।

तुमशक्यत्वादिति । **अपि च द्वयेनेति ।** नन्वाद्येनापिचेति ग्रन्थेन पूर्वपक्षे प्रसक्तप्रतिषेधतोक्ता सा न युक्ता तस्य तावदेव चिरमिति देहान्तएव ब्रह्मप्राप्तिप्रतिपादिकया श्रुत्या प्रसक्तिसम्भवादिति चेद् न । तया हि जीवं विहाय जीवादूर्ध्वगमनरूपोत्क्रान्तिर्न प्रसज्यते किं तु प्रविलयेन जीवप्रहाणमेव । अतो ऽप्रसक्तप्रतिषेधत्वापत्तिदूषणमपि युक्तमेव * ॥

५३५ । १८ **तानि परे तथा ह्याह ॥ १५ ॥**

प्रतिष्ठाविलयनश्रुती इति स्थाने प्रतिष्ठयोरवान्तरप्रकृतिमाह प्रकृत्योर्लिङ्गशरीरविलयनश्रुती इति क्व चित्पाठः । तचाप्यर्थतो न भेदः । यथेमा नद्यः स्यन्दमानाः समुद्रायणाः प्राप्यास्तं गच्छन्तीति दृष्टान्तवाक्यार्थानुत्क्रमणपूर्वकम् एवंशब्दार्थमाह **यथा नद्य इति । शक्यात्मके अपि भिद्येते इति ।** नामरूपविलयमात्रस्य नदीसमुद्रदृष्टान्तवाक्यार्थानुमतिपूर्वका†स्तगमनोक्त्या नामरूपविलयसिद्धेर्भिद्येते इत्यादिवाक्यं तयोर्निरवशेषलयप्रतिपादनार्थमिति भावः । भिद्येते इत्यादिश्रुतिवाक्यमविभागो वचनादित्युत्तराधिकरणे भाष्यकारैर्लिखितम् इह तद्व्याख्यानग्रन्थः काकपदव्यत्यासाद् भ्रान्त्या प्रमादेन वा लेखकैर्लिखितः । यद्वा अस्तं गच्छन्तीत्यन्तश्रुतिवाक्यस्यात्र व्याख्येयत्वाद् भिद्येते इत्यादिवाक्यस्य श्रुतिपाठे तदनन्तरवाक्यत्वादग्रिमाधिकरणोदाहृतमपि तद्वाक्यं पूर्ववाक्येनैकवाक्यताप्रदर्शनार्थमिहैव व्याख्यातम् ‡ ॥

५३६ । ८ **अविभागो वचनात् ॥ १६ ॥**

श्रुतिविरोधेनेति । सति श्रुतिविरोधे लयत्वे हेतुना सावशेषत्वानुमानं नोत्तिष्ठति । न चास्तं गच्छन्तीति श्रुतिवाक्यमपि सावशेषलयपरं स्यादिति वाच्यम् । भिद्येते इत्यादिवाक्यशेषेणाशत्यवशेषशङ्कानिरासादिति भावः § ॥

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगतानुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १७ ॥ ५३६ । १०

* अत्र षष्ठं प्रतिषेधाधिकरणं पूर्णम् ।

† दृष्टान्तपूर्वकेति पाठः ५ पु. ।

‡ अत्र सप्तमं वागादिलयाधिकरणं पूर्णम् ।

§ अत्र अष्टमम् अविभागाधिकरणं पूर्णम् ।

कथं तया ब्रह्मलोकप्राप्तिरिति । यद्यप्यर्चिर्लोकमारभ्याऽऽतिवाहिकाः सन्ति तथापि तावत्पर्यन्तमपि मूर्धन्यनाडी न व्याप्नोतीति भावः । **आसु नाडीषु सृप्ता इति श्रुतिसिद्धत्वादिति ।** यद्यप्यासु नाडीषु सृप्ता इत्यादिश्रुतिर्महापथस्य ग्रामद्वयसंबन्धवदादित्यरश्मीनां हृदयनाडीभिर्मण्डलेन च संबन्धमात्रं वदति न तु ब्रह्मनाड्या मण्डलानुप्रवेशं तथापि ब्रह्मनाड्या स्वानुप्रविष्टरश्मिद्वारा मण्डलसंबन्ध एव टीकायां मण्डलानुप्रवेशो विवक्षित इति तात्पर्य्यम् । **विष्वङ् नानागतय इति ।** अन्या हृदयस्य नाड्यस्तिर्यङ्मुखत्वाधोमुखत्वादिप्रकारेण नानागतयः सत्यः उत्क्रमणकार्यमात्रे प्रभवन्ति नामृतत्वफले उपयुज्यन्तइत्यर्थः । अनेन चक्षुष्टो वा मूर्ध्नो वेत्यादिश्रुत्या निष्क्रमणे हृदयनाडीनामनियमेन द्वारत्वप्राप्तावमृतत्वफलभोगार्थनिष्क्रमणे ब्रह्मनाडीतदितरनिष्क्रमणे नाड्यन्तराणि च श्रुत्या नियम्यन्तइति दर्शितं भवति । नाड्यन्तराणि तत्तत्कर्मफलभोगार्थत्वे भारतादिषु नियमितानि द्रष्टव्यानि । नाडीनां दुर्विवेचत्वेपि जीवस्य तत्तन्नाडीविशेषाननुप्रविश्य निष्क्रमणं विद्याकर्मसामर्थ्याद्यधीनम् इह प्रकृतोपयोगाद् विद्यासामर्थ्यादिमात्रं सूत्रे दर्शितम् । तत्र हार्दानुगृहीत इति हृद्यभिव्यक्तेन स्वोपासितेन परमेश्वरेणानुगृहीत इत्येतत्परं टीकायां विशिष्य हार्दविद्याग्रहणं विद्यान्तराणामप्युपलक्षणम् * ॥

रश्म्यनुसारी ॥ १८ ॥ ५३६ । १९

ग्रीष्मे दिवा सौरातपौष्ण्यप्रकर्षाद्रात्रावूष्मदर्शनेन सूर्यरश्मीनामेव स ऊष्मेत्यवसीयतइति भावः । **अम्मयेति ।** चन्द्रमण्डलस्य जलमयत्वं सलिलमये शशिनि रवेर्दीधितयो मूर्च्छिताः प्रतिफलन्तीत्यादिज्योतिःशास्त्रवचनसिद्धम् । यदि विद्याफलं नियतमेतैरेव रश्मिभिरिति श्रुतिप्राप्तो रश्मिनियमस्त्यक्तव्यः । न च रश्मिनियम आद्रियते विद्याफलनियमस्त्यक्तव्यः रात्रिमरणे विद्याफलप्रापकरश्म्यभावात् । अथ नियमद्वयमप्याद्रियते तदा रात्रौ मृतस्याहरागमप्रतीक्षणात् स यावत् क्षिप्येदिति त्वरावचनपरित्यागः रात्रावेव देहनाड्या ऽनुप्रविष्टरश्मिद्वारा विद्याफलप्राप्तिर्न सम्भवतीति रश्मिविद्याफल-

---

* अत्र नवमं तदोकोऽधिकरणं पूर्णम् ।

नियमयोरन्यतरपरित्याग इत्येषा सर्वापि शङ्का रात्रौ रश्मिसद्भावसमर्थनेन निरस्ता * ॥

५३१ । ५ **अतश्चायने ऽपि दक्षिणे ॥ २० ॥**

द्वितीयाबहुवचनमिति । याह्यतेर्द्विकर्मकत्वादिति भावः । **ज्योतिरादित्यदेवतेति ।** श्रुतावहरादिभ्यः पश्चादादित्यदेवता तदनुसारेण स्मृतौ पाठक्रमो नादर्तव्य इति भावः । **निर्गुणेति ।** निर्गुणः सत्त्वरजस्तमोरहितः पुरुषः सांख्योक्तपुरुषः तस्य प्राकृताद् बुद्ध्यादेर्यो विवेकः सांख्योक्तः यश्च योगश्चित्तवृत्तिनिरोध इति योगशास्त्रोक्तो योगः तद्विषयत्वेनेत्यर्थः † ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजि-
श्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ वेदान्तकल्पतरु-
परिमले चतुर्थस्याध्यायस्य द्वितीयः पादः ॥

---

* अत्र दशमं रश्म्यधिकरणं पूर्णम् ।

† अत्र एकादशं दक्षिणायनाधिकरणं पूर्णम् ।

अथ चतुर्थाध्यायस्य तृतीयः पादः ।

अर्चिरादिना तत्प्रथितेः ॥ १ ॥ ५३८ । १

भिन्नप्रकरणस्थत्वादिति श्लोकप्रतीकमुपादाय व्याचष्टे **मार्गा अर्चिरादय इति** । आद्यहेतुमेकविद्याविषयत्वेन योजयति **कुतः यत्र विद्यैक्ये ऽपीति** । द्वितीयादिहेतून्विद्याभेदविषयत्वेन योजयति **विद्याहेतुभेदे त्वित्यति** । त्वरां विवृणोति । **स यावत् क्षिप्येदिति** । **गुणानां प्रधानेन समुच्चयोपपत्तेरिति** । गुणानुरोधेन प्रधानभेदकल्पना न युक्तेति भावः । **अपिशब्दो न सङ्गच्छेतेति** । अपिशब्दस्य युक्त्यन्तरत्वद्योतकत्वादिति भावः * ॥

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥ ५३९ । ८

पाठक्रमाऽक्रमाभ्यामिति । ननु पाठक्रमश्रुतिक्रमाभ्यामिति वक्तव्यं तेनेति तृतीयाश्रुतेः पौर्वापर्य्यगर्भकरणत्ववाचिन्याः पौर्वापर्यरूपे क्रमे ऽपि श्रुतत्वात् तथैव सिद्धान्ते वक्ष्यमाणत्वादिति चेत् सत्यम् । सिद्धान्ते ऽर्थक्रमं वदतामन्येषां व्याख्यातॄणामेवं भावः । तेन स ऊर्ध्वमाक्रमत इत्यत्र ऊर्ध्वादित्यलोकशब्दयोर्विशेषणविशेष्यभावेनैकार्थत्वं न वक्तव्यम् । वाय्वादित्यलोकयोर्मध्ये गन्तव्यान्तरालदेशसत्त्वेन ऊर्ध्वशब्दस्य तद्विषयत्वसम्भवात् । किं चातिवाहिकदेवतानामातिवाहिकदेवतान्तरयुक्तलोकान्तरपर्यन्तनेतृत्वस्य वक्तव्यत्वाद्वायुदत्तच्छिद्रस्योर्ध्वक्रमणत्वोक्त्या तदनन्तरप्राप्त्या ऽऽदित्यलोकगमनं प्रत्यपि करणत्वमर्थात्सिध्यति । अतः सिद्धान्ते आर्थ एव क्रमो न श्रौत इति अर्चिरात्मकाग्न्याद्यानन्तर्यप्रत्यभिज्ञानादिति शङ्कान्तरप्राप्तो वायुरर्चिरादिमार्गे क्व चिदवश्यनिवेशनीयः सन् शाखान्तरश्रुतस्वस्थानरूपाग्न्यनन्तरदेशप्रत्यभिज्ञानात् तत्रैव निवेशनीय इति भावः । **नन्वादित्यप्राप्तेरिति** । तेनेत्यस्यादित्यप्राप्त्याकाङ्क्षाभावे ऽप्यादित्यप्राप्तस्तेनेत्येतदाकाङ्क्षा ऽस्ति वाय्वादिक्रमार्थे वायुदत्तावकाशच्छिद्रं विना ऽऽदित्यप्राप्ते-

---

* अत्र प्रथमम् अर्चिराद्यधिकरणं पूर्णम् ।

५३९ । २५ रनुपपत्तेः अतस्तदाकाङ्क्षया ऽनुषङ्गः स्यादित्यर्थः । **ऊर्ध्वदेशप्राप्तेर्जा-**
तत्वादिति । छिद्रेण वायुव्यवधानं प्रतिबन्धकमपनीयोर्ध्वदेशप्राप्तेः संपा-
दितत्वादित्यादित्यप्राप्तिरपि छिद्रकृतोर्ध्वदेशप्राप्त्या निराकाङ्क्षेत्यर्थः । **वरु-**
णलोकादावित्यर्थ इति । अनेन क्व चिदवश्यं निवेशनीयो वायुः कौषी-
तकिशाखानुसारेणार्चिरनन्तरं द्वितीयपर्वतया किमिति निवेश्यते यदा वै
पुरुषो ऽस्माल्लोकात्प्रैति स वायुमागच्छतीति बृहदारण्यकश्रुत्यनुसारेण प्रथ-
मपर्वतया ऽर्चिषः पूर्वं वा किमिति न निवेश्यते इति शङ्का निवारिता ।
कौषीतकिशाखा हि वरुणेन्द्रादिषु बहुषु क्लृप्तक्रमा न तूदाहृतबृहदारण्यकश्रुति-
रिति भावः । **ऊर्ध्वादित्यलोकशब्दयोरिति** । सम्पिण्डितत्वयामस्य स्वत
ऊर्ध्वदेशोत्क्रमणासम्भवादातिवाहिकाधीनं तद्विवक्षितमिति वक्तव्यं तत्र
चातिवाहिकत्वेनार्थप्राप्ता वायुलोकाभिमानिनी देवता लोकान्तरप्राप्तिपर्यन्त-
मातिवाहिकी न तु किंचिन्मात्रपर्यन्तमित्यूर्ध्वदेशस्य लोकविशेषरूपतया
विशेषणापेक्षा ऽस्तीति भावः । **तेनोर्ध्वं* आक्रमते स आदित्यमागच्छ-**
तीत्यानन्तर्यायेति† । यद्यपि देवलोकादादित्यमित्यादित्यस्य देवलोका-
नन्तर्य्यमपि श्रुतं तथापि मासेभ्यो देवलोकमिति श्रुतमाससामीप्यानुग्रहाय
संवत्सरानन्तरमेव निविष्टे देवलोके वायुलोकादित्ययोर्मध्ये निविशतइति
वाय्वादित्ययोर्नैरन्तर्य्यं लभ्यतइति भावः । **एतस्योपरि देवलोकाद्वा-**
युमिति पठितव्यमिति । एतस्य संवत्सरादित्यस्योपरि देवलोकमिति पठि-
त्वा देवलोकाद्वायुलोकमिति पठितव्यमित्यर्थः । ननु वाचकमेवेति न युक्तं वायु-
शब्दस्य लक्षणीये देवलोके शक्त्यभावादित्याशङ्क्य व्याचष्टे **बोधकमेवेत्यर्थ**
इति । **कथं तर्हि भाष्यइति** । यदि सूत्रे वायुशब्दो देवलोकोपलक्षक इति
संवत्सरदेवलोकवाय्वादित्यानां क्रमः सूत्रकाराभिमतः तदा कथं भाष्ये सौत्रस्य
वायुशब्दस्य वायुपरत्वमेवाङ्गीकृत्य वायोः संवत्सरात्परत्वमादित्यादर्वाक्त्वं च
सूत्रकारोक्ततया ऽनूदितमित्यर्थः । **छान्दोग्यपाठमात्रापेक्षयेति** । छान्दो-
ग्यपाठमात्रमपेक्ष्य सूत्रं प्रवृत्तमित्यभिप्रेत्य भाष्ये तथोक्तम् । यदि वाजसनेयक-
प्राप्तो देवलोको ऽपि सूत्रार्थत्वेन नीयते वायुशब्दस्य तदा देवलोके वा देव-
५४० । १९ लोकव्यवहितवायौ वा लक्षणा ऽङ्गीकार्येति भावः । **प्रजापतिर्विराडिति** ।

* स ऊर्ध्वमिति मूले पाठः । † आगच्छतीत्यादित्यानन्तर्यायेति मूले पाठः ।

समष्टिस्थूलाभिमानी विराट् समष्टिसूक्ष्मशरीराभिमानी हिरण्यगर्भ इति भेदः । **शुक्लपक्षात्सकाशादिति ।** आपूर्यमाणपक्षादिति पञ्चम्या यथाश्रुतार्थमादायावधिपरतयेदं व्याख्यातम् । अर्चिष इत्याद्याः सर्वाः पञ्चम्यस्तृतीयार्थ इति आतिवाहिकाधिकरणे स्थास्यति । आदित्य इति श्रुत्यपेक्षिताध्याहारः * ॥

तडितो ऽधिवरुणः सम्बन्धात् ॥ ३ ॥ ५४० । २१

तेनादित्यमिति श्रुतिविरोधादिति । तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छतीति श्रुतिविरोधादित्यर्थः । **अतो नामीषां मार्गे निवेश इति ।** यथा तेन स ऊर्ध्वमित्यादिश्रुतिविरोधाद्वायोरनन्तरं न निवेशः एवमर्चिषो ऽहरित्यादिश्रुतिविरोधादन्यत्रापि न निवेशः अमानवपुरुषावरोधात् । आतिवाहकान्तरसद्भावे विद्युतो ऽनन्तरमेवामानवपुरुषस्यातिवाहिकत्वोक्त्ययोगात् । तस्माद्वरुणादीनामर्चिरहरादिमार्गे निवेशनासंभवात् कौषीतकिशाखोक्तं मार्गान्तरमिति प्रथमाधिकरणाक्षेपः । मार्गैक्यनियमेना ऽयं यदा वै पुरुषमित्यादिबृहदारण्यकश्रुत्युक्तमपि मार्गान्तरं वक्तुं शक्यम् अतस्तत्र श्रुतो वायु†र्देवलोकादादित्यमिति श्रौतक्रमविरोधेन तयोर्मध्ये न निवेशनीय इति समनन्तराधिकरणस्याप्याक्षेपः । **प्रधानशब्दगृहीतादिति ।** कल्प्यस्य प्रकृतिवच्छब्दस्य प्रधानविशेषणत्वेन तदन्तर्भूतत्वादिति भावः । अन्ते तु बादरायण इति न्यायवत् पाठक्रमो ऽपि दृष्टान्तदार्ष्टान्तिकयोस्तुल्यः दृष्टान्ते नारिष्टहोमग्राहकप्रधानवाक्यपाठानन्तरमुपहोमवाक्यपाठः दार्ष्टान्तिके वरुणानन्तरमिन्द्रप्रजापतिपाठ इति । यद्यपि वरुणमारभ्यान्ते तु बादरायण इति न्यायो वक्तुं शक्यः तथापि वरुणस्य तडित्संबन्धो ऽप्यधिको ऽस्तीति तदुपन्यासः । विद्युदनन्तरं वरुणादीनां सत्त्वे ऽप्यमानवपुरुषस्यातिवाहिकत्वोक्तेरभिप्रायं सूत्रकार एवानन्तराधिकरणे वक्ष्यति‡ ॥

आतिवाहिकस्तल्लिङ्गात् ॥ ४ ॥ ५४१ । १

अवधिष्विति । पूर्वपूर्वसीमावधिषु स्थित्वा स्वसीमामतिक्रम्य सीमान्तरं ये प्रापयन्ति ते आवधिका आतिवाहिकाश्च । **अमूर्तेति ।** अमूर्ताः परिच्छिन्नपरिमाणरहिता आत्माकाशादयः तद्वृत्तयो बुद्धिशब्दादयः तद्वृत्ति-

---

* अत्र द्वितीयं वाय्वधिकरणं पूर्णम् ।

† श्रौतवायुरिति ५ पु॰ पा॰ ।

‡ अत्र तृतीयं तडिदधिकरणं पूर्णम् ।

रवान्तरजातिर्गुणत्वं तदाधारेषु रूपादिषु गुणशब्दः पारिभाषिक इत्यर्थः । अमूर्तवृत्तिविशेषणाभावे द्रव्यत्वकर्मत्वरूपावान्तरजातिमतोर्द्रव्यकर्मणोरतिव्याप्तिः । अवान्तरविशेषणाभावे ऽमूर्तवृत्तिसत्ताजातिमतोस्तयोरेवातिव्याप्तिः । अत उभयमुपात्तम् । **न च वैशेषिकेति** । नन्वयमनुक्तोपालम्भः । न हि शाब्दिका वैशेषिकपरिभाषितं गुणं विभाषा गुणे ऽस्त्रियां वेतो गुणवचनादित्यादिसूत्रेषु गुणशब्दार्थं वदन्ति किन्तु जाड्यमौढ्यपाटवमार्दवादिकं द्रव्योपसर्जनमित्याशङ्क्यार्चिरादेरपि तदविशिष्टमित्याशङ्क्य प्रधानान् प्रतीति । ननु द्रव्योपसर्जनमात्रं शाब्दिकानां न गुणत्वं तस्य भोक्तृपसर्जनत्वे ऽपि गुणग्रहणस्य धनेन कुलमित्यादीनां प्रत्युदाहृतत्वात् किं तु द्रव्यधर्मविशेषरूपं द्रव्योपसर्जनम् । अतो ऽर्चिरादिषु न हेतुपञ्चम्युपपद्यते । अर्चिरादीनां नेतव्यजीवधर्मत्वाभावात् किं तु पितृयाणे धूमादीनामप्युक्तन्यायेनातिवाहिकत्वं वाच्यम् । संपिण्डितकरणग्रामाणां स्वतो गमनासम्भवात् तत्र रात्रिशब्दे हेतुपञ्चमीति कथमपि वक्तुं न शक्यते । अस्त्रियामिति पर्युदासादिति चेद्यत्ययो बहुलमिति च्छान्दसेन विभक्तिव्यत्ययेन तृतीयार्थे पञ्चम्यस्तु* ॥

५४२ । १७ **कार्यं बादरिरस्य गत्युपपत्तेः ॥ ७ ॥**

न चैतदित्यादिग्रन्थेनोद्भाव्य निराकरणीयाम् अवयवसंयोगेनान्यथासिद्धाववयविसंयोगप्रत्याख्यानशङ्कां विवृणोति **शाखामृगोवयवीति** । नन्वस्त्ववयविनः संयोगः अवयवे वा ऽवयवान्तरावच्छिन्नत्वेनाप्राप्तः शाखामृगेण प्राप्यते अवयवविशेषो वा । पूर्वमप्राप्तः प्राप्यतइति चेत् । एवं तर्हि ब्रह्मापि प्रदेशविशेषावच्छिन्नं तत्प्रदेशविशेषो वा मुच्यमानेन प्राप्यते प्रागप्राप्तत्वादिति तुल्यम् ।

ननु तर्हीति । अवयविसंयोगोपलक्षितइति भ्रान्त्या शङ्का । **काल्पनिकविभागमपेक्ष्येति** । अवयवभेदेनापि वास्तवोवयविभेदो वक्तुं न शक्यते न चावयविनि भेदाभावे तस्यैव प्राप्तिश्च समर्थयितुं शक्यते । अतो भेदस्याविद्याकल्पितत्वं काल्पनिकशब्देनोक्तम् । **यथा ऽश्वमेधादीनीति** । अश्वमेधपर्यन्तान्यदृष्टार्थानि कर्माणि क्रियातत्फलादिस्वरूपसद्भावश्रद्धाही-

---

* अत्र चतुर्थम् आतिवाहिकाधिकरणं पूर्णम् ।

नस्य ब्रह्मविदो न फलन्तीत्यश्रद्दधस्य कृतं दत्तमित्यादिस्मृतिमुदाहृत्योक्तम् प्रथमसूत्रे तदर्चिरादिगतिचिन्तनेऽपि तुल्यम् अदृष्टार्थत्वाविशेषात् पुनः केन विशेषेणादृष्टार्थकर्मान्तरव्यावृत्तेनार्चिरादिगतिचिन्तनस्य वासनामात्रेण प्रवृत्तिमवलम्ब्य फलपर्यवसानमाशङ्क्यतइत्यर्थः । अतश्च वासनावशात् प्रवृत्तं लौकिकं किं चित्फलतु मा वा वैदिकं तु किमपि न फलत्येवेति भावः । टीकायां का कथेत्येतत्कैमुतिकन्यायप्रदर्शनार्थं न भवति प्रकृतार्थे तदनन्वयात् किं त्वितरापेक्षया ऽर्चिरादिगतिचिन्तनस्य को विशेषः येनेतरेषामफलत्वे ऽप्येतत्फलवत्स्यादित्येतद्दर्शयितुं कानि तान्यफलानीतराणीत्याकाङ्क्षायामाचार्यैरश्वमेधादीनि तानीत्युदाहृतानि ।

अनेनाहृत्येति । नान्यः पन्था इत्यत्र पन्था इत्ययं शब्दो ऽणुः पन्था ५४३ । २५
इत्यादिश्रुत्यन्तरेषु पन्था इति श्रवणाद् ब्रह्मप्राप्तिसाधनत्वेनार्चिरादिमार्गो विवक्षित इति भ्रममपनेतुमेवेति भावः । नन्वणुः पन्था विततः पुराणो मां स्पृष्टो ऽनुवित्तो मयैव तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ता इति * पथ इव ऊर्ध्वदेशवर्त्तिस्वर्गलोकप्राप्तिसाधनत्वं श्रूयतइति चेत् तर्हि इतस्तृतीयलोकरूपस्वर्गलोकप्राप्तिरेव ब्रह्मविद उक्ता स्याद् न तु ब्रह्मलोकप्राप्तिः । स्वर्गशब्दस्य ब्रह्मलोके लक्षणा ऽऽश्रीयतइति चेत् किमर्थं लक्षणा ऽऽश्रयितव्या यन्न दुःखेन संभिन्नमिति श्रुत्यनुशिष्टो निरतिशयानन्द इह स्वर्गशब्दार्थोऽस्तु ततश्च निरतिशयानन्दप्रकाशरूपं ब्रह्मैव स्वर्गलोकशब्देन प्राप्यमुक्तं भवति । स्वर्गकामो यजेतेत्यादावपि ब्रह्मानन्द एव स्वर्गशब्दार्थः स्यादिति चेद् अस्तु को दोषः । अन्तःकरणशुद्धिद्वारा कर्मणामपि ब्रह्मप्राप्तिसाधनत्वसंभवात् । यः कामयेत सर्वमिदं भवेयमित्यादिब्रह्मप्राप्तिरूपकर्मफलश्रवणानामेवोपपादनीयत्वात् । दर्शपूर्णमासादिष्वपि दिवि ज्योतिरजरमारभेतामित्यादिमन्त्रलिङ्गैः ब्रह्मप्राप्तिफलावगमाच्च । उक्तं च वार्त्तिके ।

स्वर्गोऽयमेव प्रागुक्तः स्वर्गकामवचस्यपि ।
कर्मभिस्तदसिद्धेर्हि वेदान्तज्ञानमिष्यते ॥

यद्वा निरतिशयब्रह्मानन्दवाचकस्य स्वर्गशब्दस्य स्वर्गकामादिवाक्येनेकमन्त्रलिङ्गाद्यवगतनाकपृष्ठभोग्यसुखविशेषे लक्षणास्तु तत्प्रशंसार्थं तत्र

* इति मन्त्रे इति १ पु॰ पा॰ ।

तस्य लक्षणोपपत्तेः । चन्दनं स्वर्गः सूक्ष्माणि वासांसि स्वर्ग इति सुखसाधनेऽपि प्रशंसार्थं तत्प्रयोगदर्शनात् । ऐहिकसुखापेक्षया नाकलोकभोग्यसुखे नितान्तोत्कर्षसत्त्वेन निरतिशयसुखवाचिना तत्प्रशंसौचित्याच्च । इह तु संकोचे कारणाभावाद् मोक्षप्रकरणाच्च परमानन्द एव स्वर्गशब्दार्थो ग्राह्यः न तु कर्मवाक्येष्विव परिच्छिन्नो लक्षणीयः । तदप्युक्तं वार्त्तिके ।

परमानन्द एवातः स्वर्गशब्देन गृह्यते ।

मोक्षप्रकरणान्नित्यः क्रियार्थो ऽतो न गृह्यते ॥ इति ।

एवं च मन्त्रस्यायमर्थः । अणुः सूक्ष्मः दुर्विज्ञानः विततो विस्तीर्णः विस्पष्टतरणहेतुः पन्था ज्ञानरूपब्रह्मप्राप्त्युपायः पुराणश्चिरन्तनः श्रुतिसिद्धः मां स्पृष्टः मां स्पृष्टवान् मया स्पृष्ट इति वा मया लब्ध इति यावत् । मयानुवित्तः फलपर्य्यवसायिनीं परिपाकदशामानीतः मयेति शब्दो मन्त्रदृष्टृऋषिपरामर्शी । तेन धीराः प्रज्ञावन्तः अन्ये ऽपि ब्रह्मविदः इतः शरीरपातादूर्ध्वं स्वर्गलोकमपियन्तीति ।

५४४ । १ **ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुतिसामर्थ्यैरिति ।** यद्यप्युत्क्रान्तिप्रतिषेधश्रुतिरपि टीकायां ब्रह्मशब्दलक्षणाहेतुत्वेन विवक्षितेति वक्तुं शक्यं तथाप्युत्क्रान्तिप्रतिषेधतो गत्यभावसिद्धिः प्रतिषेधादिति चेदित्यधिकरणेन लब्धेति ब्रह्म वेदेत्यादिश्रुतिसामर्थ्यमात्रमेतदधिकरणप्रदर्शनीयमिति तदुपादानम् । फलान्तरवत्त्वे काम्यत्वप्रसङ्गादिति । यदि प्राधान्येन नित्यनैमित्तिकानां फलान्तराभावे ऽप्यन्वाधानप्रस्तरयागादीनाम् अङ्गानां करणमन्त्रप्रकाश्यं वर्च्चःपुष्ट्यायुःप्रजादिकमानुषङ्गिकं फलमस्तीति तदभिप्रायेण भाष्यकारैरापस्तम्बस्मृतिरुदाहृतेत्युच्येत तदा तेषां न काम्यत्वप्रसङ्गो नाप्यनुनिष्पादिफलानुत्पत्तिरिति द्रष्टव्यम् । भावस्य विनाशप्रसङ्गादित्येतत्सोपपत्तिकं व्याचष्टे **स्वरूपाभाव इति ।** आत्मस्वरूपभूतयोः कर्तृत्वभोक्तृत्वयोर्नाशे आत्मस्वरूपमेव नश्येदित्यर्थः । **विकल्पमकृत्वेति ।** स्वभावास्वभावविकल्पमकृत्वा यथाश्रुतशङ्कां परिगृह्य दूषणं वक्तीत्यर्थः । **कल्पकालस्थायित्वादिति ।** नित्यस्य तु शक्तिमतः कदा चन शक्तिराविर्भवेदिति भावः । न च कार्ये प्रतिपत्त्यभिसंधि*रिति सूत्रं गतेः कार्यविषयत्वशङ्कानिराकरणार्थम् । अतस्तत्सूत्र-

* व्या· सू· अ· ४ पा· ३ सू· १४ ।

व्याख्यानारम्भभाष्ये पूर्वोक्तस्वतन्त्रयुक्तिभिः समुच्चयार्थो ऽपिशब्दो नोपपद्यत-इति शङ्कायां तदुपपादनार्थो न च कार्यमिति सूत्रमित्यादिः प्राचीनोपपत्तीना-माहेत्यन्तो ग्रन्थः । पूर्वं भाष्यगतशब्दव्याख्यानावसरालाभादिह तत्सूत्रभा-ष्योदाहृताया यशोऽहं भवामीत्यादिश्रुतेर्व्याख्यानावसरे तदुपपादनमनेन ग्रन्थेन कृतम् । तत्रोपपत्तीनामिति बहुवचनेन मुख्यत्वं तयोर्ध्वमायन्निति दर्शनं सो ऽध्वनः पारमाप्नोतीति दर्शनं च संगृहीतम् । आहेत्यस्यापि न च शब्द-निर्देश इति कर्त्रा ऽन्वयः । **यशःप्रकाश आत्मेति** । यशो नामकपरब्र-ह्मप्रकाशरूपो ब्राह्मणादीनां य आत्मा स भवामीत्यर्थः * ॥

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा दोषात्तत्क्रतुश्च ॥ १५ ॥ ५४६ । १६

ये चामी इत्यस्य सामान्यविषयत्वादिति । यद्यप्यस्य सामा-न्यविषयत्वे ऽपि ये चामी तेर्चिषमिति यत्तच्छब्दयोः प्रतीकोपासकविषयत्वं वक्तुं शक्यं पितृयाणतृतीयस्थानरहितानां तेषामर्चिरादिगत्यवश्यंभावात् तेषा-मपि ब्रह्मस्पृगुपासनाकर्तृत्वेन सत्यमुपासतइति शब्दविषयत्वोपपत्तेश्च । अङ्गावबद्धोपासनानां कासां चिद्ब्रह्मस्पृक्त्वे ऽप्युद्गातृकर्तृकासु सुत्यासु फलभाजो यजमानस्य स्वतन्त्रकर्तृत्वाभावेन सत्यमुपासतइत्येतत्तेषामपि परामर्शकं स्यादित्यतिप्रसङ्गाभावात्तस्यौत्सर्गिकस्वतन्त्रकर्तृमात्रविषयत्वे संभवति स्वत-न्त्रप्रयोजकसाधारण्यकल्पनायोगात् । तथापि स एतानित्यत्र तच्छब्दस्य प्रतीकोपासकाऽविषयत्वं वक्तुं शक्यं तदभिप्रायो सामान्यवचनस्य प्रतीको-पासकातिरिक्तविषयत्वोक्तिर्भविष्यति । ये चामी इत्यस्य सामान्यविषयत्वा-दिति ग्रन्थे येचामीग्रहणं प्रदेशोपलक्षकं सत् स एतानित्येतत्परं भवि-ष्यति । एवं च प्रतीकोपासकानामर्चिरादिमार्गेण विद्युल्लोकपर्यन्ता गतिः समाना । अमानवपुरुषस्तु तान्नयतीति शेषः । अत एवाप्रतीकालम्बनान्न-यतीति सूत्रे नयनविशेष उक्तो नार्चिरादिगतौ । भाष्ये यद् अनियमन्या-यस्य प्रतीकोपासनातिरिक्तविषयत्वमुक्तं तदपि ब्रह्मप्राप्त्यंशविषयमात्रविषयं नार्चिरादिगतिविषयमपि । अनियमाधिकरणएव भाष्यकारैरर्चिरादिगतेः सर्व-

* अत्र पञ्चमं कार्याधिकरणं पूर्णम् ।

विद्यासाधारण्यसमर्थनार्थम् । अथ य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकमिति च मार्गद्वयभ्रष्टानां कष्टामधोगतिं गमयन्ति देवयानपितृयाणयोरेव एतानुद्भावयन्ति तत्रापि विद्याविशेषादेषां देवयानप्रतिपत्तिरिति प्रदर्शितस्य प्रतीकोपासनासाधारण्याद् देवयानपितृयाणयोर्मध्ये विद्यारूपाद्विशेषाद्देवयानप्राप्तिरिति । प्रदर्शितो हि न्यायस्तास्वपि तुल्य एव । शास्त्रदर्पणे त्वाचार्य्यैः स एतानित्यस्य प्रतीकोपासकाविषयत्वे न्यायान्तरमुक्तं प्रतीकभाजां तु ये चामी रण्ये इत्यनेन पञ्चाग्निविद्भिः सम्मार्गे समुच्चये ऽप्यप्राधान्यात् स एतानित्येतच्छब्देन परामर्शाद् न ब्रह्मप्राप्तिः एतच्छब्दस्य प्राधान्येन प्रकृतपरामर्शित्वात् पञ्चाग्निविदामेव प्रकरणवत्त्वेन तथाभावादिति । इदमपि युक्तमेव । तद्यइत्थं विदुः ये चामी इति यच्छब्दद्वयनिर्दिष्टानां पञ्चाग्निविदां ब्रह्मोपासकानां च तत्प्रतिनिर्देशकेन तच्छब्देन परामर्शे ऽपि स एतानित्येतच्छब्देन प्रकरणानुरोधात् पञ्चाग्निविदामेव परामर्श इत्युपपत्तेः । न हि प्रकरणाम्नातस्य क्व चित्केन चिद्धेतुना प्रकृताप्रकृतसाधारण्यं जातमित्येतावता ऽन्यस्यापि प्रकरणाम्नातस्य तदुभयसाधारण्यनियमो ऽस्ति ज्योतिष्टोमप्रकरणाम्नातस्य उपांशु यजुषेति यजुर्वेदविहितकर्माङ्गस्वरविशेषविधानस्य याजुर्वेदिकसकलकर्मसाधारण्ये ऽपि दीक्षणीयाप्रभृत्यङ्गविधानस्य ज्योतिष्टोममात्रसाधारण्यवदुपपत्तेः । अहंग्रहोपासकानां ब्रह्मप्राप्तेस्तत्क्रतुन्यायत एव सिद्धा स एतानिति वचनानपेक्षणात् । तदपेक्षणेप्येष देवपथो ब्रह्मपथ इत्युपकोसलविद्यागतवाक्येन तत्सिद्धेश्च । सर्वथापि प्रतीकोपासकानामर्चिरादिमार्गात् पर्युदासः किं तु ब्रह्मप्राप्तेरेवेति सिद्धम् * ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ वेदान्तकल्पतरुपरिमले चतुर्थस्याध्यायस्य तृतीयः पादः ॥

---

* अत्र षष्ठम् अप्रतीकालम्बनाधिकरणं पूर्णम् ।

अथ चतुर्थाध्यायस्य चतुर्थः पादः ।

संपद्याविर्भावः स्वेन शब्दात् ॥ १ ॥ ५४८ । ६

आद्ये पादइति । निर्गुणविद्याफलैकदेशरूपा बन्धनिवृत्तिराद्ये पादे प्राधान्येन निरूपिता । भोगेन त्वितरे इति सूत्रेण तच्छेषतया तदधिगम इत्यादिसूत्रैः पुण्यपापक्षयश्चिन्तित इति भावः । **एवकारश्चावधारणइति** । मूलपाठं दृष्ट्वेदं व्याख्यातम् । एवकारश्चैवार्थे नावधारणइति पाठस्तु स्पष्टार्थः । **श्लोकगतं वाक्यादिति हेतुं व्याचष्टे इति** । एतद्व्याख्यानं सर्वमपि ज्योतिर्दर्शनादित्यधिकरणएव विवृतम् * ॥

अविभागेन दृष्टत्वात् ॥ ४ ॥ ५४९ । १९

योगानामिवेति । योगशास्त्रविदां हैरण्यगर्भाणामीश्वराद्भेदेनैव मुक्तस्य स्वरूपेणावस्थितिरिति तन्मतं दृष्टान्तीकृतम् । **तत्त्वमस्यादिवाक्यादिति** । तत्त्वमस्यादिवाक्यं मुक्तिसाधनज्ञानोत्पत्त्यर्थं तत्र पर्य्येतीत्यादि फलवाक्यम् । एवं च साधनवाक्यात् फलवाक्यस्य प्रधानविषयत्वेन प्राबल्यात् तदनुसारेण मुक्ताभेदेनैवावतिष्ठते तत्त्वमस्यादिवाक्यं त्वौपचारिकाभेदपरम् अभेददृष्टिपरं वा । अभेददृष्टावपि भेदेनानवस्थानमहंग्रहोपासनेष्विवेति पूर्वः पक्षः । **तत्राभिनिष्पन्नेति** । तथैव तत्त्वमस्यादिवाक्यानुगुणफलश्रवणात् तदनुरोधेन स तत्र पर्य्येतीत्यादिसगुणविद्यायामुक्तः सृष्टव्यं कर्तृकर्मभावनिर्देशश्च गौणो नेतव्य इति सिद्धान्तः † ॥

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥ ५५० । ७

अनेकाकारतेति श्लोके यदेकताहतेरिति विपक्षबाधकं तद्धर्मिणोऽनेकाकाररूपत्वमिति धर्मपरिशेषपक्षे अनेकाकाराणामेकधर्म्मिरूपत्वमिति धर्मिपरिशेषपक्षे त्वनेकताहतेरिति विपक्षबाधकं द्रष्टव्यमिति योजयति **एकस्यानेकाकारत्वं वदन् प्रसृत्य इत्यादिना** । श्लोकस्योत्तरार्धमवता-

* अत्र प्रथमम् संपद्याविर्भावाधिकरणं पूर्णम् ।

† अत्र द्वितीयम् अविभागेन दृष्टत्वाधिकरणं पूर्णम् ।

रयति **अथात्मन इति । सत्यद्वैताविघातकत्वमिति ।** भावाद्वैताविघातकत्वमित्यर्थः । अभावरूपा धर्मा वस्तुतः सन्ति चेत् ते भावा द्वैतं न निघ्नन्तीति वक्तुं शक्यं न तु ते वस्तुतः सन्ति प्रतियोगिनां काल्पनिकत्वेन तदधीननिरूपणानां तेषामपि काल्पनिकत्वावश्यम्भावादिति परिहारार्थः । **धर्माणां तुच्छत्वाभ्युपगमप्रयुक्तं न मृष्यतइति ।** गताः कलाः पञ्चदश प्रतिष्ठाः षोडशकलाः पुरुषायणा इति श्रुत्योरिति सर्वेश्वरत्वादिगुणकत्वचिन्मात्ररूपत्वश्रुत्योरपि व्यावहारिकपारमार्थिकदृष्टिभ्यामविरोधे संभवति कस्याश्चन श्रुतेर्निरालम्बनत्वकल्पना न युक्ता । मुक्तस्यायुक्तरूपप्रतिबिम्बप्रतियोगिकबिम्बरूपपरमेश्वरभावापत्तिश्चावर्ज्जनीया तद्भावापत्तौ च मुक्तौ तदीयगुणाविर्भावो ऽप्यनिवार्य्यः । न चैतावता मुक्तस्य चिन्मात्ररूपत्वहानिः । परमेश्वरस्येव तद्भावापन्नस्य तस्यापि वस्तुतश्चिन्मात्ररूपत्वोपपत्तेरिति भावः * ॥

५५१ । १८ **संकल्पादेव च† तच्छ्रुतेः ॥ ८ ॥**

प्रयत्नादिसापेक्षसंकल्पजन्या इति । आदिशब्देन चेष्टाग्रहणं चेष्टाजन्यत्वमपि साध्यत्वमिति समीहितसाध्यलाभार्थं प्रयत्नादिजन्या इत्येव साध्यं सङ्कल्पजन्यत्वं तु सिद्धान्तिनो ऽपि समानं न साध्ये निवेशनीयं प्रयत्ने चादृष्टाद्वारकत्वं विशेषणं तेनोपासनाकालकर्तव्यासनबन्धाद्युपयोगिप्रयत्नजन्यत्वेनार्थान्तरम् । **भोगसाधनत्वादिति ।** ननु सकलभोक्तृभोगसाधनेषु परमेश्वरेण प्रयत्नं विना सृज्येषु महाभूतेषु व्यभिचारः । न च भोगेष्वसृष्टिसङ्कल्पयितृगतत्वं विशेषणं परमेश्वरस्यापि भूतभौतिकसाध्यभोगसद्भावस्य भोगमात्रसाम्यलिङ्गाच्चेति सूत्रे वक्ष्यमाणत्वादिति चेद् न । तत्तेजोऽसृजतेत्याद्याख्यातोक्तेन तदात्मनः स्वयमकुरुतेत्यादिधातूक्तेन च परमेश्वरेण यत्नेन साध्यत्वस्य तेजःप्रभृतिष्वपि सत्त्वात् । न चैवं योगिसङ्कल्पजन्यपित्रादिष्वपि परमेश्वरप्रयत्नजन्यत्वेनार्थान्तरं यस्य यद्भोगः साधनं तत्प्रयत्नजन्यत्वस्य साध्यत्वात् । न चैवं सति पश्वादिभोगसाधनेष्वाटविकतृणादिषु व्यभिचारः । साध्यादुत्कृष्टस्य संकल्पजत्वस्य हेतौ निवेशनात् ।

---

* अत्र तृतीयम् ब्राह्माधिकरणं पूर्णम् । † एव त्विति पाठान्तरम् ।

न चैवं सति तावन्मात्रमेव हेतुः स्यादिति वाच्यम् । मनोरथसृष्टस्त्रियां व्यभिचारवारणाय भोगसाधनत्वस्यापि वक्तव्यत्वात् । **सत्ताप्रयुक्तेति** । **यद्यपि कानि चित् पदपदार्थानवगममात्रइति** । आवापोद्वापाभ्यामस्य पदस्यायमर्थ इति शक्तिग्रहणानुमानापेक्षा न तु श्रुतिवाक्यार्थबोधे संकल्पजपित्रादिपक्षकानुमाने त्वनुमित्युत्पादनायास्ति पक्षसिद्ध्यर्थं श्रुत्यपेक्षा अतः श्रुत्यैवानुमानं साध्यमित्यर्थः । **अगस्त्यकृतसमुद्रपानवदिति** । यद्यपि समुद्रपानं तन्मुखसंयोजननिगरणप्रयत्नजन्यमिति वक्तुं शक्यं तथापि समुद्रस्य यः सकृदेव पयःपानयोग्यतापादको ऽल्पीभावः अनल्पस्य वा मुखे कुक्षौ च मानं तदेव योगसामर्थ्यसृष्टमिह दृष्टान्तः* ॥

अभावं बादरिराह ह्येवम् ॥ १० ॥ ५५२ । १४

न च मनः परैर्दृश्यतइति । परे दृष्ट्वा खलु संवदेयुः मनोमात्रं परैर्द्रष्टुं शक्यमिति तत्संवादपर्यन्तः पुष्कलो भोगो न सिध्येदित्यर्थः । न च स्थूलदेहरहितस्य स्वकर्तृकत्वाभिवदनमपि न स्यादिति वक्तुं शक्ये कथं तद्दर्शनसाध्यपरकर्तृकाभिवदनमात्रासंभव उक्त इति शङ्कनीयम् । पर्यङ्कविद्यायामर्चिरादिमार्गेण गच्छतः स्थूलदेहरहितस्यापि चन्द्रेण सह संवादस्य श्रुतस्य सूक्ष्मदेहमात्रेण कथं चिदुपपादनीयो यथा तद्वदस्याप्युपपादयितुं शक्यत्वात् । न च परकर्तृकाभिवदनमपि चन्द्राभिवदनवदुपपादयितुं शक्यमिति वाच्यम् । आतिवाहिकदेवतारूपस्य चन्द्रस्येव संकल्पसृष्टपित्रादीनां मनोमात्रावशिष्टविषयदर्शनानुपपत्तेः । **दृष्टान्तं विभजतइति** । द्वादशाहस्य सत्रत्वमासनोपायिचोदनेन यजमानबहुत्वेन च सत्रशब्दाभिसंयोगाद्† यजतिचोदनादहीनत्वं स्वामिनां चास्थितपरिमाणत्वा‡दिति जैमिनिसूत्राभ्यां सत्राहीनलक्षणोक्तिपूर्वकं तदुभयलक्षणयोगाद् द्विविधो द्वादशाह इत्युक्तं तद्दृष्टान्तं विभजतइत्यर्थः ।

आसनोपयिभ्यां§ **चोदनइति** । उपपूर्वादिण् गताविति धातोर्धा- ५५३ । १२
तुनिर्देशार्थे इक्प्रत्यये इणो यणिति धात्विकारस्य यकारादेशे च सति उपयीति रूपेण भाव्यम् । उपेयीति रूपं तु यकारादेशस्थाने इयङादेशे सति भवति न तु स युज्यते । यक्प्रत्ययस्य क्तित्वाद्गुणनिषेधे सति प्राप्तस्य तस्यै-

---

* अत्र चतुर्थं संकल्पाधिकरणं पूर्णम् । † जै॰ सू॰ अ॰ १० पा॰ ६ सू॰ ५८ ।
‡ जै॰ सू॰ अ॰ १० पा॰ ६ सू॰ ६० । § आसनोपायिभ्यामिति क॰ पु॰ पाठः ।

वापवादार्थमिणो यणिति विधानात् । तस्मादुपयीत्येव पाठः । यदि त्वच क्वचिदपवादविषये ऽप्युत्सर्गो ऽभिनिविशतइति परिभाषा समाश्रीयते तदा उपेयीत्यपि पाठः साधुः । उपायीति पाठस्तु मीमांसकग्रन्थेषु* प्रायिकः स तूक्तधातोर्धात्वर्थनिर्देशार्थे औणादिके उकारप्रत्यये सार्वधातुकार्धधातुकलक्षणे धात्विकारस्य गुणे अयादेशे पूर्वसवर्णदीर्घे च सति साधुः । **आसनोपायिचोदनयोरन्यतरत्वं सत्रलक्षणमिति ।** आसनचोदनावत्त्वं षडहेनोपासीतेत्यहीनगतषडहे श्रवणात् तच्चातिव्याप्तमिति शङ्कायामासिचोदनायामनुपसृष्टत्वं विशेषणं देयम् । टीकायामुपायिचोदनएवोदाहरणद्वयमुक्तम् आसिचोदनं स्वयमुदाहरति **सप्तदशावरा इति ।**

५५३ । १७ **नियतकर्तृकत्वमहीनलक्षणमुक्तमिति ।** मीमांसाभाष्ये त्वहीनद्वादशाहस्य एको द्वौ बहवो वा कर्तार इत्यनियतसंख्यकर्तृकत्वं सत्रद्वादशाहस्य बहव एव कर्तार इति नियतसंख्यकर्तृकत्वं चोक्तम् । अहीनानां हि यजतिचोदनेन विधानं द्विरात्रेण यजेतेत्येवमादिना सत्राणां तु नियतं परिमाणं बहव एवेति । एवं च मीमांसाभाष्यकारमते अस्थितपरिमाणत्वादिति सोत्रपदविभागः । अव्यवस्थितपरिमाणत्वादित्यर्थः । टीकाकारमते त्वास्थितपरिमाणत्वादिति नियतपरिमाणत्वादित्यर्थः । अहीनद्वादशाहस्यैक एव कर्तेति नियता कर्तृसंख्या सत्रस्य तु सप्तदशावराश्चतुर्विंशतिपरमा इत्यनियता कर्तृसंख्येति । मतद्वयमपि शाखाभेदाश्रयणेन समाधेयम् । तत्राहीनद्वादशाहस्यानियतसंख्ययजमानत्वमुक्तमापस्तम्बसूत्रे । एको द्वादशाहेन यजेत षड् द्वादश त्रयोदश वेति । बोधायनसूत्रे त्वेक एव यजमान इति नियतसंख्ययजमानत्वमुक्तं द्वादशाहेन यक्ष्यमाणो भवत्येको वा बहवो वा यद्येको दक्षिणावता यजेतेति । दक्षिणावता अहीनेन । अत एव केशवस्वामी द्वादशाहो द्विविधः अहीनः सत्रं च यद्येको दीक्षते अहीनः यदि बहवो दीक्षन्ते सत्रमिति । मीमांसाभाष्यकारमते बहुत्वनियतकर्तृकत्वं सत्रस्य तन्नियमरहितकर्तृकत्वमहीनस्य च लक्षणान्तरं द्रष्टव्यम् ।

,, । २१ **शरीराभावकालइति ।** जागरव्यावहारिकशरीराभावकालइत्यर्थः । स्वप्नदृष्टान्तबलेन दृश्यानां पित्रादीनामिव द्रष्टुरुपासकस्यापि वासना-

* मीमांसाग्रन्थेष्विति १.पु. पा. ।

मयप्रातिभासिकशरीरसिद्धेः । **जागरवत्स्थूल इति ।** अतिस्पष्ट इत्यर्थः । नातिस्पष्टो हि स्वाप्नप्रतिभासः* ॥

प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥ ५५४ । १

सगुणविदात्मनोपि विद्यासामर्थ्याद् व्याप्तिः संभवतीति । ननु तस्य स्वरूपेण विद्योपहितरूपेणाविद्योपहितरूपेण वा व्याप्तिराजानसिद्धा न योगप्रभावमपेक्षते अन्तःकरणोपहितरूपेण चेत्सा कथमन्तःकरणाद्बहिर्भवेत् । उपाधिविकासमन्तरेणोपहितविकासायोगादुपाधेरन्तःकरणस्यापि विकासे जीवव्याप्तेरन्तःकरणाद्बहिष्ट्वोक्त्ययोगाद् अन्तःकरणान्तरसृष्टिवैयर्थ्यप्रसङ्गाच्चेति चेदुच्यते । विद्यासामर्थ्यात्सेन्द्रियान्तःकरणेषु शरीरान्तरेषु सृष्टेष्वविद्योपहितस्य सगुणविद्यात्मनस्तत्तदन्तःकरणेषु या ऽभिव्यक्तिस्तदभिप्रायो ऽत्र व्याप्तिशब्दः । अयमर्थो नैजादन्तःकरणादित्याद्यग्रिमग्रन्थेन स्पष्टीभविष्यति । तत्र निजं सहजमेव नैजं स्वार्थे तद्धितः । सहजं निजमाजानमिति नैघण्टुकाः । यत्र च युक्तं च तद्विभाविति श्लोकभागे विभुशब्दस्य नानादेशवर्तिष्वन्तःकरणेषु युगपदभिव्यक्तिसिद्ध्यर्थम् अविद्योपहितरूपेण व्याप्तिमत्त्वं युगपत्तावदन्तःकरणाधिष्ठानसिद्ध्यर्थं तदुपयोगिविद्यासामर्थ्यरूपं च वैभवमर्थ इत्युक्तं भवति । न चैक्याभावे भेदादिति न हेतुः साध्याविशेषादित्याशङ्क्य व्याचष्टे **भेदप्रतीतेरित्यर्थ इति ।** न तत्तद्भिन्नतैलवर्तिवर्तिनीनामिति नञा सहितं पाठमाश्रित्य निषेध्यस्यैकस्यैकस्यानुषङ्गं कृत्वा भेदावित्यस्य भेदप्रतीतेरित्यर्थ इत्युक्तः । टीकायां नञा रहितोपि पाठो दृश्यते तत्र नानुषङ्गादिक्लेशः । **एकाभिप्रायेति ।** परस्पराविरोध्यभिप्रायवत्त्वमित्यर्थः । संपन्नः केवलो मुक्त इत्यादिटीकाग्रन्थस्यार्थमाह **यो मुक्तः स ब्रह्मसंपन्न इत्युच्यतइत्यादिना** † ॥

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ १७ ॥ ५५५ । २६

टीकायां यथा सविकारे ब्रह्मण्युपास्यमाने वस्तुनः स्थितमपि तस्य निर्विकारं रूपं न प्राप्यते तत्कस्य हेतोः अतत्क्रतुत्वादुपासकस्येति ग्रन्थानन्तरं तत्त्वोपासनासु हि पुरुषक्रतुत्वमिति वाक्यमाचार्यैर्दृष्टमस्ति तदवतार्य व्याख्यायते **यथा सगुणब्रह्मणि स्थितमपी**त्यादिना **निर्गुणचिन्तकत्व**मित्यन्तेन । टीकायां पर्यायेण सृष्टिसंहारौ स्यातामित्येतदनन्तरपठितं न चेति

---

* अत्र पञ्चमम् अभावाधिकरणं पूर्णम् । † अत्र षष्ठं प्रदीपाधिकरणं पूर्णम् ।

वाक्यं तद्धेतुवाक्यं च सानुषङ्गं सोपपत्तिकं व्याचष्टे **यदीति** । अथ न वा सृष्टिसंहारौ द्वावपि स्यातामित्यनेन न चेत्यस्य पूर्ववाक्यान्निषेध्यानुषङ्गेणार्थ उक्तः । तच न चेति वाक्यार्थे द्वावपि न स्यातामित्यस्मिन् टीकोक्तो हेतुरुभयोः सृष्टिसंहर्त्रोरीश्वरत्वविघातादित्यनेनानूदितः । ईश्वरत्वविघाते उपपत्तिरिच्छाप्रतिहतिर्यदि सिसृक्षासंजिहीर्षयोः सत्योरपि सृष्टिसमये संहारः स्यादित्यनेन दर्शिता । एतदुपलक्षणं किंचिदिच्छाधीनसंहारसमये ऽन्येच्छाधीनसृष्टिर्न स्यादित्यस्यापि । एवं हि द्वयोरपीश्वरत्वविघाते हेतुरिच्छाप्रतिघातो दर्शितो भवति ।

५५१ । ६ **ननु सगुणोपास्तिषु तर्हीति** । यद्यपि सत्यकामत्वादीनां निरङ्कुशत्वांशस्योपासनाविषयत्वे ऽपि न तत्क्रतुन्यायविरोधः तस्य न्यायस्योपासकलभ्यगुणमात्रविषयतया संकोचनीयत्वेन नित्यत्वादिति श्लोकोक्तन्यायैस्तदलभ्यस्य निरङ्कुशत्वांशस्य तन्न्यायविषयत्वात् । अन्यथा कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरश्च शंभुराकाशमध्य इत्यादिश्रुत्युक्तसर्वैश्वर्यादिविशिष्टोपासनायां का गतिः का च गतिः सर्वास्वप्यहंग्रहोपासनास्वभेदोल्लेखे अहंग्रहोपासकाः खल्वभेदेनोपास्याप्यविद्योपाधिनिवृत्त्यभावाद् भेदेनैवावतिष्ठन्ते तथापि तत्क्रतुन्यायः क्वचित्संकोचनीयो जात इत्येतावता सत्यकामादिष्वश्रुतं निरङ्कुशत्वमुपास्यं परिकल्प्य तत्रापि तस्य संकोचकल्पनमयुक्तम् । क्लृप्तेन हि विशेषशास्त्रेण सामान्यशास्त्रस्य संकोचो न तु कल्प्येनापीति तात्पर्य्यम् । तदिदमुक्तं **न हि निरवग्रहसत्यकामत्वादिगुणकमीश्वरमुपासीतेति श्रुतिरस्तीति** । आपो वै खलु मीयन्ते लोकोसावितीति श्रुतिवाक्यस्य टीकायाम् अप्शब्दोपलक्षितानि भूतानि लोकशब्दोपलक्षितहिरण्यगर्भबुद्ध्योपास्यन्ते इत्यर्थो दर्शितः । अयमर्थो भाष्यकाराणामिमां श्रुतिं भोगसाम्यार्थत्वेनोदाहृतवताम् आशयस्थो न भवतीति स्वयमन्यथा व्याचष्टे **तं ब्रह्मलोकगतमित्यादिना** * ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ वेदान्तकल्पतरुपरिमले चतुर्थाध्यायस्य चतुर्थः पादः ।

समाप्तश्च फलाख्यश्चतुर्थो ऽध्यायः ।

समाप्तश्चायं ग्रन्थः ॥

शुभमस्तु ।

* अत्र सप्तमं जगद्व्यापाराधिकरणं पूर्णम् ।